# भूषण-मञ्जूषा-शब्दार्थरत्नग्रन्थस्थितानां वैयाकरणसिद्धान्तानां समीक्षात्मकमालोचनम्

यादवपुरविश्वविद्यालयस्य संस्कृतसंकाये २०१७ वर्षे
**‘ पि-एइच्-डि ’** इत्युपाधिलाभाय समायोजितोऽयं शोधनिबन्धः


शोधनिबन्धकारः

**दे इत्युपनामकः पिन्टुः**

शोधविद्यार्थी संस्कृतसंकायस्य

यादवपुरविश्वविद्यालयस्य

निर्देशकाः

**अध्यापकाः ड. तपनशङ्करभट्टाचार्य्याः**

संस्कृतसंकायाध्यक्षा

यादवपुरविश्वविद्यालयस्य

# भूषण-मञ्जूषा-शब्दार्थरत्नग्रन्थस्थितानां वैयाकरणसिद्धान्तानां समीक्षात्मकमालोचनम्

यादवपुरविश्वविद्यालयस्य संस्कृतसंकाये २०१७ वर्षे
**‘ पि-एइच्-डि ’** इत्युपाधिलाभाय समायोजितोऽयं शोधनिबन्धः


शोधनिबन्धकारः

**दे इत्युपनामकः पिन्टुः**

शोधविद्यार्थी संस्कृतसंकायस्य

यादवपुरविश्वविद्यालयस्य


निर्देशकाः

**अध्यापकाः ड. तपनशङ्करभट्टाचार्य्याः**

संस्कृतसंकायाध्यक्षा

यादवपुरविश्वविद्यालयस्य

**BHŪṢAṆA-MAÑJŪṢĀ-ŚABDĀRTHARATNAGRANTHASTHITĀNĀṂ VAIYĀKARAṆASIDDḤĀNTĀNĀṂ SAMIKSĀTMAKAMĀLOCANAM**

This thesis paper is submitted for the **Ph.D** degree in the year **2017** of the Department of Sanskrit , Jadavpur University , Kolkata 700032


Prepared & Submitted By

**Pintu Dey**

Ph.D Research Scholar

Department Of Sanskrit

Jadavpur University



Supervisor :

**Professor Dr. Tapan Sankar Bhattacharyya**

Head , Department Of Sanskrit

Jadavpur University

# Certified that the Thesis entitled

**भूषण-मञ्जूषा-शब्दार्थरत्नग्रन्थस्थितानां वैयाकरणसिद्धान्तानां समीक्षात्मकमालोचनम्**

**( BHŪṢAṆA-MAÑJŪṢĀ-ŚABDĀRTHARATNAGRANTHASTHITĀNĀṂ VAIYĀKARAṆASIDDḤĀNTĀNĀṂ SAMIKSĀTMAKAMĀLOCANAM )**

Submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried out under the supervision of **Professor Dr. Tapan Sankar Bhattacharyya , Head , Department of Sanskrit , Jadavpur University , kolkata – 700032 ,** India And that neither this thesis nor any part of it has been submitted before for any Degree or Diploma anywhere / elsewhere .

**Countersigned by Supervisor**
**Dated :**

**Signature of the Candidate**
**Dated :**
**Ph.D Research Scholar**
**Department Of Sanskrit**
**Jadavpur University**

# प्रस्तावना

व्यवहाराय मनोगतभावप्रकटनाय वा शब्दो मुख्यमवलम्बनं समेषाम् । “ **उच्चार्यमाणः शब्दः संप्रत्यायको भवति , न संप्रतीयमानः** [1]” इति “ **अणुदित्सवर्णस्य चाप्रत्ययः** [2] ” इति सूत्रभाष्योक्तेः उच्चरितादेव शब्दार्थप्रतीतिर्भवति । तेन शब्दार्थयोरस्ति कश्चन सम्बन्ध इत्यवगम्यते । शक्तिः विना न शब्दः अर्थं न बोधयति । अर्थनिरूपिता शक्तिः किं वर्णसमुदायात्मके शब्दे तिष्ठति ? उच्चरितप्रध्वंसिस्वभावाद् वर्णानां तन्न कदाप्युपपद्यते । ततो वर्णसमुदायाभावे वर्णसमुदायरूपाणां पदानां वाक्यानां वा चर्चा भवेदाकाशकुसुमसंकाशा । एवं तर्हि कीदृशः शब्दः शक्त्याश्रयः शब्दस्य किं वा स्वरूपम् ? इति प्रश्नः सर्वान् दार्शनिकान् तत्तच्छास्त्रसंस्कारसंस्कृतान् एतद्विषयकचिन्तनाय प्रवर्तयति ।

## ❖ स्फोटात्मकशब्दस्वरूपनिर्णयः

लोके ‘ **शब्द** ’ इति शब्दस्य प्रयोगो यद्यपि नदीघोषादिरूपेऽपि दृश्यते , किन्तु व्याकरणदर्शने ‘ **शब्द** ’ शब्दस्तस्य ध्वनेः पर्यायरूपेण प्रयुज्यते , यस्योच्चारणेन कस्यचिदर्थविशेषस्य प्रतीतिर्भवति । उक्तञ्च पतञ्जलिनापि – “ **अथ गौरित्यत्र कः शब्दः**[3] **? येनोच्चारितेण सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः** [4]” । “ **अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते । तद्यथा – शब्दं**

---

[1] **अणुदित्सवर्णस्य चाप्रत्यय इति सूत्रस्य महाभाष्ये ५५५ तमे पृष्ठे ।**

[2] **पाणिनीयाष्टाध्याय्यां १.१.३९ ।**

[3] **महाभाष्ये पस्पशाह्निके पृ. १० ।**

[4] **महाभाष्ये पस्पपशाह्निके पृ . १४ ।**

**कुरु , मा शब्दं कार्षीः , शब्दकार्ययं माणवक इति ध्वनिं कुवन्नेवमुच्यते । तस्माद्ध्वनिः शब्दः ”** [5]इति ।

**भाष्ये येन इति करण एषा तृतीया । येन प्रकाशितेन सास्नादिमतां ज्ञानं भवति स स्फोटः शब्दः इत्यर्थः**[6] ।

अत्रैदमाशंक्यते यत् प्रत्यायकः शब्दः वर्णसमूहरूपो भवति । अतो भाष्ये येन इति एकवचनम् अयुक्तम् । यैरुच्चारितैः सास्नालाङ्गूलककुद-खुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः इत्येवं वक्तव्यम् । यद्युच्येत वनम् इत्यत्र यथा समूहाभिप्रायेण एकवचनप्रयोगः संगतः तथैव भाष्ये समूहाभिप्रायं येनैत्यत्रैकवचनं प्रयुज्यते । तथा च येन वर्णसमूहेनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सप्रत्ययो भवति स शब्दः इत्यर्थस्वीकारे न किञ्चिद् बाधकमिति , तदपि न रमणीयम् , चिरकालस्थायी वर्णसमूहः न कथमपि निरूपयितुं शक्यते [7]। एवं विप्रतिपत्तिनिराकरणाय कैयटः अभाषि – **“ वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य ( पदस्य कल्पितत्वेन अरुचेः ) वाक्यस्य वा वाचकत्वमिच्छन्ति । वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणा-नर्थक्यप्रसङ्गात् । आनर्थक्ये तु ( अपि ) प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् , अभिव्यक्तिपक्षे तु क्रमेण एवाभिव्यक्ता समुदायाभावात् । एकस्मृत्युपारूढानां वाचकत्वे सरः रसः इत्यादौ ( वर्णानामुभयत्र अविशेषात् ) अर्थप्रतीत्यविशेष-प्रसङ्गात् तद्व्यतिरिक्तः ( वर्णव्यतिरिक्तः ) स्फोटो नादाभिव्यङ्ग्यो ( वर्णाभिव्यङ्ग्यः ) वाचकः ( एतेन ध्वनिः निरस्तः ) ”** [8] इति ।

---

[5] **महाभाष्ये पस्पपशाह्निके पृ . २८ ।**

[6] **महाभाष्ये पण्डितभार्गवशास्त्रिकृतायां प्रभाटीकायां व्याख्यानप्रसङ्गे १३ तमे पृष्ठे ।**

[7] **नागेशभट्टकृतायाम् उद्द्योतटीकायां पृ. १२ -१३ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

[8] **कैयटोपाध्यायकृतायां प्रदीपटीकायां पृ. १२ -१३ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

येन क्रमेण अनुभूताः वर्णास्तेनैव क्रमेण एकस्मृत्युपारूढानां वाचकत्वेन अर्थप्रतीत्यविशेषप्रसङ्गः नो आयाति । अन्यथा वैयाकरणमतेऽपि वर्णानां स्फोटव्यञ्जकत्वमभ्युपगमेन अर्थप्रतीत्यविशेष-प्रसङ्गरूपदोषः तेषामपि दुरुद्धर इत्याशंका[9] निराकर्तुकामेन कैयटेनोक्तं- **" विस्तरेण वाक्यपदीये ( वर्णरूपनादाभिव्यङ्ग्यः स्फोटो वाचकः ) व्यवस्थापितः "**[10] इति ।

प्रसङ्गेऽस्मिन् नागेशभट्टेनोक्तं उद्द्योते – **" एकं पदम् एकं वाक्यम्** [11]**"** इति प्रत्ययः स्फोटसत्त्वे तदैक्ये च प्रमाणम् । अनुभवक्रमेण स्मरणमित्यर्थे दृढप्रमाणाभावाच्च । क्रमेण अनुभूतानां व्युत्क्रमेणापि स्मरणदर्शनात् । यथा पटेषु नानारञ्जकद्रव्याहितनानावर्णोपरागः क्रमेण , तथा एकस्मिन् एव तस्मिन् स्फोटे उच्चारणक्रमेण क्रमवानेव तत्तद्वर्णस्वरूपानुरागः , सः स्फोटश्च स्थिरः । **श्रोत्राग्राह्यस्य तस्य च स्फोटस्य मनसा ग्रहणमिति न दोषः**[12] इति । **विद्वानन्नंभट्टोऽपि उपर्युक्तं मतमुद्योतेन**[13] इति ।

अत्रायं प्रश्नो भवितुमर्हति यद् यदि वर्णातिरिक्तः स्फोटो वाचकः तर्हि स ताल्वोष्ठपुटव्यापारविषयो भवितुं नार्हति[14] । एवं सति भाष्ये उच्चारितेन इति पदं किमाशयकम् ? अत्रायं समाधिः कैयटपादेन प्रादर्शि उच्चारितेन इत्यस्य प्रकाशितेन[15] इत्यर्थं प्रकाशयता तत्र नागेशः अभिव्यञ्जकैः इत्यध्याहृत्य

---

**[9] नागेशभट्टकृतायाम् उद्द्योतटीकायां पृ. १३ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

**[10] कैयटोपाध्यायकृतायां प्रदीपटीकायां पृ. १३ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

**[11] नागेशभट्टकृतायाम् उद्द्योतटीकायां पृ. १३ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

**[12] नागेशभट्टकृतायाम् उद्द्योतटीकायां पृ. १३ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

**[13] अन्नम्भट्टकृतायामुद्योतनटीकायां २२ तमे पृष्ठे ।**

**[14] नागेशभट्टकृतायाम् उद्द्योतटीकायां पृ. १४ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

**[15] कैयटोपाध्यायकृतायां प्रदीपटीकायां पृ. १४ , राष्ट्रीयसंस्कृतसंस्थानम् ।**

अभिव्यञ्जकैः प्रकाशितेन[16] इति कैयटाशयं प्रकाशितवान् । स्वयमप्युद्द्योते आह शरीरमारुताभिहतकण्ठादिस्थानैः अवयवद्वारा अभिव्यक्तेन येन इत्यर्थ [17]इति ।

**येनोच्चारितेन**.....इत्यादिभाष्ये प्रयुक्तः शब्दः शब्दः स्फोटपरः । अत्रेदं विचार्यते यत् स्फोटशब्दस्योल्लेखाभावात् स्फोटात्मकशब्दलक्षणपरं व्यख्यायत कथम् ? अस्य समाधानमाहुः टिप्पणीकाराः यद् – **" अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः इति उच्यते[18] "** इत्याद्युत्तरभाष्यमेवात्र मानम् । अनेन हि भाष्येण ध्वनेः शब्दत्वमुच्यते । ईदृशार्थाभावे अस्य भाष्यस्यापि स एवार्थः स्याद् इत्येतदस्य भाष्यस्य स्फोटपरत्वव्याख्याने बीजम् । अन्यथा अन्वयापत्तिः स्यादिति[19] ।

**तपरस्तत्कालस्य[20]** इति सूत्रे वर्णानां तत्तत्कालत्वस्य एवौचित्याद् इत्याशंक्य- **" एवं तर्हि स्फोटः शब्दः । ध्वनिः शब्दगुणः । कथम् ? यथा भेर्याघातः भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति , कश्चित् त्रिंशत् , कश्चिच्चत्वारिंशत् । स्फोटस्तावानेव भवति । ध्वनिकृता बृद्धिः । तथा चोक्तं -**

**" ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।**
**अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः ॥ "[21]** इति ।

इत्यनेन भाष्येण स्फोटस्य निर्देशः कृतः । अत्र प्रसङ्गे लघुमञ्जूषायामुच्यते नागेशेन **' स्फोटः शब्दः [22]'** इति प्रतीकमादाय श्रोत्रेन्द्रियग्राह्यः स्फोटनामा

---

[16] नागेशभट्टकृतायाम् उद्द्योतटीकायां पृ. १४ , राष्ट्रीयसंस्कृतसंस्थानम् ।
[17] नागेशभट्टकृतायाम् उद्द्योतटीकायां पृ. १४ , राष्ट्रीयसंस्कृतसंस्थानम् ।
[18] महाभाष्ये पस्पशाह्निके पृ.२८ ।
[19] महाभाष्ये पण्डितभार्गवशास्त्रिकृतायां प्रभाटीकायां १३ तमे पृष्ठे ।
[20] पाणिनीयाष्टाध्याय्यां १.१.३० ।
[21] तपरस्तत्कालस्य इति सूत्रे महाभाष्ये ५६३-५६४ तमे पृष्ठे ।

पदार्थः शब्दः इत्यर्थः[23] । **" ध्वनिः स्फोटश्च [24]"** इत्यंशम् उररीकृत्य आह कैयटः व्यञ्जको व्यङ्ग्यश्च इत्यर्थः । शन्ब्दानां व्यङ्गानां सम्बन्धी व्यञ्जकत्वेन यो ध्वनिः स एव महान् अल्पश्च लक्ष्यते । व्यङ्ग्यस्तु अभिन्नकाल एव[25] इत्यर्थ ।

## ❖ स्फोटनिरुक्ति

स्फोटशब्दस्य बहुधा निरुक्तिः नैकैर्वैयाकरणैः कृता अत्र प्रदर्श्यते । ताः यथा -

- स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोटशब्दोऽपादानघञन्त इति कौण्डभट्टाः [26]।
- स्फुटति बोधविषयो भवति अर्थोऽस्मादिति व्युत्पत्त्या स्फोटशब्दः अपादानघञन्त इति वैयाकरणभूषणसारस्य प्रभाटीकायाः[27] ।
- स्पुटति अभिव्यक्तीभवति अर्थोऽस्मादिति स्फोटः इति वैयाकरणभूषणसारस्य दर्पणटीकायाः[28] ।
- स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटो वाचक इति वनमालिमिश्राः [29]।

---

[22] **नागेशभट्टकृतायाम् उद्द्योतटीकायाम् ।**

[23] **वैयाकरणसिद्धान्तलघुमञ्जूषायाम् १९९ तमे पृष्ठे ।**

[24] **नागेशभट्टकृतायाम् उद्द्योतटीकायाम् ।**

[25] **तपरस्तत्कालस्य इति सूत्रे महाभाष्यप्रदीपे ५६४ तमे पृष्ठे ।**

[26] **वैयाकरणभूषणसारे स्फोटनिर्णये ४३० तमे पृष्ठे ।**

[27] **वैयाकरणभूषणसारे मङ्गलाचरणस्य प्रभाटीकायां ३ पृष्ठे ।**

[28] **वैयाकरणभूषणसारे मङ्गलाचरणस्य दर्पणटीकायां ३ पृष्ठे ।**

[29] **वनमालिमिश्रकृतवैयाकरणमतोन्मज्जनटीकायां ४५ तमे पृष्ठे ।**

- मध्यमानादवृत्त्यर्थप्रकाशप्रयोजकशक्तिमत्त्वं स्फोटत्वम् इति तत्त्वप्रकाशिकाकाराः[30] ।
- स्फुटत्यर्थोऽस्मादिति स्फोटो वाचकः इति वैयाकरणसिद्धान्तलघु-मञ्जूषाकाराः[31] ।
- स्फोटशब्दस्य च तत्तद्वर्णपदादिरूपेण ताल्वाद्याभिघाताज् ज्ञानविषयो मध्यमावस्थोऽर्थः इति लघुमञ्जूषाकाराः [32]।
- स्फुटत्यर्थोऽस्मादिति स्फोटः , स्फुट्यते यः सोऽपि स्फोट इति सभापतिशर्मोपाध्यायाः[33] ।
- स्फोटो नाम परा वाक् । सैव शब्दब्रह्म इति कृष्णमिश्राः [34]।
- स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोटो नाम पक्षभेदेन अविद्या एव ब्रह्मैव वा इति शब्दकौस्तुभकाराः श्रीभट्टोजिदीक्षिताः[35] ।
- स्फोटचन्द्रिकाकारास्तु शाब्दिकानां वाच्यलक्ष्यव्यङ्ग्यार्थ-प्रतिपादकानां वाचकलाक्षणिकव्यञ्जकानां शब्दानां तन्निष्ठजातेर्वा स्फोट इति व्यवहारः । स्फुटत्यर्थो यस्मादिति व्युत्पत्त्या पङ्कजादिपदवद् योगरूढः । केवलयोगस्वीकारे वाच्यलक्ष्यव्यङ्गानां चेष्टायाश्च व्यङ्गार्थप्रतिपादकत्वेन तत्रातिव्याप्तेः इत्याहुः[36] ।

---

[30] **परमलघुमञ्जूषायाः तत्त्वप्रकाशिकाटीकायां ३ पृष्ठे ।**

[31] **वैयाकरणसिद्धान्तमञ्जूषायां ३ पृष्ठे ।**

[32] **वैयाकरणसिद्धान्तलघुमञ्जूषायां ३४९ तमे पृष्ठे ।**

[33] **वैयाकरणसिद्धान्तलघुमञ्जूषायाः रत्नप्रभाटीकायां १९८ तमे पृष्ठे ।**

[34] **वैयाकरणभूषणसारे कृष्णमित्रकृतभूषणटीकायां ३८५ ।**

[35] **शब्दकौस्तुभे १० ।**

[36] **कृष्णभट्टमौनिकृतस्फोटचन्द्रिकायां १ पृष्ठे ।**

- न केवलं स्फुटत्यर्थोऽस्मादिति स्फोट इति प्राचोक्ता सा व्युत्पत्तिः , स्फोटो वाचकः इत्यत्र पौनरुक्त्यापत्तेः , अपि तु स्फुट्यते यः सोऽपि स्फोटः इति लघुमञ्जूषायाः कलाटीकाकाराः[37] ।
- स्फुटत्यर्थोऽस्मादिति स्फोटो वाचकः शब्दः , स च हृदयप्रदेशेऽभिव्यक्तः कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन स्वमात्रश्रव्यः प्रणवापरपर्यायिनाद-शब्दबोध्यः आन्तरो व्यञ्जकतत्तद्वर्णप्रतिविम्बयुक्तोऽभिधीयते इति भैरवमिश्राः[38] ।
- स्फुटत्यर्थोऽस्मादिति स्फोटो वाचकः आकाशवृत्तिः हृदयप्रदेशेऽभिव्यक्तः कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन उपांशुशब्दप्रयोगे च स्वमात्रश्राव्यः प्रणवापरपर्यायिनादंश आन्तरो व्यञ्जक-तत्तद्वर्णप्रतिविम्बयुतो मध्यमावस्थः शब्दः इति भावप्रकाशकाराः [39]।
- ध्वनिव्यङ्ग्यो नित्योऽर्थवाचकः शब्दः । स्फुटत्यस्मादर्थ इति विग्रहः । अकर्तरि च कारके संज्ञायाम् इत्यपादाने घञ् इति बालप्रकाशिकाकाराः[40] ।
- स्फुटत्यर्थोऽस्मादिति स्फोट इति व्युत्पत्त्या स्फोटपदस्य बोधक इत्यर्थः इति वैयकरणभूषणसारस्य सरलटीकाकाराः[41] ।

---

[37] **वैयाकरणसिद्धान्तलघुमञ्जूषायाः कलाटीकायां ३४९ तमे पृष्ठे ।**

[38] **प्रौढमनोरमायाम् अर्थवत्सूत्रे भैरवमिश्रकृतायां भैरवटीकायां ३४० तमे पृष्ठे ।**

[39] **प्रौढमनोरमायाम् अर्थवत्सूत्रे वैद्यनाथपायगुण्डविरचितभावप्रकाशटीकायां ३४० तमे पृष्ठे ।**

[40] **प्रौढमनोरमायां अर्थवत्सूत्रे बालप्रकाशिकाटीकायां १७ तमे पृष्ठे ।**

[41] **वैयाकरणभूषणसारस्य सरलाव्याख्यायां १५० तमे पृष्ठे ।**

- स्फुटयति प्रकाशयत्यर्थमिति स्फोटः इति काव्यप्रकाशस्य बालबोधिनीटीकाकाराः[42]।
- स्फुट्यते व्यज्यते वर्णैरिति स्फुटत्यर्थोऽस्मादिति वा स्फुट विकसने घञ्। शब्दव्यापारविशेष इति विश्वकोषकाराः[43]।
- वर्णातिरिक्तो वर्णाभिव्यङ्ग्योऽर्थप्रत्यायको नित्यः शब्दः स्फोटः इति सर्वदर्शनसंग्रहकाराः[44]।
- प्रत्येकवर्णेभ्योऽतिरिक्तं कलश इत्यादिरूपम् अखण्डमेकपदं स्फोट इति योगैरभ्युपगम्यते । कम्बुग्रीवाद्यावयवेभ्योऽतिरिक्तो घटाद्यवयवीव । स च शब्दविशेषः पदाख्योऽर्थस्फुटीकरणात् स्फोट इत्युच्यते इति विज्ञानभिक्षुपादाः[45]।

## ❖ शाब्दबोधः

शाब्दबोधे आकाङ्क्षाज्ञानं योग्यताज्ञानं आसत्तिज्ञानं तात्पर्यज्ञानञ्च कारणम्। तदुक्तं –

“ **आसत्तिर्योग्यताऽऽकाङ्क्षा तात्पर्यज्ञानमिष्यते**[46]” इति।

येन पदेन विना यत्पदस्य अन्वयबोधाजनकत्वं तेन पदेन सह तस्य आकाङ्क्षा , क्रियापदेन विना कारकपदं कारकपदेन विना क्रियापदञ्च अन्वयबोधं न प्रकटीकरोति । अतः क्रियापदकारकपदयोः परस्परम्

---

[42] **मम्मटकृतकाव्यप्रकाशस्य प्रथमोल्लासे बालबोधिन्याख्यटीकायां १९ तमे पृष्ठे ।**

[43] **विश्वकोषे ३०१ तमे पृष्ठे ।**

[44] **न्यायकोशे समुद्धृतं १०४३ तमे पृष्ठे।**

[45] **सांख्यदर्शने विज्ञानभिक्षुकृतसांख्यप्रवचनभाष्ये २७५ तमे पृष्ठे ।**

[46] **कारिकावल्यां शब्दखण्डे ।**

आकाङ्क्षा । आकाङ्क्षाज्ञानस्य शाब्दबोधे कारणत्वात् गोः , अश्वः , पुरुषः , हस्ती इत्यादौ आकाङ्क्षाविरहात् न शाब्दबोधः । तदुक्तं – **" गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण [47]"** इति ।

➢**अर्थाबाधो योग्यता** – ' **वह्निना सिञ्चति** ' इत्यत्र वह्निकरणकत्वस्य बाधात् योग्यताविरहात् न शाब्दबोधः । तत्र योग्यता नाम- ' **पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता** [48]' इति । पदानामविलम्बेणोच्चारणम् आसत्तिः- ' **कारणं सन्निधानन्तु पदस्यासत्तिरुच्यते** ' इति । प्रहरे प्रहरे असहोच्चारितेषु शब्देषु न शाब्दबोधः , आसत्तेरभावात् । शाब्दबोधे वक्त्रिच्छारूपतात्पर्यस्य ज्ञानमपि कारणं भवति –' **आकाङ्क्षा वक्तुरिच्छा च तात्पर्यं परिकीर्तितम्** ' इति । यथा- भोजनप्रसङ्गे ' **सैन्धवमानय** ' इत्युक्तौ सैन्धवपदेन लवणस्यैव बोधः । यात्राप्रसङ्गे ' **सैन्धवमानय** ' इत्युक्तौ घोटकपदस्य बोधो भवति ।

ननु वेदानामपौरुषेयत्वात् तत्र वक्त्रिच्छारूपतात्पर्यज्ञानं न सम्भवति , इति चेद् वेदानाम् ईश्वरकर्तृकत्वस्वीकारे तत्र ईश्वरीयतात्पर्यज्ञानम् , ईश्वरकर्तृकत्वाऽस्वीकारे तत्र तु अध्यापकस्य तात्पर्यज्ञानं कारणम् । शुकादिवाक्येषु शिक्षयितुः तात्पर्यज्ञानं कारणम् । तात्पर्यग्राहकाः तावन्मम्मटमते-

**" संयोगः विप्रयोगश्च साहचर्यं विरोधिता ।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।**

---
[47] **महाभाष्ये पस्पशाह्निके २ , पृ.६ , द , दा. आश्रम ।**
[48] **कारिकावल्यां शब्दखण्डे ।**

**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ [49]"** इति ।

पदार्थानां परस्परसंयोगस्तु आकाङ्क्षावशात् भासते । तदुक्तं व्युत्पत्तिवादे गदाधरेण – **" शाब्दबोधे चैकपदार्थेऽपरपदार्थसम्बन्धः संससर्गमर्यादया भासते [50]"** इति । पदानुपस्थितस्याप्यर्थस्य संसर्गतया भानं सम्भवत्येव ।

यथा -**" तण्डुलम् आनय "** इत्यत्र तण्डुलपदस्य तण्डुलरूपोऽर्थः , अम्-प्रत्ययस्य कर्मत्वमर्थः , तण्डुलस्य निष्ठत्वसम्बन्धेन कर्मत्वे अन्वयः । आङ्-पूर्वक –नीधातोः आनयनम् अर्थः । कर्मत्वस्य निरूपकत्वसम्बन्धेन आनयने अन्वयः । आख्यातस्य **( तिबादिप्रत्ययस्य )** कर्ता अर्थः , आनयनस्य कर्तरि अन्वयः । अत्र प्रथमादिविभक्तीनाम् अर्थाः प्रदर्श्यन्ते –

**" कर्त्ता कर्म च करणं सम्प्रदानं तथैव च ।**

**अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥[51] "** इति ।

क्रियाजनकं कारकं , यस्य क्रियानिष्पत्तौ समुपयोगो भवति तस्य कारकमिति संज्ञा । कारकप्रकरणे अनभिहिताधिकारात् अनभिहिते एव कारके कर्मादिबोधकाः द्वितीयादयो विभक्तयः भवन्ति । अभिहितेषु च कर्मादिषु ' **प्रातिपदिकार्थमात्रे** [52]' प्रथमैव विभक्ति भवति । ' **अभिधानन्तु प्रायेण तिङ्कृत्तद्धितसमासैः** [53]' भवति । यथा – ' **देवदत्तः गच्छति** ' इत्यत्र आख्यातेन देवदत्तस्य कर्त्तुरभिधानात् न तत्र तृतीया किन्तु प्रथमैव । ' **हरिः सेव्यते** ' इत्यत्र कर्माख्यातेन हरेः कर्मणः अभिधानात् हरिशब्दात् न द्वितीया किन्तु प्रथमैव ।

---

[49] **काव्यप्रकाशे मम्मटाचार्येन ।**

[50] **व्युत्पत्तिवादे गदाधरेण ग्रन्थारम्भे ।**

[51] **परमलघुमञ्जूषायां कारकनिरूपणे १४२ , पृ.२५२ , चौ. सु. प्र ।**

[52] **पाणिनीयाष्टाध्याय्याम् २.३.४६ ।**

[53] **वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे पृ. १६० ।**

कारकोपपदभेदाच्च विभक्तिः द्विविधा । तत्र क्रियासम्बन्ध-निमित्तिका विभक्तिः कारकविभक्तिः । पदान्तरसम्बन्धनिमित्तिका विभक्तिश्च उपपदविभक्तिः । तत्र ‘ **हरये नमः** ’ इत्यादिस्थलेषु नमःपदसम्बन्ध-निमित्तिका चतुर्थी । यत्र द्वयोरपि प्राप्तिः तत्र ‘ **उपपदविभक्तेः कारकविभक्तिर्बलीयसी** [54]’ इति नियमेन उपपदविभक्तिं बाधयित्वा कारकविभक्तिः भवति । यथा ‘ **नारायणं नमस्कृत्य** ’ इत्यत्र चतुर्थीं बाधयित्वा ‘ **कर्मणि द्वितीया**[55] ’ भवति ।

➢ **कर्तरि प्रथमा** - “ **कर्त्तृकरणयोस्तृतीया** [56]” इति सूत्रेण अनभिहिते कर्तरि करणे च तृतीयाविभक्तिर्भवति । यथा- ‘ **रामेण बाणेन हतो बाली** ’ इत्यत्र रामस्य कर्त्तुः बाणस्य करणस्य च अनभिहितत्वात् ताभ्यां तृतीया । रामकर्त्तृकबाणकरणक- हिंसाक्रियाविषयो बाली इत्यर्थः ।

➢ **कर्मणि द्वितीया** - अनुक्ते कर्मणि ‘ **कर्मणि द्वितीया** [57]’ इति सूत्रेण द्वितीयाविभक्तिर्भवति । यथा- ‘ **हरिं भजति** ’ , कर्म च ईप्सिततम-अनीप्सित-अकथितभेदेन त्रिविधम् । तत्र ईप्सिततमं ‘ **हरिं भजति** ’ इति प्रदर्शितमेव , अनीप्सितं द्वेष्योदासीनभेदेन द्विविधम् । द्वेष्यं यथा- ‘ **विषं भुङ्क्ते** ’ , उदासीनं यथा- ‘ **ग्रामं गच्छन् तृणं स्पृशति** ’ । अकथितम्- ‘ **अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्**[58]’ इति । एतदेव अकथितं कर्म । यथा-‘ **गां दोग्धिः पयः** ’ । गौः क्षरणे अपादानम् । तदपादानत्वमपेक्ष्य सम्बन्धित्वात्मना गोर्विवक्षायां कर्मत्वम् । एतदेव

---

[54] **परिभाषावृत्तौ सं ४८ ।**

[55] **पाणिनीयाष्टाध्याय्यां २.३.२ ।**

[56] **पाणिनीयाष्टाध्याय्यां २.३.१८ ।**

[57] **पाणिनीयाष्टाध्याय्यां २.३.२ ।**

[58] **वैयाकरणसिद्धान्तकौमुद्यां दीक्षितपादैः ३०६ तमे पृष्ठे ।**

अकथितकर्मत्वमादाय दुह्यादीनां द्विकर्मत्वव्यवहारः । **‘ हरिं भजति ’** इत्यत्र हरिनिष्ठतुष्ट्यनुकूलो देवदत्तनिष्ठो वर्तमानो व्यापारः इति बोधः ।

➢ **करणे तृतीया- ‘ हेतौ [59]’** इति सूत्रेण हेत्वर्थे तृतीया स्यात् । यथा- **‘ दण्डेन घटः ’** । द्रव्य-गुण-क्रियात्मककार्यत्रयनिरूपितं निर्व्यापारसव्यापारबृत्ति च यत् तद्धेतुत्वम् । क्रियाजनकमात्र-वृत्तिव्यापारवत्वृत्तिः च यत् तत् करणत्वम् ।

➢**सम्प्रदाने चतुर्थी – ‘ कर्मणा यमभिप्रैति स सम्प्रदानम् [60]’** इति । **‘ चतुर्थी सम्प्रदाने [61]’** इति सूत्रेण सम्प्रदानस्य चतुर्थीविभक्तिर्भवति । यथा- **‘ विप्राय गां ददाति ’** । अत्रापि अनभितस्यैव सम्प्रदानस्य चतुर्थीविभक्तिर्भवति न तु अभिहितस्य । **‘ दीयते असौ इति दानीयो विप्रः ’** इत्यत्र न चतुर्थी । **‘ विप्राय गां ददाति ’** इत्यत्र यजमानकर्तृका गोकर्मिका विप्रसम्प्रदानिका दानक्रिया , इति बोधः ।

➢**अपादाने पञ्चमी – ‘ ध्रुवमपायेऽपादानम्[62] ’** इति सूत्रेण विश्लेषे साध्ये अवधिभूतस्य कारकस्य अपादानसंज्ञा भवति । **‘ अपादाने पञ्चमी[63] ’** इति सूत्रेण पञ्चमी । यथा- **‘ ग्रामादायाति ’** इत्यत्र देवदत्तकर्त्तृका ग्रामावधिका आगमनक्रिया इति बोधः ।

➢ **सम्बन्धे षष्ठी** – षष्ठ्यर्थः सम्बन्धस्तु न कारकं । यथा- **‘ देवदत्तस्य पिता गच्छति ’** इत्यत्र देवदत्तस्य साक्षात्सम्बन्धः पित्रा सह न

---

[59] **पाणिनीयाष्टाध्याय्यां २.३.२३ ।**

[60] **पाणिनीयाष्टाध्याय्यां १.४.३१ ।**

[61] **पाणिनीयाष्टाध्याय्यां २.३.१३ ।**

[62] **पाणिनीयाष्टाध्याय्यां १.४.२३ ।**

[63] **पाणिनीयाष्टाध्याय्यां १.४.२४ ।**

तु गच्छतीति क्रियया । अतो देवदत्तस्य गमनक्रियायामनुपयोगः , तस्मात् कारकेषु ग्रहणं न सम्भवतीति ।

➢**अधिकरणे सप्तमी** – ‘ **आधारोऽधिकरणम्**[64] ’ इति सूत्रेण आधारस्य अधिकरणसंज्ञा भवति । ‘ **सप्तम्यधिकरणे च**[65] ’ इत्यनेन अधिकरणस्य सप्तमी भवति । यथा- ‘ **कटे आस्ते** ’ इत्यत्र देवदत्तकर्तृका कटाधिकरणिका आसनक्रिया इति बोधः ।

➢**सम्बोधनम्** – ‘ **सम्बोधने च**[66] ’ इति सूत्रेण सम्बोधनस्य प्रथमाविभक्तिर्भवति । सम्बोधनम्- **अभिमुखीकृतस्य ज्ञापनम्** । **‘ हे राम ’** इत्यत्र मां पाहीति शेषः । इह रामं प्रति मद्रक्षणं ज्ञाप्यम् ।

- **नैयायिकाः** – वाक्ये प्रथमान्तस्य मुख्यत्वात् प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधो भवति । यथा- **‘ देवदत्तः ग्रामं गच्छति ’** इत्यत्र ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान् एकत्वावच्छिन्नो देवदत्तः इत्याकारकं बोधं स्वीकुर्वन्ति ।

- **वैयाकरणाः** – ‘ **भावप्रधानमाख्यातम्** [67]’ इति निरुक्तकारयास्कवचनात् क्रियामुख्यविशेष्यकं बोधं स्वीकुर्वन्ति । **‘ क्रियाप्रधानं तिङन्तम् ’** इति निरुक्तवचनार्थः । अत एव **‘ पश्य मृगो धावति ’** इति वचनं संगच्छते । तत्र मृगकर्तृकं धावनकर्मकं प्रेरणाविषयीभूतं तत्कर्तृकं दर्शनम् इति बोधः ।

तत्र धावनरूपार्थवाचकस्य धावतीत्यस्य प्रातिपदिकत्वाभावात् न द्वितीया । प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधवादिनां नैयायिकानां मते तु

---

[64] **पाणिनीयाष्टाध्याय्यां २.४.४५ ।**

[65] **पाणिनीयाष्टाध्याय्यां २.३.३६ ।**

[66] **पाणिनीयाष्टाध्याय्यां २.३.४७ ।**

[67] **निरुक्ते यास्काचार्येण १.१ ।**

अन्यदेशसंयोगानुकूल-कृतिमन्मृगकर्तृकं प्रेरणविषयीभूतं यद् दर्शनं तदनुकूलकृतिमत् इति बोधः । तत्र विशेष्यार्थवाचकमृगशब्दस्य प्रातिपदिकत्वात् दृशि क्रियाकर्मकत्वाच्च द्वितीयापत्तौ ' **पश्य मृगो धावति** ' इति प्रयोगापत्तिः ।

' **सर्वं हि वाक्यं क्रियया परिसमाप्यते** [68]' इति न्यायेन यत्र क्रियापदं न दृश्यते तत्र क्रियापदाध्याहारेणैव शाब्दबोधो भवतीति ।

## ❖ शब्दशक्तिः

**" पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः ।**

**शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥[69] " इति ।**

शाब्दबोधे पदज्ञानं कारणं भवति । पदज्ञानजन्यपदार्थस्मरणं व्यापारः । शाब्दबोधः फलं भवति । पदज्ञानजन्यपदार्थस्मरणे शक्तिज्ञानं सहकारिकारणं भवति । इदं तावत् सर्वैरेव अनुभूयते यत् अपरिचितभाषायाः पदानां सत्यपि श्रवणानुभवे शाब्दबोधो न जायते । तत्र पदज्ञानस्य विद्यमानत्वेऽपि तत्पदविषयकशक्तिज्ञानस्य सहकारिकारणस्य विरहात् , पदार्थस्मरणरूप-व्यापाराभावात् शाब्दबोधात्मकं फलं नोत्पद्यते ,अतः शाब्दबोधार्थं शक्तिज्ञानम् अपेक्ष्यते ।

तत्र शक्तिः कः पदार्थः ? इति जिज्ञासायामुच्यते प्राचीननैयायिकैः ' **ईश्वरेच्छैव शक्तिः** ' नव्यनैयायिकैस्तु ' **इच्छैव शक्तिः** ' इति स्वीक्रियते । ' **अस्मात्पदादयमर्थो बोद्धव्यः वा अस्माच्छब्दादयमर्थो बोद्धव्यः**[70] ' इति अर्थविशेष्यिका पदप्रकारिका , ' **इदं पदम् इमम् अर्थं**

[68] **प्रचलितन्यायवाक्यम् ।**

[69] **कारिकावल्यां शब्दखण्डे ८१ ।**

[70] **परमलघुमञ्जूषायां शक्तिनिरूपणे पृ. २३ , चौ.सु.प्र ।**

**बोधयतु** [71]' इति पदविशेष्यिका अर्थप्रकारिका। एवं द्विविधापि ईश्वरेच्छा शक्तिपदवीम् उपयाति , न च एवंविधायाः ईश्वरेच्छायाः शक्तिरूपत्वे पित्रादिसंकेतितदेवदत्तादिनामसु तादृशेश्वरेच्छादिरूपः शक्त्यभावात् ततो बोधो नोत्पद्यते , इति वाच्यम् । ' **एकादशे वा अहनि पिता नाम कुर्यात्** [72]' इति शास्त्रवचनेन तत्रापि ईश्वरेच्छारूपशक्तेः सत्त्वात्न च ईश्वरेच्छायाः शक्तित्वे पाणिन्यादिसंकेतितनदी-वृद्ध्यादिपदेषु ईश्वरेच्छारूप-शक्तेरभावात् ततः शाब्दबोधः न स्याद् इति वाच्यम् , इष्टत्वात् , तत्र शक्तिभ्रमादेव शाब्दबोधः । एतादृशानुपपत्तिपरिहाराय नव्यनैयायिकाः केवलमिच्छारूपां शक्तिं स्वीकुर्वन्ति , तस्याः नदीवृद्ध्यादिपदेष्वपि सम्भवात् । तत्र प्रमात्मकशक्तिज्ञानादेव शाब्दबोधसम्भवे शक्तिभ्रमस्वीकारो नावश्यकः , तत्र अर्थशक्त्यनुकूलपदपदार्थसम्बन्धो बृत्तिः , इति नियमेन शक्त्यात्मकबृत्तेः सम्बन्धस्वरूपत्वं नितान्तमावश्यकम् । सम्बन्धस्तावत् सम्बन्धिभ्यां भिन्नः द्विष्ठश्च भवति । यथा घटवद् भूतलम् , इत्यत्र घटभूतलयोः संयोगः सम्बन्धः ताभ्यां भिन्नः घटभूतलोभयनिष्ठश्च भवति । सम्बन्धास्तावत् संयोग-समवाय-कालिकप्रभृतयः प्रसिद्धाः । इच्छायाः सम्बन्धत्वे मानाभावेन तस्याः पदपदार्थसम्बन्धरूपं वृत्तित्वमेव न सम्भवति। अतः ईश्वरेच्छारूपा इच्छारूपा वा शक्तिः , इति मतं न प्रमाणपदवीमधिरोहति।

वैयाकरणाः पदपदार्थयोः वाच्यवाचकभावरूपः सम्बन्धः शक्तिः , इति उररीकुर्वन्ति । पदपदार्थयोः वाच्यवाचकभावरूपसम्बन्धस्य शक्तिरूपत्व-स्वीकारे न अनुपपत्तिर्भवति। तद्यथा-

---

[71] **परमलघुमञ्जूषायां शक्तिनिरूपणे पृ. २३ , चौ.सु.प्र।**

[72] **शास्त्रवचनम्।**

**" शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतःसिद्धपदस्थवृद्धाः ॥ [73]"**

इति अभियुक्तोक्त्या व्यवहारादिभिः शक्तिग्रहो भवति । यथा- प्रयोजकप्रयोज्यवृद्धयोः ' **गामानय** ' इत्यादिशब्दव्यवहारं संपश्य समीपस्थः बालः गोपदस्य गवि शक्तिं गृह्णाति । ' **भू सत्तायाम्** [74]' ' **कर्तरि कृत्** [75]' भूधातोः सत्तारूपे अर्थे कृत्प्रत्ययस्य च कर्तरि शक्तिग्रहो भवति । ' **गोसदृशो गवयः** ' इत्यादिस्थलेषु उपमानेन गवयपदस्य गवये शक्तिग्रहस्तु सुप्रसिद्धः ।

' **यवमयः चरुर्भवति** ' इत्यत्र ' **यदा अन्या औषधयो म्लायन्ते , अथैते मोदमानास्तिष्ठन्ति** ' इति वाक्यशेषात् यवपदस्य दीर्घशूके शक्तिग्रहः । पचति इत्यत्र पाकं करोति इति विवरणात् पच्-धातोः पाके तिप्प्रत्ययस्य कर्तरि शक्तिग्रहो भवति । ' **इह सहकारतरौ मधुरं पिको रौति** ' इत्यत्र सहकारादिपदसान्निध्यात् पिकशब्दस्य कोकिले सुकरः शक्तिग्रहः ।

वैयाकरणमते सा च शक्तिः त्रिविधा- १.**योगः** २. **रूढि** ३. **योगरूढिश्चेति** । तत्र अवयवशक्तिः योगः , यथा – पाचकादिपदे पच्-धातोः पाकः अर्थः , ण्वुल्-प्रत्ययस्य च कर्ता अर्थः तेन पाचकपदं पाककर्तृरूपमर्थमभिधत्ते । समुदायशक्तिः रूढिः । यथा- गो-मण्डपादिपदे गोपदं समुदायशक्त्या सास्नादिमदर्थस्य वाचकम् । मण्डपपदञ्च जनाश्रयरूपस्य अर्थस्य वाचकम् । यत्र अवयवशक्तिविषये समुदायशक्तिरपि वर्तते तत्र योगरूढिः । यथा – पङ्कजादिपदेषु पङ्कजपदम् अवयवशक्त्या

---

[73] **न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे , पृ. २६६ ।**

[74] **धातुपाठे सं १ ।**

[75] **पाणिनीयाष्टाध्याय्यां ३.४.६७ ।**

पङ्कजनिकर्तृरूपमर्थमभिधत्ते , रूढ्या च पद्मरूपमर्थम् । तेन तत्र पङ्कजनिकर्त्रभिन्नं पद्ममिति बोधो भवति।

नैयायिकादयः – ' **गङ्गायां घोषः** ' इत्यादिस्थलेषु प्रवाहरूपशक्यार्थबाधात् गङ्गापदस्य तीरे लक्षणां मन्यन्ते । वैयाकरणास्तु लक्षणां न स्वीकुर्वन्ति। ते पदस्य प्रसिद्धशक्तिम् अप्रसिद्धशक्तिञ्च स्वीकृत्य तत्र अप्रसिद्धशक्तौ लक्षणामन्तर्भावयन्ति । इयम् अप्रसिद्धशक्तिः सहृदयवेद्यत्वात् फलविशेषे एव सम्भवति।

मीमांसकाः नैयायिकाश्च समासे लक्षणया एव बोधनिर्वाहात् समासशक्तिं गौरवात् न स्वीकुर्वन्ति। यथा- ' **राजपुरुषः** ' इति तत्पुरुषसमासे राजपदस्य राजसम्बन्धिनि लक्षणा । तस्य पुरुषपदार्थेन सह अभेदान्वये राजसम्बन्ध्यभिन्नः पुरुषः इति बोधः।

' **उपकुम्भम्** ' इत्यव्ययीभावे कुम्भपदस्य कुम्भसम्बन्धिनि लक्षणा। तस्य उपपदार्थेन समीपेन अभेदान्वयः । तेन ' **उपकुम्भमि**'त्यत्र कुम्भसम्बन्ध्यभिन्नं समीपमिति बोधः । ' **चित्रगुः**' इति बहुव्रीहौ यदि एकदेशान्वयः स्वीक्रियते तर्हि गोपदस्य गोस्वामिनि लक्षणा । गवि चित्रपदार्थस्य अभेदान्वयः। यथा- ' **चित्राभिन्नगोस्वामि** ' इति च बोधः। यदि एकदेशान्वयः न स्वीक्रियते तर्हि गोपदस्य चित्रगोस्वामिनि लक्षणा। अत्र चित्रगोपदं चित्रगोस्वामिविषयकबोधजनकं भवतु इत्याकारकवक्त्रिच्छा-रूपतात्पर्यग्राहकम्।

नैयायिकाः मीमांसकाश्च नीलोत्पलमित्यादिकर्मधारये लक्षणां न स्वीकुर्वन्ति । यत्र लक्षणां विनैव नीलपदार्थस्य नीलस्य उलपलपदार्थेन उत्पलेन अभेदान्वये शक्यैव नीलाभिन्नम् उत्पलमिति शाब्दबोधो निर्वहति। मीमांसकाः ' **धवखदिरौ** ' इत्यादिद्वन्द्वैः साहित्यलक्षणां स्वीकुर्वन्ति।

नैयायिकास्तु द्वन्द्वे लक्षणां नैवाङ्गीकुर्वन्ति । किन्तु समासे विशिष्टशक्तिरस्ति , इति वैयाकरणमतमेव समीचीनम् । समासे विशिष्टशक्त्यस्वीकारे तत्र पदानां प्रत्येकमर्थवत्त्वेऽपि समुदायस्य अर्थवत्त्वाभावात् तस्य प्रातिपदिकसंज्ञा एव न स्यात् । न च ‘ **कृत्तद्धितसमासाश्च**[76] ’ इति सूत्रेण तस्य प्रातिपदिकसंज्ञा स्यादिति शंकनीयम् । तस्य नियमार्थत्वात् । तेन नैयायिकमीमांसकमते समासस्य प्रातिपदिकत्वाभावात् ततः सुव्युत्पत्तिः नैव प्राप्नोति ।

तत्र नैयायिकाः आख्यातस्य ( **तिबादिप्रत्ययस्य** ) कृतावेव शक्तिं स्वीकुर्वन्ति । ‘ **लः कर्मणि च भावे चाकर्मकेभ्यः**[77] ’ इति सूत्रेण कर्तरि लकारस्य विधानेऽपि कृतिमतः कर्त्तुः शक्यत्वे अनेकासां कृतीनां शक्यतावच्छेदकत्वे गौरवम् । तदपेक्षया लकारस्य कृतौ जातिरूपं कृतित्वं शक्यतावच्छेकम् इति लाघवम् । किञ्च ‘ **देवदत्तः ग्रामं गच्छती**’त्यत्र प्रथमान्तदेवदत्तपदेनैव आश्रयरूपकर्त्तुर्लाभात् , तस्य अन्यलभ्यत्वात् तत्र लकारस्य शक्तिर्नोचिता । ‘ **अनन्यलभ्यो हि शब्दार्थः**[78] ’ इति न्यायात् ।

एतन्नैयायिकमतं न समञ्जसं प्रतिभाति । तत्स्वीकारे अभिहितानभिहितव्यवस्थायाः असम्भवात् विभक्तिव्यवस्था न सम्भवति । तथाहि ‘ **देवदत्तः ग्रामं गच्छती**’त्यत्र लकारस्य ( **तिबादिप्रत्ययस्य** ) कृतौ शक्तिस्वीकारे कर्त्तुरनभितत्वेन “ **कर्तृकरणयोस्तृतीया**[79] ” इति सूत्रेण देवदत्तपदात् तृतीयायाः आपत्तिः । किञ्च ‘ **लः कर्मणि च भावे**

---

[76] **पाणिनीयाष्टाध्याय्यां १.२.४६ ।**

[77] **पाणिनीयाष्टाध्याय्यां ३.४.६९ ।**

[78] **न्यायवचने ।**

[79] **पाणिनीयाष्टाध्याय्यां २.३.१८ ।**

**चाकर्मकेभ्यः**[80]' इत्यादि सूत्रे ' **कर्तरि कृत्** [81]' इति सूत्रात् कर्तरीति पदमनुवृत्तम् । नैयायिकैरपि ' **कर्तरि कृत्** [82]' इति सूत्रे कर्तरीति पदं कर्तृरूपार्थकबोधकमेव स्वीक्रियते , तस्यैव ' **लः कर्मणि च भावे चाकर्मकेभ्यः**[83] ' इत्यादिसूत्रे अनुवृत्तस्य कृतिबोधकत्वस्वीकारः ' **अर्धजरतीयं न्यायम्** ' अनुकुर्वाणः न कस्यापि सम्मतो भविष्यति ।

भिन्नेषु भिन्नेषु शब्देष्वेव भिन्नार्थस्यैव प्रातीतिर्भवति । तत्र कारणमिह शब्दशक्तेः बलवत्तात् । उपर्युक्तेषु विभक्तिषु शब्दशक्तेः प्राधान्यत्वादेव तारतम्यतां भजते । अतः शक्तेः तारतम्यत्वादेव शब्दानामर्थावबोधे भिन्नता दृश्यते । तदुक्तं –

**" न सोऽस्ति प्रत्ययो लोके लोके यः शब्दानुगमादृते ।**
**अनुबिद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ [84]" इति ।**

## ❖ शब्दार्थसम्बन्धः

वैयाकरणनिकाये शब्दः अर्थस्तथा तयोः सम्बन्धश्च नित्यतया स्वीकृतः । तथोक्तं पतञ्जलिना महाभाष्ये – ' **सिद्धे शब्दार्थसम्बन्धे** [85]' इति वार्तिकम् । एवं भर्तृहरिणापि वाक्यपदीये ब्रह्मकाण्डे शब्दार्थसम्बन्धानां नित्यत्वमुद्घोषयतागादि –

---

**[80] पाणिनीयाष्टाध्याय्यां ३.४.६९ ।**
**[81] पाणिनीयाष्टाध्याय्यां ३.४.६७ ।**
**[82] पाणिनीयाष्टाध्याय्यां ३.४.६७ ।**
**[83] पाणिनीयाष्टाध्याय्यां ३.४.६९ ।**
**[84] भर्तृहरिवाक्यपदीये १.१२३ ।**
**[85] महाभाष्यपस्पशाह्निके १४० तमे पृष्ठे ।**

**" नित्याः शब्दार्थसम्बन्धाः तत्राम्नाताः महर्षिभिः ।**

**सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रनेतृभिः ॥ [86]"** इति ।

अत एव शब्द एव नित्यः । उच्चरिते प्रध्वंसितत्वेऽपि न तस्यानित्यत्वं वाच्याकृतिनित्यत्वात् । न ह्येकत्र प्रध्वस्तशब्दः सर्वत्र उपरतो भवति इति नित्या शब्दाकृतिः । नित्यशब्द इत्यस्य नित्यशब्दाकृतिरित्यत्रैव तात्पर्यम् । एवमाकृतिपक्षाभ्युपगमे एव व्याकरणशास्त्रप्रवृत्तेः सम्भवः । व्यक्तिपक्षे तु उपसर्गशास्त्राणां प्रवृत्तिर्न सम्भवति । अत आकृतिप्रयुक्तमिदं शास्त्रम् । शब्दश्चाकृतिनित्यत्वान् नित्यः । तथा च भाष्यम् - **" आकृतिनित्यत्वान्नित्यः शब्दः [87]"** इति ।

एवं केचित्तु नित्यनिरवयवस्फोटवादिनः प्रतिवर्णं प्रतिपदं प्रतिवाक्यञ्च एक एव शब्दात्मःक्रमोत्पन्नध्वनिगतकत्वादिरूपेण क्रमोतपन्नावयवरूप-प्रतिभासो भासते । परमार्थतश्च तत्र वर्णाः पदानि न च सन्ति इति मन्यन्ते ।

केषाञ्चिन्मते पुनः व्यवहारनित्यतया शब्दाः नित्याः । केन कुत्र कदा वा शब्दानां व्यवहारः प्रारब्धः कदा वा समाप्स्यते इत्यस्यानिर्वचनीयत्वान्नित्यत्वमेव शब्दानाम् । एवमाकृतिनित्यत्वादर्था अपि नित्या एव , घटादिव्यक्तीनां नाशेऽपि तद्गतवृत्तिधर्मस्य अनोपधाद् **' यस्मिन् तत्त्वं विहन्यते तदपि नित्यम् '** इत्यभ्युपगमाद् ।

अत्रेदमवधेयं यद् घटादिरूपेण वाह्याः पदार्थाः शब्दे बोधे विषयत्वेन न गृह्यन्ते तथा सति घटपटादीनां बुद्धौ प्रवेशत्वाद् किन्तु शाब्दे बोद्ध्या एवार्थाः शब्दश्रवणसमकालं तदा बोद्ध्योपजनिताः स्युः । ते च अनादित्वादनन्तत्वाच्च नित्या एवेति बोध्यम् ।

---

[86] **भर्तृहरिवाक्यपदीये ब्रह्मकाण्डे का.२३ ।**

[87] **पतञ्जलिमहाभाष्ये ।**

एवं शब्दार्थयोः सम्बन्धोऽपि नित्य , तस्य अनादित्वाद् । वस्तुतः शब्दस्यार्थस्य च नित्यत्वे सिद्धे सम्बन्धस्य नित्यत्वं तु स्वत एव सिद्धं भवति । अयञ्च सम्बन्धः द्विविधः कार्यकारणभावरूपो योग्यतारूपश्चेति । तथाहि घटादिशब्दे उच्चारिते श्रोतृबुद्धौ कम्बुग्रीवादिमद् घटाकारः प्रत्यवयवो भासते । तत्रोच्चारितघटशब्दो घटरूपार्थस्य निमित्तं भवति । एवञ्च घट इति कम्बुग्रीवादिमत् स्वरूपेऽर्थे बोद्ध्यमाने घट इति शब्द उच्चार्यते । तत्रोच्चारितस्य घटशब्दस्य घटरूपार्थो निमित्तं भवति । एवमुभयः परस्परं कार्यकारणरूपसम्बन्धः ।

योग्यतारूपसम्बन्धस्तु शब्दार्थयोः चापरो व्यापारविशिष्टशब्दानां विशिष्टार्थबोधेन नियता योग्यता यथा इन्द्रियविशेषस्य विषयविशेषग्रहणे नियता योग्यता तथैवात्र बोध्यम् । सा च योग्यता कौण्डभट्टमते बोधजनकत्वरूपा नागेशमते तु वाच्यवाचकभावरूपशक्तिग्राहक-तादात्म्यरूपा इति ।

# प्रवृत्तिनिमित्तम्

पुरुषम् अनु पश्चात् बध्नाति स्वज्ञानेन प्रेरयतीति अनुबन्धः । अनुबन्धज्ञानाद्धि योग्याधिकारिणि ग्रन्थाधीतौ धीः प्रचोदिता भवति । अधिकारी , विषयः , सम्बन्धः , प्रयोजनं चेति अनुबन्धचतुष्टयम् । शास्त्रकृद्भिः स्वशास्त्राध्ययने अध्येतॄन् प्रवर्तयितुं स्वस्वशास्त्रादौ अनुबन्धचतुष्टयमुपनिबद्धम् ।

वेदान्तसारकृता सदानन्दयोगीन्द्रेण वेदान्तशास्त्रारम्भे अनुबन्धचतुष्टयम् उपनिबद्धम् । तत्रादौ वेदान्तशास्त्रानुगम् अधिकारिणं निर्दिशन्नाह - " **अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टय-सम्पन्नः प्रमाता** [88]" इति ।

तस्मादधिगतापातसाङ्गवेदार्थः त्यक्तयातायातसम्पादककाम्यादि-कर्मनिकरः सन्ध्यावन्दनादिनित्यादिकर्मानुष्ठानशुद्धान्तःकरणो नित्यानित्य-वस्तुविवेकादिसाधन-चतुष्टयोपेतः पुमानेव वेदान्तशास्त्रस्य योग्याधिकारी ।

जीवब्रह्मणोरैक्यं शुद्धचैतन्यं प्रमेयं विषयः यतः तत्रैव वेदान्तानां तात्पर्यम् ।

सम्बन्धस्तु जीवब्रह्मैकरूपस्य शुद्धचैतन्यरूपस्य वा प्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणञ्च बोध्यबोधकभावलक्षणः ।

---

[88] **वेदान्तदर्शने सदानन्दयोगिन्द्रेण अधिकारीनिरूपणप्रसङ्गे ग्रन्थारम्भे ।**

प्रयोजनन्तु तादृशप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च "**तरति शोकम् आत्मविद्** [89]" इत्यादिश्रुतेः "**ब्रह्म वेद ब्रह्मैव भवति**[90]" इति श्रुतेश्च ।

व्याकरणाध्ययनस्य तज्ज्ञानस्य च रक्षोहागमलघ्वसन्देहा प्रयोजनम् , इति भाष्योक्तं परमं प्रयोजनम् । तत्तु कौमुद्यादिग्रन्थाध्ययनेनापि सम्भवति , किन्तु प्रकृत्यर्थस्य प्रत्ययार्थस्य च किं विशकलितं रूपं , कश्च तयोः परस्परं सम्बन्धः , वाक्यार्थे कस्य च प्राधान्याप्राधान्ये विशेषाविशेषे वा, पदानां धातूनां प्रत्ययानाञ्च कोऽर्थः , पदे श्रुतेऽर्थस्य प्रतीतिदर्शनात् , शब्दार्थयोरस्ति कश्चन सम्बन्धः इति निश्चित्य , तस्य सम्बन्धस्य स्वरूपविषये विवदमानानां नैयायिकानां वैयाकरणानां मीमांसकानां साहित्यिकानां च मतनिरसनपुरस्सरं वैयाकरणसिद्धान्तं सिद्धान्तत्वेन स्थापयितुं सर्वतन्त्रस्वतन्त्रेण भाष्याब्धिपारंगतेन शिवभट्टसुतेन नागेशेन परमलघुमञ्जूषा , निखिलतन्त्रनिष्णात-कौण्डभट्टेन शब्दकौस्तुभसारप्रदर्शकं वैयाकरणभूषणसारेतिनाम्ना वैयाकरणतल्लजेन तारानाथतर्कवाचस्पतिना शब्दार्थरत्नम् इति प्रथितं ग्रन्थरत्नं व्यरचि । एतेषां ग्रन्थत्रितयानां विषयानवलोक्य वैयाकरणसिद्धान्तप्रतिपादनैकव्रतीनामपि नागेशकौण्ड-तारानाथतर्कवाचस्पतीनां परस्परं मतभेदः दरीदृश्यते विभिन्नस्थलेषु ।

"**प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते** [91]" इति न्यायेन प्रयोजनपरम्परा कस्यापि कुत्रचिदपि प्रवृत्तिर्न साधीयसी । एवञ्च धात्वर्थविषयेषु , लकारार्थविषयेषु , नामार्थविषयेषु , सुबर्थविषयेषु , शक्तिविषयेषु , स्फोटविषयेषु प्राधान्याप्राधान्यविषयेषु वैयाकरणपटलेषु ,

---

[89] **श्रुतिवचने ।**

[90] **श्रुतिवचने ।**

[91] **न्यायवचने ।**

नैयायिकपटलेषु , दार्शनिकपटलेषु सर्वत्रैव नितान्तमतभेदमालोक्य तत्र सिद्धान्तपक्षविषयिणी जिज्ञासा स्वत एव जागर्ति ज्ञानोत्सुकानां मनसि । तज्जिज्ञासा प्रेरितैः मया निबन्धोऽयं निबद्धः ।

# प्रतिपाद्यविषयाः

पुरातनकालेऽभीप्सितफलप्राप्तौ यज्ञादिकर्माण्यारभ्यन्त श्रद्धावन्त आस्तिकाः । तादृशकर्माचरणकाले च ऋषिदृष्टानपौरुषेयवेदमन्वानुचार्य्य तत्तद्देवतानां स्तुतिमकार्षुः । तदानेन सूक्तेनैषैव देवता स्तोतव्या पूजनीया चेति कल्पसूत्रकारा उपदिशन्तीत्यत्र तेषां कोऽभिप्रायः , तत्तद्देवतायास्तत्तत्सूक्तस्य च परस्परं कः सम्बन्धः सहैष तत्तन्मन्त्रज्ञानमपेक्षितमिति " **योऽग्निष्टोमेन यजते य उ चैनमेवं वेद** " " **इत्यादिविषयिण्यामाकाङ्क्षायां सञ्जातायां तच्छान्त्यै मन्त्रार्थज्ञानमावश्यकम् इति मन्यन्ते स्म** " इति । महाभाष्यकारैरपि मन्त्रपाठेन " **योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद** [92]" इत्यादितैत्तिरीयसंहितादिवाक्यान्युद्धृत्य मन्त्रार्थज्ञानमवश्यम् अपेक्षितम् इति मन्त्रद्रष्टृणामृषीणामिति स्पष्टं प्रतिपादितम् । महाभाष्यकारादष्टभ्यः शतकेभ्यः प्राक्काले लिखिते निरुक्तग्रन्थे यास्काचार्यैः ' **स्थाणुरयं भारहारः किलाभूत् । अधीत्य वेदं न विजानाति योऽर्थम्** [93]' इत्यादिवचनैर्धर्मानुष्ठानस्वरूपभूतानि स्वर्गसंपादयितृणि यज्ञादिकर्माणि अर्थज्ञानपुरःसराण्येवानुष्ठेयानीति व्यक्तमेवानुशिष्टम् । लोके तावद्-यज्ञादिक्रियाणां तत्साधनानां वा ज्ञानसंपत्त्यर्थमेव मुख्यतः शब्दानां प्रवृत्तिर्जायते । अतो धातव एव शब्दानां मूलस्वरूपं प्रत्येकं नाम च धातुनिष्पन्नमेव भवितुमर्हतीति सिद्धान्तः प्रस्थापितः ।

---

[92] **तैत्तिरीयसंहितामन्त्रमुद्धृत्य महाभाष्यकारैः ।**

[93] **निरुक्तवृत्तौ ।**

## ❖ धात्वर्थ :

कात्यायनप्रातिशाख्ये स्मृतञ्च – **" क्रियावाचकमाख्यातम्** [94]**"** । या प्रकृतिः क्रियावाचकभूता तद्भवति धातुरिति । तदुक्तं – **" धातुर्नाम क्रियावाचको गणपठितः शब्दविशेषः "** इति । क्रियाविषये उक्तं यत् –

**" यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।**

**आश्रितक्रमरूपत्वात् क्रियेति व्यपदिश्यते ॥**[95] **" इति ।**

अपि चोक्तं –

**" गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।**

**बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥** [96]**" इति ।**

भाष्यकारेण भाषितं – **" पदान्तरसमभिव्याहारं विनैव साध्यत्वप्रकारक-प्रतीतिविषयः , एकफलोद्देशेन प्रवृत्तपूर्वापरीभूता-वयवकः , सङ्कलनात्मक-बुद्धिविषयीकृतो व्यापारसमूहः क्रिया "** [97] इति ।

**' नाम च**[98] **धातुजमाह** निरुक्ते '- वैयाकरणानां च शाकटायन आह – **' धातुजं नाम '** इति भाष्यवार्तिकाभ्यां सर्वेषामेव शब्दानां धातुजन्यत्वं सिद्ध्यति । तेषां शब्दानां मूलभूतस्य धातोः कोऽर्थः ? इत्यत्र विवदन्त एव तत्तत्सिद्धान्तानुसारिणः । तत्र केचन फलमात्रं धात्वर्थः , व्यापारः प्रत्ययार्थः , फलव्यापारौ धातुवाच्यौ , आख्यातार्थः भावना , तत्रैव केचन फलव्यापारौ धातुवाच्यौ आख्यातार्थः कृतिरिति स्वीकुर्वन्ति ।

---

[94] कात्यायनप्रातिशाख्ये ।

[95] भर्तृहरिवाक्यपदीये ३.८.१ ।

[96] भर्तृहरिवाक्यपदीये ३.८.८ ।

[97] पतञ्जलिमहाभाष्ये ।

[98] पतञ्जलिमहाभाष्ये ३.३.९ ।

## ❖ लकारार्थ :

शब्दस्य ज्ञानाय बहूनि व्याकरणानि महर्षिभिः प्रणीतानि सन्ति। स च शब्दः वर्णपदवाक्यरूपः । तत्र यद्यपि वर्णानां पदानां वाक्यानाञ्चार्थवाचकत्वं स्वीकुर्वन्ति सर्वे । अत एव स्फोटवादिभिः वैयाकरणैः वर्णस्फोट-पदस्फोट-वाक्यस्फोट इति नामभिरष्टौ स्फोटाः स्वीकृताः सन्ति । तत्र यद्यपि " **वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः**[99] " इति रीत्या वाक्यस्फोटस्यैव प्राधान्यं प्रतिपादितं नागेशेन , किन्तु पदान्वाख्यानं विना वाक्यान्वाख्यानं सम्भवत्येव नहि। उक्तञ्च –

" **प्रतिवाक्यं संकेतग्रहासम्भवात् तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया वाक्ये पदानि विभज्य पदे प्रकृतिप्रत्ययविभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं कल्पयन्ति स्म आचार्याः** [100] " इति। एतदेवाभिप्रेत्य कैयटेनापि निगदितम् – " **अन्वयव्यतिरेकाभ्यां**[101] **प्रकृतिप्रत्ययानामिह अर्थवत्ता परिकल्पनात्** [102]" इति।

पदञ्च द्विविधम् – सुबन्तं तिङन्तञ्चेति । तत्र तिङन्तपदस्यान्वाख्यानाय महर्षिणा पाणिनिना लकारविधानमारब्धम् – " **लः कर्मणि च भावे चाकर्मकेभ्यः** [103]" इति।

सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र इति नियमात् अस्मिन्नपि सूत्रे " **चकारग्रहणात्** " " **कर्त्तरि कृत्** [104]" इति सूत्रात् कर्तरीति पदमनुवर्तते।

---

[99] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. १।**

[100] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. ४।**

[101] **पतञ्जलिमहाभाष्यप्रदीपे ४.३.६८ , पृ.६३१।**

[102] **महाभाष्यप्रदीपे ५/३/६८।**

[103] **पाणिनीयाष्टाध्याय्यां ३/४/६९।**

एवञ्च सकर्मकेभ्यो धातुभ्यो लकाराः कर्मणि कर्तरि च , अकर्मकेभ्यो धातुभ्यो लकाराः कर्तरि भावे च भवन्तीति लकारविधायकसूत्रस्यार्थः । " **द्व्येकयोर्द्विचनैकवचने** [105]" " **बहुषु बहुवचनम्**[106] " इत्येताभ्यां सूत्राभ्यां सहैकवाक्यतया कर्तरि प्रत्ययस्थले कर्तृगतैकत्वद्वित्वबहुत्व-विवक्षायां , कर्मणि प्रत्ययस्थले कर्मगतैकत्वद्वित्वबहुत्व-विवक्षायां क्रमशः लादेशानामेकवचनद्विवचनबहुवचनानि विधीयन्ते । एवञ्च कर्तृकर्मभावसंख्या लकाराणां लादेशानां वार्थः । लडादीनां लकाराणां विधानन्तु ' **वर्तमाने लट्** [107]' इत्यादिसूत्रैः तत्तत्काल एव भवति । एवञ्च कालोऽपि तेषामर्थः । तत्र कर्तृकर्मसंख्याभावकालेषु भावस्य धातुवाच्यत्वात्[108] कर्तृकर्मसंख्याकाला एव लकाराणामर्थाः सिद्ध्यन्ति वैयाकरणनिकाये ।

## ❖ नामार्थ :

**" निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः ।**
**यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो अतिरिच्यते ॥** [109]"

अतः प्रातिपदिकमेव हि नाम । कातन्त्र्यमतेषु लिङ्गमस्य पार्यायभूतम् । नामविषये यास्काचार्येण उक्तं – " **सत्त्वप्रधानानि नामानि** [110]" इति । तत्र

---

**[104] पाणिनीयाष्टाध्याय्यां ३/४/६७ ।**
**[105] पाणिनीयाष्टाध्याय्यां १/४/२२ ।**
**[106] पाणिनीयाष्टाध्याय्यां १/४/२१ ।**
**[107] पाणिनीयाष्टाध्याय्यां ३/२/१२३ ।**
**[108] ' भाष्य एव हि धात्वर्थ इत्यवच्छिन्न आगमः- वाक्यपदीयतृतीयकाण्डस्य क्रियासमुद्देशे का.२४ ।**
**[109] शब्दशक्तिप्रकाशिकायां सार्थकशब्दप्रकरणे स. १४ , पृ. १५० सं.कलेज् –१ खण्डे**

दुर्गाचार्येण लिखितं – **“ लिङ्गसंख्ययोरत्र सद्भाव इति सत्त्वम् ”**[111] इति। नामविषये अन्याचार्यैरुक्तम् –

**“ शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते।**
**तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः॥ ”**

नामविभक्त्योरर्थसम्बन्धविषये तैरुक्तम् –

**“अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः।**
**तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः॥**
**निर्देशः कर्म करणं प्रदानमपकर्षणम्।**
**स्वाम्यर्थोऽथाधिकरणं विभक्त्यर्थाः प्रकीर्त्तिताः॥**[112] **” इति।**

मुग्धबोधव्याकरणे नामार्थविषये उक्तम् –

**“ स्वार्थो द्रव्यञ्च लिङ्गं च संख्या कर्मादिरेग्व च।**
**अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः॥**[113] **” इति।**

नामार्थविषये सन्ति विप्रतिपत्तयः। केचित् जातिरेव नामार्थः केचिच्च जातिव्यक्तिश्चेति द्विकं प्रातिपदिकार्थः, अन्ये तु जाति व्यक्ति लिङ्गं चेति त्रिकं प्रातिपदिकार्थः, प्रवृत्तिनिमित्तव्यक्तिलिङ्गसंख्या चेति चतुष्कं प्रातिपदिकार्थः। कातन्त्ये उक्तम् –

**“ शब्दैरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः।**
**चातुर्विध्यादमूषां तु शब्द उक्तश्चतुर्विधः॥** [114]”

परन्तु दुर्गासिंहेन अस्य क्रमभङ्गः **“ जातिक्रियागुणद्रव्य** [115]” इति कृतः। तत्र काव्यादर्शे दीपकचक्रे लिखितमस्ति –

---

[110] **निरुक्ते पृ.१२।**
[111] **निरुक्तवृत्तौ पृ.१२।**
[112] **निरुक्तवृत्तौ पृ. १३।**
[113] **मुग्धबोधव्याकरणे तर्कवागीशटीकायां पृ.३८३।**
[114] **कातन्त्र्यवृत्तौ।**
[115] **दुर्गासिंहेन निरुक्तवृत्तौ।**

“ **जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना ।**
**सर्ववाक्योपकारश्चेत् तदाहुर्दीपकं यथा ॥** [116]” इति ।

## ❖ सुबर्थ :

‘ **विवक्षावशाद् कारकाणि भवन्ति** [117]’ इति सर्वजनविदितं तथ्यमादाय कारकनिकाये विवक्षायास्तारतम्यं दृश्यते । अस्माकं दैनन्दिनजीवनचर्चायां भावविनिमय एव मुख्यत्वं धत्ते । विनिमयोऽयं येन केनापि प्रकारेण चरितार्थतां भजते । वागव्यवहारस्तथा मौनीभाव इति द्विधा विभज्यते । मौनीभावे इङ्गिताकारचेष्टा विद्यन्ते । तथाह्युच्यते – ‘ **आकारेङ्गितेन चेष्टितेन वा** [118] ’ इति । विभागद्वयमध्ये वागव्यवहारो श्रेयान् । अन्तःस्पन्दनं भावमासाद्य वहिःप्रकाशमानं सुष्ठुतामाप्नोति । वहिःप्रकाशे शब्दार्थद्वारैव तत्स्पन्दनं शोभनतां भजते । कविकुलललामभूतेन महाकविना पार्वतीपरमेश्वरवत् वागर्थौ शस्येते रघुवंशे—

“ **वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥** [119]” इति ।

काव्यादर्शकृता दण्डिनापि शब्दव्यवहारस्य अलौकिकी चमत्कारिता सप्रशंसमौद्गीता-

“ **इदमन्धं तमःकृत्स्नं जायते भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥** [120]” इति ।

---

[116] **काव्यादर्शे ।**

[117] **पाणिनीये ।**

[118] **महाभाष्यपस्पशाह्निके ।**

[119] **रघुवंशे १/१ ।**

[120] **काव्यादर्शे १/४ ।**

शब्दार्थव्यवहारो भाषाप्रयोगे सार्थकपदवीं लभते । भाष्यतेऽनयेति भाषा । शब्दानां यथान्वितानां व्यवकारेण उत्पन्नं वाक्यं वक्तुर्भावादिकं यथायथं विनिर्णयति । तद्वशाद् श्रोता तदनुकूलं व्यापारं साधयति इतो कृत्वा चलति लोकव्यवहारः । एतेन वक्तुरभिप्रायः सदा स्फुटो भवेद् , श्रोतुश्च तद्विषयकमनुध्यानं कर्तव्यम् । नोचेत् , केनापि किमपि फलं नासाद्यते । लोकयात्रायां परस्परसाहचर्यप्रदर्शनाय भावविनिमयो यथा स्वच्छन्दतां वैशद्यं स्पष्टतां च भजेत तदर्थं भाषाव्यवहारे वक्तुः इच्छा एव परिगणयितव्या ।

## ❖ शक्त्यर्थ :

लोकेऽस्मिन् ‘ **गौरागच्छति** ’ इत्यादिवाक्येभ्यो गवागमन-रूपार्थप्रतीतिः , ‘ **गौः अश्व** ’ इत्यादिशब्दश्रवणानन्तरञ्च गवाश्वादीनां प्रतीतश्च दृश्यते । किन्तु सर्वः शब्दः सर्वमर्थं न बोधयति , कश्चित् शब्दः कमपि विशेषार्थमेव बोधयति । यथा घट शब्दोच्चारणे घटरूपार्थस्यैव प्रतीतिर्भवति न तु पटरूपार्थस्य । तेन ज्ञायते शब्दार्थयोरस्ति कश्चन सम्बन्धः । अतः शब्दः स्वसम्बद्धमेवार्थमेव बोधयति । शब्दार्थयोः सम्बन्धः काव्यप्रकाशे[121] अन्विताभिधानवादिनां मतमुपपादयता आचार्यमम्मटेन प्रमाणत्रयेण निर्धारितः ।

---

[121] **शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।**
**श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥**
**अन्यथानुपत्त्या तु बोधेच्छक्तिं ।**
**अर्थापत्त्यावबोधेत् सम्बन्ध त्रिप्रमाणकम् ॥ - काव्यप्रकाशे चतुर्थोल्लासे ।**

## ❖ स्फोटार्थ :

व्यवहाराय मनोगतभावप्रकटनाय वा शब्दो मुख्यमवलम्बनं समेषाम् । **“ उच्चार्यमाणः शब्दः संप्रत्यायको भवति , न संप्रतीयमानः** [122]**”** इति **“ अणुदित्सवर्णस्य चाप्रत्ययः** [123] **”** इति सूत्रभाष्योक्तेः उच्चरितादेव शब्दार्थप्रतीतिर्भवति । तेन शब्दार्थयोरस्ति कश्चन सम्बन्ध इत्यवगम्यते । शक्तिः विना न शब्दः अर्थं न बोधयति । अर्थनिरूपिता शक्तिः किं वर्णसमुदायात्मके शब्दे तिष्ठति ? उच्चरितप्रध्वंसिस्वभावाद् वर्णानां तन्न कदाप्युपपद्यते । ततो वर्णसमुदायाभावे वर्णसमुदायरूपाणां पदानां वाक्यानां वा चर्चा भवेदाकाशकुसुमसंकाशा । एवं तर्हि कीदृशः शब्दः शक्त्याश्रयः शब्दस्य किं वा स्वरूपम् ? इति प्रश्नः सर्वान् दार्शनिकान् तत्तच्छास्त्रसंस्कारसंस्कृतान् एतद्विषयकचिन्तनाय प्रवर्तयति ।

लोके ‘ **शब्द** ’ इति शब्दस्य प्रयोगो यद्यपि नदीघोषादिरूपेऽपि दृश्यते , किन्तु व्याकरणदर्शने ‘ **शब्द** ’ शब्दस्तस्य ध्वनेः पर्यायरूपेण प्रयुज्यते , यस्योच्चारणेन कस्यचिदर्थविशेषस्य प्रतीतिर्भवति । उक्तञ्च पतञ्जलिनापि – **“ अथ गौरित्यत्र कः शब्दः**[124] **? येनोच्चारितेण सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः ” । “ अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते । तद्यथा – शब्दं कुरु , मा शब्दं कार्षीः , शब्दकार्ययं माणवक इति ध्वनिं कुवन्नेवमुच्यते । तस्माद्धनिः शब्दः ”** [125]इति ।

---

**[122] अणुदित्सवर्णस्य चाप्रत्यय इति सूत्रस्य महाभाष्ये ५५५ तमे पृष्ठे ।**

**[123] पाणिनीयाष्टाध्याय्यां १.१.३९ ।**

**[124] महाभाष्ये पस्पशाह्निके १२ तमे पृष्ठे ।**

**[125] महाभाष्ये पस्पपशाह्निके २३ तमे पृष्ठे ।**

**भाष्ये येन इति करण एषा तृतीया। येन प्रकाशितेन सास्नादिमतां ज्ञानं भवति स स्फोटः शब्दः इत्यर्थः**[126]।

अत्रैदमाशंक्यते यत् प्रत्यायकः शब्दः वर्णसमूहरूपो भवति । अतो भाष्ये येन इति एकवचनम् अयुक्तम् । यैरुच्चारितैः सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः इत्येवं वक्तव्यम् । यद्युच्येत वनम् इत्यत्र यथा समूहाभिप्रायेण एकवचनप्रयोगः संगतः तथैव भाष्ये समूहाभिप्रायं येनैत्यत्रैकवचनं प्रयुज्यते । तथा च येन वर्णसमूहेनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सप्रत्ययो भवति स शब्दः इत्यर्थस्वीकारे न किञ्चिद् बाधकमिति , तदपि न रमणीयम् , चिरकालस्थायी वर्णसमूहः न कथमपि निरूपयितुं शक्यते [127]। एवं विप्रतिपत्तिनिराकरणाय कैयटः अभाषि –“ **वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य ( पदस्य कल्पितत्वेन अरुचेः ) वाक्यस्य वा वाचकत्वमिच्छन्ति । वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात् । आनर्थक्ये तु ( अपि ) प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् , अभिव्यक्तिपक्षे तु क्रमेण एवाभिव्यक्ता समुदायाभावात् । एकस्मृत्युपारूढानां वाचकत्वे सरः रसः इत्यादौ ( वर्णानामुभयत्र अविशेषात् ) अर्थप्रतीत्यविशेष-प्रसङ्गात् तद्व्यतिरिक्तः ( वर्णव्यतिरिक्तः ) स्फोटो नादाभिव्यङ्ग्यो ( वर्णाभिव्यङ्ग्यः ) वाचकः ( एतेन ध्वनिः निरस्तः ) ”** [128] इति।

येन क्रमेण अनुभूताः वर्णास्तेनैव क्रमेण एकस्मृत्युपारूढानां वाचकत्वेन अर्थप्रतीत्यविशेषप्रसङ्गः नो आयाति । अन्यथा

---

[126] **महाभाष्ये पण्डितभार्गवशास्त्रिकृतायां प्रभाटीकायां १३ तमे पृष्ठे ।**

[127] **नागेशभट्टकृतायाम् उद्द्योतटीकायां १८ तमे पृष्ठे ।**

[128] **कैयटोपाध्यायकृतायां प्रदीपटीकायां १७ तमे पृष्ठे।**

वैयाकरणमतेऽपि वर्णानां स्फोटव्यञ्जकत्वमभ्युपगमेन अर्थप्रतीत्यविशेष-प्रसङ्गरूपदोषः तेषामपि दुरुद्धर इत्याशंका[129] निराकर्तुकामेन कैयटेनोक्तं- **" विस्तरेण वाक्यपदीये ( वर्णरूपनादाभिव्यङ्ग्यः स्फोटो वाचकः ) व्यवस्थापितः "**[130] इति ।

प्रसङ्गेऽस्मिन् नागेशभट्टेनोक्तं उद्योते – **" एकं पदम् एकं वाक्यम्** [131]**"** इति प्रत्ययः स्फोटसत्त्वे तदैक्ये च प्रमाणम् । अनुभवक्रमेण स्मरणमित्यर्थे दृढप्रमाणाभावाच्च । क्रमेण अनुभूतानां व्युत्क्रमेणापि स्मरणदर्शनात् । यथा पटेषु नानारञ्जकद्रव्याहितनानावर्णोपरागः क्रमेण , तथा एकस्मिन् एव तस्मिन् स्फोटे उच्चारणक्रमेण क्रमवानेव तत्तद्वर्णस्वरूपानुरागः , सः स्फोटश्च स्थिरः । **श्रोत्राग्राह्यस्य तस्य च स्फोटस्य मनसा ग्रहणमिति न दोषः**[132] इति । **विद्वानन्नंभट्टोऽपि उपर्युक्तं मतमुद्योतेन**[133] इति ।

अत्रायं प्रश्नो भवितुमर्हति यद् यदि वर्णातिरिक्तः स्फोटो वाचकः तर्हि स ताल्वोष्ठपुटव्यापारविषयो भवितुं नार्हति[134] । एवं सति भाष्ये उच्चारितेन इति पदं किमाशयकम् ? अत्रायं समाधिः कैयटपादेन प्रादर्शि उच्चारितेन इत्यस्य प्रकाशितेन[135] इत्यर्थं प्रकाशयता तत्र नागेशः अभिव्यञ्जकैः इत्यध्याहृत्य अभिव्यञ्जकैः प्रकाशितेन[136] इति कैयटाशयं प्रकाशितवान् । स्वयमप्युद्योते

---

**129 नागेशभट्टकृतायाम् उद्द्योतटीकायां १८ तमे पृष्ठे ।**
**130 कैयटोपाध्यायकृतायां प्रदीपटीकायां २७ तमे पृष्ठे ।**
**131 नागेशभट्टकृतायाम् उद्द्योतटीकायां १३ तमे पृष्ठे , सं.रा.संस्थानम् ।**
**132 नागेशभट्टकृतायाम् उद्द्योतटीकायां १८ तमे पृष्ठे ।**
**133 अन्नम्भट्टकृतायामुद्योतनटीकायां २२ तमे पृष्ठे ।**
**134 नागेशभट्टकृतायाम् उद्द्योतटीकायां १८ तमे पृष्ठे ।**
**135 कैयटोपाध्यायकृतायां प्रदीपटीकायां १७ तमे पृष्ठे ।**
**136 नागेशभट्टकृतायाम् उद्द्योतटीकायां १८ तमे पृष्ठे ।**

आह शरीरमारुताभिहतकण्ठादिस्थानैः अवयवद्वारा अभिव्यक्तेन येन इत्यर्थ [137]इति।

**येनोच्चारितेन**.....इत्यादिभाष्ये प्रयुक्तः शब्दः शब्दः स्फोटपरः। अत्रेदं विचार्यते यत् स्फोटशब्दस्योल्लेखाभावात् स्फोटात्मकशब्दलक्षणपरं व्यख्यायत कथम् ? अस्य समाधानमाहुः टिप्पणीकाराः यद् – **" अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः इति उच्यते[138] "** इत्याद्युत्तरभाष्यमेवात्र मानम्। अनेन हि भाष्येण ध्वनेः शब्दत्वमुच्यते। ईदृशार्थाभावे अस्य भाष्यस्यापि स एवार्थः स्याद् इत्येतदस्य भाष्यस्य स्फोटपरत्वव्याख्याने बीजम्। अन्यथा अन्वयापत्तिः स्यादिति[139]।

**" तपरस्तत्कालस्य[140]"** इति सूत्रे वर्णानां तत्तत्कालत्वस्य एवौचित्याद् इत्याशंक्य- **" एवं तर्हि स्फोटः शब्दः। ध्वनिः शब्दगुणः। कथम् ? यथा भेर्याघातः भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति। ध्वनिकृता बृद्धिः -**

**" ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥ "[141]** इति।

इत्यनेन भाष्येण स्फोटस्य निर्देशः कृतः। अत्र प्रसङ्गे लघुमञ्जूषायामुच्यते नागेशेन **' स्फोटः शब्दः [142]'** इति प्रतीकमादाय श्रोत्रेन्द्रियग्राह्यः स्फोटनामा

---

**[137] नागेशभट्टकृतायाम् उद्द्योतटीकायां १७ तमे पृष्ठे।**
**[138] महाभाष्ये पस्पशाह्निके १९ तमे पृष्ठे।**
**[139] महाभाष्ये पण्डितभार्गवशास्त्रिकृतायां प्रभाटीकायां १७ तमे पृष्ठे।**
**[140] पाणिनीयाष्टाध्याय्याम् १.१.३०।**
**[141] तपरस्तत्कालस्य इति सूत्रे महाभाष्ये ४६३-४६४ तमे पृष्ठे।**
**[142] नागेशभट्टकृतायाम् उद्द्योतटीकायाम्।**

पदार्थः शब्दः इत्यर्थः[143]। **“ ध्वनिः स्फोटश्च [144]”** इत्यंशम् उररीकृत्य आह कैयटः व्यञ्जको व्यङ्ग्यश्च इत्यर्थः । शन्ब्दानां व्यङ्गानां सम्बन्धी व्यञ्जकत्वेन यो ध्वनिः स एव महान् अल्पश्च लक्ष्यते । व्यङ्ग्यस्तु अभिन्नकाल एव इत्यर्थ।

---

[143] **वैयाकरणसिद्धान्तलघुमञ्जूषायां १९९ तमे पृष्ठे।**

[144] **तपरस्तत्कालस्य इति सूत्रे महाभाष्यप्रदीपे ४६४ तमे पृष्ठे।**

# कृतज्ञताज्ञापनम्

अकारणकरुणावतां भगवत्स्वरूपाणां प्रातःस्मरणीयानां पूज्यपादानां श्रीरामकृष्णसारादादेविविवेकानन्दमहात्मनां चरणारविन्दयोः भूयो भूयो सश्रद्धं प्रणतिं समर्पयामि येषां कृपैव अस्माकं जीवनाधारः -

**" मन्त्रः सत्यं पूजा सत्यं सत्यं देवनिरञ्जनः।**

**गुरुर्वाक्यं सदा सत्यं सत्यमेव परं पदम् ॥**[145] " इति ।

पूज्याः मातामहीः सश्रद्धं साष्टाङ्गं वन्दे यासां आशिषा च संस्कृताध्ययने प्रवर्तितोऽभवम् । परमश्रद्धेयां पितामहीं पूज्यां मातरं पुज्यपितृचरणं शिरसा प्रणमामि येषां तपः आशीश्च सन्मार्गे प्रवर्तयति । श्रद्धा-स्नेह-दया-करूणा-ममत्व-इत्यादीनां प्रतीकश्च स्वपितामहः , येषां शुभाशिर्वादस्य छत्रछायैव मदीयं सर्वस्वम् ।

गुरुशिष्यपरम्परासु स्वनामधन्याः " **विद्या ददाति विनयं** " कथनस्यास्य प्रदातारः गुरुपादाः डा.तपनशंकरभट्टाचार्य्यमहोदयाः, स्वर्गीयाः श्रीकरूणासिन्धुदासमहोदयाः , श्रीअमरकुमारचट्टोपाध्यायमहोदयाः , श्रीप्रमथेशमण्डलमहोदयाः , श्रीविप्लवकुमारमान्नामहोदयाः एते मुहुर्मुहुर्वन्द्याः प्रणम्याः सत्कार्याश्च , येषां सत्स्नेहेन एषः निबन्धग्रन्थः पूर्णतामापद्यत –

**" अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**

**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥** [146]" इति ।

वैयाकरणभूषणसारपरमालघुमञ्जूषाशब्दार्थरत्नग्रन्थस्थितानां वैयाकरणसिद्धान्तानाम् अत्यधिकगूढरहस्यस्य सुस्पष्टताप्रदाने

---

[145] **प्रचलितवचने ।**

[146] **गुरुवन्दनायाम् ।**

निबन्धाकारस्य सुषमरूपप्रदाने तत्तद्विषयाणां समुचितरूपप्रतिविधाने सन्देहास्पदस्थले यथावसरं सस्नेहममूल्यं कालं विचारञ्च दत्त्वा यैः वयमनुगृहीतास्तेषामुदारचरितानां देववाणीसमुन्नयनसंसक्तचेतसां सरस्वती-समुपानैकव्रतीनां शाब्दिककुलमौलिकरत्नानां पण्डितवर्गलब्ध-कीर्तिनां यादवपुरविश्वविद्यालयस्य व्याकरणविभागाध्यक्षपदभाजां पण्डितवरेण्यानाम-स्मद्गुरुवर्याणां स्वनामधन्यानां डा.तपनशंकरभट्टाचार्य्य-महोदयानां भूयो भूय आभारप्रदर्शने सन्तोषोऽतृप्तिमालिङ्गति -

**" गुरुर्ब्रह्मा गुरुर्विष्णु गुरुदेवो महेश्वरः ।**
**गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ [147]" इति ।**

मया डा. तपनशंकरभट्टाचार्य्यमहोदयानां निर्देशेन मे शोधकार्यं सुसम्पादितम् । तपनशंकरभट्टाचार्य्यमहाभागाः न केवलं मत्कृते विद्यापीठे एव स्वकीयममूल्यं समयं दत्तवन्तः अपि तु अवकाशदिवसेष्वपि स्वकीये गृहे मम मार्गनिदर्शनं काठिन्यनिवारणं गूढस्थलानामध्यापनमपि च कृतवन्तः । एतेषां महाभागानां प्रयासैरेव एतत्कार्यं सम्पन्नम् । न केवलं कार्यमेव सम्पन्नम् अपि तु कार्यस्यास्य प्रेरका अपि तत्रभवन्तः एव । तत्रभवतां पुनः पुनः प्रबोधनेनैव मयि एतादृशी जिज्ञासा समुत्पन्ना मया एतच्छोधकार्यं समारब्धम् । अतः सहृदयहृदयग्राहीनं ब्रह्मानन्दस्वरूपं परमसुखदं त्रिगुणरहितं विमलमचलं सद्गुरुं प्रति साष्टाङ्गप्रणामः –

**" ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं**
**द्वन्द्वातीतं गगनसदृशं तत्त्वस्यादिलक्ष्यम् ।**
**एकं नित्यं विमलमचलं सर्वधी साक्षिभूतं**
**भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ [148]"** इति ।

---

[147] **गुरुवन्दनायाम् ।**

[148] **गुरुवन्दनायाम् ।**

“ **जननी जन्मभूमिश्च स्वर्गादपि गरीयसी** [149]” इत्यस्य प्रतीकस्वरूपश्रीमातृसावित्रीदेव्याः श्रीपादपद्माभ्याम् , अपि च -

**“ पिता स्वर्गः पिता धर्मः पिता हि परमं तपः ।**
**पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः ॥[150] ”**

इत्यस्य प्रतीकस्वरूपश्रीपितृकार्त्तिकचन्द्रदेवस्य श्रीपादपद्माभ्यां हृदयाञ्जलिं विनिवेदयामि । अनन्तरं कोलकातास्थगुरुवर्याणां वेदान्तकुलमौलिकरत्नानां पण्डितश्रेष्ठतमानां श्रीअमरकुमारचट्टोपाध्याय-महोदयानां , कुलगुरुप्रवराणां करुणानिधीनां सहृदयहृदयाह्लादकाणां स्वर्गीय-श्रीकरूणासिन्धुदासमहोदयानां , साहित्यकुलरत्नानां शुद्धबुद्धस्वभावानां श्रीप्रमथेशमण्डलमहोदयानां , आदर्शशिक्षकमूर्धन्यभूतानां श्रीविप्लवकुमार-मान्नामहोदयानां च कृते सहृदयं पादपद्मयोः नमांसि येषां मार्गनिर्देशनेन निबन्धग्रन्थोऽयं पूर्णतां प्राप्तः -

**“ अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।**
**तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥[151] ” इति ।**

वन्धुकुलशिरोमणीनां श्रीराकेशशर्मामहोदयानां च कृते सविनयं कृतज्ञतां प्रकटयामि । या मे मनोमुकुरेषु नास्ति चेद् एतत् शोधकार्यं कदापि न सम्पन्नं कर्तुं पारङ्गमः अभवम् । सा भवति मे हृदयाह्लादयित्री देवी आस्था । कार्येऽस्मिन् प्रोत्साहितवन्तः अग्रजाः सुहृद्वर्याः श्रीस्वरूपसिंहमहोदयाः धन्यवादार्हाः सन्ति ।

अनुसन्धानप्रबन्धप्रकाशनाय धर्-ब्रादार्स-इत्येतेषां सर्वेभ्यो धन्यवादार्हाः प्रदीयन्ते येषामनुग्रहैः टङ्कणपरिष्करणादिभ्यः ग्रन्थस्यास्य प्रकाशनं जायते ।

---

[149] **सुभाषितवल्याम् ।**

[150] **सुभाषितवल्याम् ।**

[151] **गुरुवन्दनायाम् ।**

रामकृष्ण-मिशन्-इन्स्टिटिउट्-अव-कालचार , न्याशनाल-लाइब्रेरी , संस्कृत-साहित्य-परिषद् , यादवपुर-सेन्ट्राल-लाइब्रेरी इत्येतेभ्यो ग्रन्थागारस्थित-सहायकेभ्यो धन्यवादार्हाः प्रदीयन्ते। एतदतिरिच्य कार्येऽस्मिन् प्रत्यक्ष्यं परोक्षं वा साहाय्यम् आचारितवन्तः समेपि भूरिशः धन्यतावचनेन भूष्यन्ते इति शम् ।

**दिनाङ्कः** **विनीतस्य विदुषां वशंवदस्य**

**पिन्टु-दे इत्येतस्य**

“ यशःसमन्विते रम्यं परमे प्रेमदायिके ।
कामेभ्यो नः सदा पाहि यशोमयि नमोऽस्तु ते॥
विद्यां देहि महामायि सुधीषु चासुधीषु च ।
महाविद्याप्रदानेन महादेवि नमोऽस्तु ते ॥ ”

# सूचीपत्रम्


विषयाः पृष्ठाङ्काः

➢ **भूमिका : 51-70**

● व्याकरणशास्त्रस्य महत्त्वम् ।

● नागेश-कौण्ड-तारानाथतर्कवाचस्पतीनां संक्षिप्तपरिचयः ।

➢ **प्रथमोऽध्यायः – धात्वर्थविचारः 71-137**

● मीमांसकमतम्

● मण्डनमिश्रसम्मतिः , तन्मतखण्डनम् ।

● प्राभाकरमतम् ।

● आचार्यखण्डदेवमतम् , तन्मतखण्डनम् ।

●वैयाकरणमतम् , व्यापारस्वरूपविमर्शः , फलव्यापारयोर्धातुवाच्यता , फलस्यधात्वर्थत्वखण्डनम् , फलस्य धात्वर्थत्वसमर्थनम् ।

● फलव्यापारयोः खण्डशः शक्तिरिति प्राचीनमतोपस्थापनम् , तत्र विशिष्टे शक्तिरिति नागेशसम्मतिः , सिद्धान्तपक्षः ।

● शाब्दबोधविषये कौण्डभट्टमतम् , तारानाथमतम् , तत्र नागेशाभिमतिः , तत्र सिद्धान्तपक्षः ।

➢ **द्वितीयोऽध्यायः - लकारार्थविचारः 138-187**

●सामान्यः लकारार्थः – नागेशकौण्डतारानाथमतम् ।

●कालस्वरूपविचारः – भाष्यसम्मतिः , नागेशसम्मतिः , भर्तृहरिसम्मतिः ।

●लट्लकारार्थः – कौण्डभट्टमतम् , भर्तृहरिसम्मतिः , वर्तमानसामीप्यं नागेशमतम् , तारानाथमतम् ।

●लिट्लकारार्थः – अनद्यतनभूतार्थविचारः , परोक्षस्वरूपविचारः , तत्र भाष्यसम्मतिः , परोक्षस्य विशेषणत्वविचारः , उत्तमपुरुषे लिट्लकारव्यवस्था , तत्र दीक्षितसम्मतिः , भाष्यसम्मतिः , सिद्धान्तपक्षः ।

● लुट्लकारार्थः , लेट्लोडर्थविचारः ।

● लिङर्थः – वैयाकरणमतम् , नागेशकौण्डतारानाथवास्पतीनां मतम् , आचार्यखण्ददेवमतम् ।

●लङ्लकारार्थः , लुङ्लकारार्थः , लृङ्लकारार्थः ।

## ➢तृतीयोऽध्यायः – नामार्थविचारः 188-274

●मीमांसकमतम् ।

●नामार्थविषये महिमभट्टाभिमतिः , मतखण्डनम् , तारानाथाभिमतिः ।

●बौद्धमतम् , मतखण्डनम् ।

●वेदान्तिनां मतम् ।

●नैयायिकसम्मतिः ।

●अचार्याणामभिमतम् , वैयाकरणसम्मतिः , तत्र लिङ्गस्वरूपम् , लिङ्गस्य शब्दनिष्ठत्वम् ।

## ➢ चतुर्थोऽध्यायः - सुबर्थविचारः (कारकाणि ) 275-418

●सामान्यकारकस्वरूपविचारः , वैयाकरणानां सम्मतिः , नागेशादिसम्मतिः , भर्त्तृहरिसम्मतिः ।

●क्रियास्वरूपविमर्शः ।

●कारकभेदः , तत्र भर्त्तृहरिसिद्धान्तः ।

●कर्त्ता- स्वरूपविषये हरिसम्मतिः , मतखण्डनम् , कर्त्तुः भेदाः , भेदविषये कौण्डाभिमतम् , तत्र सिद्धान्तपक्षः ।

●प्रथमाविभक्त्यर्थनिरूपणम् - सम्बोधनप्रथमायाः अर्थः , नैयायिकमतम् , वैयाकरणसम्मतिः , प्रथमाविभक्तेः कारकत्वम् ।

●द्वितीयाविभक्त्यर्थनिरूपणम् – कौण्डभट्टाभिमतम् , कर्मस्वरूपविचारः , नागेशमतम् , कौण्डभट्टाभिमतम् , कर्मभेदनिरूपणम् , तारानाथमतम् ।

●तृतीयाविभक्त्यर्थनिरूपणम् – करणतृतीयार्थः , करणस्वरूपम् , नागेशमतम् , तारानाथमतम् , भर्त्तृहरिसम्मतिः ।

●चतुर्थीविभक्त्यर्थनिरूपणम् – सम्प्रदानं तत्र पाणिनिमतम् , वृत्तिकारमतम् , नागेशाभिप्रायः , कौण्डाभिमतम् , तारानाथमतम् , सम्प्रदानभेदाः ।

●पञ्चमीविभक्त्यर्थनिरूपणम् – नागेश-कौण्ड-तारानाथमत-साम्यत्वम् , सम्प्रदानापादानयोः कारकत्वाकारकत्वविचारः ।

● षष्ठीविभक्त्यर्थनिरूपणम्

●सप्तमीविभक्त्यर्थः – कौण्डभट्टाभिमति , नागेशमतम् , तारानाथमतम् । अधिकरणस्वरूपविचारः , अधिकरणस्य क्रियासम्बन्धविचारः , अधिकरणभेदविचारः ।

➢ पञ्चमोऽध्यायः – शक्तिस्वरूपविचारः 419-458

● शक्तिस्वरूपविषये मतम् , मतखण्डनम् , साहित्यिकानां मतम् , कौण्डभट्टाभिमतम् , नागेशमतम् , तारानाथमतम् , शक्तिस्वरूपविषये सिद्धान्तपक्षः ।

➢ षष्ठोऽध्यायः - स्फोटस्वरूपविचारः 459-512

● स्फोटविषये नागेशकौण्डभट्टतारानाथतर्कवाचस्पतीनामभिमतम् तथा वैयाकरणमतम् , स्फोटभेदविचारः , स्फोटसिद्धान्तखण्डनम् , सिद्धान्तपक्षः ।

➢ उपसंहारः 513-534

➢ परिशीलिता ग्रन्थपञ्जी 535-549

# भूमिका

# भूमिका

व्यवहारप्रयोजकेषु प्रमुखं वाक्यार्थज्ञानं व्याकरणन्यायमीमांसादिशास्त्रैकशरणम् । तत्र व्याकरणशास्त्रे वाक्यपदीयाभिधो दार्शनिको ग्रन्थो वाक्यार्थनिर्णायकत्वेन व्यरचि श्रीभर्तृहरिणा । तदनु श्रीभट्टोजिदीक्षितनिर्मितां कारिकावलीमुपजीव्य विद्वद्वरेण श्रीकौण्डभट्टेन भूषणसारनामिका व्याख्या श्रीनागेशभट्टेन बृहन्मञ्जूषा , लघुमञ्जूषा , परमलघुमञ्जूषा चेति ग्रन्थत्रितयं शब्दशास्त्रीयदर्शनसिद्धान्तरत्नप्रकाशकतया निरमायि । न केवलं नागेशकौण्डभट्टादयः वर्ण-शब्द-वाक्यार्थनिर्णयेषु सदा निरताः अपि च अस्ति वैयाकरणपटलेषु ख्यातनामैकः पण्डितः तारानाथतर्कवाचस्पतिरितिव्यधायि । तत्रापि वाक्यार्थनिर्णायककारणेषु वैमत्यमपूर्णात्वादिकं चालोच्य शाब्दिकचक्रचूडामणिना खलु तदीये ' **शब्दार्थरत्नम्** ' इत्याख्ये व्याख्यानमूलके ग्रन्थे वर्ण-शब्दार्थ- वाक्यार्थ-सन्धि-कारक-शक्ति-स्फोट-धात्वर्थ-समासार्थ-लकारार्थ-नामार्थ-निपातार्थादिविषयेषु वैशद्येन आलोचितम् । परञ्चाद्यावधि श्रीनागेशभट्टकौण्डभट्टतारानाथ-तर्कवाचस्पतीनां सिद्धान्तानां समीक्षा केनापि न कृता , यत्र स्थापितानां युक्तायुक्तत्वेषु विवेचितेषु स्यान्ति ।

व्याकरणशास्त्रग्रन्थेषु शब्दार्थविवेचनपरो वैयाकरणभूषणसारनामा कौण्डभट्टेन लिखितोऽयं ग्रन्थः श्रेष्ठं स्थानं लभते । प्रतिपाद्यविषयदृष्ट्या व्याकरणग्रन्था द्विधा विभज्यन्ते शब्दग्रन्था अर्थग्रन्थाश्च । प्रकृतिप्रत्ययरूपेण पदानि विभज्य लोपागमवर्णविकारादिभिः कार्यैरर्थानुरोधेन शब्दसिद्धिः क्रियते । व्याकरणशास्त्रस्य शब्दसिद्धेर्मुख्याङ्गत्वेन शब्दग्रन्थसंख्या सुबहुतरा महती वर्तते अर्थग्रन्थापेक्षया । शब्दग्रन्थेषु निर्दिष्टां शब्दसिद्धिं मनसि कृत्वा तदनुरोधेनैवार्थविवेचनं क्रियतेऽर्थग्रन्थेषु । अतः

शब्दग्रन्थाध्ययनं विना न कोऽप्युपयोगोऽर्थग्रन्थाध्ययनस्य न कापि शक्यता वा । अष्टाध्यायीनाम्ना प्रसिद्धमष्टकं पाणिनीयम् वस्तुतः शब्दग्रन्थ एव । तथापि शब्दसिद्धौ कर्तव्यायां स्थाने स्थाने विशेषतः प्रत्ययविधिसूत्रेष्वर्थनिर्देशस्य कृतत्त्वात्तत्कृतिः सुतरामर्थग्रन्थानां मूलतया बीजतया वा वर्णयितुं शक्यते । पाणिनिसूत्रप्रणयनानन्तरमल्प एव कालावधौ मुनेः पाणिनेर्मातुलकूलं विभूषयता व्याडिना शब्दस्वरूप-शब्दनित्यत्व-द्रव्याभिधायित्वादिविषयानां सम्पूर्णतया विवेचनं कुर्वाणः ‘ संग्रहनामा लक्षश्लोकात्मको ग्रन्थो विरचित इत्युल्लेखो लभ्यते परन्तु न स ग्रन्थोऽधुनोपलभ्यते । केवलं तस्मादुद्धृतानि कतिपयान्येव वाक्यानि समुपलभ्यन्ते येभ्यः सकाशाद्ग्रन्थस्य तस्य योग्यता प्रतीता भवति । व्यडेरनन्तरं कात्यायनप्रमुखैर्वार्तिककृद्भिर्यानि पाणिनिसूत्रव्याख्यानपराणि वार्तिकानि रचितानि तेषु अर्थवद्धातुरप्रत्ययः प्रातिपदिकम् , स्वं रूपं शब्दस्याशब्दसंज्ञा , समर्थः पदबिधिः , इत्यादीनां सूत्राणां व्याख्यानं कुर्वद्भिरर्थविवेचनपराणि बहूनि वार्तिकानि लिखितानि येषां साकल्येन व्याख्यानं भगवता पतञ्जलिना कृतं महाभाष्यग्रन्थे समुपलभ्यन्ते । महाभाष्ये चर्चितेषु बहुषु शब्दार्थस्वरूपविवेचनपरेषु विषयेषु शब्दस्य नित्यत्वं , अर्थाभिधानस्य स्वाभाविकत्वं , शब्दस्य प्रवृत्तिनिमित्तानि , शब्दानामवान्तरभेदाः इत्यादिविषयास्तथा सूक्ष्मतया विवेचिताः यथा सवार्तिकं महाभाष्यं पाणिनिसूत्रबीजकस्य शब्दार्थवृक्षस्य अङ्कुरतया समवस्थितं वर्तते इति यदि वदामस्तर्हि तत्र नायाति शङ्कालवोऽपि ।

महाभाष्यानन्तरं प्रयातेषु पञ्चवर्षशतकेषु हरिरिति सार्थापरनामा जातो भर्तृहरिवैयाकरणकेसरी येन वाक्यपदीयनामा केवलशब्दार्थविचारात्मकः पाण्डित्यपूर्णः कारिकामयो लिखितोऽर्थग्रन्थो यस्मिन्नित्यशब्दरूपः स्फोटः शब्दब्रह्मतया प्रतिपादितः । शब्दब्रह्मैक्यविज्ञानात्कैवल्यप्राप्तिरिति वदतानेन

व्याकरणशास्त्रं दर्शनरूपेण प्रतिष्ठापितं महाभाष्यप्रणेतुः भगवतः पतञ्जलेरुर्वरितं कार्यं च सुसम्पूर्णतामापादितम् । तथा च लोके प्रसृतः श्लोकः –

**" अहो भाष्यमहो वयमहो वयम् ।**

**मामदृष्ट्वा गतः स्वर्गमकृतार्थः पतञ्जलिः ॥ [152] " इति ।**

भर्तृहरेर्वाक्यपदीयग्रन्थो व्याकरणशास्त्रगतानामर्थग्रन्थानाम् आदिमो ग्रन्थ आकरग्रन्थ एव तथाप्यध्ययनाध्यापनपरम्परासु न स सिद्धान्तकौमुद्यादिग्रन्थवदध्ययनग्रन्थप्रणालीषु स्थानं लभते । बहुविधान्यत्र विषये कारकाणि स्युः । प्रथमं कारणं नूनमस्य दुर्बोधता । द्वितीयं तु गुरुमुखाद्भाष्यान्तशब्दग्रन्थाध्ययनकर्मणि व्यतीतेषु द्वादशाधिकवर्षेषु साहजिकी अप्रवृत्तिरेवार्थग्रन्थाध्ययनं प्रति कदाचिद्भर्तृहरिबौद्धधर्मपक्षपाती स्यादिति मतिरपि तद्ग्रन्थाध्ययनं प्रत्यप्रवृत्तेः कारणं स्यात् । वैयाकरणपाठशालास्वपि न सर्वासु पाठशालास्वर्थग्रन्थाः पाठ्यन्ते किन्तु कतिपयास्वेव । समुपलभ्यमाने त्रिकाण्डात्मके वाक्यपदीये शब्दार्थस्वरूपं शब्दार्थविवेचनं शब्दस्यार्थदृष्ट्या बहुविधाः प्रकारा इत्यादिविषयाः साकल्येन विवेचिताः । शब्दब्रह्मनिरूपणमारभ्य स्वतन्त्रप्रबन्धत्वेन विरचितः अस्मिन् ग्रन्थे तृतीयं काण्डं स्त्रियाम् , उपमितं व्याघ्रादिभिः सामान्यप्रयोगे अतिशायने तमविष्ठनौ इत्यादिसूत्राणां विवरणरूपतया रचिता नूनं जैननिर्युक्तसदृशी कतिपयसूत्रव्याख्यानपरा सूत्रवृत्तिरेव भाति । भर्तृहरिचिरचितेति भागवृत्तिग्रन्थस्य निर्देशो बहुषु ग्रन्थेषूपलभ्यते । कदाचिच्चतुर्दशसर्गुद्देशात्मकं वाक्यपदीयस्य तृतीयं काण्डमपि पाणिनिसूत्राणां न साकल्येन किन्तु भागशः वृत्तिः कुर्वद्भागवृत्तिनाम्ना तदानीं प्रसिद्धं स्यात् । इदानीन्तनास्तु

---

[152] **प्रचलितवचने ।**

पण्डितविमलमतिनाम्ना जैनवैयाकरणेन भागवृत्तिर्लिखितेति प्रतिपादयन्ति । पाठसम्प्रदायेऽनधिगतसम्यक्पदत्वाद्वाक्यपदीयस्य वह्न्यष्टीका उपलभ्यन्ते । केवलं हेलाराजपुण्यराजकृता प्राचीना तथा अर्वाचीना भावप्रदीपनाम्नी चोपलभ्यन्ते ।

भर्तृहरेरनन्तरं भट्टोजिदीक्षितकालपर्यन्तं शब्दविचारपरेषु काशिका-न्यासपदमञ्जर्यादिषु भाषावृत्तिप्रक्रियाकौमुदीप्रकाशादिषु कुत्रचित्स्थलेष्वर्थ-विचारं कुर्वत्सु लिखितेष्वपि बहुषु ग्रन्थेषु न कोऽपि यथार्थनामा अर्थविचारग्रन्थो लिखितः समुपलभ्यते । भट्टोजिदीक्षितास्तु समधिगत-भाष्यकैयटरहस्याः समधीतकाशिकान्यास-पदमञ्जर्यादिग्रन्थाः सुसमीक्ष्य भर्तृहरेर्वाक्यपदीयग्रन्थं प्रविवेच्य च तद्गतानर्थविषयकान्मौलिक-सिद्धान्तान्संगृह्य च तस्मात्साररूपं सर्वं वस्तु बहुलाघवतः प्रणिन्युर्वैयाकरणसिद्धान्तकारिकाग्रन्थं द्वासप्ततिकारिका-परिमितम् । अतीव लघुभूतमिमं ग्रन्थं परम्परागतमुखोद्गतव्याख्यानं विना अतीव दुःखबोधमिमं कारिकाग्रन्थं शिष्यसुखावबोधाय व्याचिख्यासुर्भट्टोजिभ्रातुः सुगृहीतनाम्नो रङ्गोजिभट्टस्य तनूजः कौण्डभट्टः कारिकाव्याख्यारूपं वैयाकरणसिद्धान्तभूषणं प्रणिनाय । ग्रन्थेऽस्मिन् पदार्थव्याख्यानग्रन्थेषु भूषणभूते निर्णयनामधेयानि धात्वर्थनिर्णयादीनि चतुर्दशप्रकरणानि विरचितानि येषु फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः , इत्यादीनामेकविंशतिकारिकाणां व्याख्यानरूपो धात्वर्थनिर्णयो , वर्तमाने परोक्षे श्वः इत्यादिकारिकाद्वयव्याख्यानरूपो लकारार्थनिर्णयः , अन्ते च " **वाक्यस्फोटोऽतिनिष्कर्षे**[153]" इत्यादीनां चतुर्दशकारिकाणां व्याख्यानरूपः स्फोटनिर्णय इत्येवं निबद्धाश्चतुर्दश निर्णयाः ।

---

[153] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ.१ ।**

कौण्डभट्टकृतवैयाकरणभूषणसारोपरि ‘ **हरिराम केशव काले** ’ एतन्नामकेन पण्डितेन काशिकानाम्नी टीका व्यलेखि। तदन्ते १८५४ इत्ययं वत्सराङ्को निर्दिष्टः। काशिकाटीकायां भैरवमिश्राणां गौरवपुरःसरम् उल्लेखो कृतोऽस्ति । ते इमे भैरवमिश्राः प्रयोगक्षेत्रनिवासिनस्तथाभट्टनागेश-कृतग्रन्थानामुपरि विद्वत्ताप्रचुरिका लिखन्तो महावैयाकरणा महानैयायिकाश्च भूत्वा काशिकाटीकाकृतो हरिरामस्य गुरवः स्युः। वैयाकरणभूषणसारादनन्तरं प्रखरपाण्डित्यभरितोऽर्थविचारग्रन्थो नागोजीभट्टविरचिता मञ्जूषैव । सेयं मञ्जूषा वृहन्मञ्जूषा , लघुमञ्जूषा , परमलघुमञ्जूषा चेति प्रकारत्रयेण लिखिता । सोऽसौ मञ्जूषाग्रन्थोऽधुनातनासु पाठशालासु पाठ्यार्थप्रक्रियाग्रन्थेषु श्रेष्ठतमत्वेन गण्यते । शेखरान्तग्रन्थानां सामीचीन्येनाध्ययने संवृत्ते सति ततोऽर्थविचारात्मकस्य प्रकृतमञ्जूषा-ग्रन्थस्याध्ययनं क्रियत इत्येवं सम्प्रदायः । प्रकृतमञ्जूषाग्रन्थस्यार्थ-विचारात्मकस्य संग्रहो महत्त्वं च अग्रिमकारिकासु व्यक्तं भवेत्।

“ **शब्दार्थकल्पवृक्षस्य बीजं सूत्रं हि पाणिनेः।**
**मृद्भिर्वार्तिकरूपाभिभाष्यरूपेण वारिणा ।।**
**संवृद्धं महता वृक्षस्वरूपेण स्थितं खलु।**
**ग्रन्थे भर्तृहरेर्वाक्यपदीयेऽर्थप्रकाशके ॥**
**तस्य शाखापर्णमयं वैयाकरणभूषणम्।**
**पुष्पाणि लघुमञ्जूषावाक्यानि सुरभीणि च ।।**[154] ” इति।

व्याकरणशास्त्रमिदं शब्दशास्त्रमित्युच्यते लोके । अथापि शब्दार्थज्ञानोभयमालम्ब्य संप्रवृत्तं शब्दशास्त्रमिति ज्ञेयम् । कः कोऽपि मनुष्यप्राणी स्वमनोगतान् विचारान् कस्मैचिदन्यस्मै बोधयितुमुत्सुको दृश्यते।

---

[154] **मञ्जूषाग्रन्थे अग्रिमकारिकासु।**

तदर्थं च स्वीयकर्मेन्द्रियैः प्रयतते । व्यवहारे कस्याश्चिदेकस्या व्यक्तेर्मनसो द्वितीयव्यक्तेर्मनसा सह साक्षात्सम्बन्धो भवितुं न शक्यः । अतः स्वमनोगतान् विचारान् परं प्रति बोधयितुं स्वीयकर्मेन्द्रियाणां व्यापारः कर्तव्यो भवति । स च व्यापारो द्वितीयव्यक्तेर्ज्ञानेन्द्रियेण गृह्यते । सोऽयं व्यापारो बोधयितुर्मुखनिर्गतध्वनिद्वारा भूत्वा तस्य व्यापारस्य अन्यव्यक्तेः कर्मेन्द्रियेण ग्रहणे जाते तादृशग्रहणस्य शब्दज्ञानमिति वदन्ति । वस्तुतः श्रोत्रेन्द्रियग्राह्यो ध्वनिरथ च शब्द इत्युभौ यद्यपि पर्यायशब्दौ तथापि अर्थयुक्तध्वनिविषये ‘ **शब्द** ’ इत्याकारकशब्दस्य प्रयोगः शास्त्रीयवाङ्मये क्रियते । व्याकरणशास्त्रस्य ‘ **शब्दानुशासनम्** ’ इत्येवं यो व्यवहारः कृतो भाष्यकारैस्तत्रत्यो यः शब्दाशब्दस्तस्यार्थयुक्तः शब्द इत्येवार्थो-ऽभिप्रेतोऽस्ति ।

आत्मनो विचारान् परं प्रति बोधयितुं प्रयुक्तानां साधनानां मध्ये शब्द इत्याकारकं मुख्यं साधनमिति जेगीयते । अर्थात् यं विचारं बोधयितुं यः शब्दः उच्चार्यते स शब्दस्तस्य विचारस्य वाचको भवति । एतस्य विचारस्यैव ‘ शब्दस्य अर्थः ’ इत्येवं व्यवहारः क्रियते । अर्थ इत्येवं शब्दः **‘ ऋ गतौ ’** इति धातोः साधितः । स शब्दो यद्वस्तूद्दिश्यानुधावति तद्वस्तु अर्थशब्देना-भिधीयते । तस्मात् **‘ शब्दानुशासनम् ’** इति भाष्यप्रयोगे शब्द इत्ययं शब्दोऽर्थविशिष्टः शब्दः इत्यस्मिन्नेवार्थे शास्त्रे प्रयुज्यते ।

यदातीव पुरातनकालेऽभीप्सितफलप्राप्तौ यज्ञादिकर्माण्यारभ्यन्त श्रद्धावन्त आस्तिकाः । तादृशकर्माचरणकाले च ऋषिदृष्टानपौरुषेय-वेदमन्त्रानुचार्य्य तत्तद्देवतानां स्तुतिमकार्षुः । तदानेन सूक्तेनैषैव देवता स्तोतव्या पूजनीया चेति कल्पसूत्रकारा उपदिशन्तीत्यत्र तेषां कोऽभिप्रायः , तत्तद्देवतायास्तत्तत्सूक्तस्य च परस्परं कः सम्बन्धः सहैष तत्तन्मन्त्रज्ञानमपेक्षितमिति **“ योऽग्निष्टोमेन यजते य उ चैनमेवं वेद ”**

“ **इत्यादिविषयिण्यामाकाङ्क्षायां संजातायां तच्छान्त्यै मन्त्रार्थज्ञानमावश्यकम् इति मन्यन्ते स्म** ” । महाभाष्यकारैरपि मन्त्रपाठेन “ **योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद** ” इत्यादितैत्तिरीयसंहितादि-वाक्यान्युद्धृत्य मन्त्रार्थज्ञानमवश्यम् अपेक्षितम् इति मन्त्रद्रष्टृणामृषीणामिति स्पष्टं प्रतिपादितम् । महाभाष्यकारादष्टभ्यः शतकेभ्यः प्राक्काले लिखिते निरुक्तग्रन्थे यास्काचार्यैः ‘ **स्थाणुरयं भारहारः किलाभूत् । अधीत्य वेदं न विजानाति योऽर्थम्** [155] ’ इत्यादिवचनैर्धर्मानुष्ठानस्वरूपभूतानि स्वर्गसंपादयितृणि यज्ञादिकर्माणि अर्थज्ञानपुरःसराण्येवानुष्ठेयानीति व्यक्तमेवानुशिष्टम् । लोके तावद्-यज्ञादिक्रियाणां तत्साधनानां वा ज्ञानसंपत्त्यर्थमेव मुख्यतः शब्दानां प्रवृत्तिर्जायते । अतो धातव एव शब्दानां मूलस्वरूपं प्रत्येकं नाम च धातुनिष्पन्नमेव भवितुमर्हतीति सिद्धान्तः प्रस्थापितः ।

अथ च वेदग्रन्थघटकशब्दागमसाधनमिति निरुक्तकारैरेकार्थ-पराणामनेकशब्दानां तथा अनेकार्थपराणां वा वैयक्तिकशब्दानां श्रेणीर्विलख्य धात्वादिप्रकृतिकथनपूर्वकं व्युत्पत्तिर्वर्णिता । वेदान्तगतविशिष्टशब्दानामर्थान् मनसि गृहीत्वा तादृशार्थशब्द-साधनानुकूलस्तादृशवर्णघटितो धातुरेव योग्यः इति कल्पयित्वा तत्तच्छब्दस्य तत्तद्धातोः सकाशाद्व्युत्पत्तिकथनं निरुक्तग्रन्थानां मुख्यं कर्तव्यं विद्यत इति कृत्वा तादृशग्रन्थानां निरुक्तग्रन्थत्वेन वेदाङ्गेषु स्थानं दत्तमस्ति । तथैव प्रकृति, प्रत्यय , आगम , आदेश , इत्येतेषामर्थानुरूपां कल्पनां कृत्वा शब्दसिद्धिं कुर्वतां ग्रन्थानां व्याकरणम् इत्येवं नामधेयं समर्पितम् ।

---

[155] **निरुक्ते ।**

सुप्प्रत्ययप्रकृतिभूतप्रातिपदिकानां ‘ **अव्युत्पन्नसर्वनामाव्यय-समासकृत्तद्धितान्ततेति षड्विभागाः पाणिनिसम्मता दृश्यन्ते** ’ **इति** । तथा तिङ्प्रत्ययप्रकृतिभूतधातूनां भूवादिदशगणा णीजन्तसन्नन्तयङ्न्त-नामधातव इति पञ्चधा आलक्ष्यते । प्रातिपदिकादुत्पद्यमानानां सुब्विभक्तीनां प्रथमाद्वितीयेत्यादिसप्तमीपर्यन्ताः सप्त प्रकाराः कृताः सन्ति । प्रत्येकं सुब्विभक्तिः , एकवचनं ,द्विवचनं , बहुवचनं चेति त्रिधा विभक्ता । तथा धातुभ्यो जायमानानां प्रत्ययानां विकरणप्रत्ययाः लकारार्थप्रत्ययाश्चेत्येवं मुख्यतो द्विधैव विभागः स्वीकृतः । किञ्च तादृशप्रत्ययानां तेनाचार्येण आगमा आदेशाश्च विहिताः । तत्र आगमस्यावयवरूपत्वात्तस्मिन् कृतेऽपि मूलशब्दार्थे नेषदपि विशेषो जायते । तथा आदेशोऽपि स्थाने जायमानः स्थानिसदृशत्वात् ‘ **गुरोः स्थाने शिष्यः** ’ इति न्यायेन स्थान्यमर्थमे-वाभिधत्ते । एवं लोपस्यापि आदेशरूपत्वात्प्रत्ययलोपेऽपि न तदर्थो लुप्तो भवतीति ‘ **प्रत्ययलोपे प्रत्ययलक्षणम्** [156]’ इत्यनेन सूचितम् ।

धातुप्रातिपदिकरूपद्विविधप्रकृतीनां भिन्नभिन्नार्थकप्रत्ययसंयोजनेन भाषाघटकसर्वपदानि संसाध्य तेषां पदानां सुबन्ततिङन्तेत्येवं द्वावेव मुख्यौ विभागौ प्रदर्शितौ । तत्रैते तिङन्तशब्दाः पूर्ववैयाकरणप्रोक्ताख्यातशब्दा एव भवन्ति । सुबन्तशब्देषु नामोपसर्गनिपातेति पूर्ववैयाकरणप्रोक्तविविधशब्दानां समावेशो भवति । यद्यपि पाणिन्याचार्येण उपसर्गनिपातयोः प्रातिपदिकेषु समावेशः कृतस्तथापि प्राचीनवैयाकरणस्ते उपसर्गनिपाताः प्रातिपदिकात्पृथक्त्वेन गृहीत्वा आसन् । तत्र च पूर्ववैयाकरणानां कश्चनहेतुरासीत् । स च हेतुः पाणिनिना यद्यपि स्पष्टं नोक्तस्तथापि चादयोऽसत्त्वे , उपसर्गाः क्रियायोगे , अधिपरी अनर्थकौ इत्यादिसूत्रेभ्यः तथा

---

[156] **पाणिनीयाष्टाध्याय्यां १.१.६२ ।**

धातुभ्यः प्राक् भिन्नभिन्नोपसर्गसमभिव्यहारे सति धातुभ्यो भिन्नभिन्नोऽर्थबोधो जायते इति प्रतिपादकेभ्यः " **उपाद्यमः स्वकरणे सम्माननोत्सञ्जनाचार्यकरण**[157] **इत्यादिसूत्रेभ्यश्च स हेतुर्व्यक्तो भवति** " । एतद्विषये " **न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः**[158] " इत्येवं निरुक्तवाक्यमपि विचारणीयं भवति । ते इमे उपसर्गाः घटपटादिशब्दवन्न स्वातन्त्र्येण अर्थान् प्रतिपादयन्ति । किन्तु यैस्ते संयोजिता भवन्ति तादृशक्रियावाचकशब्दार्थानामेव वैशिष्ट्यं दर्शयन्ति । अतः क्रियानिष्ठविशेषगुणो वैशिष्ट्यं वा तेषामर्थो भवति ।

निपातोपसर्गयोः स्वरूपं पाणिनिसम्मतमित्यनुमीयते । यतः " **चादयोऽसत्त्वे**[159] " इति सूत्रेण अद्रव्यार्थकानां चादीनां निपातसंज्ञा विदधाति । अयमर्थः सत्त्वं द्रव्यं लिङ्गसंख्याकारकान्वितं द्रव्यम् । घटादयः शब्दाः एकत्वविशिष्टं पुंस्त्वविशिष्टं कर्तृत्वादिकारकविशिष्टं च कम्बुग्रीवादिमन्तमर्थं प्रतिपादयन्तो द्रव्यार्थका इत्युच्यन्ते । एवं समुच्चयप्रकर्षादयः शब्दा अपि लिङ्गसंख्याकारकविशिष्टं समुच्चयाद्यर्थमभिदधतो द्रव्यार्था एव भवन्ति । यदा च तादृशः समुच्चयाद्यर्थाश्चादिशब्दैः प्रतिपाद्यन्ते तदा शब्दशक्तिस्वभावात् लिङ्गसंख्याद्यनन्वितत्वेन गम्यन्त इति चादयः शब्दाः अद्रव्यार्था भवन्तीति तादृशश्चादयः शब्दा निपातसंज्ञाः लभन्त इति तदर्थात् । तथा ' **सुः पूजायाम्** [160]' इत्यादिसूत्रेषु प्रतिपादितानां पुजाद्यर्थानां क्रियान्वयित्वे सति प्रपरेत्याद्यव्ययानि उपसर्गा इत्युच्यन्ते । नामर्थान्वयित्वे तु

---

[157] **पाणिनीयाष्टाध्याय्यां १.४.५६ ।**

[158] **निरुक्तवृत्तौ ।**

[159] **पाणिनीयाष्टाध्याय्यां १.४.५७ ।**

[160] **पाणिनीयाष्टाध्याय्याम् १.४.९४ ।**

कर्मप्रवचनीयत्वेन व्यवह्रियन्ते । एवं च ‘ **असत्त्वे** ’ इत्युक्तेर्निपातो-पसर्गाणामर्थवत्त्वं नास्तीति कथनमयुक्तम् । किञ्च तत् प्राचीनवैयाकरणानां पाणिनेश्चापि सम्मतं नेति बोध्यम् ।

पाणिनिना प्रदर्शितेषु प्रातिपदिकानां षट्प्रकारेषु तथा धातूनां पञ्च प्रकारेषु चार्थप्रतिपादनविषये कथं भिन्नता भवतीतीदानीमवलोकयेम । शब्दानां सत्त्वं क्रिया चेति द्वावेव मुख्यावर्थौ । तत्र सत्त्वमित्यर्थे द्रव्यशब्दोऽपि प्रयुज्यते । क्रियेत्यर्थे च ‘ **भाव** ’ इति इमं शब्दमपि प्रयुञ्जते । तत्र नामरूपप्रातिपदिकेभ्यो नित्यं द्रव्यस्यैव बोधो जायते । सर्वनामशब्दैरपि द्रव्यमेवावगम्यते । परं स द्रव्यरूपोऽर्थः सांकेतिकद्रव्यविशेषरूपो घटाद्यर्थवन्न भवति । किन्तु पूर्वे यादृशद्रव्यस्योल्लेखः कृतो भवति तादृशस्यैकानेकद्रव्यस्याथवा स्वतो वक्तुः किम्वा यन्निकटे वक्ति तस्य , अपि वा यमुद्दिश्य किञ्चिद् वक्ति तस्य उपस्थितिं कुर्वन्ति सर्वनामशब्दाः । अव्ययशब्देभ्योऽपि द्रव्यस्य बोधो जायते परं स पूर्वम् उल्लिखितस्यैव द्रव्यस्य परामर्शरूपेण जायते । किञ्च अव्ययेभ्यः परो विभक्तिप्रत्ययो न दृश्यते । कदा कदा दृग्गोचरीभूतोऽपि विभक्तिविशेष एव दृश्यते । सामासिकशब्दा अपि द्रव्यमेव प्रतिपादयन्ति परं ते परस्परं संबद्धयोर्द्वयोस्तदधिकानां वा द्रव्याणामर्थानां च प्रतिपादनं कुर्वन्ति । समासान्ते कश्चिदेकोऽधिको वर्णोऽक्षरं वा कदा दृश्यते तादृशवर्णस्याक्षरस्य वा पाणिन्याचार्येण समासान्त इत्येवं संज्ञा विहिता । ते च समासान्ताः प्रत्ययेष्वेव परिगणिताः । तथापि तेषां स्वातन्त्र्येण अन्यः कश्च अपि अर्थो नैवोक्त इति हेनोर्यादृशसमासानामन्तावयवा भवन्ति तादृशसमासानामेवार्थे तेऽभिदधति नाधिकम् । अत एव ते स्वार्थिकप्रत्यया इत्येव व्यवह्रियन्ते । एवं पाणिनिमतानुसारिभिर्वैयाकरणैः सिद्धान्तः प्रस्थापितोऽस्ति ।

पाणिन्याचार्येण धातुपाठे भू , एध इत्यादयः केवलं धातव एव पठ्यन्ते । ते च धातव भ्वादि , अदादि , जुहोत्यादीत्येवमादिशब्दैर्दशधा विभक्ताः । सैव दशगणीत्युच्यते । दशगण्यन्तर्गतधातुभ्यः कर्तरि शप् , दिवादिभ्यः श्यनित्येवमादयो विकरणाख्याः प्रत्ययाः विधीयन्ते । तैश्च विकरणैः कतिपयगणस्थोऽयं धातुरिति ज्ञातुं शक्यते । यथा एधते , अत्ति , जुहोति , दीव्यतीत्यादि । दशगण्यन्तर्गतधातुभिः भवनं करणं गमनं पचनम् इत्येवमादिसामान्यक्रिया विशेषक्रिया च उच्यते । तथा प्रयोजक-विशिष्टक्रियां , इच्छार्थविशिष्टक्रियां , क्रियासमभिहारविशिष्टक्रियां चाभिदधाना णिच्-सन्-यङ्-प्रत्ययान्ता धातुघटितधातवोऽपि आचार्येणोक्ताः । एवं नामघटितधातवोऽप्युक्ता इति बोध्यम् ।

नामाख्यातोपसर्गनिपाता एते सर्वेऽर्थवन्तो भवन्ति अथ च तेषु प्रत्येकं प्रकृतिप्रत्यय इत्येवं भागद्वयं वर्तत इत्यपि साधितमुपरि । प्रकृतिप्रत्ययोरर्थः किं शब्दवाच्यत्वेन मनस्ययाति किंवा सूचकत्वेनेत्येतद्विषये पाणिनिसूत्रैः किमपि निष्कष्टुं न शक्यते । निपाता उपसर्गाश्चेति द्वौ प्रकारौ स्वतन्त्राविति पूर्ववैयाकरणैः स्वीकृतमिति तत्प्रतिपादितोऽर्थः द्रव्यस्वरूपः क्रियास्वरूपो न भवतीति न शब्दवाच्यत्वेन मनस्ययाति किन्तु तैः सूचितो भवतीति वक्तुं शक्यम् ।

भर्तृहरेर्वाक्यपदीयग्रन्थः काण्डत्रयात्मकः । तत्र प्रथमं काण्डं प्रायस्तत्त्वज्ञानप्रतिपादनपरम् । लोके तावत्स्वमनोगतान् विचारान् परं प्रत्यावेदयितुं शब्दप्रयोगः क्रियते । एतादृशशब्दप्रयोगकरणसमये यादृशी कल्पना मनसि भवति , या चान्यस्य ज्ञाता भवतु इति धिया शब्दोच्चारणक्रिया प्रारभ्यते , तथा या ‘ **कर्मेन्द्रियेण ध्वनिग्रहणादनन्तरं स्मृतिरूपेण स्थातुं शक्नोति** ’ , एवम् आत्मिकायाः कल्पनाया एव भर्तृहरिणा ‘ **स्फोट** ’ इति व्यवहारः कृतः निरुक्तकल्पनाया

विशिष्टविधिपरवाक्यार्थरूपत्वादखण्डवाक्यस्फोट इत्येवं व्यवहारः कृतः शास्त्रे। अर्थादियमखण्डवाक्यस्फोटाभिधेया काचनेका विशिष्टा शब्दशक्तिरेव भवति यां चावलम्ब्यैव जगतः सर्वे व्यवहाराः प्रचलन्ति । सेयं शक्तिरेव ' **शब्दब्रह्म** ' इति शब्देनोच्यते । वादरायणादिग्रन्थोक्ततत्त्वज्ञानेनेव स्फोटज्ञानेनैव मोक्षः संपद्यत इति चोक्तम्।

द्वितीये काण्डे दिक्कालाद्युपाधिवशादन्यथा भासमानस्य अखण्डवाक्यस्फोटस्य विवेचनं कृतम् । तथैव प्रत्ययोपसर्गकर्मप्रवचनीय-निपातानां द्योतकत्वमित्येषोऽर्थः सिद्धः कृतः ।

तृतीये काण्डे तु शब्दार्थविचारोऽतीव सामीचीन्येन कृतोऽस्ति । तदेतत्तृतीयं काण्डं प्रकीर्णककाण्डमित्युच्यते । एतस्मिन् काण्डे चतुर्दश समुद्देशाः सन्ति । एतन्मध्येऽर्थविचारदृष्ट्या महत्त्ववतां कतिपयानां पाणिनिसूत्राणां सुन्दरं विवेचनं कृतमस्ति। विशेषतः शब्दानामर्थो जातिर्वा व्यक्तिः वेति विषये विवेचनं कृतम्। तथा शब्दानामथ सह सम्बन्धः कीदृशः कथं च वर्तत इत्येतद्विषये विवेचनं कृतं विद्यते । तथैव गुणक्रिययोरपि विवेचनं कृतम् । अनन्तरं च संख्या वचनं परस्मैपदात्मनेपदे लिङ्गं च इत्येतेषाम् अर्थदृष्ट्या विचारः कृतोऽस्ति। भर्तृहरिणा नित्यशब्दापरपर्यायस्य स्फोटस्य प्राधान्यं दत्त्वा वाक्यपदीयग्रन्थे शब्दार्थस्य विचारोऽकारि । व्याकरणशास्त्रमिदं शुद्धाः शब्दाः के के च अशुद्धाः इति ' यथा कथंचित् शुद्धाशुद्धशब्दस्वरूपमावेदयन्न केवलं शब्दशास्त्रं ' , किन्तु यथातथ्येन शब्दस्वरूपं बोधयित्वा तच्चिन्तनेन ध्यानेन च शब्दब्रह्मज्ञानं ददत् तद्द्वारा मोक्षप्राप्तिकरत्वाद्दर्शनस्वरूपमपि तदस्तीति संसाधितं भर्तृहरिणा।

वैयाकरणभूषणं वैयाकरणभूषणसारश्चेत्येतौ ग्रन्थावर्थग्रन्थत्वेन वाक्यपदीयापेक्षया अपि अधिकं सुगमावुपयुक्तौ चेति यद्यप्यनुभवसाक्षिकं तथापि शास्त्रीयोर्थविचार इत्येषविषयो जात्यैव दुर्बोध इति कृत्वा तदर्थस्य

याथातथ्येनावगमाय सुलभटीकया अपेक्षा भाति स्म । अतस्तदुपरि मतोमज्जालघुभूषणकान्तिप्रभृतयः टीकाः व्यालेखिषत । परमेताः सम्पूर्णतया नोपलभ्यन्ते ।

कौण्डभट्टश्च भट्टोजिदीक्षितस्य भ्रातुष्पुत्रः । तस्य पिता च रङ्गोजिभट्टः । अनया दिशा एतद्विज्ञातं भवति यद् भट्टोजिदीक्षितस्य परिवारो व्याकरणशास्त्रविचारे प्रसारे च संलग्न आसीत् । भट्टोजिदीक्षितस्य कालः १५६० खीष्टाब्दस्य समन्तरमेव भवेदिति विद्वांसः समामनन्ति । अयमेव कालः कौण्डभट्टस्यापि सम्भवेत् । लाघवदृष्ट्या वृहद्वैयाकरणलघुभूषण-सारयोर्मध्ये लघुभूषणसारस्यैवाधिकः प्रचारः प्रसारश्च वर्तते , अल्पाक्षरयुक्तेऽपि सकलार्थसंग्राहकत्वात् । अपेक्षणीयं हि पुरुषाणामवश्यं हि तद् भवेति यत् सकलार्थप्रतिपादिकत्वेऽपि सूत्रवल्लाघवयुक्तं भवति । अत एवास्यैव भूषणसारस्य सर्वत्र पठन-पाठन-प्रचारः परीक्षाग्रन्थेषु समावेशनं न दरीदृश्यते । ग्रन्थस्यारम्भो अनेन श्लोकपादेन कृतः –

**“ श्रीलक्ष्मीरमणं नौमी गौरीरमणरूपिणम् ।**

**स्फोटरूपं यतः सर्वं जगदेतद् विवर्तते ॥ [161]” इति ।**

समग्रोऽयं ग्रन्थश्चतुर्दश प्रकरणेषु विभक्तो वर्तते । तानि च प्रकरणानि एभिः नामभिः सन्दर्शितानि सन्ति –

**१. धात्वर्थनिर्णयः ।**

**२. लकारार्थनिर्णयः।**

**३. सुबर्थनिर्णयः ।**

**४. नामार्थनिर्णयः।**

**५. समासशक्तिनिर्णयः।**

---

[161] **वैयाकरणभूषणसारस्य मङ्गलाचरणे ।**

**६. शक्तिनिर्णयः ।**

**७. नञर्थनिर्णयः ।**

**८. निपातार्थनिर्णयः।**

**९. त्वादिभावप्रत्ययार्थनिर्णयः।**

**१०. देवताप्रत्ययार्थनिर्णयः।**

**११. अभेदैकत्वसङ्ख्यानिर्णयः।**

**१२. सङ्ख्याविवक्षानिर्णयः ।**

**१३. क्त्वाद्यर्थनिर्णयः ।**

**१४. स्फोटनिर्णयश्चेति ।**

वैयाकरणनये स्फोटादेव जगतः प्रक्रिया विवर्तते। पूर्वं तावद् वाक्यार्थे समुपयुक्तानि अङ्गानि निरूपितानि । अन्ते च अङ्गी स्फोटरूपो निरूपितः । तत्रापि वाक्यस्फोटस्य प्राधान्यं प्रतिपादितम् । प्रसङ्गवशाद् वर्णपदस्फोटयोः स्वरूपं प्रदर्श्य तयोः काल्पनिकत्वं च कौण्डभट्टो निरूपितवान्।

व्याकरणदर्शने श्रीनागेशभट्टकृतायाः परमलघुमञ्जूषायाः स्थानं प्रशस्यं विद्यते । ग्रन्थोऽयं नाम्ना तु वैयाकरणसिद्धान्तलघुमञ्जूषा परमलघुरूपं दृश्यते , किन्तु विषयदृष्ट्यासौ न तथेति ग्रन्थस्यास्य नागेशप्रणीतत्वे कतिपये विचक्षणाः संशेरते। यद्यपि प्रारम्भवाक्ये –

**“ शिवं नत्वा हि नागेशेनानिन्द्या परमा लघुः ।**

**वैयाकरणसिद्धान्तलघुमञ्जूषैषा विरच्यते ॥ [162]” इति ।**

अत्र हि विषयाः संक्षेपेण किन्तु पूर्णतया निरूपिताः सन्ति। सन्त्यत्र -

---

[162] **परमलघुमञ्जूषायां मङ्गलश्लोके ।**

**१. शक्तिनिरूपणम् ।**

**२. लक्षणानिरूपणम् ।**

**३. व्यञ्जनानिरूपणम् ।**

**४. स्फोटनिरूपणम् ।**

**५. आकाङ्क्षाविचारः।**

**६. योग्यताविचारः ।**

**७. आसत्तिविचारः ।**

**८. तात्पर्यविचारः ।**

**९. धात्वर्थनिरूपणम् ।**

**१०. निपातार्थनिर्णयः ।**

**११. दशलकारादेशार्थनिर्णयः।**

**१२. कारकनिरूपणम् ।**

**१३. नामार्थविचारः ।**

**१४. समासादिवृत्त्यर्थनिरूपणम्** इति प्रकरणानि ; यानि हि किरणवल्यां व्याख्यासौकर्याय १९८ खण्डेषु विभक्तानि सन्ति । विषयनिरूपणे ग्रन्थोऽयं वाक्यपदीयेन सह तु सर्वत्र साम्यं भजते , किन्तु वैयाकरणभूषणेन यत्र कुत्र वैषम्यमपि । क्वचित्तु कैयटेनापि । महाभाष्यन्तु ग्रन्थोऽयमुपजीव्यत्वेन गृह्णाति वाक्यपदीये प्रमाणग्रन्थरूपेण । बहुविधविषये यथा धात्वर्थनिर्णये सकर्मकत्वाकर्मकत्वविषये तु स्वकीयं मौलिकमेव रूपमाधत्ते च ।

वैयाकरणपटलेषु विशिष्टं स्थानं धत्ते वैयाकरणतल्लजः तारानाथतर्कवाचस्पतिः । तत्कृतं शब्दार्थरत्नम् इति ग्रन्थः विद्वत्प्रवरैः बहुप्रशंसितम् । तेन आचार्येण ग्रन्थारम्भः एवंरूपेण क्रियते –

**“ अभिवन्द्य जगद्वन्द्यां देवीं वाचामधीश्वराम् ।**
**शब्दार्थरत्नं क्रियते श्रीतारानाथशर्मणा ॥**
**साधुशब्दार्थबोधाय प्रवृता ये महर्षयः ।**
**तद्वाक्यमवलम्ब्यैव शब्दार्थोऽत्र निरूप्यते ॥**
**वैयाकरणसिद्धान्तो दुर्बोधो ग्रन्थगौरवात् ।**
**अल्पायासेन तद्बोधसाधनाय ममोद्यमः ॥**
**सुधियो वङ्गदेशीया न्यायादरपराहताः ।**
**तत्प्रदर्शितया रीत्या शब्दार्थज्ञानतत्पराः ॥**
**तद्बोधनाय यतते मञ्जूषाद्यनुसारतः ।**
**वात्स्यवंशावतंसश्रीकालिदासविदः सुतः ॥**
**शब्देन्दुशेखरे प्रोक्तं यच्चोक्तं शब्दकौस्तुभे ।**
**भूषणादौ च यत् प्रोक्तं तन्मूलं लिख्यतेऽखिलम् ॥**
**इदं मदुक्तं शृण्वन्तु हृदये धारयन्तु च ।**
**कलयन्ति निजं भावं सन्तः सान्त्वेन याचिताः ॥**
**खलाः खेलन्त्यसत्तकैः स्वभावात् निर्मूलेष्वपि ।**
**सरलास्त्वनुकूलाः स्युर्विरलास्तेहि साम्प्रतम् ॥**
**प्रसिद्धे मुग्धबोधस्य तस्य संज्ञानुसारतः ।**
**व्याख्याता पाणिनेः संज्ञा सुबोधाय क्वचिन्मया ॥ [163]”**

ग्रन्थेऽस्मिन् वाक्यकाण्डं पदकाण्डं चेति काण्डद्वयं वर्तते । काण्डद्वयेऽस्मिन् बहुविषयेषु आलोचना वर्तते । ते यथा – **ध्वनि-शब्द-वर्ण-पद-वाक्य-धात्वर्थ-लकारार्थ-निपातार्थ-नामार्थ-कारकार्थ-समासार्थ-**

---

[163] तारानाथतर्कवाचस्पतिकृतशब्दार्थरत्नस्य मङ्गलश्लोके ।

**स्फोटार्थादयः** । सर्वेषु विषयेषु आचार्यैः दार्शनिकमतानि सम्यगालोच्य खण्डनपुरःसरं स्वमतं प्रदर्शितम् ।

गवेषणनिबन्धेऽस्मिन् षडध्यायाः सन्ति । तत्र **प्रथमेऽध्याये** धात्वर्थो विमृष्टोऽस्ति । तत्रादौ मीमांसापक्षतः श्रीमण्डनमिश्रस्य फलमात्रं धात्वर्थ इति मतमुपस्थापितम् । पुनश्च नैयायिकानां व्यापारमात्रं धात्वर्थः , फलावच्छिन्नव्यापारो वा धात्वर्थ इति मतद्वयं प्रदर्शितम् । पुनश्च प्रसङ्गतः कृतेराख्यातार्थत्वादिखण्डनं प्रथमान्तार्थमुख्यविशेष्यकबोधखण्डनं च विधाय सोपष्टम्भं वैयाकरणाभिमतं धात्वर्थं निरूपयता ग्रन्थकृता फले व्यापारे च खण्डशः शक्तिरिति भूषणसारमतम् , फलविशिष्टे व्यापारे व्यापारविशिष्टे फले वा धातोः शक्तिरिति मञ्जूषामतं वाचस्पतिकृतं शब्दार्थरत्नमतं चोपस्थापयता खण्डशः शक्तिवाद एव युक्तिभिः स्थापितः ।

**द्वितीयाध्याये** लडादिलकाराणामर्थाः निरूपिताः । तत्र लादेशानां तिङां कृतौ शक्तिरिति नैयायिकमतं प्रदर्श्य युक्तिभिर्निराकृत्य च तद्विषये मुनित्रयसम्मतिं श्रीभर्तृहरिसम्मतिं च प्रदर्श्य कर्तरि कर्मणि च शक्तिर्व्यवस्थापिता । पुनश्च लडर्थगतं वर्तमानत्वं लिडर्थगतं परोक्षत्वं च परिष्कुर्वता लृड्लेड्लोटामर्था विमृष्टाः । पुनश्च लिङर्थविषये इष्टसाधनत्वस्यैव लिङ्वाच्यतेति शाब्दिकसिद्धान्तः प्रदर्शितः , प्रसङ्गतो नैयायिकानां प्राभाकराणां च मतं युक्तिभिः निराकृतम् ।

**तृतीयाध्याये** नानामतप्रदर्शनपुरःसरं व्याचक्षाणेन नामार्थविषये महिमभट्टस्य , बौद्धदर्शनदीक्षितानां वेदान्तिनां नैयायिकानां चाभिमतिं प्रदर्शयता निराकुर्वता च महाभाष्यानुगुणां मम्मटाचर्यसम्मतिं चोपस्थाप्य , श्रीनागेशमते च प्रवृत्तिनिमित्ततदाश्रययोरेव नामार्थत्वं युक्तिभिः व्यवस्थापितम् । अन्ते च शब्दस्यापि नामार्थत्वे

भाष्यकैयटकौण्डभट्टनागेशतारानाथतर्कवाचस्पतीनां सम्मतिं परिष्कुर्वता षोढा प्रातिपदिकार्थ इति सिद्धान्तितम् ।

**चतुर्थेऽध्याये** सुबर्थनिर्णयप्रसङ्गे पुर्वं कारकविचारः क्रियाविचारश्च प्रस्तुतः । तत्र नानामतानि प्रदर्श्य भाष्याभिमतं दर्शितम् । पुनश्च कर्तृभेदविषये भूषणकृता त्रयो भेदाः संकेतिताः । शुद्धः प्रयोजको हेतुः कर्मकर्ता चेति ।

अग्रे च प्रथमाविभक्त्यर्थविषये कात्यायनमतं निरूप्य , नैयायिकमतं प्रदर्श्य प्रत्याख्यातम् । सम्बोधनप्रथमार्थो विमृष्टः । प्रथमार्थस्य कारकत्वं सुविचारितम् । कर्मभेदान् विस्तरेण निरूपयता तृतीयाविभक्तेरर्थविषये करणस्वरूपमुद्दिश्य नानामतानि दर्शितानि । चतुर्थीविभक्त्यर्थविषये कौण्डनागेशतारानाथतर्कवाचस्पतीनां मतानि उद्धृत्य नागेशमतमेव श्रेष्ठं भाष्यसम्मतत्वाद् इत्युक्तम् ।

पञ्चम्यर्थविषयेऽपादानभेदविषये भूयान् विचारः कृतोऽस्ति । तत्रापादानभेदविषये तद्भेदस्वरूपविषये च प्रायो मतैक्यमेवाचार्याणामिति उपसंहृतम् । सम्प्रदानापादानयोः कारकत्वाकारकत्वविषये या विचार-धारोपस्थापिता , सा अभिनवैव भाति । अन्ते च सप्तम्यर्थाधिकरणस्य स्वरूपं विमृष्टम् ।

**पञ्चमाध्याये** शक्तिस्वरूपं विमृष्टम् । तत्र शक्तिस्वरूपविषये नानामतानि दर्शितानि , प्रत्याख्यातानि च । पुनः वाच्यवाचकरूपा शक्तिः श्रीनागेशाभिमता प्रदर्शिता । तन्मतस्यापि सयुक्तिखण्डनं विधाय बोधजनकतारूपा शक्तिः भूषणसाराभिमता शब्दार्थरत्नाभिमता सिद्धान्तिता । तत्र च सम्बन्धशब्दे सम्बन्धे योग्यतां प्रति योग्यता – इति हरिकारिकापि स्वमते प्रमाण्यतयोपन्यस्ता ।

**षष्ठोऽध्याये** स्फोटनिरूपणं कृतमस्ति। तत्र वर्णानां वर्णसमूहरूपपदानां पदसमूहरूपवाक्यानां वा वाचकत्वमिति विचारे नैयायिकादि-समस्तदार्शनिकानां मतानि उपस्थाप्य विशिष्टयुक्तिभि-र्निराकृतानि।

# प्रथमोऽध्यायः

# प्रथमोऽध्यायः

## धात्वर्थविचारः

कात्यायनप्रातिशाख्ये स्मृतञ्च – “ **क्रियावाचकमाख्यातम्** [164]” । या प्रकृतिः क्रियावाचकभूता तद्भवति धातुरिति । तदुक्तं – “ **धातुर्नाम क्रियावाचको गणपठितः शब्दविशेषः** ” इति । क्रियाविषये उक्तं यत् –

**“ यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।**
**आश्रितक्रमरूपत्वात् क्रियेति व्यपदिश्यते ॥[165] ” इति ।**

अपि चोक्तं –

**“ गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।**
**बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ [166] ” इति ।**

भाष्यकारेण भाषितं – “ **पदान्तरसमभिव्याहारं विनैव साध्यत्वप्रकारक-प्रतीतिविषयः , एकफलोद्देशेन प्रवृत्तपूर्वापरीभूता-वयवकः , सङ्कलनात्मक-बुद्धिविषयीकृतो व्यापारसमूहः क्रिया** [167]” इति ।

‘ **नाम च**[168] **धातुजमाह** निरुक्ते ’- वैयाकरणानां च शाकटायन आह –‘ **धातुजं नाम** ’ इति भाष्यवार्तिकाभ्यां सर्वेषामेव शब्दानां धातुजन्यत्वं सिद्ध्यति । तेषां शब्दानां मूलभूतस्य धातोः कोऽर्थः ? इत्यत्र विवदन्त एव तत्तत्सिद्धान्तानुसारिणः । तत्र केचन फलमात्रं धात्वर्थः ,

---

[164] **कातन्त्र्यवृत्तौ ।**

[165] **भर्तृहरिवाक्यपदीये ३.८.१ ।**

[166] **भर्तृहरिवाक्यपदीये ३.८.८ ।**

[167] **पतञ्जलिमहाभाष्ये ।**

[168] **पतञ्जलिमहाभाष्ये ३/३/१ पृ.२०४ ।**

व्यापारः प्रत्ययार्थः , फलव्यापारौ धातुवाच्यौ , आख्यातार्थः भावना , तत्रैव केचन फलव्यापारौ धातुवाच्यौ आख्यातार्थः कृतिरिति स्वीकुर्वन्ति ।

## ➢मीमांसकमतम्

मीमांसकेषु मण्डनमिश्राः **‘ फलमात्रं धात्वर्थो व्यापारः प्रत्ययार्थः**[169]**’** इत्युद्घोषयन्ति । अयमभिप्रायस्तेषाम् – फलमेव धात्वर्थः । गम्पच्त्यज् इत्यादीनामुत्तरदेशसंयोगादयोऽर्थाः । व्यापारस्त्वाख्यातार्थः । तत्र फलस्यानुकूलत्वसम्बन्धेन व्यापारेऽन्वयः । एवञ्च लडाद्यर्थवर्तमानत्वादि-कालानामपि व्यापार एवान्वयः , एकपदोपात्तत्वात् । प्रतिपादितञ्चैतत् धात्वर्थनिरूपणावसरे खण्डदेवेन भाट्टतन्त्ररहस्ये- **“ मण्डनमिश्राः तावत् विक्लित्त्यादिरूपं फलमेव धात्वर्थः , तदनुकूलफुत्कारादिरूपो व्यापारसंघस्तु सर्वोऽपि व्यापारत्वेन प्रत्ययार्थः , फलस्य च तं प्रति प्रकारत्वमित्याहुः**[170] **”** इति ।

नागेशेनापि मीमांसकमतमित्थमेव प्रतिपादितम् –

**“ यत्तु मीमांसकाः फलं धात्वर्थो व्यापारः प्रत्ययार्थः इति वदन्ति** [171]**”** तत्र **‘ मीमांसकाः ’** इत्यनेन मण्डनमिश्राणामेव ग्रहणम् । अन्येषां मीमांसकानां तु **‘ आख्यातार्थो भावना ’** इति मतं प्रसिद्धमेव । तस्मात् फलमात्रं धात्वर्थ इति मण्डनमिश्रसम्मतिः ।

न च फलमात्रस्य धात्वर्थत्वे **‘ ग्रामो गमनवान् ’** इति प्रयोगापत्तिः , यथा संयोगरूपफलस्य ग्रामे विद्यमानत्वात् ग्रामः संयोगवानिति प्रयोगो भवति , तथैव धात्वर्थसंयोगरूपफलस्य ग्रामे विद्यमानत्वात् । अतएवोक्तं

---

**[169] मीमांसाशास्त्रे मण्डनमिश्रेन ।**

**[170] भाट्टतन्त्ररहस्ये पृ.५८ ।**

**[171] परमलघुमञ्जूषायां धात्वर्थविचारे पृ.४२ ।।**

कौण्डभट्टेन – “ **फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवान् इति प्रयोगापत्तिः संयोगाश्रयत्वात्** [172] ” इति। तस्मात् फलमात्रस्य धात्वर्थत्वं न सम्भवतीति वाच्यम् , तत्र ल्युट्प्रत्ययस्य व्यापारवाचकत्वेन गमनपदस्योत्तरदेशसंयोगानुकूलव्यापारार्थकत्वात् , ग्रामे च व्यापारस्याविद्यमानत्वेन दोषाभावात् । तस्मात् फलमात्रस्य धात्वर्थत्वे न कश्चन दिष इति मण्डनमिश्रस्योद्घोषः।

### ➢मण्डनमिश्रमतखण्डनम्

फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवानिति प्रयोगापत्तेः कथञ्चिद् वारणसम्भवेऽपि गम्यर्थवान् ग्रामः इति प्रयोगापत्तिः ‘ **गमधात्वर्थजन्यसंयोगाश्रयो ग्रामः** ’ इतीष्टप्रयोगानुपपत्तेश्च । उक्तञ्च मण्डनमिश्रमतं खण्डयता खण्डदेवेन –“ **गम्यर्थवान् ग्राम इति प्रयोगस्यैवमप्यापत्तेः , गम्यर्थजन्यसंयोगाश्रयो ग्राम इति प्रयोगानापत्तेश्च** [173] ” इति।

किञ्च प्रत्ययस्य व्यापारार्थकत्वे ‘ **लः कर्मणि न भावे चाकर्मकेभ्यः** [174]’ इति कर्तरि कर्मणि भावे च लकारविधायकपाणिन्यनुशासनविरोधापत्तिः , तेन सूत्रेण कर्तरि कर्मणि लकारविधानद्वारा तयोरेवाख्यातप्रत्ययार्थत्वोपपादनात् । उक्तञ्च नागेशेनापि – “ **लः कर्मणीति सूत्रविरोधापत्तेः**[175] **नहि तेन व्यापारस्य प्रत्ययार्थता लभ्यते** ” इति।

---

[172] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.८३ ।**

[173] **भाट्टतन्त्ररहास्ये पृ . ५८ ।**

[174] **पाणिनीयाष्टाध्याय्यां ३.४.६१ ।**

[175] **परमलघुमञ्जूषायां धात्वर्थविचारे ।**

गच्छति गमिष्यति गमनवान् इत्यादौ प्रतीयमाने व्यापारेऽनेकप्रत्ययानां शक्तिकल्पने गौरवम् , शक्ततावच्छेदकनानात्वात् । अतो लाघवात् धातोरेव व्यापारे शक्तिः स्वीकरणीया , न तु प्रत्ययानामिति ।

ननु व्यापारस्य धात्वर्थत्वे गच्छतीत्यत्र फूत्कारादिप्रतीत्याभावदर्शनाद् व्यापारविशेषबोधं प्रति तत्तद्धातूनां समभिव्याहारस्य कारणतावश्यमेव कल्पनीया , एवञ्च व्यापारस्य धात्वर्थवादिमतेऽप्यनेककार्यकारण-भावकल्पनायां गौरवम् , तथा च गौरवस्योभयोर्मते विद्यमानत्वेन गौरवात् फलस्य धात्वर्थत्वं न सम्भवतीति कथनमयुक्तमेवेति चेत् ? उच्यते –

फलस्य धात्वर्थत्वे स्वत्वध्वंसरूपफलस्य यजिधातुवाच्यत्वात् तेनैव स्वर्गोत्पत्तिसम्भवात् , मध्येऽपूर्वकल्पना मीमांसकसम्मता व्यर्थैव स्यात् । उक्तञ्च खण्डदेवेनापि – " **स्वत्वध्वंसाख्यस्य फलस्य यजिपदार्थत्वे तस्यैव फलभावनाकरणत्वेन स्वर्गसाधनतापत्तेः , स्थायिनस्तस्मादेव स्वर्गोत्पत्युत्पत्तावपूर्वकल्पनानापत्तेश्च** [176] " इति ।

प्रभाकरास्तु फलमात्रं धात्वर्थ अख्यातार्थो भावनेति स्वीकुर्वन्ति । तत्र फलमात्रस्य धात्वर्थत्वं तु खण्डितमेव । आख्यातार्थो भावनेत्यपि न युज्यते , लः कर्मणीति सूत्रविरोधात् । किञ्च ' **कर्तरि कृत्**[177] ' इत्यनुशासनात् कृदन्तस्थले यदि कृतां कर्तृवाचकत्वं भावनाया आक्षेपेण बोध इति स्वीकुर्वन्ति , तर्हि इहाप्याख्यातार्थः कर्ता भावनायाश्चाक्षेपेणैव बोधः – इति स्वीक्रियताम् , किं शक्तिकल्पनया ! न चाक्षेपे तस्याप्राधान्यापत्तिः जातिशक्तिवाद आक्षिप्तायाः व्यक्तेरिव तस्यापि प्राधान्योपपत्तेः । अतः आख्यातार्थो भावनेत्यपि न युज्यते । खण्डितोऽयं सिद्धान्तः महता

---

[176] **भाट्टतन्त्ररहस्ये पृ.५८ ।**

[177] **पाणिनीयाष्टाध्याय्यां ३.४.६७ ।**

समारम्भेण कौण्डभट्टः । तथा चोक्तम् – “ **अपि च मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तु , भावनाया एवाक्षेपेण कृदादिवत् प्रतीतिसम्भवे वाच्यत्वं मास्तु** [178]” इति ।

व्यापारमात्रं धात्वर्थः ’ इति मीमांसकसिद्धान्तोऽपि न समीचीनः । यतोहि – यदि व्यापारत्वसामान्येन व्यापारस्य धातुवाच्यत्वं स्वीक्रियते , तदा सर्वेषां धातूनां समानार्थकत्वापत्तिः । यदि क्रियात्वेन वाच्यता व्यापारस्येति पक्षः ? तदा त्यजिगम्योः समानार्थापत्तिः , त्यजिधात्वार्थरूपायाः पूर्वदेशविभागानुकूलक्रियाया एव उत्तरदेशसंयोगानुकूलक्रियात्वात् , तस्य गम्यर्थत्वेन पर्यायतापत्तिः स्पष्टैव । तत्र क्रिया च पादसञ्चारादिरूपा । तत्तद्रूपेण वाच्यतायां त्वनेकशक्तिकल्पनायां गौरवात् । अतो व्यापारमात्रस्य धात्वर्थत्वं न सम्भवति ।

### ➢आचार्यखण्डदेवमतम्

मीमांसाशास्त्रपारावारपारीणः खण्डदेवस्तु विक्लित्तिजनकव्यापार-समूहरूपपाकपदार्थे विद्यमानं पाकत्वादिसामान्यमेव धात्वर्थ इति स्वीचकार । उक्तञ्च – “ **अतोऽनुभूयमानं पाकत्वं यागत्वादिकमेव तत्तत्फलोपधायकत्वाद् व्यापारवृत्तिसामान्यं पच्यादिशक्यता-वच्छेदकम्** [179] ” इति ।

आख्यातार्थस्तु प्रयत्न एव तेषां मते । अतो व्यापारसामान्यमेवाख्यातार्थ इति पार्थसारथिमिश्राणां मतं खण्डयन्नाह – “ **वस्तुतस्तु तत्तद्फलभेदेन तत्तद्व्यापारभेदेन चानुगतैकभूतशक्यता-**

---

[178] **वैयाकरणभूषणसारे पृ . २८ ।**

[179] **भाट्टतन्त्ररहस्ये पृ.४९ ।**

**वच्छेदकाभावात् , पचति पाके यतते पाकं करोतीत्यादि-विवरणादाख्यातस्य यत्नत्वमेव शक्यतावच्छेदकम्** [180]" इति ।

## ➢खण्डदेवमतखण्डनम्

खण्डदेवमते सामान्यधातोः कोऽर्थः इत्यत्र विचारो न प्रकटितः , यदि तत्तद्धातूनां तत्तदर्थे शक्तिः कल्प्यते चेत् , तर्हि धातोर्नानात्वेनानेकशक्तिकल्पनायां गौरवम् ।

आख्यातस्य यत्नार्थकत्वमप्ययुक्तमेव , ' **लः कर्मणीति**[181] सूत्रस्य कर्तृकर्मणोरेवाख्यातस्य शक्तिनियामकत्वात् । पाके यतते पाकं करोतीत्यादि विवरणानुरोधादपि तस्य यत्नार्थकत्वं न सम्भवति , यतोहि विवरणेऽप्यागतस्य तिप्रत्ययस्य कोऽर्थ इति जिज्ञासायां यत्नाश्रयस्यापि वक्तुं शक्यत्वात् । ' **देवदत्तः पचति** ' इत्यत्राभेदान्वयोऽपि न स्याद् यत्नार्थकत्ववादिमते ।

किञ्च ' **स्ववाच्यवाचकत्वरूपतिङ्समानाधिकरणे प्रथमाविभक्तिर्भवतु** ' इत्यर्थकात् ' **तिङ्समानाधिकरणे प्रथमा** ' इति वार्त्तिकविरोधाद् आख्यातस्य यत्नार्थकत्वं न स्वीकरणीयम् , अपि त्वाख्यातस्य कर्तृकर्मवाचकत्वमेव युक्तम् ।

उक्तञ्च कौण्डभट्टेन – ' **पचति देवदत्तः**[182] ' **इत्यत्राभेदान्वय-बोधदर्शनात्तदनुरोधेन कर्तुर्वाच्यत्वमावश्यकम् , पक्ता देवदत्त इतिवत्** ' ।

---

[180] **भाट्टतन्त्ररहस्ये पृ.६२ ।**

[181] **पाणिनीयाष्टाध्याय्यां ३.४.६९ ।**

[182] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.३० ।**

## ➢नैयायिकमतम्

नैयायिकेष्वपि मतद्वयं दृश्यते तत्र प्राचीननैयायिकाः व्यापारमात्रस्य धात्वर्थत्वं स्वीकुर्वन्ति । तथा चोक्तं व्युत्पत्तिवादे – **" व्यापारमात्रस्य धात्वर्थत्वात्** [183]**" इति** ।

अयमभिप्रायस्तेषाम् – ग्रामं गच्छतीत्यादौ व्यापारमात्रं धात्वर्थः ; फलञ्च द्वितीयार्थः , आख्यातार्थः कृतिः । तत्र द्वितीयार्थस्य फलस्य प्रकृत्यर्थे निष्ठत्वसम्बन्धेन , धात्वर्थव्यापारे चानुकूलत्वसम्बन्धेनान्वयः । धात्वर्थव्यापारश्च प्रत्ययार्थे कृतौ विशेषणम् , प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यात् । एवञ्च - **" ग्रामनिष्ठसंयोगानुकूलव्यापारानुकूलकृतिमान् "** इति बोधः ।

न चैवं व्यापारमात्रस्य धात्वर्थत्वे ' त्यजति गच्छति ' इत्यादौ समानबोधापत्तिः , एवञ्च त्यागादितात्पर्येण गमनादिशब्दस्यापि प्रयोगः स्यात् । तत्र तत्फलविशिष्टव्यापारे धातोः लक्षणास्वीकारेण समानबोधापत्तिवारणमप्ययुक्तम् ; लक्षणास्वीकारे गौरवाद् इति वाच्यम् , तत्तत्फलावच्छिन्नव्यापारेऽनादितात्पर्यकल्पनेनादोषात् । उक्तञ्च गदाधरेण - **" कर्मप्रत्ययासमभिव्याहृत त्यागगमनादिपदस्य तत्तफलावच्छिन्न-व्यापारेऽनादितात्पर्यं कल्प्यते , न तु केवलव्यापारे । अनादितात्पर्यमेव च स्वारसिकप्रयोगनियामकमिति एकार्थतात्पर्येण प्रामाणिकानां स्वारसिको न त्यागगमनादिप्रयोगः** [184] " इति ।

नव्यास्तु फलव्यापारयोः धात्वर्थत्वं स्वीकुर्वन्ति । आख्यातार्थश्च कृतिः , न तु कर्ता , प्रथमान्तपदादेव तल्लाभात् , अनन्यलभ्यस्यैव

---

[183] **व्युत्पत्तिवादे पृ.१८४ ।**

[184] **व्युत्पत्तिवादे पृ.१८६ ।**

शब्दार्थत्वात् । कृतौ शक्तिस्वीकारे लाघवमपि । यतोहि कर्तरि शक्तिः स्वीक्रियते चेत्तदा कर्तृत्वं नाम कृत्याश्रयत्वमिति वक्तव्यम् , तच्च कृतिरूपम् , प्रकृतिजन्यबोधे प्रकारीभूतोऽर्थः भावप्रत्ययार्थः इति नियमात् । एवञ्च कृतिराश्रयभेदात् अनेका , तस्या एव शक्यतावच्छेदकत्वे गौरवम् , शक्यतावच्छेदकभेदात् शक्तिनानात्वप्रसङ्गाच्च । प्रथमान्तार्थमुख्य-विशेष्यकश्च शाब्दबोधः , तत्र फलस्य व्यापारे व्यापारस्य कृतौ विशेषणता । एवञ्च " **चैत्रः पचति** " इत्यादौ - " **विक्लित्तिजनकव्यापारजनक-कृतिमांश्चैत्रः** " इति शाब्दबोधः । उक्तञ्च नैयायिकमतमुपपादयता नागेशेन – " **यत्तु तार्किकाः फलव्यापारौ धात्वर्थः । लकाराणां कृतावेव शक्तिर्लाघवात् न तु कर्तरि , कृतिमतः कर्तृत्वेन तत्र शक्तौ गौरवात् । प्रथमान्तपदेनैव तल्लाघवाच्च** [185] " इति ।

गदाधरेणाप्युक्तम् – " **नव्यास्तु संयोगादिरूपफलविशेषावच्छिन्न-स्पन्दो गम्याद्यर्थः** [186]" इति ।

ननु फलविशिष्टव्यापारे शक्तिस्वीकारे फलस्य पदार्थैकदेशतया , तत्र पदार्थान्तरस्यान्वयो न स्यात् , ' **पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन** ' इति नियमात् , अन्यथा घटत्वे नित्यान्वयविवक्षया नित्यो घट इति प्रयोगापत्तिरिति चेन्न , देवदत्तस्य गुरुकूलमित्यादौ यथा पदार्थैकदेशे गुरौ देवदत्तादीनामन्वयः तथात्रापि कल्पनेनादोषात् । उक्तञ्च – " **व्युत्पत्तिवैचित्र्येण प्रकृते एकदेशान्वयस्वीकारात्** [187] " इति ।

---

[185] **परमलघुमञ्जूषायां धात्वर्थनिर्णये पृ . ५० ।**

[186] **व्युत्पत्तिवादे पृ . १८६ ।**

[187] **व्युत्पत्तिवादे पृ. १८७ ।**

ननु चैवमपि आख्यातस्य कृतौ शक्तिस्वीकारे , तस्याः प्रथमान्तपदोस्थाप्ये आश्रयत्वसम्बन्धेन समवायसम्बन्धेन वा अन्वये **‘ रथो गच्छति ’** इत्यादौ बोधो न स्यात् , कृतेश्चेतनमात्रवृत्तित्वात् रथस्य च अचेतनत्वादिति वाच्यम् ; अचेतनकर्तृस्थक आख्यातस्य व्यापारे लक्षणास्वीकारेणादोषात् । तथा चोक्तं – **“ रथो गच्छतीत्यादौ रथस्याचेतनत्वात् , यत्नशून्यत्वेन व्यापारे आश्रयत्वे वा लक्षणेत्याहुः**[188] ” इति ।

## ➤ नैयायिकमतखण्डनम्

प्राचीननैयायिकाभिमते सिद्धान्ते व्यापारमात्रस्य तु धात्वर्थत्वं खण्डितमेव मीमांसकमतपर्यालोचनावसरे । नव्यनैयायिकाभिमते सिद्धान्ते धात्वर्थमात्रे न कश्चन विरोधः , किन्त्वाख्यातार्थः कृतिः , प्रथमान्तार्थमुख्यविशेष्यकबोधस्तु बहुदोषदूषितत्वात् खण्ड्यते ।

## ➤कृतेराख्यातार्थत्वखण्डनम्

कृतेराख्यातार्थत्वे **‘ रथो गच्छति ’** इत्यादौ व्यापारे तिङो लक्षणा **“ देवदत्तो गच्छति ”** इत्यादौ च , कृतौ शक्तिरित्येकस्मिन्नेव पदे वृत्तिद्वयकल्पने विरोधात् , गौरवाच्च ।

यदि तु इत्थमुच्यते यथा **“ गङ्गायां मीनघोषौ स्तः ”** इत्यत्र युगपदेव वृत्तिद्वयं स्वीकृत्या शक्त्या प्रवाहस्य लक्षणया घोषस्य बोधो भवति , तथैवात्रापि सम्भवति , अतः न कश्चन दोषः इति ।

---

**188 परमलघुमञ्जूषायां धात्वर्थविचारे पृ.५० ।**

तर्हि आख्यातस्य कृतिवाचकत्वे पुरुषव्यवस्था न स्यात् । तथाहि – " **युष्मद्युपपदेसमानाधिकरणे स्थानिन्यपि मध्यमः**[189] " " **अस्मद्युत्तमाः**[190] " इति सूत्रद्वयेन पुरुषव्यवस्थोपपादिता पाणिनिना ।

अस्यायम्भावः तिङ्समानाधिकरणे युष्मदि मध्यमपुरुषः तिङ्समानाधिकरणेऽस्मदि चोत्तमपुरुषो भवति । तत्र समानाधिकरण्यं स्ववाच्यवाचकत्वसम्बन्धेन । तथा चोक्तं - " **भिन्नप्रवृत्तिनिमित्तकानां शब्दानामेकस्मिन्नर्थे वृत्तिः समानाधिकरण्यम्** [191]" इति । एवञ्चाख्यातस्य कृतिवाचकत्वे तस्य युष्मदस्मच्छब्देनोक्तसमानाधिकरण्या-सम्भवात् पुरुषव्यवस्थोच्छिन्ना स्यात् । नागेशेनापि भणितं – " **युष्मदस्मदोलकारेण सामानाधिकरण्याभावात् पुरुषव्यवस्थानापत्तेः** [192]" इति ।

कृतिवाचकत्वे लाघवम् , कर्तृवाचकत्वे गौरवमित्यपि न युक्तम् , नहि कर्तृत्वं कृत्याश्रयत्वम् , रथादावचेतने तस्यासम्भवेनाव्याप्तेः । उक्तञ्च कौण्डभट्टेनापि – " **कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा दण्डः करोति इत्यत्राव्याप्तम्** [193]" इति । तस्मात् कर्तृत्वं कृतिरिति न सम्भवति , येन शक्यतावच्छेदके गौरवम् भवेत् , अपि तु कर्तृत्वमखण्डोपाधिरूपमेकमेव शक्यतावच्छेदकमतो न किमपि गौरवमाख्यातस्य कर्तरि शक्तिस्वीकारे । एवं पचतीत्युक्ते पाककर्ता कः ? इति कर्तृविषयिण्याकाङ्क्षायाः चेतनमात्रे सम्भवात् कर्तृत्वमेवाख्यातस्य शक्यतावच्छेदकम् ।

---

[189] **पाणिनीयाष्टाध्याय्यां १.४.१०५ ।**

[190] **पाणिनीयाष्टाध्याय्यां १.४.१०७ ।**

[191] **वैयाकरणसिद्धान्तकौमुद्याः तत्त्वबोधिनीटीकायां ३९२ तमे पृष्ठे ।**

[192] **परमलघुमञ्जूषायां धात्वर्थविचारे ५१ तमे पृष्ठे ।**

[193] **वैयाकरणभूषणसारे १९४ तमे पृष्ठे ।**

“ **लः कर्मणि च भावे चाकर्मकेभ्यः**[194] ” इति सूत्रेण कर्तृकर्मणोः लकारविधानेन तयोरेवाख्यातवाच्यत्वस्यौचित्याच्च ।

किञ्च लादेशानां तिङादीनां ( आख्यातस्य ) कृतिवाचकत्वे ‘ **गच्छन्तं रामं पश्य** ’ इत्यादौ लादेशत्वेन शतृप्रत्ययस्यापि कृतिवाचकत्वे रामेत्यादौ समवायसम्बन्धेन कृतेरन्वयो न स्यात् , नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इति न्यायात् । तथा चोक्तं गदाधरेण – “ **तादृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयस्याव्युत्पन्नत्वात्** [195] ” इति । अत एवोक्तं नागेशेनापि – “ **पचन्तं चैत्रं पश्य , पचते देवदत्ताय देहीत्यादौ शतृशानजादीनामपि तिबादिवल्लादेशाविशेषेण तेभ्यः कृतिमात्रबोधापत्तेश्च न चेष्टापत्तिराश्रयाश्रयिभावेन कर्मणि सम्प्रदाने च कृतेरन्वयादिति वाच्यम् , नामार्थयोरभेदान्वयोऽव्युत्पन्न इति व्युत्पत्तिभङ्गापत्तेः**[196] ” । तस्मादख्यातस्य कृतौ शक्तिरिति नैयायिकानां सिद्धान्तो बहुदोषदूषितत्वादुपेक्षणीय इति ।

### ➢ कृतेः प्राधान्यखण्डनम्

यत्तु “ **प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तत्र प्रत्ययार्थस्यैव प्राधान्यम्** [197]” इति न्यायेन कृतेः प्राधान्यं धात्वर्थस्य च विशेषणत्वं प्रतिपादितं नैयायिकैः तदपि न समीचीनम् ; तस्य नियमस्यासार्वत्रिकत्वात् । अतएव ‘ **अजा** ’ इत्यादौ टाबर्थस्त्रीत्वस्य विशेषणतयैव प्रतीतिरिति सर्वजनीनोऽनुभवः । उक्तञ्च नागेशेन –“ **तत्रापिप्रत्ययवाच्यस्यैवार्थस्य**

---

[194] **पाणिनीयाष्टाध्याय्यां ३.४.६९ ।**

[195] **व्युत्पत्तिवादे १०७ तमे पृष्ठे ।**

[196] **परमलघुमञ्जूषायां धात्वर्थविचारे ५२ तमे पृष्ठे ।**

[197] **न्यायवचनम् ।**

**प्राधान्यम् , द्योत्यस्य तु अप्राधान्यमेव । यथा ‘ अजा ’ इत्यत्र स्त्रीत्वविशिष्टपशुविशेष इति बोधः [198]”** इति ।

ननु **“ आख्यातं तिङ्वाचकं भावप्रधानम् ”** इत्यत्र भावस्य प्रधानं भावप्रधानमिति षष्ठीतत्पुरुषश्च समासः , एवञ्च प्रत्ययार्थस्यैव प्राधान्यं सिद्ध्यतीति चेत् ? अत्रोच्यते – **“ आख्यातमख्यातेन क्रियासातत्ये ”** इत्यादौ तिङ्न्तेऽप्याख्यातशब्दस्य प्रयोगदर्शनात् , तिङ्न्तस्याप्याख्यातपदेन ग्रहणम् । भावप्रधानमित्यत्र च बहुव्रीहिसमासः , अतः प्रत्ययस्य प्राधान्यं तेनोपपादयितुं न शक्यते । नागेशेनापि भणितं – **“ आख्यातमाख्यातेन क्रियासातत्ये ” इति सूत्रम् आख्यातपदेन तिङ्न्तस्यैव ग्रहणात् । तस्माद् भावप्रधानमित्यत्र बहुव्रीहिः [199]”** इति ।

### ➢प्रथमान्तार्थमुख्यविशेष्यकबोधखण्डनम्

नैयायिकैः स्वीकृतः प्रथमान्तार्थमुख्यविशेष्यकबोधोऽपि न समीचीनः । यतो हि प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे – **“ पश्य मृगो धावति ”** इत्यादौ वैयाकरणनये मृगकर्तृकधावनकर्मकप्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति क्रियामुख्यविशेष्यक-शाब्दबोधः । अत्र धावतीत्यस्य कर्मसंज्ञा भवति , संदर्शनादिक्रियया क्रियापीप्सिततमा भवतीति भाष्ये[200] प्रतिपादनात् । द्वितीयोत्पत्तिस्तु न भवति , प्रातिपदिकत्वाभावात् । कर्मत्वस्य सम्बन्धरूपेण प्रतीतिस्तु भवत्येव । तथा चोक्तं नागेशेन – **“ धावतीत्यस्य प्रातिपदिकत्वाभावान्न द्वितीया , कर्मत्वन्तु संसगमर्यादया भासते [201]”** इति ।

---

**[198] परमलघुमञ्जूषायां धात्वर्थविचारे पृ.५३ , ५४ ।**
**[199] परमलघुमञ्जूषायां धात्वर्थविचारे ५४ तमे पृष्ठे ।**
**[200] पतञ्जलिमहाभाष्ये १.४.३२ , २५७ तमे पृष्ठे ।**
**[201] परमलघुमञ्जूषायां धात्वर्थविचारे ५४ तमे पृष्ठे ।**

तार्किकमते तु धावनानुकूलकृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यद्दर्शनम् , तदनुकूलक्रुतिमांस्त्वमितिबोधः । एवञ्च मृगशब्दाद् द्वितीयापत्तिः , तस्य विशेष्यभूतार्थवाचकत्वात् प्रातिपदिकत्वाच्च । त्वमिति पदाध्याहारेण निस्तारे कृते वाक्यभेदप्रसङ्गः स्यात् । उत्कटधावनस्यैव दर्शनक्रियाकर्मत्वाभिप्रायेण प्रयुक्तात् तद्वाक्यात् प्रथमान्तार्थमुख्यविशेष्यक-बोध इष्टस्य बोधस्याप्यसम्भवाच्च । उक्तञ्च कौण्डभट्टेनापि – “ **तथा च पश्य मृगो धावति** [202]” इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात् । “ **प्रथमान्तमृगस्य धावनक्रियाविशेषस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः** ” इति ।

ननु उत्कटधावनानुकूलकृत्याश्रयो मृग इति विशिष्टार्थवाचकस्य ‘ **धावति मृगः** ’ इति वाक्यस्य कर्मत्वेऽपि ‘ **यत्र संघाते पूर्वो भागः पदं तस्य चेद्भवति तर्हि समासस्यैव** [203]’ इति समासग्रहणकृतनियमात् , वाक्यस्य प्रातिपदिकत्वाभावात् न द्वितीयोत्पत्तिः । वाक्यावयवस्य मृगस्य तु कर्मत्वाभावात् द्वितीयाप्राप्तिरेव । अत एव “ **श्रुत्वा ममैतन्माहात्म्यं , तथा चोत्पत्तयः शुभाः । पश्य लक्ष्मण पम्पायां वकः परमधार्मिकः** [204] ” इत्यादिप्रयोगाः संगच्छन्ते , अन्यथा तत्रापि कर्मत्वापत्तौ द्वितीयापत्तिः स्यादिति चेद् ? अत्रोच्यते –

“ **अनभिहिते**[205] ” इति सूत्रभाष्ये “ **अभिधानन्तु प्रायेण तिङ्कृत्तद्धितसमासैः** ” इति परिगणनप्रत्याख्यानाय प्रतिपादितदिशा मृगस्यापि कर्मत्वापत्तेर्दुर्वारत्वात् । तथाहि तत्र भाष्ये –

---

[202] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.४७ , ४८ ।**

[203] **वैयाकरणसिद्धान्तकौमुद्यां ४८ तमे पृष्ठे ।**

[204] **दुर्गासप्तसत्यां अ.१२ , श्लोक.२४ ।**

[205] **पाणिनीयाष्टाध्याय्यां २.३.१ ।**

“ **कटं भीष्मं कुरु** ” इत्यादौ विशेष्यकटशब्दादुत्पन्नया द्वितीयया कर्मत्वोक्तौ भीष्मशब्दाद् द्वितीया न स्यात् , एवं परिगणनं कर्तव्यमिति परिगणनस्यावश्यकत्वं प्रतिपाद्य “ **नैषः दोषः । अथवा कट एव कर्म भीष्मादयोऽपि । तत्र कर्मणीत्येव सिद्धम्**[206] ” इत्युक्तम् ।

भीष्मत्वावच्छिन्नमपि कर्म , कटत्वावच्छिन्नमपि कर्म । तत्र कटकर्मकत्वाच्छिन्ने कृञ्धात्वर्थे भीष्मकर्मत्वस्यान्वयः । एवञ्च कटपदोत्तरद्वितीयया कटनिष्ठकर्मत्वस्योक्तत्वेऽपि भीष्मनिष्ठकर्मत्वस्या-नुक्तत्वात् , भीष्मपदाद् द्वितीयोत्पत्तिः सम्भवतीति न कर्तव्यं परिगणनमिति भाष्याशयः ।

एवञ्चात्रापि ‘ **धावति मृगः** ’ इति वाक्यस्य कर्मत्वेऽपि मृगस्यापि कर्मत्वमस्त्येवेति तस्य प्रातिपदिकत्वात् द्वितीयापत्तिः ’ समासग्रहणकृतनियमेन तु वाक्यस्यैव प्रातिपदिकत्वनिषेधो न तु अवयवस्य । अतः मृगस्य प्रातिपदिकत्वं कर्मत्वञ्चेति उभयोर्विद्यमानत्वे द्वितीयाविभक्तेर्वारयितुमावश्यकत्वात् । अतः “ **पश्य मृगो धावति** ” इत्यत्र कर्मत्वे द्वितीयापत्त्या प्रथमान्तार्थमुख्यविशेष्यकबोधस्यासम्भवात् , कुत्रापि प्रथमान्तार्थमुख्य-विशेष्यको बोधो न स्वीकरणीय इति । तथा चोक्तं नागेशेन – “ **तस्माद् धावति मृगः इत्यत्रोभयोः कर्मत्वे धावतीत्यस्य प्रातिपदिकत्वाभावात् विषेषणत्वेनान्यत्र निराकाङ्क्षत्वाच्च द्वितीयोत्पत्त्यभावेऽपि मृगशब्दात् द्वितीया दुर्वारैवेत्यवेहि** [207] ” इति ।

---

[206] **पतञ्जलिमहाभाष्ये २.३.१, ४७९ तमे पृष्ठे ।**

[207] **परमलघुमञ्जूषायां धात्वर्थविचारे ५६ तमे पृष्ठे ।**

## ➢वैयाकरणमतम्

वैयाकरणास्तु फलव्यापारयोः धातुवाच्यत्वं स्वीकुर्वन्ति । आख्यातार्थश्च कर्तृकर्मणी । तत्र आख्यातार्थकर्तुः चैत्रादिनाभेदेनान्वयः, फलञ्चानुकूलत्वसम्बन्धेन व्यापारे विशेषणम् आख्यातार्थकर्तुरपि व्यापार एव निरूपकत्वसम्बन्धेनान्वयः । व्यापारमुख्यविशेष्यकश्च शाब्दबोधः , ' **भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि** '[208] इति निरुक्तोक्तेः । तथा चोक्तं कौण्डभट्टेन –

**" फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥[209] " इति ।**

एवञ्च फलव्यापारौ धातुवाच्यौ , आख्यातार्थः कर्तृकर्मणी , व्यापारमुख्यविशेष्यकशाब्दबोधश्चेति वैयाकरणानां सम्मतिः ।

## ➢फलम्

तत्र किं नाम फलमिति जिज्ञासायामुक्तं कौण्डभट्टेन – " **फलं विक्लित्त्यादि** [210]" इति । तस्यायम्भावः यद्यपि –

**" यस्यार्थस्य प्रसिद्ध्यर्थमारभन्ते पचादयः ।**
**तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम् ॥** [211]"

इति भर्तृहर्युक्तिदिशा " **स्वरितञितः कर्त्रभिप्राये क्रियाफले** [212]" इति सूत्रे यदुद्दिश्य धात्वर्थक्रियायां प्रवृत्तिस्तत् फलं क्रियाफलेन गृह्यते , तथाप्यत्र तादृशफलस्वीकारे सकर्मकत्वादिव्यवस्था न स्यात् । यतोहि –

---

[208] **निरुक्ते १/९ ।**

[209] **वैयाकरणभूषणसारकारिकायां सं २ ।**

[210] **वैयाकरणभूषणसारे धात्वर्थविचारे पृ . १४ ।**

[211] **वाक्यपदीये उपग्रहसमुद्देशे का.१८ ।**

[212] **पाणिनीयाष्टाध्याय्यां १.३.७२ ।**

धात्वर्थफलव्यधिकरणव्यापारवाचकत्वञ्चाकर्मकत्वमिति व्यवस्था । एवञ्च धात्वर्थक्रियाप्रवृत्त्युद्देश्यरूपफलस्यात्र धातुवाच्यत्वे **‘ पत्ये शेते ’** इत्यादौ शिङ्धातोरपि सकर्मकत्वापत्तिः । यतोहि तत्र धात्वर्थव्यापारः स्त्रियाम् , तदुद्देश्यं फलञ्च पत्यौ इति , फलान्यधिकरणव्यापारवाचकत्वात् । तस्मादत्र धातुवाच्यं फलं धात्वर्थजन्यत्वे सति धातुजन्योपस्थितीयविषयताश्रयत्वम् । एवं त्यजिधातौ संयोगस्य गमिधातौ विभागस्य न फलत्वम् ; तत्र संयोगविभागयोस्तद्व्यापारजन्यत्वेऽपि धातुजन्योपस्थितीयविषयताश्रयत्वाभावात् । उक्तञ्च नागेशेन – “ **विभागजन्यसंयोगादिरूपे पतत्यादिधात्वर्थे विभागसंयोगयोः फलत्ववारणायोभयम्** [213]” इति ।

### ➢व्यापारः

व्यापारस्य धात्वर्थत्वे विवादाभावेऽपि तत्स्वरूपे दृश्यते मतभेदः कौण्डनागेशयोः । तत्र कौण्डभट्टास्तु साध्यत्वेनाभिधीयमानायाः क्रियाया एव व्यापारत्वं स्वीकुर्वन्ति । भणितञ्च तैः – “ **व्यापारस्तु भावनाभिधा साध्यत्वेन प्रतीयमाना क्रिया** [214] ” इति साध्यत्वप्रकारकप्रतीतिर्विषत्वमेव व्यापार इति कौण्डभट्टाशयः । भर्तृहरिणा उक्तं –

**“ यावत्सिद्धमसिद्धं वा , साध्यत्वेनाभिधीयते ।**
**आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते** [215]” **॥ इति ।**

एवञ्चानेन लक्षणेन ज्ञायते यद् व्यापाररूपा क्रिया द्विविधा – सिद्धस्वभावा , साध्यस्वभावा । तत्र साध्यस्वभावा क्रिया तिङन्तस्थले , सिद्धस्वभावा क्रिया कृदन्तस्थले प्रतीयते ।

---

[213] **परमालघुमञ्जूषायां धात्वर्थविचारे ३९ तमे पृष्ठे ।**

[214] **वैयकरणभूषणसारे धात्वर्थनिर्णये १५ तमे पृष्ठे ।**

[215] **भर्तृहरिवाक्यपदीये ३.८.१ ।**

साध्यस्वभावा क्रिया तत्रैव भवति यत्र ‘ **अस्या अन्वयिनी क्रिया का** ’ इति क्रियान्तराकाङ्क्षा न भवति , यथा ‘ **पचति** ’ इत्यत्र प्रतीयमाना विक्लित्त्युनुकूलव्यापाररूपा क्रिया साध्यस्वभावा । तथा चोक्तं कौण्डभट्टेन – “ **तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपत्वं साध्यत्वम्** [216]” इति ।

क्रियायाः साध्यत्वेन प्रतीयमानत्वे प्रमाणन्तु अनुभव एव । तथाहि पचति पाकः – अत्रोभयस्थले धात्वर्थः विक्लित्त्यनुकूलव्यापाररूपोऽस्ति । किन्तु ‘ **पाकः** ’ इत्यत्र एतदन्वयिनी का इत्यन्वयित्वेन क्रियान्तरस्याकाङ्क्षा भवति , किन्तु ‘ **पचति** ’ इत्यत्र क्रियान्तरस्य नापेक्षा , अतः पचतीत्यत्र क्रियासाध्यस्वभावैव ।

यद्यपि ‘ **पाकः** ’ इत्यादावपि साध्यस्वभावा क्रिया प्रतीयते , अतएव पाक इत्यादिस्थले किंकर्तृकः किंकर्मकः पाकः इत्याद्याकाङ्क्षायाः , तत्र कर्त्रादिकारकाणाञ्चान्वयोपपत्तिः , अन्यथा तु साध्यक्रियायामेव तदन्वयस्य सिद्धान्तिततत्वात् , सिद्धस्वभावक्रियायां तेषामन्वयानुपपत्तिरस्त्येव । एवञ्च पाक इत्यत्र पच्धातुवाच्या क्रिया साध्यस्वभावा , प्रत्ययघञादिवाच्या च सिद्धस्वभावा इति सिध्यति । उक्तञ्च भर्तृहरिणा –

“ **साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।**
**सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धना ॥** [217]” इति ।

वस्तुतस्तु “ **साध्यत्वेन प्रतीयमाना क्रिया एच व्यापारः** ” इत्यत्र साध्यत्वं साधनाकाङ्क्षोत्थापकतावच्छेदकरूपवत्त्वमेव । पाकः इत्यादौ सिद्धत्वज्ञाने साध्याकाङ्क्षावत् , पचतीत्यादौ पचाद्यर्थे साध्यतयावगते किमस्य साधनमिति साधनाविषयाकाङ्क्षायाः सर्वानुभवसिद्धत्वात् ।

---
216 **वैयाकरणभूषणसारे पृ.१७-१८ ।**

217 **भर्तृहरिवाक्यपदीये ३.८.४८ ।**

अतएव पचति भवति इत्यादि संगच्छते। तत्र हि द्वयोः क्रिययोः कथं सम्बन्धः ? इति प्रश्ने भाष्ये उक्तं – " **पच्यादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति** [218]" इति। एवञ्च द्वयोः साध्यसाधनभावसम्बन्ध इति प्रतिपादितं प्रदीपे । तथा चात्र ' **पचति** ' इत्यस्य ' **भवति** ' इति क्रियान्वयाकाङ्क्षोत्थापकत्वात् भवतां मते साध्यत्वं न स्यात् , एतन्मते तु उभयो साध्यत्वं सिद्ध्यति। उक्तञ्च भर्तृहरिणा –

**" प्रयोगार्हेषुसिद्धः सन् मन्तव्योऽर्थोऽविशेषणैः ।**

**प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते ॥** [219]" इति।

## ➢नागेशमते व्यापारलक्षणम्

व्यापारस्य स्वरूपं प्रतिपादयता नागेशेन भणितम् – " **धात्वर्थफलजनकत्वेसति धातुवाच्यत्वम्** [220]" इति। यथा पचादिधातौ फूत्कारादिव्यापाराः धात्वर्थविक्लित्तिजनका धातुवाच्याश्च सन्ति , सर्वेषामेव तेषां व्यापाराणां धातुवाच्यत्वात् । उक्तञ्च – " **अयञ्च व्यापारः फूत्कारत्वाधःसन्तापनत्व-यत्नत्वादितत्तद्रूपेण वाच्यः , पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभव- सिद्धत्वात्** [221] " इति।

ननु पच्धातोरनेकव्यापारवाचकत्वे नानाधर्मावच्छिन्नशक्यता-निरूपितैकधर्मावच्छिन्नशक्ततावत्त्वरूपनानार्थतापत्तिः स्यादिति चेत् ? अत्रोच्यते –

बुद्धिविशेषस्य तत्र शक्यतावच्छेदकस्वीकारेण न नानार्थापत्तिः । अयम्भावः – यथा तदादिशब्दानां ' **घटमस्ति तमानय** ' ' **पटमस्ति**

---

[218] **पतञ्जलिमहाभाष्ये १.३.१, पृ.१२०।**

[219] **भर्तृहरिवाक्यपदीये २.१८३।**

[220] **परमलघुमञ्जूषायां धात्वर्थविचारे पृ.३९ ।**

[221] **वैयाकरणभूषणसारे धात्वर्थनिर्णये १९ तमे पृष्ठे।**

**तमानय** ' इत्यादौ नानाधर्मावच्छिन्नघटादीनां वाचकत्वेऽप्येकबुद्धि-विशेषमवच्छेदकं स्वीकृत्य तत्तद्बुद्धिविशेषोपलक्षिततत्तद्धर्मावच्छिन्ने तदादीनां शक्तिस्वीकारे नानार्थापत्तिर्न भवति , एकस्यैव बुद्धिविशेषस्य शक्यतावच्छेदकत्वात् । तथात्रापि फूत्कारादिसमूहविषयमेकं बुद्धिविशेषं स्वीकृत्य तस्यैव फूत्कारादिनिष्ठशक्यतावच्छेदकस्वीकारेणादोषात् , शक्यतावच्छेदकस्यैकत्वे नानार्थत्वाभावात् इति ।

तस्मात् फूत्काराधःश्रयणाधिश्रयणादिसर्वेषां धातुवाच्यत्वात् , धात्वर्थविक्लित्ति-जनकत्वाच्च व्यापारत्वमक्षुण्णमेव ।

वैयाकरणभूषणसारस्य ' **दर्पण** ' व्याख्यायां यदिदं व्यापारलक्षणं खण्डितं तत्तु न समीचीनम् , युक्तिविरुद्धत्वात् । तथा हि तत्रोक्तम् –

" **अतएव न तज्जन्यत्वे सति तज्जन्यजनकत्वरूपं तत्रान्तरप्रसिद्धं तत् । तदवच्छिन्नस्य धातुवाच्यत्वे साक्षाद् विक्लित्तिजनकान्तिमाग्निसंयोगदशायामेव ' पचति ' इति प्रयोगः स्यात् , न तु अधिश्रयणादिदशायामपि , तेषामन्तिमाग्नि-संयोगेनान्यथासिद्धतया विक्लित्त्यजनकत्वात्** [222]" इति ।

अयम्भावः अन्तिमाग्निसंयोगेन पाकादीनामुत्पत्तेः तदितरेषां फूत्कारादीनां विक्लित्तिं प्रत्यन्यथासिद्धत्वेन विक्लित्त्यादिजनकत्वं न स्यात् । अतोऽभीष्टे व्यापारे व्यापारलक्षणावृत्तित्वेनाव्याप्तिदोषः स्यादित्यर्थः । एवञ्चाधिश्रयणादिव्यापाराणां विक्लित्तिं प्रत्यन्यथासिद्धत्वेन जनकत्वाभाव इति खण्डनकर्तुराशयः ।

---

[222] **वैयाकरणभूषणसारस्य दर्पणव्याख्यायां १६ तमे पृष्ठे ।**

अत्रेदं बोद्धव्यं यत् प्रतिपादितेषु पञ्चस्वन्यथासिद्धेषु एकोऽप्यन्यथासिद्धप्रकारोऽधिश्रयणादीनां नास्ति । तथाहि – अन्यथासिद्धा इत्थं सोदाहरणं व्याख्याता विश्वनाथपञ्चाननेन –

**" येन सह पूर्वभावो कारणमादाय वा यस्य ।**
**अन्यं प्रति पूर्वभावे ज्ञाने यत्पूर्वभावविज्ञानम् ॥**
**जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ।**
**अतिरिक्तमथापि यद् भवेन्नियतावश्यकपूर्वभाविनः ॥**
**एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् ।**
**घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥**
**तृतीयं तु भवेद् व्योम , कुलालजनकोऽपरः ।**
**पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥**[223] "

एतेषां पञ्चानां स्वरूपावलोकनेन इदमेवायाति यद् अन्यथासिद्धं तदेव भवति येन विनापि कार्यसिद्धिः स्यात् । किन्तु प्रकृते अधिश्रयणादिव्यापारं विना विक्लित्तिर्न सिध्यति अतो न तेषां व्यापाराणां विक्लित्तिं प्रत्यन्यथासिद्धत्वम् । यदि तेषामप्यन्यथासिद्धत्वं स्वीक्रियते चेत् , तर्हि घटं प्रति कपालस्यैव कारणत्वं स्यात् , न तु दण्डचक्रकुलादीनाम् ; तेषामप्यन्यथासिद्धानभिज्ञतामेव प्रकटयति ।

सिद्धान्ते तु तेषामन्यथासिद्धत्वाभावात् तेषामन्यथासिद्धत्वाभावाद् विक्लित्तिं प्रति जनकत्वेन , तज्जन्यत्वे सति तज्जन्यजनकत्वमस्त्येवेति न कश्चन दोषः ।

---

[223] **न्यायसिद्धान्तमुक्तावल्यां का.१९-२२ ।**

तस्मात् नागेशमते “ **व्यापारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वरूपम्** [224]” इति , कौण्डभट्टमते “ **साध्यत्वेन प्रतीयमाना क्रिया एव व्यापारः** ” [225] इति ।

## ➢व्यापारविषये सिद्धान्तपक्षः

कौण्डभट्टाभिमत एव व्यापारो युक्तियुक्तत्वात् स्वीकरणीयः । नागेशाभिमतव्यापारस्वीकारे तु नागेशवचनैरेव विरोधः स्यात् । तथा हि सकर्मकत्वाकर्मकत्वस्वरूपविवेचनप्रसङ्गे नागेशेनोक्तम्- “ **क्वचित्तु फलांशभावादकर्मकत्वम् । यथा अस्त्यादौ केवलं सत्तादिरेवार्थः ; फलांशस्य सूक्ष्मदृष्ट्याप्यप्रतीतेः** [226] ” इति ।

यदि तत्र फलांशस्य प्रतीतिर्नास्ति , अतः फलव्यधिकरणव्यापारवाचकत्वमपि नास्तीति चेत् , तर्हि तद्वाच्ये व्यापारे तद्वाच्यफलजनकत्वं कथं स्यात् ! फलांशप्रतीत्याभावे धातुवाच्यव्यापारे धातुवाच्यफलजनकत्वाभावात् , धातुवाच्यत्वे सति धातुवाच्यफलजनकत्वं व्यापारे नास्ति एव इति अव्याप्तिदोषः । अतो अव्याप्तिदोषग्रस्तत्वात् नागेशाभिमतं न युक्तमिति मन्मतम् ।

## ➢फलव्यापारयोर्धातुवाच्यता

“ **फलव्यापारौ धातुवाच्यौ** ” इति वैयाकरणसिद्धान्तसमर्थनोत्सुकैः श्रीमद्भिः कौण्डभट्टैः महता समारम्भेन सिद्धान्तोऽयं सिद्धान्तित आभिर्युक्तिभिः –

---

[224] **परमलघुमञ्जूषायां धात्वर्थनिर्णये १६ तमे पृष्ठे ।**

[225] **वैयाकरणभूषणसारे धात्वर्थनिर्णये ।**

[226] **परमलघुमञ्जूषायां धात्वर्थनिर्णये पृ. ४७-४८ ।**

● **विवरणात्** – विवरणाद् धातोर्व्यापारवाचकत्वं सिद्ध्यति । तथाहि पचति इत्यस्य विवरणं ‘ पाकमुत्पादयति ’ इति । अर्थात् पाकानुकूला भावना तादृश्युत्पादना च । एवञ्च विवरणविव्रियमाणयोः समानार्थकत्वाद् धातोरपि भावनावाचकत्वमावश्यकम् ; विवरणे तस्याः भावनायाः प्रतीतेः ।

न चैवं धातोः भावनावाचकत्वेऽपि तस्य व्यापारवाचकत्वं नास्ति , अतो वैयाकरणैर्व्यापारवाचकत्वं धातोः कथं स्वीक्रियत इति वाच्यम् , व्यापारभावनोत्पादनादिक्रियासु परस्परं भेदाभावात् । तथा चोक्तम् –

**“ व्यापारो भावना सैवोत्पादना सैव च क्रिया ।**
**कृञोऽकर्मकतापत्तेर्नहि यत्नोऽर्थ इष्यते ॥** [227]” इति ।

अत्र क्रियापदस्य यत्नार्थक-कृञ्-धातुना निष्पन्नत्वेन यत्नमात्रार्थवाचकत्वात् व्यापारादिपर्यायित्वं न स्यादिति नैयायिकादीनामाक्षेपं मनसि विधायैव द्वितीयपंक्तिरुद्धृता ग्रन्थकृता । तस्याः अयम्भावः – कृञ्-धातोः यत्नमात्रार्थकत्वे प्रयत्नार्थक-यती-धातोरिव तस्याप्यकर्मकत्वं स्यात् , तस्य सकर्मकता तु सिद्धान्तसिद्धा । अतोऽकर्मकत्वापत्तिभिया ‘ कृञ् – धातोः यत्नमात्रार्थकत्वाभावे व्यापारादिपर्यायित्वं सम्भवत्येव ’।

रथो गमनं करोति[228] ‘ **बीजादिना अङ्कुरः कृतः** ’ इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः ।

● **रथो गच्छति**

धातोर्व्यापारवाचकत्वाभावे ‘ **रथो गच्छति** ’ इत्यत्र प्रयोगासम्भवः नैयायिकाभिमतस्य ‘ **गमनानुकूलकृतिमान् रथः** ’ इति शाब्दबोधस्यासम्भवात् , कृतेश्चेतनमात्रवृत्तित्वात् रथस्याचेतनत्वाच्च ।

[227] **वैयाकरणभूषणसारे का.५ ।**

[228] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.६५ ।**

व्यापारस्य धात्वर्थत्वे तु रथाभिन्नैककर्तृकगमनानुकूलव्यापार इति शाब्दबोधस्य तत्रापि सम्भवात् न दोषः । व्यापारस्तु चेतनाचेतनवृत्तिरित्यत्र नास्ति कश्चन विवादः ।

एवमेव ‘ **देवदत्तो जानाति** ’ ‘ **घटो नश्यति** ’ इत्यादिप्रयोगा अप्यसम्भवाः , ज्ञानानुकूलकृतेः नाशानुकूलकृतेः चोभयत्र अपि असम्भवात् ।

यदि त्वत्र केचिदित्थं विवदन्ते – उक्तेषु प्रयोगेषु कुत्रचिदाख्यातस्य व्यापारे , कुत्रचिदाश्रये , कुत्रचित् प्रतियोगित्वे च लक्षणाश्रयणेन न काप्यनुपपत्तिरिति , इत्थं वाच्याः – यदनेकलक्ष्यतावच्छेदकत्वस्वीकारे गौरवमेव । कौण्डभट्टेनापि –“ **न चैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम् , ‘ रथो गच्छति जानाति ’ इत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वीः , शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववत् गुरुणि सम्भवात्** [229]” इति ।

### ● घटो भवतीत्यत्रापि द्वितीयापत्तिः

व्यापारस्य धात्ववाच्यत्वे ‘ **घटं भावयति** ’ इत्यत्र सत्तारूपफलाश्रयत्वेन यथा कर्मत्वाद् द्वितीयोत्पत्तिर्भवति , तथैव घटो भवतीत्यत्रापि सत्तारूपफलाश्रयत्वेन कर्मत्वापत्तौ द्वितीयापत्तिः । तथा चोक्तम् - “ **किञ्च भावनाया अवाच्यत्वे ‘ घटं भावयति ’ इत्यत्रैव ‘ घटो भवति** [230]’ इत्यत्रापि द्वितीया स्यात् ” इति ।

---

[229] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.६३ ।**

[230] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.६६ ।**

व्यापारस्य धात्वर्थत्वे तु व्यापाराश्रयत्वेन घटस्य कर्तृत्वात् कर्तृसंज्ञया कर्मसंज्ञया बाधो भवति , अतो न तन्मते द्वितीयाद्यापत्तिः । नैयायिकरीत्या तु घटस्य कर्तृत्वमेव न सम्भवति , अनुगतकर्तृत्वस्य तन्मतेऽसम्भवात् । कृत्याश्रयत्वं कारकचक्रप्रयोक्तृत्वं वा कर्तृत्वस्यैव तन्मते सम्भवेन उभयोरपि घटादावसम्भवत्वमेव ।

कौण्डभट्टेनापि उक्तं – “ **न चात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम् , अनुगतकर्तृत्वस्य तन्मते दुर्वचत्वेन घटस्याकर्तृत्वात् कृत्याश्रयत्वस्य कार्कचक्रप्रयोक्तृत्वस्य वा घटादावभावात्** [231]” इति ।

वस्तुतस्तु – ‘ अचेतने घटे कृत्याश्रयत्वरूपकर्तृत्वस्याभावेऽपि , इतरव्यापारानधीनत्वप्रकारकविवक्षाविषयव्यापाराश्रयत्वरूपकारकचक्रप्रयोक्तृत्वमेव कर्तृत्वमिति स्वीकारेण घटादौ तत्सम्भवान्नास्ति काचिद् विप्रतिपत्तिः । सः च व्यापारः क्वचिद् कृतिः , क्वचिच्च संयोगादिरेव । तादृशव्यापाराश्रय एव “ **स्वतन्त्रः कर्त्ता**[232] ” इति सूत्रे स्वतन्त्रपदेन विवक्षितः । तस्मात् ‘ **घटो भवति** ’ इत्यत्र नास्ति कश्चन दोषो व्यापारस्य धात्ववाच्यत्वेऽपीति मम सम्मतिः ।

### ● सकर्मकत्वाकर्मकत्वव्यवस्थोच्छेदापत्तिः

युक्तिरियं फलव्यापारयोरुभयोरेव धातुवाच्यत्वसाधिका । तथाहि फलव्यापारयोर्धात्ववाच्यत्वे धातूनां सकर्मकत्वाकर्मकत्वव्यवस्था न स्याद् । तत्र सकर्मकत्वं नाम स्वार्थफलव्यधिकरणव्यापारवाचकत्वम् । तद्भिन्नत्वञ्चाकर्मकत्वं बोद्ध्यम् । तथा चोक्तम् –

---

[231] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.६७ ।**

[232] **पाणिनीयाष्टाध्याय्यां १.४.५४ ।**

**" फलव्यापारयोरेकनिष्ठतायामकर्मकः ।**

**धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥** [233]" इति ।

एवञ्च फलव्यापारयोर्धात्ववाच्यत्वे धातूनां तदसम्भवमेव ।

ननु **' फलमात्रं धात्वर्थः , ' आख्यातार्थो भावना '** इति मते प्रत्ययार्थव्यधिकरणफलवाचकत्वं सकर्मकत्वं तद्भिन्नत्वमकर्मकत्वमिति स्वीकारे व्यापारस्य धात्वर्थत्वाभावेऽपि नास्ति काचिद् विप्रतिपत्तिरित्युच्यते चेत् ? तर्हि कर्तृकर्मणोरुक्तत्वानुक्तव्यवस्थैविच्छिन्ना स्याद् । तथाहि – आख्यातार्थभावनावादिमते पचत्योदनमितिवत् पच्यत ओदनमित्यपि स्यात् , उभयत्रापि कर्मणोऽनुक्तत्वात् । अत एवोक्तं नागेशेन – " **अभिधानानभिधानव्यवस्थोच्छेदापत्तेः** [234]" इति । भावनायाः आख्यातवाच्यत्वमेव न सम्भवतीति पूर्वमपि प्रतिपादितमेव । तस्मात् फलव्यापारयोरुभयोरपि धातुवाच्यत्वमवश्यमेव स्वीकार्यम् ।

### ➢ कृञोऽकर्मकतापत्तिः

**' कृञ्-धातोऽकर्मकत्वापत्तिभिया धातोः फलव्यापारवाचकत्वमावश्यकम् , अन्यथा यत्नार्थकवाचकयती '** धातोरिवास्याप्यकर्मकत्वं स्यात् । उक्तञ्च – **" तथा च ' यती प्रयत्ने ' इतिवत् फलस्थानीययत्नवाचकत्वा-विशेषादकर्मकतापत्तिरुक्तरीत्या दुर्वारिति** [235]" ।

लक्षणया तत्र सकर्मकत्वस्वीकारो न युक्तः , लाक्षणिकस्य सकर्मकत्वस्य व्यवहार उपयोगसम्भवेऽपि , प्रत्ययादौ उपयोगाभावात् ,

---

[233] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का. १३ ।**

[234] **परमलघुमञ्जूषायां धात्वर्थविचारे पृ.४३ ।**

[235] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.६९ ।**

कर्मणि लकारासम्भवात्। यथा –' **गङ्गायां घोषः** ' इत्यादौ गङ्गापदात् लक्षणया प्रतीयमानस्य तटस्य बोधसम्भवेऽपि , नहि तत्र गङ्गादिवत् स्नानादिक्रियाः सम्भवन्ति , तथैवात्रापि लक्षणया सकर्मकत्व-व्यवहारसम्भवेऽपि कर्मणि लकारा असम्भवा एव। उक्तञ्च कौण्डभट्टेनापि – " **व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासम्भवात्** [236]" इति।

### ➢फलस्य धात्वर्थखण्डनम्

एवं व्यापारस्य धात्वर्थत्वेऽपि ' **फलं न धात्वर्थः** ' प्रमाणाभावात्। अतएवागमप्रामाण्यवादी आचार्यो भर्त्तृहरिः केवलं भावमेव धात्वर्थमाह । उक्तञ्च –

" **भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः** [237]" इति।

वैयाकरणसम्प्रदाये पूर्वं फलशब्दं भगवान् पाणिनिः ' **स्वरितञितः कर्तृभिप्राये क्रियाफले** ' [238] इति सूत्रे सस्मार। अत्र फलं हि तत्क्रियाणां ग्रामप्राप्तिरूपं भोजनादि रूपञ्च , न तु [239]फलव्यापारयोरित्यत्राभिमतं धातुवाच्यत्वे सति धातुवाच्योपस्थितीय-विषयताश्रयत्वरूपं विभागविक्लित्त्यादि । यतोहि विक्लित्त्यादिरूपं फलं कर्माश्रयं भवति , तदाश्रयत्वेनैव कर्मसंज्ञाविधानात् । किन्तु सूत्रे फलं कर्तृनिष्ठत्वमेव गृह्यते । अत एवोक्तम् – ' **कर्तृगामिनि क्रियाफले** [240]' इति। अस्य सूत्रस्य भाष्यमनुसृत्यैवाचार्यो भर्तृहरिः –

---

236 **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.७२।**

237 **भर्तृहरिवाक्यपदीयतृतीयकाण्डे क्रियासमुद्देशे का.२४।**

238 **पाणिनीयाष्टाध्याय्यां १.३.७२।**

239 **वैयाकरणभूषणसारे धात्वर्थनिर्णये का. २।**

240 **वैयाकरणसिद्धान्तकौमुद्यां पृ . ३९२।**

**" यस्यार्थस्य प्रसिद्ध्यर्थमारभन्ते पचादयः ।**

**तत्प्रधानं फलं तेषां न लाभादि प्रयोजनम् ॥ [241]"** इति ।

अत्रेदमेव वक्तव्यं यत् पूर्वाचार्याणां सम्मतं फलं कर्त्तुः क्रियया आप्तुमिष्टतममेव , **" कर्त्तुरीप्सिततमं कर्म [242]"** इति सूत्रप्रामाण्यात् । तत् क्वचिद् ग्रामादि , क्वचिच्च स्वर्गादिरूपम् । इतोऽन्यत् अन्येच्छानधीनेच्छाविषयत्वम् , अथवा धातुवाच्यत्वे सति धातुजन्योपस्थितिविषयताश्रयत्वम् , एवंविधो यो विलक्षणफलपदार्थः स न कुत्रापि भाष्यादौ वाक्यपदीये वा श्रवननयनयोर्विषयतां गतः । एवं हि दृश्यत आपाणिनेः न्यासकारपर्यन्तं फलस्य धात्वर्थत्वं कैश्चिदपि न प्रतिपादितम् ।

वैयाकरणसम्प्रदाय इयं फलश्रुतिः मीमांसकेभ्यः प्राप्ता । तत्र पूर्वं हरिदत्तग्रन्थे धातोः फलमर्थं शृणुमः , विस्तरस्तु दीक्षितग्रन्थेषु तेषां शिष्याणां कौण्डभट्टादीनां ग्रन्थेषु च । एतेषां हि धातोः फलवाचकत्वे इमा एव युक्तयः सन्ति –

१. **सकर्मकत्वोच्छेदापत्तिः ।**

२. **' क्रियते घटः स्वयमेव ' इति प्रयोगो न स्यात् ।**

३. **त्यगिगम्योः पर्यायतापत्तिः ।**

४. **' द्व्यर्थः पचिः ' इति भाष्यनिर्देशः ।**

### ➢सकर्मकत्वोच्छेदापत्तिः-

फलस्य धात्वर्थाभावे सकर्मकत्वाकर्मकत्व-व्यवस्थोच्छिन्ना स्यात् । तथाहि – **" स्वार्थफलव्यधिकरणव्यापारवाचकत्वम् "[243]**

---

[241] **भर्तृहरिवाक्यपदीये उपग्रहसमुद्देशे का . १८ ।**

[242] **पाणिनीयाष्टाध्याय्यां १.४.४९ ।**

[243] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.५८ ।**

“ **स्वार्थव्यापारव्यधिकरण-फलवाचकत्वं** ” वा सकर्मकत्वम् , तद्भिन्नत्वञ्चाकर्मकत्वमिति व्यवस्था । सा च धातोः फलावाचकत्वेऽसम्भवा एव स्यात् इत्याशयः ।

परन्त्वयं सकर्मकाकर्मकविभागो न भाष्यादौ , न वा वाक्यपदीयादौ प्रदर्शितः , न च सूत्रकारादीनां वचनैर्ज्ञापितः , केवलं मध्ये काले जातानां वैयाकरणानामेषा व्यवस्था । यथोक्तं कौण्डभट्टेन –

**“ फलव्यापारयोरेकनिष्ठतायामकर्मकः ।**
**धातोस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥** [244]” इति ।

वस्तुतो नेयं व्यवस्था युक्तियुक्ता । अत एव नागेशेन “ **अध्यासिताः भूमयः** ” इत्यादावव्याप्तिं प्रदर्श्य - “ **वस्तुतस्तु शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वं तदन्वय्यर्थक-त्वमकर्मकत्वम्** [245]” इत्युक्तम् ।

यदि धात्वर्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति स्वीक्रियते चेत्तदा “ **अध्यासिताः भूतयः** ” इत्यत्र अधि आ उपसर्गक आस् धातोः सकर्मकत्वं न स्यात् , धात्वर्थफलव्यधिकरणव्यापार-वाचकत्वाभावात् । तथा च तत्र कर्मणि क्तप्रत्ययो न स्यात् , अतः कर्मसंज्ञकार्थान्वय्यर्थकत्वमेव सकर्मकत्वं स्वीकार्यम् । एवञ्च “ **अध्यास्** ” धातोः कर्मसंज्ञकभूमावन्वयात् तस्यापि सकर्मकत्वे न कश्चन दोषः ।

### ➢क्रियते घटः स्वयमेव

फलस्य धात्वर्थत्वं प्रतिपादयद्भिः वैयाकरणैरित्थं भण्यते – नैयायिकानुसारेण ‘ **कृञ्** ’ धातोः यत्नमात्रार्थकत्वे “ **यती प्रयत्ने** ” इतिवत्

---

[244] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का.१३ ।**

[245] **परमलघुमञ्जूषायां धात्वर्थविचारे पृ.४८ ।**

फलस्थानीययत्नवाचकत्वेनाकर्मकत्वात् कर्मवद्भावाप्राप्तौ **“ क्रियते घटः स्वयमेव ”** इति प्रयोगो न स्यात् । अतः उत्पत्तिरूपफलानुकूलव्यापार एव कृञ्-धात्वर्थः स्वीकरणीयः । तथा च पच्यत ओदनः स्वयमेव इतिवत् ‘ **क्रियते घटः स्वयमेव** ’ इत्यत्रापि ‘ **कर्मवत् कर्मणा तुल्यक्रियः** [246]’ इत्यनेन कर्मवद्भावे कृते यगादयः उत्पद्यन्ते । तत्र कृञ्धातोः धातुमात्रस्योपलक्षणत्वेन सर्वेषामेव धातूनां फलव्यापारवाचकत्वमा-वश्यकमिति तेषामाशयः ।

परन्त्वत्रेदं विचारणीयम् – यत् नैयायिकानां मते यत्नमात्रस्यैव कृञ्-धात्वर्थत्वेन न स्यादयं प्रयोगः , किन्तु वैयाकरणानां नये तु व्यापारस्य धात्वर्थमस्त्येव । स च व्यापारः क्रियारूपः सर्वेष्वेव कारकेषु तिष्ठति । अतएव यदा यन्निष्ठव्यापारस्य स्वातन्त्र्यविवक्षा , तदा तस्य कर्तृत्वं भवतीति प्रतिपादितं भाष्ये[247] । भर्तृहरिणा तु ‘ **एकैव कर्तृत्वशक्तिः , सैवावान्तरव्यापाररूपनिमित्तभेदात् बिद्यत** ’ इति स्वीकृतम् -

**“ निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते ।**
**षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तेर्निअबन्धनम् ॥ [248]” इति ।**

एवञ्च कर्मण्यपि क्रियायाः विद्यमानत्वात् ‘ **कर्मस्थक्रियया तुल्यक्रियः कर्ता कर्मवत्** ’ इत्यर्थकेन ‘ **कर्मवत् कर्मणा**[249] ’ इति सूत्रेण कर्मवद्भावे ‘ **क्रियते घटः स्वयमेव** ’ इत्यादौ यगादयः सम्भवन्त्येव फलस्य धात्वर्थत्वाभावेऽपि । अतस्तत्प्रयोगानुपपत्तिर्न फलस्य धात्वर्थत्वप्रयोजिका ।

---

[246] **पाणिनीयाष्टाध्याय्यां ३.१.८७ ।**
[247] **पतञ्जलिमहाभाष्ये १.४.२३ , पृ.२४३ ।**
[248] **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. ३७ ।**
[249] **पाणिनीयाष्टाध्याय्यां ३.१.८७ ।**

न चैवं ‘ **ग्रामो गम्यते स्वयमेव** ’ इत्यपि प्रयोगः स्यादिति वाच्यम् ; ‘ **न तु प्राप्येकर्मणीति सिद्धान्तोऽत्र व्यवस्थितः** [250]’ **इति ।**

इति दीक्षितोक्तदिशा प्राप्ये कर्मणि कर्मवद्भावस्यासम्भवेन तादृशप्रयोगस्याप्राप्तेः । अत्र हि ‘ **ग्राम** ’ प्राप्यं कर्म क्रियाकृतविशेषानुपलभ्यमानत्वात् । यत्र क्रियाकृतविशेषो नोपलभ्यते तदेव प्राप्यं कर्म इति प्रतिपादनात् । तथा चोक्तं कौण्डभट्टेन – “ **प्राप्यत्वञ्च क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते । न ह्ययं घटः केनचित् दृष्टः , ग्रामोऽयं केनचिद्गत इति शक्यं कर्मदर्शनेनावगन्तुम्** [251]” इति ।

## ➢त्यजिगम्योः पर्यायतापत्तिः

विभागानुकूलव्यापारः त्यजिधात्वर्थः , संयोगानुकूलव्यापारश्च गम्धात्वर्थः । एवञ्चोभयत्र फलस्यैव वैलक्षण्यं दृस्यते । फलस्य धात्वर्थत्वाभावे व्यापारवाचकत्वस्योभयस्यापि समानत्वेन समानार्थकतापत्तिरिति । उक्तञ्च कौण्डभट्टेनापि – “ **धातूनां फलावाचकत्वे त्यजिगम्योः पर्यायतापत्तिः , क्रियावाचकत्वाविशेषात्** [252]” इति ।

क्रियायां कर्तुः प्रवृत्तिः फलार्थमेव भवति । यथा ‘ **देवदत्तो ग्रामं गच्छति** ’ इत्यत्र ग्रामप्राप्त्यर्थमेव देवदत्तस्य गमनक्रियायां प्रवृत्तिः , तथा च कश्चित् व्यापारः किञ्चित् फलं जनयति , कश्चिच्च किञ्चित् इति न हि सर्वेषां व्यापाराणामेकरूपता । एवञ्च समानेऽपि त्यजिगम्योश्चलनात्मके

---

[250] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का. ७ ।**

[251] **वैयाकरणभूषणसारे धात्वर्थनिर्णये ७८ तमे पृष्ठे ।**

[252] **वैयाकरणभूषणसारे धात्वर्थनिर्णये ८० तमे पृष्ठे ।**

व्यापारे विभिन्नफलजनकत्वात् कर्तुः प्रवृत्तिभेदेन व्यापारभेदः सिद्ध्यति । एवञ्च धातोः फलावाचकत्वेऽपि केषाञ्चिदपि धातूनां न पर्यायतापत्तिः , येन धातोः फलवाचकत्वं सिद्ध्येत् ।

- **द्व्यर्थः पचिः**

विक्लेदना निर्वर्तना च पचेरर्थः । तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः । तथा चोक्तं भाष्ये – " **इह हि तण्डुलानामोदनं पचति** " **इति द्व्यर्थः पचिस्तण्डुलान् पचन्नोदनं निर्वर्तयतीति** [253]" इति । तथा च विक्लित्तिरूपफलावाचकत्वे द्व्यर्थः पचिरिति भाष्यासंगतिरिति भाष्याशयं स्वीकुर्वन्ति कौण्डभट्टादयः ।

किन्त्वत्र द्वौ व्यापारौ धातुवाच्यौ , न त्वेकं फलमेकश्च व्यापार इति । अन्यथा तु सर्वेषामेव धातूनां फलव्यापारवाचकत्वेन द्व्यर्थत्वात् , ' **पचीति** ' विशेषोपादानं व्यर्थमेव स्यात् । अत एवोक्तं कैयटेन – ' **विक्लेदनोपसर्जने निर्वर्तने पचिर्वर्तते** [254] ' इति । तण्डुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थः । तत्रोपसर्जनविक्लेदनक्रियापेक्ष तण्डुलानां कर्मत्वम् । प्रधानभूतक्रियापेक्ष त्वोदनस्य इति । एवञ्चानेन कैयटव्याख्यानेन व्यापारद्वयस्य वाचकत्वं पचिधातोः सिद्ध्यति ; न तु फलव्यापारयोः ; तस्मात् द्व्यर्थः पचिरिति भाष्यप्रामाण्यात् धातोः फलवाचकत्वसमर्थनमप्यविचारितरमणीयमेव ।

एवं फलस्य धात्ववाच्यत्वे ' **स्तोकं पचति** ' इत्यादौ स्तोकादिक्रियाविशेषणानां व्यापार एवान्वयः । अत एव " **मन्दं मन्दं नुदति**

---

[253] **पतञ्जलिमहाभाष्ये १.४.४९ , पृ.२६१ ।**

[254] **पतञ्जलिमहाभाष्यप्रदीपे पृ.२६१ ।**

**पवनः** [255]" इत्यादयः प्रयोगाः संगच्छन्ते । अत्र हि गमनरूपव्यापारगतमेव मान्द्यं प्रतीयते ।

न च व्यापारेऽन्वयात् तेभ्यो द्वितीया न स्यादिति वाच्यम् ; क्रियाविशेषणानां कर्मत्वमेकत्वं क्लीबत्वञ्चेति स्वीकारेणादोषात् । इदं वचनमपाणिनीयमिति तु नाशङ्कनीयम् , " **पूजनात् पूजितमुदात्तम्**[256] इति सूत्रे भाष्ये दारुण यदध्यापनं तत्कर्तेत्यर्थके " **दारुणाध्यापक** " इति वाक्ये दारुणादिक्रियाविशेषणानाम-ध्यापकादिभिः सह समानाधिकरणाभावात् समासाभावे " **मलोपार्थं वार्तिकमारब्धम् मलोपवचनम्**[257] " इति । तेन ज्ञायते क्रियाविशेषणेभ्यो द्वितीयोत्पत्तिः भाष्यसम्मता , अन्यथा तत्र मकाराभावेन मलोपविधानार्थं कृतं वार्तिकमेव व्यर्थं स्यात् । उक्तञ्च कैयटेनापि " **क्रियाविशेषणं दारुणशब्दो द्वितीयान्तः** [258]" इति ।

व्यापारेऽन्वयादेव क्रियाविशेषणेभ्यो लिङ्गसंख्ययोः प्रतीतिर्न भवति , भावप्रत्ययवदिति बोध्यम् ।

न च फलस्य धात्वर्थभावे क्रियाविशेषणेभ्यो द्वितीयोत्पत्तये , क्रियाविशेषणानां कर्मत्वमित्यपूर्ववचनकल्पना करणीया । फलस्य धातुवाच्यत्वे तु तत्रैव स्तोकादीनामभेदेनान्वयात् फलमपि व्यपदेशिवद्भावेन फलाश्रयं भवतीति फलाश्रयत्वादेव क्रियाविशेषणानां कर्मसंज्ञया द्वितीयोत्पत्तिः । अतः क्रियाविशेषणानां कर्मत्वमिति फलितार्थकथनमेव , नापूर्ववचनमिति लाघवं फलस्य धातुवाच्यत्व इति वाच्यम् , तत्रापि व्यपदेशिवद्भावादिकल्पनायां गौरवस्य सत्त्वेन लाघवाभावात् ।

---

[255] **कालिदासमेघदूते पूर्वमेघे श्लोक . ९ , पृ.२० , सं .पुस्तक.भाण्डार ।**

[256] **पाणिनीयाष्टाध्याय्यां ८.१.६७ ।**

[257] **पतञ्जलिमहाभाष्यवार्तिके ८.१.६७ , पृ.३४० ।**

[258] **पतञ्जलिमहाभाष्यप्रदीपे पृ.३४० ।**

तस्मात् नास्ति फलस्य धात्वर्थमिति महता समारम्भेण फलस्य धात्वर्थत्वं खण्डयति व्याकरणसिद्धान्तानभिज्ञाः ।

## ➢फलस्य धात्वर्थत्वसमर्थनम्

वस्तुतस्तु फलस्य धात्वर्थमवश्यमेव स्वीकार्यम् । वैयाकरणनिकाये फलस्य धात्वर्थत्वं सर्वैरेव स्वीकृतम् , किन्तु फलशब्देन निर्देशो न कृतः कैश्चिदपि , अतएवैतादृशभ्रमो जायते । अत्र पाणिन्याद्याचार्याणामुक्तयः प्रदर्श्यन्ते , येन फलस्यापि धात्वर्थत्वं सिद्ध्यति ।

महर्षिणा पाणिनिना सूत्रमेकं प्रणीतम् – ‘ **कर्मवत् कर्मणा तुल्यक्रियः** [259]’ इति । तस्यायमर्थः कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवद् भवति । अत्र सूत्रे ‘ **कर्मणा** ’ इत्यत्र कर्मपदेन कर्मस्था क्रियैव गृह्यते । तथा चोक्तं कैयटेन –“ **कर्मणेति कर्मस्थया क्रिययेत्यर्थः** [260]” । साध्यसाधनयोरत्यन्तभेदात् तुल्यत्वासम्भवात् कर्मस्था क्रिया कर्मशब्देनोच्यते इति । सा च कर्मस्था क्रिया फलरूपैव , न तु व्यापाररूपा । अतएव कर्मणेत्यस्य प्रयोजनप्रतिपादनाय कर्मणेति किमर्थम् ? इति भाष्यस्थप्रश्नस्याशयं प्रकटयता कैयटेनोक्तम् - “ **धातुवाच्या क्रिया कर्तृकर्मणोः समवेता , तत्र कर्तृस्थया क्रियया तुल्यक्रियः कर्ता न सम्भवतीति कर्मस्थैव क्रियाश्रयिष्यते** [261]” इति । सा च कर्मस्था धातुवाच्या क्रिया किमित्याकाङ्क्षायां फलमेव स्वीकार्यम् , न तु व्यापारः , कर्मनिष्ठव्यापारस्य धातुवाच्यत्वाभावात् ।

---

[259] **पाणिनीयाष्टाध्याय्यां ३.१.८७ ।**

[260] **पतञ्जलिमहाभाष्यप्रदीपे ३.१.८७ , पृ.१०५ ।**

[261] **पतञ्जलिमहाभाष्यप्रदीपे ३.१.८७ , पृ. १०४ ।**

एवञ्च कर्मवद्भावाय कृतमिदं सूत्रं फलस्य धात्वार्थत्वे पाणिनेः सम्मतिं प्रदर्शयति।

‘ **साधकतमं करणम्** [262]’ इति करणसंज्ञाविधायकसूत्रं सूत्रितं पाणिनिना। तत्र प्रकृष्टत्वं तमबर्थः। प्रकृष्टत्वं च – यद्व्यापारादनन्तरं क्रिया सिद्धिर्भवति तदेव। उक्तञ्च भर्तृहरिणापि –

“ **क्रियायाःपरिनिष्पत्तिर्यद्व्यापारादनन्तरम्।**
**विवक्ष्यते तया तत्र , करणत्वं तदा स्मृतम्॥** [263]” इति।

यद्व्यापारादनन्तरं क्रियासिद्धिर्विवक्ष्यते तत्करणं भवति । अतएव ‘ **रामेण वाणेन हतो वाली** ’ इत्यत्रोभयोः क्रियासाधकत्वे समानेऽपि वाणस्यैव करणसंज्ञा न तु रामस्य । सा क्रिया का ? यस्याः सिद्धिः करणव्यापारानन्तरं भवति ? इति प्रश्ने क्रियापदेन फलमेव गृह्यते , व्यापारानन्तरं फलस्यैव जायमानत्वात् कर्तुरपि करणत्वापत्तिः । अतः क्रियापदेन फलमेव गृह्यते । तच्च फलं धातुवाच्यत्वे सति धातुवाच्यव्यापारजन्यमेव , न तु स्वरितञितः इत्यादि सूत्रवत् लौकिकं फलम्। एवञ्चानेन व्याख्यानेन फलस्य धात्वर्थत्वे पाणिनिभर्तृहर्योः सम्मतिः प्रदर्शिता।

‘ **सुप आत्मनः क्यच्** [264]’ इति सूत्रे इष्यते पुत्रः इत्यर्थे पुत्रीयतीति न प्रयोगः , भिन्नार्थत्वात् , किन्तु पुत्रमिच्छतीत्यर्थ एवेत्यर्थकं भाष्यप्रवृत्तम् अस्ति। तथाहि “ **अथेह क्यचा भवितव्यं इष्टः पुत्रः इष्यते पुत्र ? इति इहभवन्तस्तावदाहुः न भवितव्यम् , किं कारणम् ? समानार्थेन वाक्येन भवितव्यं , प्रत्ययान्तेन च। यश्चेहार्थो वाक्येन गम्यते – इष्टः पुत्रः ,**

---

[262] **पाणिनीयाष्टाध्याय्यां १.४.४२।**

[263] **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. ९०।**

[264] **पाणिनीयाष्टाध्याय्यां ३.१.८।**

**इष्यते पुत्र इति , नासौ जातुचित्प्रत्ययान्तेन गम्यते** [265]" इति भाष्यकृतोक्तम् ।

एवञ्च कर्मणि प्रत्यये , भिन्नार्थत्वादेव न क्यजिति भाष्याशयः । फलस्य धात्वर्थत्वाभावे ' **इष्यते पुत्रः पुत्रीयति** ' इत्यत्र चोभयत्रापि व्यापारमुख्यविशेष्यकशाब्दबोधसम्भवात् । फलस्य भिन्नार्थत्वं दुरुपपादम् एव , कर्मणि प्रत्यये फलमुख्यविशेष्यकबोधः , कर्तरि प्रत्यये तु व्यापारमुख्यविशेष्यको बोधः इति वाक्यप्रत्ययान्तयोः भिनार्थत्वं सम्भवति । उक्तञ्च तत्रैव प्रदीपे – " **यदा क्रिया फलस्य कर्मणः प्राधान्यं प्रतिपादयितुमिष्टं तदा वाक्यमेव प्रयुज्यते पुत्र इष्ट इत्यादि , न तु क्यजन्तः** [266]" इति । अनया कैयटोक्त्या फलस्य धात्वर्थत्वं कर्मणि प्रत्यये तस्य प्राधान्यञ्च सिद्ध्यति ।

एवञ्च दृश्यते फलशब्देन फलस्य धात्वर्थत्वं न कैश्चिदपि प्रतिपादितम् , किन्तु प्रकारान्तरेण शब्दान्तरेण च सर्वैरेव भाष्यकार- कैयट- पाणिन्यादिवैयाकरणैः फलस्य धात्वर्थत्वं स्वीकृतं तत्तत्स्थलेषु ।

फलस्य धात्वर्थत्वसिद्ध्यै उपन्यास्ताम् " **सकर्मकत्वाकर्मकत्वोच्छेदापत्तिः** " इति युक्तिं चिखण्डयिषुणा यदुक्तम् " **स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्** " इति तन्न युक्तम् , अपि त्वेनच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वमेव सकर्मकत्वमिति सिद्धान्तः ।

अत्रेदमवधेयं यद् नागेशाभिमतोक्तरूपसकर्मकत्वस्वीकारेऽपि फलस्य धात्वर्थत्वं न कैश्चिदपि वारयितुं शक्यते , यतो हि – फलस्य धात्वर्थत्वं विना कर्मसंज्ञैव दुरुपपादा । तथाहि – कर्मसंज्ञाविधायकं सूत्रं

---

[265] **पतञ्जलिमहाभाष्ये ३.१.८ , पृ.३५-३६ ।**

[266] **पतञ्जलिमहाभाष्यप्रदीपे ३.१.८ , पृ.३५ ।**

‘ **कर्तुरीप्सिततमं कर्म** ’ [267] इति पाणिनिना सूत्रितम् । तस्यार्थः यद्यपि कर्तुः[268] क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् इति कृतः सिद्धान्तः कौमुद्याम् , तथापि तादृशार्थस्वीकारे यदा पुष्ट्यर्थं ‘ **माषेष्वश्वं बध्नाति** ’ इति वाक्ये माषस्यापि कर्मत्वापत्तौ द्वितीयापत्तिः , अत्र बन्धनक्रियया माषस्यापीष्टत्वात् । एवमेव ‘ **अग्नेर्माणवकं वारयति** ’ इत्यत्र अपि उत्तरदेशसंयोगानुकूलव्यापारा-भावानुकूलव्यापाररूपधात्वर्थक्रियया अग्नि-माणवकयोः उभयोरपि कर्तुरिष्टत्वात् कर्मसंज्ञा प्राप्ता , एवञ्च निरवकाशः ‘ **वारणार्थानामीप्सितः** ’[269] इति विधिः कर्मसंज्ञाया अपवादो भूत्वा ‘ **अग्नेर्माणवकस्योभयोरप्यपादानसंज्ञा विधास्यतीति माणवकादपि पञ्चम्यापत्तिः** ’ । तन्मा भूदेतदर्थं कर्तृवृत्तिव्यापारविशिष्ट-फलवत्त्वप्रकारिकेच्छोद्देश्यताश्रयं कारकं कर्मसंज्ञं भवति । व्यापारस्य फले वैशिष्ट्यं च स्ववाचकधातुवाच्यत्वस्वप्रयोज्यत्वैतत् सम्बन्धद्वयेनेति कर्मसंज्ञाविधायकसूत्रस्यार्थः स्वीकरणीयः । उक्तं च – “ **स्वप्रयोज्यत्वं स्ववाचकधातुवाच्यत्वमेतदुभयसम्बन्धेन व्यापारविशिष्टफलवत्त्व-रूपः सम्बन्धः आब्धात्वर्थः** [270]” इति ।

एवञ्च फलस्य धात्वर्थत्वाभावे कर्मसंज्ञाया एव व्यवस्थानुपपन्ना , कर्मविधायकसूत्रस्यार्थे स्ववाचकधातुवाच्यत्वसम्बन्धेन व्यापरस्य फले वैशिष्ट्यावश्यकत्वात् । अतएवोक्तं नागेशेन – “ **कर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमिति निष्कृष्टमतेऽपि**

---

[267] **पाणिनीयाष्टाध्याय्यां १.४.४९ ।**

[268] **वैयाकरणसिद्धान्तकौमुद्यां १४९ तमे पृष्ठे ।**

[269] **पाणिनीयाष्टाध्याय्यां १.४.२७ ।**

[270] **लघुशब्देन्दुशेखरे शेखरदीपिकायां ५७ तमे पृष्ठे ।**

**फलाश्रयतया कर्मसंज्ञकस्य धात्वर्थफले एवान्वयौचित्येन द्योतकत्वमावश्यकम्** ”[271] इति।

अत्र तु धात्वर्थफले इति स्पष्टं वदता नागेशेन फलस्य धात्वर्थत्वं स्वीकृतमेव।

तस्मात् नागेशाभिमतसकर्मकत्वस्वीकारे फलस्य धात्वर्थत्वाभावेऽपि नास्ति काचिद् विप्रतिपत्तिरिति न वक्तुं शक्यते कैश्चिदपि , कर्मसंज्ञानुपपत्तेः प्रतिपादितत्वात्। एवञ्च फलस्य धात्वर्थत्वमवश्यमेव स्वीकार्यम्।

भट्टोजिदीक्षितेनापि सिद्धान्तकौमुद्यां धात्वर्थनिर्देशः कृतः तत्र कुत्रचित् फलमेव धात्वर्थरूपेण निर्दिष्टम्। यथा – “ **ष्ठा गतिनिवृत्तौ** [272]” इति। अत्र गतिनिवृत्तिः फलमेव। अतएवोक्तं माधवीयधातुवृत्तौ सकर्मकत्वाकर्मकत्वनिरूपणप्रसङ्गे –“ **यथास्था गतिनिवृत्तौ** [273]” **अत्र फलं गतिनिवृत्तिः व्यापारस्तदनुकूलः** ” इति।

एवञ्च सर्वैरेव वैयाकरणैः धात्वर्थत्वेन स्वीकृतस्य फलस्य धात्वर्थत्वं नास्तीत्युक्तिर्न युक्ता। तस्मात् फलव्यापारौ धातुवाच्याविति वैयाकरणसिद्धान्तः।

### ➢प्राचीनमतम्

प्राचीनाः कौण्डभट्टादयस्तु एकवृन्तगतफलद्वयन्यायेन धातोः फलनिरूपिता , व्यापारनिरूपिता च पृथगुपस्थितिप्रयोजिकैकैव खण्डशः शक्तिरिति स्वीकुर्वन्ति। अतएव [274]फलव्यापारयोर्धातुरित्यत्र द्विवचनोक्तिः

---

[271] **परमलघुमञ्जूषायां निपातार्थविचारे ५७ तमे पृष्ठे ।**

[272] **वैयाकरणसिद्धान्तकौमुद्यां भ्वादिप्रकरणे पृ . ४४६ ।**

[273] **मधवीयधातुवृत्तेः भूमिकायां पृ.२८ ।**

[274] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का.२ ।**

संगच्छते । खण्डशः शक्तिस्वीकारादेव “ **स्तोकं पचति** ” इत्यादौ स्तोकपदार्थस्य धात्वर्थे फलेऽन्वयः सम्भवति , विशिष्टे शक्तिस्वीकारे तु फलस्य धात्वर्थैकदेशात् तत्रान्वयो न स्यात् , “ **पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन** ” इति न्यायात् । अतएव “ **ऋद्धस्य राजपुरुषः** ” घटत्वे नित्यान्वयविवक्षया ‘ **नित्यो घटः** ’ इति च न प्रयोगः ।

ननु हरिशब्दादुपस्थितयोः विष्णुसिंहयोः परस्परान्वयबोधनाय तत्पदजन्यतद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रत्ययपरपदजन्योपस्थितिः कारणमिति कार्यकारणभावस्यावश्यमेव स्वीकर्तव्यतया , एकस्मादेव धातोः उपस्थितयोः फलव्यापारयोः परस्परमन्वयो न स्यात् । अतएवोक्तं गदाधरेण – ‘ **शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते इति चेत् ?** ’ [275] अत्रोच्यते व्युत्पत्तिवैचित्र्येण क्वचिदेकपदोपस्थितयोरपि पदार्थयोः परस्परान्वयस्य सर्वसम्मतत्वेन तस्य नियमस्यासार्वत्रिकत्वात् । अतएव “ **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** [276] ” इतिसूत्रे मात्रपदोपस्थापितयोरर्थयोः परस्परमन्वयो भवति । तथाहि प्रातिपदिकार्थेति सूत्रे मात्रशब्दस्यावधारणमर्थः । उक्तञ्च – “ **मात्रशब्दस्येति । तस्य चावधारणमर्थः** ” । उक्तञ्च – “ **मात्रशब्दस्येति । तस्य चावधारणमर्थः । मात्रं कात्स्न्र्येऽवधारणे इत्यमरः** [277]” इति । तत्रावधारणञ्चान्ययोगव्यवच्छेदः । योगः सम्बन्धः , व्यवच्छेदोऽभावः , एवञ्चाभावे सम्बन्धस्य प्रतियोगितयान्वयो भवति । तस्मात् फलव्यापारयोः पृथक् शक्तिस्वीकारे नास्ति काचन विप्रतिपत्तिः ।

---

[275] **व्युत्पत्तिवादे १ तमे पृष्ठे ।**

[276] **पाणिनीयाष्टाध्याय्यां २.३.४६ ।**

[277] **प्रौढमनोरमायां कारकप्रकरणे पृ . ७४१ ।**

फलव्यापारयोरपि धातोः युगपदुपस्थितिः न सम्भवतीति नाशंकनीयम् , सकृदुच्चरितेति न्यायः विभिन्नशक्त्योपस्थितावेव प्रवर्तते , यत्रैकयैव शक्त्या , एकवृन्तगतफलद्वयन्यायेन पदार्थद्वयस्योपस्थितिस्तत्र नायं नियमः , अत एवाख्यातपदोपस्थापितयोर्नैयायिकानां कृतिवर्तमानादि-कालयोः , वैयाकरणानां कर्तृसंख्ययोश्च परम्परान्वयबोधः संगच्छते ।

ननु फलव्यापारयोः खण्डशः शक्तिस्वीकारे पृथगुपस्थिते संयोगरूपफले भेदान्वयविवक्षया **" गमनं न स्पन्दः "** इति प्रयोगस्य प्रामाण्यापत्तिः स्यादिति चेन्न , अन्तरङ्गत्वात् पूर्वमुपस्थितयोः फलव्यापारयोरेवान्वयः , तत्पश्चादेव फले पदार्थान्तरस्यान्वयो भवति । एवञ्च फलस्य व्यापारे विशेषणे जाते तत्र पदार्थान्तरस्य भेदस्यान्तरो न सम्भवति ; गुणानां च पारार्थत्वादसम्बन्धः समत्वादिति न्यायात् ।

## ➢नागेशमतम्

नागेशास्तु फलविशिष्टे व्यापारे व्यापारविशिष्टे फले च धातोः शक्तिं स्वीकुर्वन्ति । अतएव तेषां मते कर्तृप्रत्यये व्यापारमुख्यविशेष्यकः , कर्मप्रत्ययस्थले फलमुख्यविशेष्यकः शाब्दबोधः । तत्र फलस्य व्यापारे वौशिष्ट्यमनुकूलत्वसम्बन्धेन , व्यापारस्य च जन्यत्वसम्बन्धेन फले वैशिष्ट्यं बोध्यम् । भणितञ्च –" **तस्मात् फलावच्छिन्ने व्यापारे , व्यापारावच्छिन्ने फले च धातूनां शक्तिः , कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः इत्याहुः** [278]" ।

एवं स्वाभिमतं विशिष्टशक्तिवादं समर्थयता , पृथक्शक्तिवादं दूषयता नागेशेन खण्डशः शक्तिवाद इमे दोषा उपन्यस्ताः –

---

[278] **परमलघुमञ्जूषायां धात्वर्थविचारे ४१ तमे पृष्ठे ।**

१. उद्देश्यविधेयभावेनान्वयापत्तिः।

२. कार्यकारणभावद्वयकल्पनम्।

३. अर्थद्वये शक्तिद्वयकल्पनम्।

४. बोधजनकत्वसम्बन्धद्वयकल्पनमिति गौरवम्।

### ➢उद्देश्यविधेयभावेनान्वयापत्तिः

फले व्यापारे च खण्डशः शक्तिस्वीकारे फलव्यापारयोः परस्परमुद्देश्यविधेयभावेनान्वयापत्तौ व्यापारोद्देश्यकफलविधेयकस्य , फलोद्देश्यकः व्यापारविधेयकस्य च बोधस्यापत्तिः। उद्देश्यविधेयभावेनान्वये पृथगुपस्थितेः कारणतया , तस्याश्च पृथक्शक्तिवादे विद्यमानत्वात्। उक्तञ्च – " **फलव्यापारयोर्धातुः पृथक्शक्तावुद्देश्यविधेयभावेनान्वयापत्ति-स्तयोः स्यात् , पृथगुपस्थितयोस्तथा-न्वयस्यौत्सर्गिकत्वात्** "[279] इति।

घटपदात् घटघटत्वयोर्विशिष्टोपस्थितिसत्त्वात् न तत्रोद्देश्यविधेय-भावेनान्वयः , अतो ज्ञायते यत्र विशिष्टोपस्थित्यभावः तत्रोद्देश्यविधेयभावेनान्वयो भवति। अतो धातोरपि पृथग् पृथगुपस्थितयोः फलव्यापारयोः परस्परमुद्देश्यविधेयभावेनान्वयापत्तिः।

वस्तुतस्तु उद्देश्यविधेयभावेनान्वयं प्रति विभिन्नपदजन्योपस्थितिरेव कारणम् , एकपदात् विभिन्नशक्तिज्ञानजन्योपस्थितपदार्थद्वयस्योद्देश्य-विधेयभावेनान्वये तु प्रमाणाभावः , दृष्टान्ताभावश्च। अतएव हरिपदादुपस्थितयोः सूर्यसिंहयोर्न परस्परमुद्देश्यविधेयभावेनान्वयः। अतः पृथक्शक्तिवादेऽपि नायं दोषो युक्तियुक्त इति।

---

[279] **परमलघुमञ्जूषायां धात्वर्थविचारे ४० तमे पृष्ठे।**

## ➢कार्यकारणभावद्वयकल्पनम्

फलत्वावच्छिन्नप्रकारतानिरूपितव्यापारविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्तृप्रत्ययसमभिव्याहृतधातु-जन्योपस्थितिः कारणम् , व्यापारत्वावच्छिन्नप्रकारता-निरूपितफलविशेष्यक-शाब्दबुद्धित्वावच्छिन्नं प्रति कर्मप्रत्ययसमभिव्याहृत-धातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पने गौरवं पृथक् शक्तिवादिमते इति नागेशाशयः ।

## ➢अर्थद्वये शक्तिद्वयकल्पनम्

अर्थद्वये शक्तिद्वयकल्पने नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वरूपनानार्थत्वं धातोः स्यात् पृथक्शक्तिवादिमते यथा ‘ **हरि** ’ आदिशब्दाः नानार्थकाः तथा धातुरपि नानार्थक इति व्यवहारापत्तिः ।

## ➢सम्बन्धद्वयकल्पनम्

फलनिरूपितव्यापारनिरूपितस्वविषयकबोधजनकत्वरूपसम्बन्धद्वयकल्पने गौरवम् । एवञ्चानेकगौरवग्रस्तत्वात् पृथक्शक्तिवादो न श्रेयस्करः । अतः विशिष्ट एव शक्तिः स्वीकरणीयेति नागेशाभिमतिः । तथाह्युक्तं – “ **फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम् , व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पनम् , धातोरर्थद्वये शक्तिद्वयकल्पनं धातोर्बोधजनकत्वसम्बन्ध-द्वयकल्पनं चातिगौरवम्** [280]” इति ।

सिद्धान्तपक्षः – वस्तुतस्तु पृथक्शक्तिवाद उपन्यस्ता इमे दोषाः विशिष्टशक्तिवाद एव परापतन्ति , न तु पृथक्शक्तिवादे ।

---

[280] **परमलघुमञ्जूषायां धात्वर्थविचारे ४१ तमे पृष्ठे ।**

प्राचां मते कर्तृप्रत्यये कर्मप्रत्यये चोभयत्रापि व्यापारमुख्यविशेष्यकबोधस्यैव स्वीकृतत्वेन फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम् , व्यापारविशेषणक-फलबोधे च कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति न कार्यकारणभावद्वयकल्पना पृथक्शक्तिवादिमते।

प्रत्युत नागेशमत एव फलावच्छिन्नव्यापारबोधे कर्तृप्रत्ययसमभि-व्याहृतधातुजन्योपस्थितिः कारणम् , व्यापारावच्छिन्नफलबोधे च कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वय-कल्पना करणीया , तेषां मते कर्तृप्रत्यये व्यापारमुख्यविशेष्यकबोधस्य , कर्मप्रत्यये च फलमुख्यविशेष्यक-बोधस्येष्टत्वात्।

एवञ्च कार्यकारणभावद्वयकल्पनारूपं गौरवं विशिष्टशक्तिवादे नागेशाभिमत एव , न तु खण्डशः शक्तिवादिमते।

किञ्च नागेशाभिमते विशिष्टशक्तिवादे फलावच्छिन्नव्यापरत्वस्य , व्यापारावच्छिन्नफलत्वस्य च शाक्यतावच्छेदकात्वे शक्तिनानात्वापत्तिः नानाशक्यतावच्छेदकत्वादिति गौरवम्।

विशिष्टे शक्तिस्वीकारे ‘ **स्तोकं पचति** ’ इत्यादौ स्तोकादीनां फलेऽन्वयो न स्यात् ; फलस्य पदार्थैकदेशत्वेन **‘ पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन ’** इति न्यायबिरोधात् । ‘ देवदत्तस्य गुरुकुलम् ’ इत्यादिवदत्राप्येकदेशेऽन्वयः सम्भवत्येवेति न वक्तव्यम् , नित्यसाकाङ्क्षस्थले एकदेशान्वयस्वीकारेऽप्यत्र तत्स्वीकारे मानाभावात्।

पृथक्शक्तिवादे प्राचां मते त्वेकवृन्तावलम्बिफलद्वयवत् फलव्यापारयोरेकैव शक्तिः खण्डशः स्वीक्रियते , अतः पृथक्शक्तिवादे शक्तिद्वयकल्पनम् , बोधजनकत्वसम्बन्धद्वयकल्पनमपि न करणीयम्। प्रत्युत

नागेशमत एवायं दोषः । तस्मात् पृथक्शक्तिवाद एव श्रेयस्करः । तत्पक्षे उद्भाविता दोषास्त्वविचारितरमणीया एव ।

### ➢शाब्दबोधे कौण्डभट्टमतम्

फलव्यापारौ धातुवाच्यौ , आख्यातार्थः कर्तृकर्मसंख्याकाला एव । तत्र यद्यपि " **आश्रये तु तिङः स्मृताः** [281]" इत्यनेन कर्तृकर्मणोरेवाख्यातार्थत्वं सिद्ध्यति , किन्तु " **वर्तमाने लट्**[282] " इत्यादिना वर्तमानादिकाले लडादीनां विधानात् तदादेशानां तिङामपि तत्काले शक्तिः स्वीकरणीयैव । एवञ्च " **द्व्येकयोर्द्विवचनैकवचने** [283]", " **बहुषु बहुवचनम्**[284] " इति सूत्रयोः तिङ्विधायकसूत्रैः सहैकवाक्यतया संख्यापि तिङामर्थः सिद्ध्यति ।

सा च संख्या समानप्रत्ययोपस्थापितत्वात् कर्तृप्रत्यये कर्तरि , कर्मप्रत्यये च कर्मण्यन्वेति , कर्तुर्व्यापारे , कर्मणश्च फलेऽन्वयः ।

उक्तञ्च " **तिङर्थः कर्तृकर्मसंख्याकालाः तत्र कर्तृकर्मणी फलव्यापारयोर्विशेषणे , संख्या कर्तृप्रत्यये कर्तरि , कर्मप्रत्यये कर्मणि समानप्रत्ययोपात्तत्वात्** "[285] इति ।

कालस्य तु व्यापार एवान्वयो भवति, " **क्रियाभेदाय कालस्तु** " इत्यभियुक्तोक्तेः । किञ्च – " **वर्तमाने लट्**[286] " इत्यत्र धातोः इत्यधिकारात्

---

[281] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का. २ ।**

[282] **पाणिनीयाष्टाध्याय्यां ३.२.१२३ ।**

[283] **पाणिनीयाष्टाध्याय्यां १.४.२२ ।**

[284] **पाणिनीयाष्टाध्याय्यां १.४.२१ ।**

[285] **वैयाकरणभूषणसारे धात्वर्थनिर्णये ३७ तमे पृष्ठे ।**

[286] **पाणिनीयाष्टाध्याय्यां ३.२.१२३ ।**

धातुर्लभ्यते , स च धातुजन्यशाब्दबोधे व्यापारस्यैव प्राधान्यं बोधयति । तथा चोक्तं कौण्डभट्टेन –कालस्तु व्यापारे विशेषणम्[287] , तथाहि ‘ **वर्तमाने लट्** [288]’ इत्यत्राधिकारात् ‘ **धातोः** ’ इति लब्धम् । तच्च धात्वर्थं वदत् प्राधान्याद् व्यापारमेव ग्राहयति , तत्रैव तदन्वयः ।

‘ **चैत्रः पचति** ’ इत्यत्र चैत्राभिन्नैककर्तृकविक्लित्त्यनुकूलो वर्तमानकालिको व्यापारः इति शाब्दबोधः । ‘ **चैत्रेण ओदनं पच्यते** ’ इत्यादौ तु “ **चैत्रकर्त्तृकओदननिष्ठैकविक्लित्त्यनुकूलो वर्तमान-कालिको व्यापारः** ” इति बोधः । एवञ्च कर्तृप्रत्यये कर्मप्रत्यये च व्यापारमुख्यविशेष्यक एव बोधः कौण्डनये ।

## ➢नागेशमतम्

नागेशास्तु कर्तृप्रत्यये व्यापारमुख्यविशेष्यकः , कर्मप्रत्यये फलमुख्यविशेष्यको बोध इति स्वीकुर्वन्ति । “ **फले प्रधानं व्यापारः**[289]” इत्यादिना व्यापारस्य प्राधान्यबोधनन्तु कर्त्राख्याताभिप्रायेण ।

अथवा ‘ **फले अप्रधानं , फले प्रधानम्** ’ इति उभयविधपदसम्भवाद् व्यापारस्य प्राधान्याप्राधान्यञ्च सम्भवति । तत्र प्राधान्यं कर्तृप्रत्ययाभिप्रायकम् अप्राधान्यञ्च कर्मप्रत्ययाभिप्रायकम् । कर्तृकर्मस्थले विभिन्नरूपेण शाब्दबोधस्वीकारादेव “ **सुप आत्मनः क्यच्**[290] ” इति सूत्रस्थं भाष्यं संगच्छते । वाक्ये ‘ **इष्यते पुत्रः** ’, ‘ **पुत्रीयति** ’ इति वाक्यविग्रहयोः समानार्थत्वेन भाष्यासंगतिः

---

[287] **वैयाकरणभूषणसारे धात्वर्थनिर्णये ३९ तमे पृष्ठे ।**

[288] **पाणिनीयाष्टाध्याय्यां ३.२.१२३ ।**

[289] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का.२ ।**

[290] **पाणिनीयाष्टाध्याय्यां ३.१.८ ।**

स्यात् । अतो वाक्ये **‘ इष्यते पुत्रः ’** इत्यत्र फलस्य वृत्तौ **‘ पुत्रीयति ’** इत्यत्र व्यापारस्य मुख्यविशेष्यतया न समानार्थत्वमिति भाष्याशयात् , तद्भाष्यानुरोधेन कर्मप्रत्यये फलमुख्यविशेष्यकबोध एव श्रेयस्कर इति नागेशाभिमतिः ।

### ➢तारानाथतर्कवाचस्पतिमतम्

क्रिया नाम धातुवाच्या फलव्यापारोभयरूपा तद्विशिष्टरूपा वा फलव्यापारयोर्धातुरित्यग्रिमवचनात् व्यवस्थापयिष्यते च मतभेदेन फलव्यापारयोर्पृथक्शक्त्या विशिष्टशक्त्या वा धातुवाच्यता । अत्र फलांशस्य कर्त्तुरुद्देश्यत्वेन प्राधान्याभावात् व्यापारस्यैव प्राधान्यं समुचितं तस्य च साध्यतया कर्मातिरिक्तसर्वकारकाणां तत्रैव स्वस्वव्यापारद्वारा साधकत्वेनान्वयः कर्मणस्तु फल एव क्रियाजन्यफलाश्रयतयैव तस्योद्देश्यादिति विवेकः । उक्तञ्च वाक्यपदीये –

**“ प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते ।**

**साध्यप्रयुक्तानि अङ्गानि फलं तस्याः प्रयोजकम् ॥[291]” इति ।**

अर्थस्य फलस्य तदपेक्षयेत्यर्थः प्राधान्यात् विशिष्यत्वात् साध्यं प्रयुक्तं यैः तानि साध्यसाधकानि अङ्गानि कारकाणीत्यर्थः । अत्र फलस्य क्रियाप्रयोजकत्वाभिधानं तदुद्देशेनैव क्रियायां प्रवृत्तिरित्येवाभिसन्धाय । यथा सर्वलोकः स्वाभीष्टफलमभिप्रेप्सुस्तत्साधनाय यतते लभते च ततस्तत्तत्फलमुपायसंसाधनेन एवं क्रियाफलं विक्लित्त्यादिकमभीप्सुः पाकाय यतमानो जनः पाकसंसाधनेन फलं लभते । ततश्च फलसाधनतया पाकादेवपीष्टत्वात् साध्यत्वम् ।

---

[291] **भर्तृहरिवाक्यपदीयद्वितीयकाण्डे का. ४२७ ।**

फलविशिष्टक्रियाया धात्वर्थत्वं तु विशिष्टत्वेनेष्टत्वात् विशिष्टस्यैव साध्यत्वमिति विशेषः । तथा चैवं रीत्या साध्यत्वेन क्रियां जानता जनेन प्राधान्यवुबोधयिषया एव व्याख्यातान्ततया धातुः प्रयुज्यते अन्यथा कृदन्ततयेति । एवञ्च भावकृदन्तस्थले धातुना साध्यरूपक्रियावबोधने अपि तस्याः प्रत्ययार्थसिद्धक्रियाविशेषणत्वेन न प्राधान्यं ‘ **भावप्रधानमाख्यातम्** [292]’ इत्यादिनिरुक्तवचनस्य प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यमिति न्यायस्य च परस्परं विरोधपरिहाराय न्यायस्य आख्यातातिरिक्तविषयत्वव्यवस्थापनात् । हरिणापि धातुभावकृतोः क्रियावाचित्वाविशेषेऽपि धातुना साध्यत्वेन कृता तु सिद्धत्वेन क्रियायाः बोधनमिति व्यवस्थापितं यथा ।

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना । सिद्धभावस्तु यः तस्याः स घञादिनिबन्धन इति आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता । प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रम इत्येताभ्याम् । भागाभ्यां पश्य मृगो धावतीत्यादौ तिङन्ताभ्यां साध्यसाधनवर्त्तितेति मृगो धावतीत्येतस्य साधनत्वम् अपरस्य साध्यत्वं क्रियाकारकभावेन तयोरन्वयात् घञर्थक्रियायास्तु इतरक्रियायामेव साधनत्वमिति विवेकः ।

साध्यत्वञ्च लिङ्गसंख्यानन्वयित्वं तद्वीपरीतं सिद्धत्वं तथा च घञाद्युपस्थाप्यक्रियायाः लिङ्गसंख्यानन्वयित्वेन अपरक्रियायां साधनत्वम् । युक्तञ्चैतत् यत् घञन्तादौ द्विविधक्रियाया भानं कारकाणां साध्यक्रियायामेवान्वयोपगमात् कृदन्तस्थले कारकविभक्तिप्रयोगस्य सर्वजनीनतया साध्यत्वेन तदुपस्थितावेव कारकान्वयोपपत्तिः साध्यस्य

---

[292] **निरुक्तवृत्तौ १.१ ।**

साधनाकाङ्क्षेति नियतं साधने साध्यं क्रिया नियतसाधनेति साध्यत्वेन निमित्तानि क्रियापदमपेक्षते इति चाभियुक्तोक्तेः ।

अत एव ' **स्तोकं पाक** ' इत्यादौ द्वितीयान्ततोपपद्यते साध्यक्रियाफलयोर्विशेषणे एव द्वितीयानुशासनात् घञाद्युपस्थाप्यक्रिया-विशेषणस्य तु विशेष्यलिङ्गतया प्रथमाद्यन्तता कृदभिहितो भावो द्रव्यवत् प्रकाशत इति भाष्योक्तेः ।

कृदभिहितः कृता बोधितो भावो भावना धात्वर्थस्वरूपमिति यावत् द्रव्येण तुल्यं प्रकाशते द्रव्यधर्मान् लिङ्गसंख्याकारकत्वानि भजते इति यावत् । अत्र द्रव्यत्वं लिङ्गसंख्यान्वयित्वमेव योग्यत्वात् न तत्तु पृथिव्याद्यात्मकत्वं ज्ञानपाकादौ तदभावात् । नापि वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।

ते च सर्वेऽपि धातवः सकर्मकाकर्मकभेदेन द्विविधाः । तत्र व्यापाराधिकरणमात्रावृत्तिफलवाचकः सकर्मकः पच्यादेः व्यापाराधिकरणावृत्ति-विक्लित्तिरूपफलस्य बोधकतया सकर्मकत्वं कर्त्तृकर्मोभयनिष्ठफलबोधकस्यापि गम्यादेः व्यापाराधिकरणमात्रावृत्ति-फलबोधकतया सकर्मकत्वम् । भूप्रभृतीनां तु व्यापाराधिकरणमात्रफल-बोधकतया न सकर्मकत्वं फलस्य सत्तायास्तत्सम्बन्धरूप-व्यापारस्यैकस्मिन्नेव धर्मिणि घटादौ सत्त्वात् । उक्तञ्च वाक्यपदीये –

" **आत्मानमात्मनाविभ्रदस्तीति व्यपदिश्यते ।**
**अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मक ॥**[293] " इति ।

[293] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य सम्बन्धसमुद्देशे क. ४७ ।**

अस्यायमर्थः आत्मानं स्वरूपं विभ्रद् आत्मधारणानुकूलव्यापाराश्रयः अस्तीतिपदेन समानाधिकरणतया व्यपदिश्यते तदभेदबोधनाय तिङादिकं प्रयुज्यते इति यावत् तेनात्मनात्मरूपेण कर्मणा धारणकर्मणा धातुः न सकर्मकः अत्र हेतुर्न्तर्भावात् धात्वर्थः एव तस्य कर्मणः प्रवेशात् आत्मधारणानुकूलव्यापाररूपधात्वर्थेनात्मन उपसंग्रहाद् इत्यर्थः अथवा अन्तरेव व्यापाराधिकरण एव भावात् फलस्य सत्त्वात् व्यापारसमानाधिकरण्यादित्यर्थः तेन भूवादेरुत्पत्त्यनुकूलव्यापारवाचितया धात्वर्थोपसंगृहीतकर्मकत्वाभावेऽपि फलसमानाधिकरणवाचित्वाद-कर्मकत्वम्। अतएव फलव्यापारयोरेकनिष्ठतायामकर्मकः। धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृत इति फलसमानाधिकरण्यादिकृताकर्मकविभागोऽभिहितः एकनिष्ठतायामेकमात्रवृत्ति-तायामित्यर्थः तेन गम्यादेर्व्यापाराधिकरणवृत्ति-फलवाचित्वेऽपि नाकर्मकत्वमिति धर्मिभेदेऽधिकरणान्यत्वे इत्यर्थः । एवमेव शब्दकौस्तुभकारादयः । एतन्मते सकर्मकाकर्मकशब्दौ पारिभाषिकाविति द्रष्टव्यम् । मञ्जूषाकृतस्तु – कर्मणा सहेति नास्ति कर्म यस्येति व्युत्पत्त्या सकर्मकाकर्मकशब्दौ यौगिकौ।

तत्र साहित्यं तदन्वितस्वार्थबोधकत्वम् अन्वयश्च पृथक्पदोपस्थाप्ययोः सम्बन्धरूपोग्राह्यत्वेन जीवत्यादीनां प्राणधारणानुकूलव्यापारार्थकतया तत्कर्मणः प्राणादेर्धात्वर्थमध्यपातात् न सकर्मकत्वं धात्वर्थोपगृहीतकर्म-त्वेनाकर्मकत्वात् । कर्म च व्याकरणशास्त्रीयपारिभाषिककर्मसंज्ञा-विशिष्टमुच्यते तेन **‘ अधिशय्यते प्रासाद ’** इत्यादौ कर्मणि लकारोपपत्तिः अधिशेतेः कर्मसंज्ञाविशिष्टान्वितस्वार्थबोधकत्वात् अन्यथा पूर्वमते तस्य फलसमानाधिकरणव्यापारबोधकतया अकर्मकत्वेन भावे चाकर्मकेभ्य इति भाव एव लकारापत्तेः। भवति च ग्रामं गच्छतीत्यादौ गम्यादिः ईप्सिततमत्वेन कर्मसंज्ञाविशिष्टत्वेन पृथग्भूतेन ग्रामेणान्वितं स्वार्थं बोधयन् सकर्मकः

अधिवसति तु अधिकरणत्वेन कर्मसंज्ञा विशिष्टेनेति विवेक इति प्राहुः । युक्तञ्चैतत् धात्वर्थोपगृहीतकर्मकाणां व्यापारव्यधिकरणफलवाचितया पूर्वकल्पे सकर्मकत्वापत्तेः तत्तद्भिन्नत्वेन निवेशे च गौरवं तथा कर्मणोऽविवक्षायां गम्यादेरपि अकर्मकत्वस्वीकारेण अविवक्षाविशिष्टत्वेन निवेशे गौरवञ्च एतन्मते तु कर्माभावादेव तदन्वितस्वार्थबोधकत्वाभावान्नकर्मकत्वहानिरिति सूक्ष्ममीक्षणीयम्। अत्र पक्षे अकर्मकस्तु तदन्वितस्वार्थबोधक इति।

सकर्मकाश्च द्विविधाः एककर्मका द्विकर्मकाश्च । एककर्मान्वितस्वार्थबोधकाः गम्यादयः एककर्मकाः । द्विकर्मका अपि द्विविधाः द्विकर्मान्वितैकव्यापारार्थकाः द्विकर्मान्वितद्विव्यापारार्थकाश्च । तत्र्याद्यादुह्यादयः । न च ते सिद्धान्ते द्विव्यापारार्थकाः तथात्वे ईप्सिततमाभ्यामेव कर्माभ्यां व्यापारद्वयेऽन्वयसम्भवेन द्वितीयाद्युत्पत्तौ अकथितञ्चेति सूत्रेण दुह्यादीनां कारकान्तरसंज्ञानापन्नस्याकथितस्य कर्मसंज्ञाविधानानौचित्यात्। दर्शयिष्यते च दुह्यादीनामेकव्यापारार्थकता यदा पुनस्तेषां द्विव्यापारार्थकता विवक्षिता तदा ईप्सितसूत्रेणैव कर्मसंज्ञायां जातायां द्विकर्मान्वितद्विव्यापारार्थका एव ते णिजन्तादिवदिति बोध्यम् । द्विकर्मान्वितद्विव्यापारा णिजन्ताः तत्र च धातुना एकव्यापारोऽभिधीयते द्वितीयस्तु णिचा तद्व्यापारद्वये च ईप्सितकर्मणः प्रयोज्यकर्त्तृरूपकर्मणः यथाक्रममन्वयः। तथात्वञ्च गम्यादीनामिति बोध्यं पच्यादीनां तु नैवं तद्योगे प्रयोज्यकर्त्तुः कर्मसंज्ञाभावेन व्यापारद्वये कर्मद्वयान्वयाभावात् न च पच्यादेः क्रियाफलाश्रयत्वेनोद्देश्यतया प्रयोज्यकर्त्तुः कर्मसंज्ञा भवितुमर्हति गत्यादिधातुयोगे एव तन्नियमात्। उक्तञ्च हरिणा-

**" गुणक्रियायां स्वातन्त्र्यं प्रधाने कर्मतां गतम् ।**

**नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥[294] "** इति ।

नियमात् गतिबुद्ध्यादिसूत्रेण तदितरेषां निषेधात् स्वातन्त्र्यं कर्त्तृत्वमेव स्वधर्मेण तृतीयया अभिधीयते इति तदर्थः वस्तुतस्तु प्रयोज्यकर्त्तुरीप्सिततमत्वेऽपि परत्वात् कर्त्तृसंज्ञया तस्य बाधात् कर्मत्वाप्रसक्तौ गत्यादिसूत्रेण अप्राप्तप्रापकत्वरूपविधित्वाश्रयेण गम्यादेः कर्मत्वं विहितं न पाच्यादेरिति द्रष्टव्यम् ।

उक्तञ्च हरिणा-

**" परत्वादन्तरङ्गत्वादुपजीव्यतयाऽपि च ।**

**प्रयोज्यस्यास्तु गत्यादेर्विधितोचितेति ॥ [295]" इति ।**

परत्वात् विप्रतिषेधे परं कार्यमित्युक्तेः –

**" अपादानसम्प्रदानकरणाधारकर्मणाम् ।**

**कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्तते ॥ "**

इति चोक्तेः अन्तरङ्गत्वात् पच्यादिरूपप्रकृत्याकाङ्क्षितकर्त्तृसंज्ञारूप-कार्य्यत्वात् अन्तरङ्गं बलीय इति न्यायात् पाच्याद्याकाङ्क्षितकर्मसंज्ञायाः प्रत्ययाश्रितत्वेन दुर्बलत्वादिति भावः । उपजीव्यतया उपजीव्यजातीयतया सर्वेषामेव कारकाणां कर्त्तृप्रयोज्यत्वेन कर्त्तुरुपजीव्यजातीयत्वादिति फलितोऽर्थः तेन पाच्याद्यपेक्षया तस्योपजीव्यत्वाभावेऽपि न क्षतिः । एवं पाच्यादियोगे प्रयोज्यस्य कर्मसंज्ञाया एवाप्रवृत्तेः न द्विकर्मकत्वं तेषामित्यन्यत्र विस्तरः ।

अकर्मका अपि धातवः हेतुचतुष्टयाधीनाकर्मकक्रियार्थत्वात् चतुर्विधाः । अकर्मकक्रियात्वे हेतवः चत्वारो हरिणा प्रदर्शिताः-

---

[294] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे सं १२३ ।**

[295] **भर्तृहरिवाक्यपदीये ।**

**" धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।**

**प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥ [296]" इति ।**

धातोः स्वबोधकधातोरर्थान्तरे स्वसजातीयभिन्ने वृत्तेः सामर्थ्यात् स्वविजातीयार्थबोधकत्वादेत्येकः । यथा जानाति ज्ञानं वदन् सकर्मकः प्रवृत्त्यादिकं बोधयन्नकर्मकः न तु गतिवाची गम्यादिः ज्ञानाद्यर्थेऽप्यकर्मकः तयोर्द्वयोरप्यर्थयोः सकर्मकत्वेन स्वसजातीयत्वात् । धात्वर्थेनोपसंग्रहादिति द्वितीयः । कर्मणो धात्वर्थेन उपसंग्रहात् स्वशरीरे प्रवेशनात् यथा जीवत्यादीनां प्राणधारणानुकूलव्यापाररूपक्रियार्थतया तत्कर्मणः प्राणादेर्धात्वर्थे एव प्रवेशः । प्रसिद्धेः सत्ता लज्जादिरूपाणामकर्मकत्वेन प्रसिद्धेः । यथा सत्ता लज्जास्थितजागरणं वृद्धिक्षयभयजीवितमरणम् । शयनक्रीडारुचिदीप्त्यर्थं धातुगणन्तमकर्मकमाहुरिति परिगणितदिशा फलसमानाधिकरणव्यापारबोधकानामित्यर्थः इति तृतीयो हेतुः । कर्मणोऽविवक्षात इति चतुर्थः यथा गम्यादिरेव कर्माविवक्षातः अकर्मकः । अत्र च कर्मपदं व्यपदेशिवद्भावेन फलस्याप्युपलक्षणं तेन फलस्याविवक्षायामेव गम्यादेरकर्मकत्वमिति कौस्तुभानुसारिणः तेषाञ्च व्यापारमात्रबोधकतया फलवाचित्वान्न सकर्मकत्वमिति द्रष्टव्यम् ।

अत्र चाविवक्षा नाम येन रूपेणान्वयविवक्षया यस्य कर्मसंज्ञा तेन रूपेणान्वयविवक्षाभावः । तत्र क्वचित् कर्मणोऽविवक्षया यथा पच्यते इत्यादौ क्वचिच्च कर्मत्वाविवक्षया यथा मातुः स्मर्य्यते इत्यादौ । अत्र मातुः कर्मत्वेनैव स्मरणान्वये कर्मसंज्ञा न पुनः सम्बन्धत्वेन विवक्षायामेव कर्मणि

---

[296] **भर्तृहरिवाक्यपदीये ३.७.८८ ।**

षष्ठीविधानात् स्मरणादेः कर्मान्वयासत्त्वेऽपि कर्मत्वेन तदन्वयभावादकर्मकत्वं तेन भावे लकारादय इति बोध्यम् । क्वचित्तु कार्य्यप्रवृत्तिवेलायामविवक्षा पश्चाद्विवक्षा । यथा कृतपूर्वी कटम् भुक्तपूर्वी ओदनमित्यादौ । तथाहि कृतं पूर्वमनेनेति विग्रहे पूर्वादिनिरिति अनेनेत्यर्थे पूर्वशब्दादिनिमनुवर्त्य सपूर्वाच्चेति सूत्रात् विद्यमानपूर्वात् पूर्वशब्दादपि इनिर्विहितः तत्र यदि कृतमिति कर्मणि स्यात्तदा तस्य कटादिरूपकर्मविशेषणतया सापेक्षत्वेन समासादिवृत्तिर्न स्यादेकत्र विशेषणत्वेनोपस्थितस्यान्यत्र विशेषणतयान्वया-योगात् वृत्तिश्चात्र जायते भाष्यादिषु तथाप्रयोगाद् अतोऽवश्यं प्रथमं कर्माविवक्षया अकर्मकत्वेन भावे क्तप्रत्यये विहिते तदन्तेन पूर्वादिभिः सुप्सुपेति समासे च कृते तत्पूर्वकात् पूर्वशब्दात् कर्त्तरि इनिप्रत्ययो भवति । पश्चाच्च कर्त्तृकृतक्रियायाः कर्मविशेषाकाङ्क्षायां कटादिकर्मणोऽन्वयः । उक्तञ्च हरिणा-

**“ अकर्मकत्वे सत्येव क्तान्ते भावाभिधायिनि ।**
**पश्चात् क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥**
**अविग्रहो गतादिस्था यथा ग्रामादिकर्मभिः ।**
**क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥** [297]” इति ।

क्रियावतेत्यनेन क्रियाद्वारैव कर्मणोऽन्वय इति द्योतितम् क्रियायाश्च वृत्तिशब्दैकदेशतया अन्वयशङ्कायामाह अविग्रहेति । नास्ति विशेषेण गहोज्ञानं यस्याः सा पृथगुपस्थ्तस्याभावेन ज्ञातुमशक्येत्यर्थः गतादिस्था कर्तृबोधकनिष्ठान्तगत-पदोपस्थाप्यगमनकर्त्तृरूपार्थप्रविष्टापि यथा ग्रामं गत इत्यादौ विभिन्नपदोपात्तैरपि ग्रामादिकर्मभिः क्रिया सम्बध्यते तथेत्यर्थः समुदायशक्तिस्वीकारे एकदेशान्वयाभ्युपगमादवयवशक्तिस्वीकारे तु

---

[297] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य वृत्तिसमुद्देशे का. ६० , ६७ ।**

तदनुपगमे क्षत्यभावादितिभावः। कृतपूर्वादिषु इत्यादिपदेनाध्वरेषु इष्टीत्यादयो गृह्यन्ते तत्रापि इष्टादिभ्यः चेत्यनेन कर्त्तरि इनिविधानात्।

अत्रेदं बोध्यं निष्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके इत्युक्तेः कर्मणोऽपि स्वव्यापारद्वारा क्रिया निष्पत्तिहेतुत्वेन कर्त्तृत्वे स्थिते तद्व्यापारस्य धात्वर्थत्वविवक्षायां धात्वर्थक्रियाश्रयत्वेन तस्य कर्त्तृत्वं समानानुपूर्वीकमुख्यार्थबोधकधातूपात्तफलाश्रयत्वेन च कर्मत्वमित्यकस्यैव कर्मकर्त्तृता एवञ्च तत्र धातोरर्थान्तरे वृत्तेरेवाकर्मकत्वम्। तथाहि अन्नं पच्यते स्वयमेव इत्यादौ विक्लित्तिस्तदनुकूलोऽन्नस्थाल्यादिसंयोगरूपो व्यापारश्च तद्विशिष्टो वा पच्यर्थः तयोः फलव्यापारयोरेकनिष्ठतया तद्बोधकधातोरकर्मकत्वम् तेन अन्नेन पच्यते स्वयमेव इत्यादौ भावे लकारोपपत्तिः । द्विकर्मकाणान्तु एककर्मणः कर्त्तृत्वविवक्षया अपरस्याविवक्षयैवाकर्मकत्वं पचिदुह्योस्तु कर्मान्तरसत्त्वेऽपि कर्मवद्भावविधानात् सकर्मकत्वं तेन तयोर्न भावे लकारादयः किन्तु कर्मण्येव तेन दुह्यते गवा दुग्धं स्वयमेवेत्यादि।

एवञ्च सर्वेषामेव धातूनां कर्मणः कर्त्तृत्वविवक्षायां कर्मवद्भावे प्राप्ते धातुविशेषयोग एव कर्मवत्कार्य्यातिदेशः न सर्वधातुयोगे तेन गम्यादियोगे कर्त्तरि वाच्ये न कर्मवद्भावः किन्तु कर्त्तृवत्कार्य्यं भावे तु इष्यते एव कर्मवत्कार्य्यं पच्यादियोगे तु कर्त्तरि भावे च वाच्ये कर्मवद्भाव इति विवेकः। उक्तञ्च कर्मस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्मवत्। कर्त्तृस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्त्तृवदिति। कर्मवत् कर्मवत्कार्य्यवानित्यर्थः अत एव कर्मवत् कर्मणा तुल्यक्रिये इति सूत्रे कर्मपदेन कर्मस्थक्रिया लक्षिता शास्त्रकारैस्तेन कर्मस्थक्रियातुल्यक्रियावति कर्त्तरि कर्मवत् कार्य्यमित्यर्थः क्रिययोस्तुल्यत्वञ्च एकाधिकरणमात्रवृत्तित्वेन तथा च कर्मस्थक्रियया फलेन व्यापारस्य सामानाधिकरण्ये एव कर्मवद्भावविधानात्

पच्यादेस्तथाभूतार्थकतया तत्कर्त्तरि कर्मवत्कार्य्यं गम्यादेस्तु व्यापारस्योक्तफलसामानाधिकरण्याभावात् कर्त्तृत्वभावकत्वमिति कर्मवत्कार्य्यमिति विवेकः। तथा तुल्यक्रिये कर्त्तरीत्यभिधानेन गम्यादीनामपि भावे कर्मवत्कार्य्यं यगादि भवत्येव । यद्यपि सर्वेषामेवाकर्मकाणां फलव्यापारयोः सामानाधिकरण्यबोधकतया कर्मवद्भावापत्तिस्तथापि सूत्रे कर्मणा तुल्येति निर्देशात् येषां धातूनां मुख्यार्थवाचिनां सकर्मकत्वं तेषामेव कर्मवद्भाव इति गम्यते अस्त्यादेः सत्तादिरूपमुख्यार्थे सकर्मकत्वाभावात् न तत्प्रसङ्गः भवतेस्तु लाक्षणिकानुभवार्थे वर्त्तमानस्य सकर्मकत्वेऽपि सत्तारूपमुख्यार्थे तथात्वाभावान्नप्रसङ्गः। एवञ्च सर्वेषामेव सकर्मकाणां कर्त्तृकर्मोभयस्थभावकत्वेनाव्यवस्थायां हरिणा क्रियाकृतविशेषेण व्यवस्था दर्शिता यथा। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। शब्दप्रवृत्तिरन्येषां शब्दैरेव प्रकल्पितेति । यत्र कर्मणि कर्त्तरि वा विशेषः क्रियाकृतोऽसाधारणधर्मो दृश्यते तत्रैव क्रिया व्यवस्थितेत्यर्थः धात्वर्थयोः फलव्यापाररूपयोः क्रिययोरुभयनिष्ठत्वेऽपि तत्कृतविशेषादेव तन्निष्ठत्वव्यवहार इति भावः।

विशेषश्च द्विविधः धातूपस्थाप्य तदनुपस्थाप्य च तत्राभ्यर्हितत्वेन उपस्थितत्वेन च धातूपात्तविशेषस्यैव प्रथमं ग्रहणं तदप्राप्तौ तु अपरस्येति विवेकः । तेन पच्यादयः स्वोपस्थाप्यस्य कर्त्रापेक्षया असाधारणधर्मस्य व्यापाररूपक्रियाकृतस्य विक्लित्तिरूपफलस्य बोधकाः कर्मस्थभावका एव गम्यादयस्तु नैवं तदुपस्थाप्यफलस्य संयोगादेरुभयनिष्ठतया साधारण्यात् धातूपस्थाप्यविशेषासत्त्वात् धात्वनुपस्थाप्यस्य क्रियाकृतस्य श्रमादिरूपासाधारणधर्मस्य ग्रहणं तस्य च कर्त्तरि दर्शनात् कर्त्तृस्थत्वम् । एवञ्च कर्त्तृस्थादिविभाग एतन्मते न्यायमूल एव । अन्येषां मते पुनः शब्दप्रवृत्तिः कर्मवत्कार्य्यप्रवृत्तिः शब्दैरेव नियामकशास्त्रैरेव प्रकल्पितेति

द्रष्टव्यम् । तच्च शास्त्रं यथा । कर्मस्थः पचतेर्भावः कर्मस्थाश्च भिदादयः । कर्त्तृस्थो बुद्ध्यतेर्भावः कर्त्तृस्थाश्च गमादय इति कर्मस्थाः कर्मस्थक्रियार्थका इत्यर्थ एवमग्रेऽपि । सम्प्रदायविदस्तु एतच्छात्रमपि न्यायमूलकं पूर्वोक्तरीत्या एतेषां कर्मस्थत्वादिव्यवस्थापनात् अन्यथा प्रातिस्विकरूपेण तत् गणनस्य कर्त्तुमशक्यतया अव्यवस्थापत्तिरिति । एवञ्च क्रियाकृतविशेषेणैव क्रियाव्यवस्थेति पक्षमवलम्ब्य निर्वर्त्ये च विकार्य्ये च कर्मवद्भाव इष्यते । न तु प्राप्ये कर्मणि तु सिद्धान्तोऽयं व्यवस्थित इत्यभियुक्तैर्व्यवस्था भङ्ग्यन्तरेण दर्शिता । तथा च निर्वर्त्यविकार्य्ययोरेव क्रियाकृतस्य उत्पत्त्यादिरूपस्य विशेषस्य सत्त्वात् प्राप्ये तदसत्त्वाच्च तेषु कर्मवद्भावाभावौ बोध्यौ क्रियाकृतविशेषाणां सिद्धिर्यत्र न तिष्ठतीत्यग्रिमप्राप्यकर्मलक्षणे प्राप्यस्य क्रियाकृतविशेषभावकथनात् व्यतिरेकेण निर्वर्त्यविकार्य्ययोस्तत्सत्त्वमर्थायातमित्यलं विस्तरेण ।

सन्नन्तधातूनां धात्वर्थेच्छार्थकत्वेन कर्त्तृस्थत्वेऽपि तत् प्रकृतीभूतधातोरेव कर्मकर्त्तृस्थभावकतया व्यवस्था तत्प्रकृतेरात्मनेपदादिना तदन्तस्यात्मनेपदादिवदिति द्रष्टव्यम् । बोधस्तु कर्मकर्तरि कर्तरीव यथा ओदनः पच्यते स्वयमेवेत्यादौ ओदनाभिन्नैकाश्रयकविक्लित्त्यनुकूलस्थाल्यादिसंयोगरूपव्यापारः । अपरे तु कर्त्तुराश्रयांशे विशेषणत्ववत् व्युत्पत्तिवैचित्र्येण फलेऽपि विशेषणत्वमङ्गीचक्रुरङ्गीश्चक्रुश्चात्र नामार्थधात्वर्थयोरपि साक्षादन्वयम् । वस्तुतस्तु तिङर्थाश्रयस्यैव व्युत्पत्तिवैचित्र्येणोभयत्रान्वय इति द्रष्टव्यम् ।

एवं धातुसामान्यलक्षणे तद्विभागे च दर्शिते इदानीं तदर्थो निरूप्यते । सर्वेषां धातूनां फलं तदनुकूलो व्यापारश्चार्थ इति सिद्धान्तः द्व्यर्थः पचिरिति भाष्योक्तेः -

**" फलव्यापारयोर्धातुराश्रयेतु तिङः स्मृताः ।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ [298]" इति ।**

इत्युक्तेश्च न तु फलमात्रं धात्वर्थः व्यापारस्त्वाख्यातार्थ इति कल्पनीयं तथात्वे कृदादौ व्यापारबोधानुपपत्त्या तत्साकाङ्क्षकारकप्रयोगानुपपत्तेः प्रयुज्यते च कारकं सर्वैः ग्रामो गमनवानिति प्रयोगापत्तेश्च । प्रत्ययमात्रस्यापि न व्यापारवाचित्वमनेकेषां प्रत्ययानां तद्वाचकत्वकल्पनापेक्षया सर्वत्रैव धातोरेवान्वयव्यतिरेकाभ्यामेकरूपत्वाच्च लाघवात् वाचकत्वोचित्यात् । व्यापारमात्रं धात्वर्थः फलं कर्मप्रत्ययार्थ इति कल्पनीयं त्यजिगम्योः पर्य्यायतापत्तेः त्यजादौ संयोगस्य गम्यादौ च विभागस्य कर्मप्रत्ययेन बोधनापत्तेः गत्यादौ संयोगादिबोधने च गम्यादिसमभिव्याहारस्य हेतुत्वकल्पनापेक्षया गम्यादेरेव तदर्थत्वौचित्यात् ।

द्वितीयाषष्ठीचतुर्थीलकारादीनामनेकेषां फलवाचकत्वकल्पनापेक्षया धातोरेव तथात्वौचित्याच्च । तयोश्च पृथगेव शक्तिः एकपदोपस्थितयोः परस्परं विशेष्यविशेषणभावेन विशिष्टबुद्धिरुदेति तेन कर्मादेराश्रयतया फलान्वयोपगमेन नैकदेशान्वयः विशिष्टशक्तिस्वीकारे तु तस्यैक-देशान्वयापत्तेः । तथा फले प्रधानं व्यापार इत्युक्तेः सर्वत्रैव व्यापारस्य विशेष्यत्वं विशेषणत्वमितरस्य तयोश्च संसर्गः जन्यजनकत्वादिरूपः अतएव क्रियाप्रधानमित्याद्युक्तिरपि साधु सङ्गच्छते । तथा तिङर्थस्याश्रयादेः सर्वथैव विशेषणत्वं तत्राप्ययं विवेकः तिङर्थाः खलु कालसंख्याकर्त्रादिरूपाश्रयास्तेषां कालस्य व्यापार एव विशेषणत्वम् । क्रियाभेदाय कालस्त्वित्युक्तेः संख्या

---

[298] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का .२ ।**

पुनराश्रयांशे विशेषणं संख्या सर्वस्य भेदिकेतिप्रागुक्तेः सर्वस्येत्यनेनाश्रयस्य नानात्वसूचनात् आश्रयरूपाख्यातार्थस्य कर्त्तृलकारे व्यापारे कर्मलकारे च फले विशेषणत्वेनान्वयस्वीकारेण तदंशे एव संख्यायाः विशेषणत्वमेकपदोपात्तयोरपि विशेष्यविशेषणभावान्वयाभ्युपगमात् आश्रयरूपोऽर्थस्तु फलव्यापारयोर्विशेषणम् । कर्त्तरि कृदिति लः कर्मणि इत्यादिसूत्राभ्यां लकारस्य व्यापाराश्रयरूपकर्त्तरि फलाश्रयरूपकर्मणि च शक्तिप्रतिपादनेऽपि फलव्यापारयोर्धातुलभ्यत्वाद् अन्यलभ्यत्वेन तदंशे शक्त्यनभ्युपगमात् आश्रयमात्रे एव तच्छक्तिस्वीकारः एवं कर्मणि द्वितीया कर्त्तृकरणयोस्तृतीयेत्यादावपि कर्त्तृकर्मणोर्द्वितीयादेराश्रयमात्रार्थः । एवञ्च तिङर्थाश्रयान्वितार्थकप्रातिपदिके प्रत्ययेनोक्तार्थत्वात् प्रथमा ततश्च यथा तिङर्थाश्रयेण सह कर्त्रादेरभेदान्वय एवं तृतीयाद्याश्रयेणापि देवतादिप्रत्ययार्थ इव प्रकृत्यर्थस्याभेदेनान्वयाभ्युपगमात् युष्मदि मध्यम इत्यादिसूत्रैर्युष्मदर्थसमानाधिकरण एव मध्यमादिपुरुषवचनलडादेर्विधानात् ‘ **लटः शतृशानचावप्रथमसमानाधिकरण**[299] ’ इति सूत्रे चादेशस्याप्रथमसामानाधिकरण्यनिर्देशात् स्थानिनस्तथात्वावदमाच्च । एवञ्च तिङर्थाश्रयस्य फलव्यापारयोरन्वये तङ्परस्मैपदादयो द्योतकाः । उक्तञ्च हरिणा-

“ **फलव्यापारयोस्तत्रफले तङ्यक्चिणादयः ।**
**व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥**
**उत्सर्गोऽयं कर्मकर्त्तृविषयादौ विपर्य्ययात् ।**
**तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥**[300] ” इति ।

---

[299] **पाणिनीयाष्टाध्याय्यां ३.२.१२४ ।**

[300] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का. ३ , ४ , पृ. ४८ , चौ.सं.प्र ।**

कर्मकर्त्तरि विहितयगादेः कर्त्तरि विहितस्य बुद्ध्यत्यादिभ्यश्चिणादेश्च फलान्वयद्योतकत्वापत्त्या यथागममित्युक्तं तथा च कर्मकर्त्तृविहितभाव-साधारणविधिविहिततङादयः आश्रयस्य फलान्वयद्योतकाः तद्भिन्नाः व्यापारान्वयद्योतका इति फलितम् । तेन कर्त्तरि विहिततङादेर्न फलान्वयद्योतकत्वप्रसङ्ग इति शब्दकौस्तुभानुसारिणः । मञ्जूषाकृतस्तु फलव्यापारयोः पृथक्शक्तिपक्षेऽपि कर्मप्रत्यये फलं कर्त्तृप्रत्यये च व्यापारो विशेष्यतया भासते तथैवानुभवादेवञ्च विशिष्टशक्तिस्वीकारापेक्षया पृथक्शक्तिकल्पने लाघवमपि भवति तथाहि आनुभविकतथाबोधस्योपपत्तये विशिष्टशक्तिवादिनां शक्तिद्वयकल्पनापत्तेः पृथक्शक्तिपक्षे तु व्युत्पत्तिवैचित्र्येण फलानुसारात् विशेष्यविशेषणभाववैपरीत्यमात्रं कल्प्यत इति बोध्यम् एवञ्च क्रियाप्रधानमित्युक्तिः लक्षणया धात्वर्थप्रधानमित्यर्थपरा तथाच द्वयोरपि धात्वर्थतया प्रयोगानुसारेण तयोः प्राधान्याप्राधान्ये तत्र च नियामकाः आश्रयस्य फलाद्यन्वयद्योतका एवेति प्राहुः । नव्यास्तु पृथक्शक्तिकल्पने तयोरुद्देश्यविधेयभावेनान्वयापत्तिः पृथगुपस्थियोस्तथान्वयस्यौत्सर्गिकत्वात् नानुभूयते च तयोस्तथान्वय इति विशिष्टशक्तिं स्वीकृत्य व्यापारविशिष्टफलफलविशिष्ट-व्यापारयोर्बोधने कर्मकर्त्तृप्रत्यययोश्च द्योतकतामभ्युपेत्य द्विधैव धातोः शक्तिः द्व्यर्थः पचिरितिभाष्यस्यापि द्विविधार्थवत्ताप्रतिपादनपरत्वादित्याहुः ।

तत्र फलतीतिव्युत्पत्त्या फलं नाम तद्धात्वर्थजन्यं गम्यादौ विभागस्य फलत्ववारणाय तद्धातूपस्थाप्यत्वेन विशेषणेऽपि विभागजन्यसंयोगस्य पतनफलत्वमते विभागस्य तद्धात्वर्थजन्यत्वात् तद्धातूपस्थाप्यत्वादति-व्याप्तेस्तद्धात्वर्थे विशेषणतया भासमानत्वेनैव विशेषणीयं गम्यादौ च विभागस्य तद्धात्वर्थे विशेषणतया भासमानत्वाभावात् न फलत्वप्रसङ्गः । मञ्जूषाकृन्मते तु कर्त्तृप्रत्ययस्थले तथाभासमानत्वमिति विवेकः ।

क्रियाविशेषणादेर्धात्वर्थे विशेषणत्वेऽपि तज्जन्यत्वाभावान्न फलत्वप्रसङ्गः विशेषणत्वञ्च साक्षादेव विवक्षितं तेन घटं करोतीत्यादौ घटादेः धात्वर्थक्रियाजन्यस्य विभक्त्यर्थद्वारा तद्विशेषणत्वेऽपि न फलत्वापत्तिः ।

व्यापारस्तु पूर्वोक्ता क्रियासमुदायात्मिका भावना तस्य तत्तत्क्रियात्वरूपेण फुत्कारात्वादिनैव बोधः । न तु व्यापारत्वरूपेण यत्नसाधारणस्य तस्यैकस्यानुतरूपस्यासत्त्वात् तत्तत्क्रियात्वादीनां नानात्वेऽपि एकबुद्धिविषयतया तेषामैक्यारोपादेकत्वव्यवहारः-

**" यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।**

**आश्रितक्रमरूपत्वात् क्रियेति व्यपदिश्यते ॥[301] " इति ।**

अपि चोक्तं –

**" गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।**

**बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ [302]" इति ।**

वाक्यपदीयोक्तेः एकैकावयवेऽपि समूहारोपादधिश्रयणकालेऽपि पचतीतिव्यवहारः यद्वा तावत्क्रियाव्यक्तिवृत्तिजातिरेव व्यापार इति बोध्यं प्रतिपादितञ्च तस्याः क्रियात्वं साध्यत्वञ्च प्रागिति ।

इदन्तु बोध्यं सर्वेषां कारकाणां क्रियायां विशेषणत्वस्वीकारेऽपि हिरुगाद्यव्ययार्थक्रियायां न तेषामन्वयः तद्बोध्यक्रियायाः साध्यरूपत्वाभात् साध्येष्वेव साधनान्वयनियमात् तेषां क्रियाप्रधानत्वव्यवहारस्तु क्रियामात्रविशेषणार्थकत्वात् स्वरादीनां तु स्वःपतिरित्यादौ नामार्थेऽप्यन्वितार्थकतया तथात्वाभावादतो हिरुगादीनां सिद्धरूपक्रिया-बोधकत्वमित्यवगन्तव्यम् ।

---

[301] **भर्तृहरिवाक्यपदीये ३.८.१ ।**

[302] **भर्तृहरिवाक्यपदीये ३.८.८ ।**

एवं सामान्यतो धात्वर्थे निरूपित इदानीं केषाञ्चिद्धातुविशेषाणामर्थः प्रदर्श्यते केषाञ्चिच्च कारकादिनिरूपणावसरे वक्ष्यते । तत्र भवत्यस्त्यादीनां सत्ता आत्मधारणञ्चार्थस्तच्चानेककालस्थायि कालगतपौर्य्यापर्य्येण क्रमवच्चेति तस्य क्रियात्वम् । आत्मधारणञ्च स्वरूपधारणं तत्र आत्मा स्वरूपञ्च सत्तैव । एवञ्च फलव्यापारयोरेकनिष्ठत्वादकर्मकत्वं व्यतिषे इत्याद्यात्मनेपददर्शनात्तेषां क्रियावाचकत्वमवगम्यते कर्मव्यतिहारे आत्मनेपदविधानात् कर्मपदेन च तत्र सूत्रे क्रियाया एव ग्रहणात् न च फलस्य व्यतिहारः सम्भवतीति भाष्यादौ स्पष्टम् । घटो भवतीत्यादौ उत्पत्त्यनुकूलव्यापारो भवतेरर्थः स च व्यापारः साध्यत्वेनाभिधीयमानाश्रयता । पचेर्विक्लित्त्यनुकूलव्यापारः स च अनेकविध इत्युक्तम् । नश्यतेरदर्शनानुकूलो व्यापारः स च ध्वंससामग्रीसम्बन्धः व्यवधानसामग्रीसम्बन्धश्च । एवञ्च व्यापारे कालान्वयोपगमात् नाशस्यातीत्वाभावेऽपि नष्ट इत्यादिप्रयोगोपपत्तिः । ध्वंसश्च कारणे तिरोभावावस्था कारणशक्ति स्वरूपेणावस्थानन्तु प्रागभावः ततः प्रच्युताऽभिव्यक्ति लक्षणधर्मापन्ना व्यक्तिरित्युच्यते इति सिद्धान्तः । जानातेर्विषयतया ज्ञानं फलमात्ममनःसंयोगो व्यापारोऽर्थः । अतो मनो जानातीत्याद्युपपत्तिः आत्मानं जानातीत्यादौ तु शरीरावच्छिन्नात्मनः कर्मत्वमन्तःकरणावच्छिन्नस्य तु कर्त्तृत्वमिति कर्मवदिति सूत्रे भाष्ये स्पष्टम् । इदमेव ज्ञानरूपं फलं चक्षूरादिकरणकत्वेन विवक्षितं दृश्यादेरर्थः । तथाहि चक्षुर्जन्यं ज्ञानं दृशेरर्थः श्रोत्रजन्यं शृणोतेः घ्राणजन्यं जिघ्रते रसनाजण्यं रसतेः त्वग्जन्यं स्पृशतेः मनोमात्रजन्यं मन्यतेः लिङ्गादिज्ञानजन्यमनुमिनोतेः शब्दजन्यं शृणोतेः भावनाख्यसंस्कारजन्यं स्मरतेः संस्कारेन्द्रियसन्निकर्षजन्यं प्रत्यभिजानातेरेवं तत्तत्समानार्थकधातोश्चार्थः व्यापारस्तु सर्वत्रैकरूपः पूर्वोक्त एव । तथा ज्ञानस्य वेद्यविशेषगोचरत्वे हेतुविशेषजन्यत्वे

संशेत्यादेर्विभेत्यादेश्चार्थत्वं यथा। विरुद्धद्वयप्रकारकैकविशेष्यकं ज्ञानं संशेतेः संशयान्यज्ञानं निश्चिनोतेः अवाधितविषयकं प्रमिनोतेः बाधितविषयकं ज्ञानं भ्राम्यतेः गौरवहेतुकं ज्ञानं संमन्यतेः अपकर्षहेतुकं ज्ञानमवजानातेः मोहभयादेरपि ज्ञानेऽन्तर्भावः दर्शयिष्यते च विभेत्यादीनामर्थः कारके इत्यलम्।

इच्छतेर्विषयतया इच्छा फलं व्यापारस्तु तदनुकूलज्ञानमिष्टसाधनत्वादिविषयकम्। इयञ्चेच्छा नानाविधा। भोज्यविषयिणी रुचिरूपा योषिदादिविषयिणी कामानुरागादिरूपा सामान्यभोग्यविषयिणी अभिलाषरूपा औत्सुक्यहेतुका भोज्यादिविषयिणी लालसारूपा तत्तद्वाचकधातवस्तु रोचत्यादय एवमन्येऽपि विशेषेच्छार्थका अवसरे दर्शयिष्यन्ते। यततेः समवायेन यत्नः फलमात्ममनःसंयोगस्तु व्यापारस्तेन फलव्यापारयोरेकनिष्ठत्वादकर्मकः विषयतया फलबोधने अस्य निराङ्क्षत्वात् न सकर्मकत्वमेवं प्रवर्ततेः निर्वर्ततेश्च बोध्यं करोतेश्च उत्पत्त्यनुकूलव्यापारार्थकत्वात् न सकर्मकत्वहानिः यत्नार्थकत्वे अकर्मकत्वापत्तेः। उक्तञ्च कृञोऽकर्मकतापत्तेर्नहि यत्नोऽर्थः इष्यते। युक्तञ्चैतत् कृञो यत्नमात्रार्थकत्वे कर्त्तृस्थभावकतया ततः कर्मकर्त्तरि कर्मवत्कार्य्यानापत्तेः भवति च क्रियते घटः स्वयमेवेति प्रयोगः शास्त्रसम्मतोऽतोऽवश्यम् उत्पत्त्यनुकूलो व्यापारः करोत्यर्थः स्वीकार्य्यः उत्पत्तिरूपफलस्य कर्मतया कर्मवद्भाव उपपद्यते। विषयतया द्वेषः फलं व्यापारश्चात्ममनःसंयोगादिरूपद्विषेरर्थः। द्वेषस्तु दुःखसाधनताधीजन्योऽप्रीति-जनकश्चित्तवृत्तिविशेषः। संयोगस्तदनुकूलव्यापारश्च तद्विशिष्टो वा गम्यादेरर्थः संयोगश्च नानाहेतुकत्वेन नानाधिकरणत्वेन च नानाविधः। ततश्च तत्ततसंयोगफलबोधकानां सर्वेषामेव धातूनां गत्यर्थतावसेया। तथाहि पूर्वदेशसंयोगनाशानन्तरोत्तरदेशसंयोगो गमेः फलं वहिर्विभागजन्याभ्यन्तर-

संयोगः प्रविशेः । द्रवद्रव्यकरणकसंयोगः सिचेः जलं सिञ्चतीत्यादौ तु विजातीयसंयोगावच्छिन्ने लक्षणा। एवं सुरभ्यादिद्रव्यकरणकसंयोगो लिपेः। स्नेहद्रव्यकरणकसंयोगोमर्दयते । सर्वशरीरसंयोगमज्जतेः । उर्द्ध्वदेशसंयोग उत्क्षिपतेः अधःसंयोगोऽवक्षिपतेः फलं बोध्यमेवमन्येषामपि भ्रम्यादीनां गत्यर्थत्वमवसेयम्। विभागजन्यसंयोगः क्रिया च पतेरर्थः क्रियामात्रन्तु अपरे तदर्थमाहुः- विभागजनकक्रिया त्यजादेरर्थः । अवयवविभागावच्छिन्ना तु भिद्यादेरर्थः । द्विकर्मकाणान्तु कारकेऽर्था निरूप्यन्ते इति दिङ्मात्रम् प्रदर्शितमाकरे तु विस्तरः।

प्रातिस्विकरूपेण सर्वेषां धातूनामर्थनिरूपणस्य वाहुल्यात् कर्त्तुमशक्यतया अधुना कतिचिदर्था एव निरूप्यन्ते। पराभिभवेच्छा स्पर्द्धा अकर्मिका अभिभवेच्छामात्रविवक्षायां सकर्मिका परदुःखप्रहरणेच्छा दया अकर्मिका । निर्दोषत्वेनाभिमानोविश्वासः स्वावधिकोत्कर्षज्ञापनं नमनं सकर्मकं स्वावधिकोत्कर्षस्य ज्ञाने विषयतया सामानाधिकरण्येन चोभयसम्बन्धेन विशेषणत्वं तेन नोदासीनस्य तत्कर्मत्वं ज्ञापनव्यापारश्च करशिरःसंयोगादिरूपो नानाविधः । मेध्यानाडीसंयोगः स्वापः । निद्रा शयनमपि तथा शय्यासंयोगश्च स्वापाभावो जागरणम्। मुखविकाशो हासः। क्रियामात्रं स्पन्दनं चलनं कम्पनञ्च। यत्नजन्यक्रिया चेष्टा एतेऽकर्मकाः। आस्वादनं रसानुभवो रुचिश्च यथाक्रमं सकर्मकोऽकर्मकश्च । जिह्वाकरणकोरसानुभवोलेहनम् आकर्षणपूर्वकः स एव चोषणं दन्तकरणकः स एव चर्वणमिति विवेकः। मोदादयः आनन्दविशेषाश्चित्तस्य परिणामाः अकर्मकाः । काठिन्यशैथिल्ये आरम्भकसंयोगवृत्ती धर्मविशेषौ मृदुत्वतीक्ष्णत्वादयः स्पर्शवृत्तयः धर्मविशेषाः । एते च तन्मात्रार्थत्वे अकर्मकास्तत्करणार्थत्वे सकर्मकाः । अविद्यमानगुणज्ञापनं श्लाघा । अभिमानहेतुकं शब्दद्वारा तज्ज्ञापनं विकथनम्। भेदनानुकूलव्यापारो लेखनं

संस्थानविशेषरचनमपि । हिंसाहेतुको दन्तकरणकः संयोगानुकूलव्यापारो दंशनं रागहेतुकोधरकरणकः स एव चुम्वनम् । गलविलाधःसंयोगानुकूलो व्यापारोभोजनं द्रवद्रव्यविषयकं तदेव पानम् । गलविलावधिकोर्द्धसंयोगजनकोव्यापारोवमनमुद्गिरणञ्च । दोषाविष्करणं निन्दा गुणाविष्करणं प्रशंसनम् । एतौ व्यापारौ प्रायशः शब्दरूपौ कथनेनैव हि सर्वदोषादिकं प्रकटीकुर्वन्ति एते च सर्वे सकर्मकाः । दोषत्यागः शुद्धिरुभयोरेकाश्रयत्वादकर्मकस्तत्करणविवक्षायां सकर्मकः । शोभाविशेषोत्पत्तिर्मण्डनम् अकर्मकम् तत्करणविवक्षायां सकर्मकम् । गर्वहेतुकाभिमानोऽहङ्कारश्चित्तवृत्तिविशेषः अकर्मकः । इतरभेदज्ञापनं विशेषणं लक्षणञ्च याथातथ्येन ज्ञापनं निरूपणं साकल्येनाभिसम्बन्धः व्याप्तिः साध्यविशिष्टतया धर्मिनिर्देशः प्रतिज्ञा एते सकर्मकाः । त्यागकरणको व्यापारोयागः । त्यागश्च स्वत्वध्वंसानुकूलो व्यापारः तत्रैव च सर्वेषां कारकाणामन्वयाभ्युपगमात् तस्यापि व्यापाररूपत्वसत्त्वात् देवादेश्च तत्र त्यागे विवक्षया कर्मत्वं द्रव्यादीनां च करणत्वं बोध्यम् । त्यागस्य करणत्वञ्च स्वर्गादिफलानुकूलव्यापारे इति विवेकः । त्यागस्य च व्यापारे करणत्वात्तद्विशेषणस्याश्वमेधादेरपि करणत्वं तेनाश्वमेधपदेन यजेतेत्यादौ अश्वमेधपदे तृतीया अश्वमेधपदेन च तत्तदितिकर्त्तव्यताविशिष्टोऽभिधीयते । स्वत्वध्वंसानुकूलोव्यापारस्त्यागतत्र द्रव्यादीनां कर्मत्वं देवादेश्चोद्देश्यत्वात् सम्प्रदानत्वम् । द्रवद्रव्यकरणकारम्भकसंयोगशैथिल्यापादनं विक्लेदनम् । द्रवद्रव्यनिःसारणपूर्वकतत्काठिन्यापादनं शोषणम् । रज्वादिकरणकगत्यादि-रोधहेतुसंयोगानुकूलोव्यापारः वन्धनं विषयविशेषे व्यवस्थापनं नियमनम् । प्रीत्यनुकूलोव्यापारो भजनम् । प्राणवियोगानुखुलोव्यापारो हननं विभागजनकव्यापारो मोचनं विभजनञ्च एतानि सकर्मकाणि । अत्यन्तानलसंयोगजन्यनाशोदाहस्तत्करणविवक्षायायां सकर्मकः ।

मादकद्रव्यादिहेतुकशित्तविक्षेपः। मादोन्मादप्रभृतयः। गतिनिवृत्तिः स्थितिः बृद्धिरुपचयः हानिरपचयः आत्मनि निन्दितत्वज्ञानाधीनशित्तवृत्तिविशेषो लज्जा । हर्षजनकहस्तादिविक्षेपः क्रीड़ा । विषयात्वापत्तिः प्रकाशः विषयाभिलाषोरागस्तदनभिलाषोविरागोविरतिश्च द्रवहेतुकक्रियाविशेषः स्यन्दनमेतान्यकर्मकाणि । एवञ्च गणनिर्दिष्टधातूनां तत्तदर्थेषु शक्तिर्लक्षणा पुनर्थान्तरेषु अतएव अनेकार्था हि धातव इत्यभियुक्तोक्तिरपि लक्ष्यार्थविषयेत्याकरे स्पष्टम्।

इदानीं प्रत्ययान्तधातूनामर्था निरूप्यन्ते तत्र स्वार्थिकप्रत्ययानां गुपादिभ्यो विहितानां सन्प्रभृतीनां धात्वर्थस्वरूपमेवार्थस्तत्र च प्रकृत्यर्थस्याभेदेनान्वयः उक्तञ्च हरिणा – " **स्वार्थिकाः प्रत्ययाः केचित् प्रकृत्यर्थानुवादिन** [303]" इति । प्रकृत्यर्थानुवादकञ्च तत्तत्स्वरूपाभिधायकत्वं नातो घटो घट इतिवत् प्रकृतिप्रत्ययार्थयोस्तयोवयोग्यतापत्तिरिति द्रष्टव्यम्।

धातोः कर्मणः समानकर्तृकादिच्छायां वेति सूत्रेण इषिकर्मण एषितृकर्तृकात् धातोरिच्छार्थे सन् वा स्यादित्यर्थकेन विहित सन् इच्छार्थस्तत्र च धात्वर्थस्य च कर्मतया सामानाधिकरण्येन चोभयसम्बन्धेनान्वयः तेन पाकेन भोजनेच्छायां परकर्तृकपाकेच्छायाञ्च पिपक्षतीति न प्रयोगः । एवञ्च सनन्तस्य स्वप्रकृत्यर्थकर्मकत्वेन धात्वर्थोपगृहीतकर्मकतया अकर्मकत्वे अपि सनन्तस्य स्वप्रकृतिधातोस्तङादिना तङादिमत्त्ववत् तत्सकर्मकाकर्मकत्वाभ्यां सकर्मकत्वाकर्मकत्वे बोध्ये तेन चैत्रेणौदनो वुभुक्ष्यते मैत्रेण सुषुपप्स्यते इत्यादौ कर्मणि भावे च लकारोपपत्तिः। तथाहि सनर्थविशेषणे धात्वर्थे कर्मणोऽन्वयेऽपि तत्पारतन्त्र्येणेच्छायामप्यन्वयात्

---

[303] **भर्तृहरिवाक्यपदीये।**

कर्मान्वितस्वार्थबोधकत्वरूपसकर्मकत्वाक्षतेराद्ये कर्मणि लकारोद्वितीये तु कर्माभावेन सन् प्रकृतिधात्वर्थत्वेऽपि कर्मानन्वयात् अकर्मकतया भावे इति विवेकः । वस्तुतस्तु पारतन्त्र्येण धात्वर्थकर्मणः सनर्थेच्छान्वयेऽपि न तस्य सनन्तोत्तरलकारादिनिमित्तकार्य्यप्रसङ्गः तत्प्रकृतिनिमित्तककार्य्यस्य द्वितीयादेरन्तरङ्गकार्य्यत्वेन बलत्वात् तेन समं लकारयोगाभावेन च द्वितीयाया बाधः एवञ्च तत्प्रयोगोपपत्तये फलव्यापारयोर्विशेष्यविशेषणभाव-वैपरीत्यवत् सनन्तेऽपि तथास्वीकारेण कर्मप्रत्यये इच्छार्थविषयधात्वर्थ एव सनन्तार्थः ततश्च तादृशधात्वर्थान्वितकर्मलकाराद्यर्थान्वितार्थकत्वेनौदनादेः प्रथमोपपत्तिः । कालादिरूपाख्यातार्थस्तु इच्छायामेवान्वेतीति विशेषः । बोधस्तु ओदनाभिन्नैकाश्रयकंचैत्राश्रयकवर्त्तमानेच्छाकर्मभोजनमित्येवं रूपः । आशङ्कायामचेतनेषूपसंख्यानमितिविहित सन् आशङ्कार्थः तत्र च धात्वर्थस्य कर्मतामात्रसम्बन्धेनान्वयः आख्यातार्थस्त्वाश्रयोऽत्र विशेष्यतासम्बन्धेन ग्राह्यस्तेन कूलं पिपतिषतीत्यादौ कूलाभिन्नैकविशेष्यकवर्त्तमानपतनसन्देह इत्येवं रूपो बोधः । सन्देहस्त्वत्र प्रयोक्तुरेवातो धात्वर्थस्य तत्सामान्यधिकरणाभावात् कर्मतामात्रेणान्वयः कल्प्यते इत्यवधेयम् ।

सुप आत्मनः क्यजि[304]तिविहितक्यच इच्छार्थः तत्र च प्रकृत्यर्थस्य कर्मतासामानाधिकरण्याभ्यामन्वयः कर्मण इत्यस्यानुवृत्त्या सुबन्तेन सहाभेदेनान्वयात् आत्मन इत्यस्य सम्बन्धितया सुबन्ते एव अन्वयाच्च आत्मसम्बन्धिसुबन्तात् कर्मरूपादिच्छार्थे क्यजितिसूत्रार्थलाभेन तत्रान्वयौचित्यात् सामानाधिकरण्यञ्चात्र स्वसम्बन्धिवृत्तित्वं ग्राह्यमेवञ्च देवदत्तपुत्रमिच्छति स्वपुत्रेण च सुखमिच्छतीत्यादिविग्रहे पुत्रीयतीत्यादिर्न

[304] **पाणिनीयाष्टाध्याय्यां ३.१.८ ।**

प्रयोगः तत्रेच्छायां देवदत्तपुत्रसामानाधिकरणाभावात् स्वपुत्रस्य च कर्मत्वाभावात् । गुरुपुत्रमिच्छतीत्यादिविग्रहे तु नामार्थैकदेशस्यैषितृसम्बन्धितया क्यजर्थे तदन्वयसम्भवात् क्यजादय उत्पद्यन्ते गुरोः पुत्रमिच्छतीत्यादौ तु नैवं क्यच् प्रकृतिनामार्थस्यैकदेशस्यापि एषितृसम्बन्धित्वाभावेन तत्र निरुक्तसम्बन्धेनान्वये अयोग्यत्वात् । यद्यपि क्यजाद्यन्तस्य गृहीतकरेमकत्वेनाकर्मकत्वेऽपि सनन्तस्येव स्वप्रकृतेः सकर्मकत्वेन सकर्मकत्वापत्तिस्तथाच ओदनस्य पाकमात्मन इच्छतीति विग्रहे ओदनस्य पाकीयतीति वृत्तौ ओदनादेर्द्वितीयापत्तिरोदनादेः पाकादावन्वयेऽपि पारतन्त्र्येण क्यजर्थेऽन्वयात् तथापि कृद्योगषष्ठ्या अन्तरङ्गकार्य्यत्वेन बलवत्त्वात् तया द्वितीयाया बाध इत्यवधेयम् । अत्र च सनन्तवत् प्रकृतिप्रत्ययार्थयोर्विशेष्यविशेषणभाववैपरीत्यमपि न सम्भवति धातोरेव पृथक्शक्तिकल्पनेन तथात्वस्वीकारात् क्यजन्तस्य धातुत्वेऽपि तत्प्रकृतेर्नामित्वात् नामार्थस्य तथात्वाकल्पनादिति ।

# द्वितीयोऽध्यायः

# द्वितीयोऽध्यायः

## लकारार्थविचारः

शब्दस्य ज्ञानाय बहूनि व्याकरणानि महर्षिभिः प्रणीतानि सन्ति । स च शब्दः वर्णपदवाक्यरूपः । तत्र यद्यपि वर्णानां पदानां वाक्यानाञ्चार्थवाचकत्वं स्वीकुर्वन्ति सर्वे । अत एव स्फोटवादिभिः वैयाकरणैः वर्णस्फोट-पदस्फोट-वाक्यस्फोट इति नामभिरष्टौ स्फोटाः स्वीकृताः सन्ति । तत्र यद्यपि " **वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः** [305]" इति रीत्या वाक्यस्फोटस्यैव प्राधान्यं प्रतिपादितं नागेशेन ,

किन्तु पदान्वाख्यानं विना वाक्यान्वाख्यानं सम्भवत्येव नहि । उक्तञ्च –

" **प्रतिवाक्यं संकेतग्रहासम्भवात् तदन्वाख्यानस्य लघूपायेनाशक्यत्वाच्च कल्पनया वाक्ये पदानि विभज्य पदे प्रकृतिप्रत्ययविभागकल्पनेन कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं कल्पयन्ति स्म आचार्याः** [306]" इति । एतदेवाभिप्रेत्य कैयटेनापि निगदितम् – " **अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह अर्थवत्ता परिकल्पनात्** [307]" इति ।

पदञ्च द्विविधम् – सुबन्तं तिङन्तञ्चेति । तत्र तिङन्तपदस्यान्वाख्यानाय महर्षिणा पाणिनिना लकारविधानमारब्धम् – " **लः कर्मणि च भावे चाकर्मकेभ्यः** [308] " इति ।

---

[305] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. १ ।**

[306] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. ५।**

[307] **पतञ्जलिमहाभाष्यप्रदीपे ५/३/६८ ।**

[308] **पाणिनीयाष्टाध्याय्यां ३/४/६९ ।**

सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र इति नियमात् अस्मिन्नपि सूत्रे " **चकारग्रहणात्** " " **कर्त्तरि कृत्**[309]" इति सूत्रात् कर्तरीति पदमनुवर्तते । एवञ्च सकर्मकेभ्यो धातुभ्यो लकाराः कर्मणि कर्तरि च , अकर्मकेभ्यो धातुभ्यो लकाराः कर्तरि भावे च भवन्तीति लकारविधायकसूत्रस्यार्थः । " **द्व्येकयोर्द्विचनैकवचने**[310]" " **बहुषु बहुवचनम्**[311] " इत्येताभ्यां सूत्राभ्यां सहैकवाक्यतया कर्तरि प्रत्ययस्थले कर्त्तृगतैकत्वद्वित्व-बहुत्वविवक्षायां , कर्मणि प्रत्ययस्थले कर्मगतैकत्वद्वित्वबहुत्वविवक्षायां क्रमशः लादेशानामेकवचनद्विवचनबहुवचनानि विधीयन्ते । एवञ्च कर्तृकर्मभावसंख्या लकाराणां लादेशानां वार्थः । लडादीनां लकाराणां विधानन्तु ' **वर्तमाने लट्**[312]' इत्यादिसूत्रैः तत्तत्काल एव भवति । एवञ्च कालोऽपि तेषामर्थः । तत्र कर्तृकर्मसंख्याभावकालेषु भावस्य धातुवाच्यत्वात्[313] कर्तृकर्मसंख्याकाला एव लकाराणामर्थाः सिद्ध्यन्ति वैयाकरणनिकाये ।

ननु वर्तमानादिषु लकाराणां विधानात् तेषां कालरूपोऽर्थः कथं सम्भवतीति चेत् , उच्यते भूत-भविष्य-वर्तमानश्चेतित्रयः कालस्य भेदाः वर्णिता आचार्यैः । तत्र यद्यपि काल एकैव विभुर्नित्यश्च , किन्तु तस्य क्रियोपाधिकृतं भेदत्रयमेव । तथा चोक्तम् –

---

**[309] पाणिनीयाष्टाध्याय्यां ३/४/६७ ।**

**[310] पाणिनीयाष्टाध्याय्यां १/४/२२ ।**

**[311] पाणिनीयाष्टाध्याय्यां १/४/२१ ।**

**[312] पाणिनीयाष्टाध्याय्यां ३/२/१२३ ।**

**[313] ' भाष्य एव हि धात्वर्थ इत्यवच्छिन्न आगमः- वाक्यपदीयतृतीयकाण्डस्य क्रियासमुद्देशे का.२४ ।**

**“ तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः ।**

**भेदा एव त्रयः सिद्धाः यांल्लोको नातिवर्तते ॥** [314] **” इति ।**

एवञ्च वर्तमानोऽपि कालविशेष एव । अतो वर्तमानादिषु विधीयमानानां लकाराणां कालोऽप्यर्थः , ‘ **नहि विशेषः सामान्यादतिरिच्यत** ’ इति न्यायात् । तस्मात् कर्ता , कर्म , संख्या , काल इति चत्वारो लकाराणां सामान्यरूपेण वाच्याः ।

नागेशास्त्वेष्वर्थेषु लादेशानां तिङादीनां शक्तिं स्वीकुर्वन्ति । उक्तञ्च तैः - “ **तत्र संख्याविशेषकालविशेषकारकविशेषभावा लादेशमात्रस्यार्थाः** [315]” **इति ।** अयमभिप्रायस्तेषां लोके लादेशानामेव प्रयोगो दृश्यते , न तु लकाराणाम् । एवञ्च ‘ **उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति** [316]’ इति भाष्योक्त्या लोके प्रयुक्तानामेव तिङादीनां वाचकत्वं युक्तमिति कृत्वा लादेशार्थविचार एव कृतस्तेन ।

एवञ्चास्मिन् मते यद्यपि ‘ **लः कर्मणि च भावे चाकर्मकेभ्यः**[317] ’ ‘ **वर्तमाने लट्** [318]’ इत्यादिसूत्राणां स्वारस्यमसंगतमेव प्रतिभाति , यतो ह्युक्तसूत्रैः तत्तदर्थेषु लकाराणां विधानात् , लकाराणामेव तद्वाचकत्वं युक्तम् , न तु लादेशानामिति । इमामेव असंगतिं मनसि निधाय उक्तम् –“ **वर्तमाने लट् इत्यादि विधायका ‘ लः कर्मणि च भावे चाकर्मकेभ्यः ’ इति शक्तिग्राहकसूत्राणामादेशार्थ स्थानिन्यारोप्य प्रवृत्तिः**[319] ” इति ।

---

[314] वाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का.४८ ।

[315] परमलघुमञ्जूषायां लादेशार्थविचारे पृ.७३ ।

[316] पतञ्जलिमाहाभाष्ये १/४/६९ , पृ.३७२ ।

[317] पाणिनीयाष्टाध्याय्यां ३/४/६९ ।

[318] पाणिनीयाष्टाध्याय्यां ३/२/१२३ ।

[319] परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७२ ।

अयम्भावः तिङादीनां वाच्यार्थान्न तत्स्थानिनि लकार आरोप्य तत्तत्सूत्रैः तेष्वर्थेषु लकारा विधीयन्ते । स्वीकृतञ्चायं कौण्डभट्टेनापि - **" बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्तरि चानेन विधीयन्ते , नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकतां शक्तिमादाय शसादिविधानवत् "** [320] इति ।

## ➢कौण्डभट्टमतम्

**" वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति ।**

**विध्यादौ प्रार्थनादौ क्रमाज्ज्ञेया लडादयः ॥**[321]"इति ।

लडाद्यष्टितः षट्क्रमेणैष्वर्थेषु द्रष्टव्याः इत्यादिरूपेण वर्तमानादिष्वर्थेषु लडादीनां विधानं वर्णयन्ति । अतस्तेषां मते लकाराणामेव वाचकत्वम् ।

किन्तु **" आश्रये तु तिङः स्मृताः**[322] **"** इत्यनेन कर्तरि कर्मणि च तिङः एव शक्ति वर्णिता । कर्तृकर्मणोः तिङ्वाच्यत्वमपि समर्थितं बहुभिर्युक्तिभिः । एवञ्च **' कर्तरि कर्मणि तिङां शक्तिः , काले च लकाराणाम् '** इति प्रतिपादयतां कौण्डभट्टानां लकाराणां लादेशानां वा वाचकत्वे न कश्चनाग्रहः , यतो हि लकाराणां वाचकत्वे लत्वस्य शक्ततावच्छेदकत्वे लाघवम् , तिबादीनां वाचकत्वे तु नानाशक्ततावच्छेदकत्वस्वीकारे गौरवम् । एवञ्च लकाराणां वाचकत्वे लाघवम् , तिबादीनां वाचकत्वे च **' उच्चार्यमाणः शब्दः सम्प्रत्यायको भवति न संप्रतीयमानः '**[323] इति भाष्यं प्रमाणम् ।

---

[320] **वैयाकरणभूषणसारे धात्वार्थनिर्णये , पृ. २५ ।**

[321] **वैयाकरणभूषणसारे धात्वर्थनिर्णये का. २२ ।**

[322] **वैयाकरणभूषणसारे का. २ ।**

[323] **अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रस्य महाभाष्ये ५५५ तमे पृष्ठे ।**

एवञ्चोभयोर्वाचकत्वपक्षे युक्तेर्विद्यमानत्वात् कस्यापि वाचकत्वमस्तु , तत्र न कश्चनाग्रहो कौण्डभट्टस्य प्रतीयते मे मतौ ।

भवतु नाम , लकाराणां , लादेशानां वा कर्तृकर्मसंख्याकालाः सामान्यतोऽर्था इति वैयाकरणानां राद्धान्तः । तत्र संख्या कर्तृप्रत्यये कर्तरि , कर्मप्रत्यये च कर्मणि विशेषणम् , कालस्तु धात्वर्थव्यापारे विशेषणम् , ‘ **क्रियाभेदाय कालस्तु**[324] ’ इति भर्तृहरिसिद्धान्तात् ।

### ➢नैयायिकमतम्

कृतिरेवाख्यातार्थः ( तिङर्थः ) न तु कर्तृकर्मणीति नैयायिकानां सिद्धान्तः । अभिहितञ्च – “ **यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते । चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्वयः । तच्च गौरवात् त्यज्यते किन्तु कृतौ शक्तिर्लाघवात् । कृतिश्चैत्रादौ प्रकारीभूय भासते** [325]” इति ।

अयमभिप्रायः – कर्तरि शक्तिकल्पनापेक्षया कृतौ शक्तिस्वीकारे लाघवम् । लाघवन्तु शक्यतावच्छेदकदृष्ट्या । तथाहि कर्तरि शक्तिस्वीकारे कर्तृत्वमेव शक्यतावच्छेदकम् । कर्ता च कृत्याश्रयः , एवञ्च कर्तृत्वं कृतिरूपमेव , ‘ **प्रकृतिजन्यबोधे प्रकारीभूतोऽर्थः भावप्रत्ययार्थः** ’ इति नियमात् । सा च कृतिराश्रयभेदादनेका । एवञ्च कर्तरि शक्तिस्वीकारे नानाशक्यतावच्छेदकमिति गौरवम् । कृतौ शक्तिस्वीकारे तु कृतित्वं शक्यतावच्छेदकं तच्चैकमेवेति लाघवं स्पष्टमेव । तस्मात् शक्यतावच्छेदके लाघवात् कृतौ शक्तिः स्वीकर्तव्या । सा च कृतिः चैत्रादौ आश्रयत्वसंसर्गेण समवायसम्बन्धेन वा विशेषणम् । एवञ्च चैत्रः पचति इत्यत्र विक्लित्त्यनुकूल

---

[324] **वाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का.२ ।**

[325] **न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डे पृ.२६६-६७ ।**

कृत्याश्रयः , कृतिमान् वा चैत्रः इति शाब्दबोधः , तेषां मते प्रथमान्तार्थमुख्यविशेष्यकबोधस्यैवेष्टत्वात् ।

## ➢नैयायिकमतखण्डनम्

एवं महता समारम्भेण प्रतिपादितोऽयं नैयायिकानां सिद्धान्तोऽविचारितरमणीय एव । यतोहि – **‘ गच्छति ’ इत्युक्तेः गमनकर्ता कः ? इति कर्तृविशेषविषयकाकांक्षायाः सर्वानुभवसिद्धान्तात् , कर्तुरेव वाच्यत्वं युक्तम् ।**

किञ्च शक्यतावच्छेदकविषये प्रदर्शिता लाघवगौरवचर्चापि नादरणीयाः , कृत्याश्रयत्वस्य कर्तृत्वासम्भवात् । कृत्याश्रयत्वस्य कर्तृत्वे **‘ रथो गच्छति ’** इत्यादौ रथादीनां कर्तृत्वासम्भवात् , यतोहि – यत्नरूपा कृतिश्चेतन एव तिष्ठति रथश्चाचेतनः अतस्तस्य कर्तृत्वाभावेऽव्याप्तिदोषः । उक्तञ्च कारकचक्र प्रयोक्तृत्वम्[326] , कृत्याश्रयत्वं वा **‘ दण्डः करोति ’** इत्यत्राव्याप्तम् । अतः स्वातन्त्र्येण विवक्षितत्वमेव कर्तृत्वम् , ‘ **स्वतन्त्रः कर्ता** [327]’ इत्यनुशासनात् । तच्च सकलकर्तृष्वखण्डोपाधिरूपमेकमेवेति न किमपि गौरवं शक्यतावच्छेदके ।

लकाराणां कृतौ शक्तिस्वीकारे , स्थान्यादेशयोः समानार्थकत्वनियमात् ’ शतृशानजादीनामपि लादेशत्वेन तिबादिवत् कृतावेव शक्तिः स्वीकरणीया । एवञ्च **‘ गच्छन्तं रामं पश्य ’**, **‘ समेधमानस्य रामस्य धनम् ’** इत्यादौ शतृशानजर्थस्य कृतेः आश्रयत्वसम्बन्धेन , समवायेन रामेऽन्वयो न स्यात् , **‘ पचतः ’** इत्यस्य प्रातिपदिकत्वेन गमनानुकूलकृतिरूपार्थस्य नामार्थत्वेन

---

[326] **वैयाकरणभूषणसारे सुबर्थनिर्णये पृ.१९४ ।**

[327] **पाणिनीयाष्टाध्याय्यां १/४/५४ ।**

‘ **नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न** [328]’ इति नैयायिकाभिमतसिद्धान्तविरोधात् ।

**‘ नामार्थयोरभेद एवं संसर्ग ’** इति व्युत्पत्त्यनुरोधात् शतृशानजादीनां कर्तरि शक्तिः , तिबादीनान्तु कृताविति नैयायिकानां सम्मतं मतमपि दुराग्रहग्रस्तत्वादुपेक्षणीयमेव । यतोहि स्थानिन एव वाचकाः लाघवात् , आदेशास्त्ववाचका[329] एव , तेषां वाचकत्वस्वीकारे गौरवात् । यथा – **‘ रामः ’ ‘ ज्ञानम् ’** इत्यादौ सौ विसर्गेऽमि च कृते , यदि **‘ अमि ’ ‘ विसर्गे ’** च वाचकता स्वीक्रियते , तथा शक्तिद्वयकल्पने गौरवम् , अतः सा एव वाचकतेति नैयायिकैरेव स्वीकृतत्वात् , एवञ्चात्रापि तिबादीनां शतृशानजादीनाञ्च स्थानी लकार एव अतः स एव वाचकः , न तु तिबादयः शत्रादयो वा । तथाहि यदि शतृप्रत्ययान्ते लकारः कर्तरि शक्तः , तर्हि तिङन्ते कथं कृतिं बोधयेत् । अतः , शत्राद्यन्ते लकारस्य कर्तृबोधकत्वावश्यकत्वेन तिबन्तेऽपि तस्य कर्तृबोधकत्वमेवोचितम् ।

### ➢पाणिनिसम्मतिः

किञ्च लकाराणां कर्तृकर्मरूपार्थावाचकत्वे मध्यमपुरूषादि-व्यवस्थैवोच्छिन्ना स्यात् । तथाहि पुरुषव्यवस्थानियामकं सूत्रद्वयं प्रणीतं पाणिनिना ‘ **युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि**[330] **मध्यमः** ’ ‘ **अस्मद्युत्तमः**[331] ’ इति । तस्यायमर्थः समानाधिकरणे युष्मदि प्रयुज्यमाने

---

328 **“ तादृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोधस्याव्युत्पन्नत्वात् ” – व्युत्पत्तिवादे पृ.१०७ ।**

329 **“ आदेशेषु बुहुषु शक्तिकल्पने गौरवात् ” – परमलघुमञ्जूषायां नैयायिकरीत्या लकारार्थविचारे , पृ.७९ ।**

330 **पाणिनीयाष्टाध्याय्यां १/४/१०५ ।**

331 **पाणिनीयाष्टाध्याय्यां १/४/१०७ ।**

अप्रयुज्यमाने च मध्यमः भवति । उक्तञ्च –‘ **भिन्नप्रवृत्तिनिमित्तकानां शब्दानामेकस्मिन्नर्थे वृत्तिः समानाधिकरण्यम्** [332]’ इति । अतएव वृत्तावुक्तम् – तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमाने अप्रयुज्यमाने च मध्यमो भवति । एवञ्च – तिङ्वाच्यकारकवाचिनि अस्मद्युत्तमो भवति ।

तथा च यदि लकाराणां कर्तरि कर्मणि च शक्तिर्न स्वीक्रियते , तर्हि तिबादीनामपि कर्तृकर्मवाचकत्वं न स्यात् , स्थान्यादेशयोः समानार्थकत्वनियमात् । अतएव ‘ **तृज्वत्क्रोष्टुः**[333] ’ इति सूत्रेण विधीयमानं तृजन्तवद्रूपं क्रोष्टुशब्दस्य स्थाने ‘ **क्रोष्टृ** ’ एव भवति , अर्थकृतसादृश्यात् , न तु होतृपोत्रादयः । एवञ्च लकारस्य कर्तृकर्माद्यवाचकत्वे तिबादीनामपि कर्तृकर्माद्यवाचकत्वात् , तिङ्वाच्यवाचकत्वरूपसामानाधिकरणस्य युष्मद्यस्मदि चाभावेन पुरुषव्यवस्था न स्यात् । तस्मादुक्तरूपेण पुरुषव्यवस्थां प्रतिपादयता पाणिनिना अपि लकाराणां कर्तरि कर्मणि च शक्तिः स्वीकृता एव ।

### ➢कात्यायनसम्मतिः

महर्षिणा कात्यायनेन अपि अभिहिते कर्मणि कर्तरि करणे च प्रातिपदिकार्थमात्रे प्रथमेत्यर्थकं ‘ **अभिहिते प्रथमा** ’ इति वार्तिकम् , ‘ **तिङ्समानाधिकरणे प्रथमा** ’ इति वार्तिकञ्च निर्माय लकाराणां कर्तृकर्मरूपार्थवाचकत्वे स्वकीया सम्मतिः प्रकाशिता । अन्यथा तु लकारैः कर्तृकर्मणोरुक्तत्वाभावे केन कर्तृकर्मणोरुक्तत्वं स्यात् , यत्र प्रथमा विधीयते । अतएवोक्तं भट्टोजिदीक्षितेनापि – “ **अभिधानं तु प्रायेण**[334]

---

[332] **वैयाकरणसिद्धान्तकौमुद्याः तत्त्वबोधिनीटीकायां पृ.३९२ ।**

[333] **पाणिनीयाष्टाध्याय्याम् ७/१/९५ ।**

[334] **वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे पृ.१६० ।**

**तिङ्कृत्तद्धितसमासैः** ’’ इति । यद्यप्येतत् परिगणनं प्रत्याख्यातं , तत्त्वन्यदेतत् ।

‘ **अनभिहिते**[335] ’ इत्यधिकारसूत्रमपि प्रमाणं लकाराणां कर्तृकर्मरूपार्थवाचकत्वे । तथाहि ‘ **कर्मणि द्वितीया**[336] ’ ‘ **कर्तृकरणयोस्तृतीया** [337]’ इत्यादिसूत्रेषु ‘ **अनभिहिते**[338] ’ इति सम्बन्धादनुक्ते कर्मणि द्वितीया , एवमनुक्ते कर्तरि करणे च तृतीया विधीयते । एवञ्च लकाराणामवाचकत्वे तदादेशत्वेन तिबादीनामपि वाचकत्वाभावे ‘ **रामः ओदनं पचति** ’ इतिवत् ‘ **रामेण ओदनं पचति** ’ इति प्रयोगस्यापत्तिः तिबादीनां कर्तृकर्मवाचकत्वाभावेनोभयत्रापि कर्तृकर्मणोरनुक्तत्वात् ।

यदि तु तत्तत्सूत्रेष्वनभिहिते इत्यस्य सम्बन्धे जातेऽनुक्तसंख्याके कर्मणि द्वितीया , एवं कर्तृगतकरणगतायामनुक्तायां संख्यानां तृतीया भवतीत्यर्थस्वीकारे न दोषः । “ **रामेण ओदनं पचति** ” इत्यत्र तु कर्तृगतसंख्यायाः , रामः ओदनं पच्यते कर्मगतसंख्यायाश्च तिङोक्तत्वेन तृतीया-द्वितीयाद्यप्राप्तावनिष्टरूपापत्त्यभावादित्युच्यते चेत् ? तर्हि कृत्तद्धितसमासेषु संख्याभिधानस्याप्रसिद्धत्वात् ‘ **पक्वस्तण्डुलः** ’ ‘ **शत्योऽश्वः** ’ इत्यादौ द्वितीयापत्तेर्दुर्वारत्वात् ।

एवञ्च ‘ **कर्तृकर्मसंख्याकालाः लकाराणां सामान्यरूपेण वाच्याः** ’ इति कात्यायनपाणिन्यादिवैयाकरणानां सम्मतिः ।

---

335 **पाणिनीयाष्टाध्याय्याम्** २/२/१ ।

336 **पाणिनीयाष्टाध्याय्याम्** २/३/२ ।

337 **पाणिनीयाष्टाध्याय्याम्** २/३/१८ ।

338 **पाणिनीयाष्टाध्याय्याम्** २/२/१ ।

‘ **वर्तमाने लट्**[339] ’ इत्यादिरूपेण तत्तत्काले लडादीनां विधानात् तेषां कालवाचकत्वन्त्वक्षुण्णमेव ।

तच्च कर्तृत्वकर्मत्वादिकमेकमेवाखण्डोपाधिरूपमिति न शक्यतावच्छेदकेऽपि गौरवं वैयाकरणनिकाये ।

एषु कर्तृकर्मसंख्याकालेषु लकारार्थेषु कालो यद्यपि वर्तमानभूतभविष्याद्यनेकरूपेण वर्णितः पाणिनिना , किन्तु स तु उपाधिकृत एव भेदः । वस्तुतस्तु काल एवेति ।

### ➤कालस्वरूपविचारः

पाणिणिना तु कालस्य परिभाषैव न कृता , तेषां मते कालस्य लोकतः स्वतो ज्ञायमानत्वात् । अतएवाकालमित्युच्यते पाणिनीयव्याकरणम् । ‘ **पाणिन्युपज्ञमकालकं व्याकरणम्** [340]’ इति ।

### ➤भाष्यसम्मतिः

कालस्वरूपं प्रतिपादयता भगवता पतञ्जलिना – ‘ **येन**[341] **मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमित्याहुः**’ । तस्यैव कयाचित् क्रियया क्रियया युक्तस्याहरिति च भवति रात्रिरिति च । कया क्रियया ? आदित्यगत्या । तयैवासकृदावृत्तया ‘ **मासः** ’ इति भवति ‘ **संवत्सरः** ’ इति च भ्वति । तरुगुल्मादीनां कदाचित् ह्रासो भवति , कदाचिच्च वृद्धिर्भवतीति वृद्धिह्रासाभ्यां कालोऽनुमीयते । एवञ्च कालोऽनुमेय एवेति प्रतिपादितं भाष्यकृता ।

---

[339] **पाणिनीयाष्टाध्याय्यां ३/२/१२३ ।**

[340] **काशिकायां २/४/२१ ।**

[341] **पतञ्जलिमहाभाष्ये २/२/५ , पृ.४२१ ।**

भर्तृहरिणा अपि इत्थमेव प्रतिपादितम् –

**" मूर्तीनां तेन भिन्नानामुपचयापचयाः पृथक् ।**
**लक्ष्यन्ते परिणामेन स्वर्वासां भेदयोगिना ॥** [342]" इति ।

तस्यैव कालस्य क्रियया सह सम्बन्धे दिवारात्रीति भेदः प्रतीयते , क्रियायाः भिन्नत्वात् । आख्यातवाच्या क्रिया , निवृत्तभेदैवाख्यातेनोच्यते इति प्रतिपादितं कैयटेन[343] , तथाप्यादित्यादिसाधनभेदात् भिद्यत इति भाष्याशयः । एवञ्च **' कालः क्रियाया भेदकः '** इति पक्षः सिद्ध्यति । स तु काल एक एव **' येन ' ' तं कालम् '** इत्युभयत्राप्येकवचनस्य भाष्ये प्रयुक्तत्वात् । अतएवोक्तं तत्रैव कैयटेन[344] – **' परोपाधिक एव सर्वस्य भेदः '** इति ।

## ➢नागेशसम्मति

नागेशास्तु **' कालः क्रियायाः भेदको न भवति '** इति प्रतिपादयन्ति । उत्तरदेशसंयोगावच्छन्ना क्रियेति स्वीकारे तस्यास्तदादीनामपि विशेषणविशेष्यसम्बन्ध-युक्तत्वेन , त्रयाणां विद्यमानत्वे , तत्र क्षणादि-व्यवहारोऽसम्भव एव । **' क्रियते कालः '** इति पक्षेऽयमेव दोष उद्भावितो नागेशेन । **' क्रियातिरिक्तः कालः '** इति स्वीकारेऽपि कालस्याखण्डत्वं नास्ति अपि तु क्षणादिरूप एव कालः । क्षणानाञ्च प्रचयेन मुहूर्तादिव्यवहाराः सम्भवन्तीति प्रतिपादितमुद्द्योते –

---

[342] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का.१३ ।**

[343] **" आख्यातवाच्या क्रिया सर्वैव निवृत्तभेदा प्रतीयते "- पतञ्जलिमहाभाष्यप्रदीपे १/४/६४ , पृ. ८२ ।**

[344] **महाभाष्यप्रदीपे २/२/५, पृ.४२१ ।**

**“ आद्यपक्षे क्षणोपाधेर्निर्वर्त्तुमशक्यत्वात् । उत्तरदेशसंयोगावच्छिन्नक्रियेति चेत् , तस्यविशेष्यविशेषण सम्बन्धरूपत्वे त्रयाणामपि स्थिरत्वात् , क्षणव्यवहारनियामकत्वाभावः । अतिरिक्तत्वे सिद्धोऽतिरिक्तः क्षणपदार्थ इति तत् प्रचयैरेव कलामुहूर्तादिव्यवहारोपतां किमखण्डेन तेन ! [345] ” इति ।**

एवं भाष्यसम्मतं कालविषयकं सिद्धान्तं खण्डयित्वा ‘ **क्षणप्रवाह एव कालः** ’ इति स्वीकृतो नागेशेन । तथा चोक्तम् – प्रकृतेः[346] परिणामस्य विवर्तस्य वातिभङ्गुरस्य विभोः क्षणस्य धारायाः क्षणत्वात् । एवञ्च नागेशेन व्याकरणसम्प्रदायप्रचलिता भाष्यादिसम्मता कालविषयिणी स्वीकृतिरस्वीकृता ।

### ➢भर्त्तृहरिसम्मतिः

भर्त्तृहरिसिद्धान्ते सकलवस्त्वधिष्ठानभूते शब्दब्रह्मणि कालः शक्तिरूपेण स्थितः । यां शक्तिमाश्रित्यानन्ताः कालरूपाः शक्तयः जन्मादिविकाराणां कारणतां भजन्ते । उक्तञ्च -

**“ अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥ [347]”** इति ।

सर्वाः क्रियाः उत्पत्तिस्थितिलयेष्वन्तर्भूताः । उत्पत्तिस्थितिलयानाञ्च यन्निमित्तं स एव कालः । कालादेव वस्तूनामुदयादिः प्रविभक्तशरीरतया विभाव्यते । यथा केचित् वसन्ते प्रसूयन्त , अपरे शरदि प्रावृष्यन्य इति । प्रतिपादितञ्चैतत् वाक्यपदीये –

---

[345] **महाभाष्योद्योते ३/२/८४ , पृ.१६४ ।**

[346] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ.८३९ ।**

[347] **भर्तृहरिवाक्यपदीयब्रह्मकाण्डे का.३ ।**

**" उत्पत्तौ च स्थितौ चापि , विनाशे चापि तद्वताम् ।**

**निमित्तं कालमेवाहुः विभक्तेनात्मना स्थितम् ॥[348] " इति ।**

यथा यन्त्रस्थपुरुषस्य लोकनृत्ये ( कठपुतली इतिख्याते ) सर्वे क्रियाकलापाः सूत्रधारकृता एव भवन्ति । एवमेव विश्वस्य क्रियाकलापः कालकृत एव , अन्यथा युगपदेव सर्वेषु वस्तुषु सर्वाः क्रियाः प्रवर्तेरन् । कालस्याङ्गीकारे तु यदा सोऽभ्यनुजानाति तदा वस्तुषु काचित् क्रियाभ्युदेति यदा प्रतिबध्नाति , तदा क्रियावरुद्ध्यत , इति क्रियासु पौर्वापर्यव्यवहारः कालेनैव सम्यक् सम्पादयितुं शक्यते । अभिहितञ्च हरिणा-

**" तमस्यलोकयन्त्रस्य सूत्रधारं प्रचक्षते ।**

**प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्वं विभज्यते ॥**

**यदि न प्रतिबध्नीयात् , प्रतिबन्धं न चोत्सृजेत् ।**

**अवस्था व्यतिकीर्येरन् पौर्वापर्यविनाकृता ॥**[349] " इति ।

सामान्यकालस्य स्वरूपं प्रतिपादयता पतञ्जलिनोक्तम् – " **अयं ज्येष्ठः अयं कनिष्ठः इति व्यवहारोपपत्तये दैशिकातिरिक्तपरत्वापरत्वा-रूपज्येष्ठत्वकनिष्ठत्वयोः असमवायिकारणताश्रयत्वमिति काल-लक्षणम्** [350] " इति ।

एवं सामान्यतः लकारार्थं , कालसामान्यञ्च निरूप्य तत्तत्लकाराणां विशेषार्थो निरुप्यते । तत्र प्रथमोपस्थितत्वात् लट् लकारार्थो निरुप्यते ।

---

[348] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का.३ ।**

[349] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का. ४,५ ।**

[350] **वैयाकरणभूषणसारस्य प्रभाटीकायां पृ.१४१ ।**

## ➢कौण्डभट्टस्य मतम्

कौण्डभट्टास्तु वर्तमानकालविशिष्टक्रियावाचकात् धातोर्लट् भवतीत्यर्थकात् ‘ **वर्तमाने लट्**[351] ’ इत्यनुशासनात् वर्तमानकालो लडर्थ इति स्वीकुर्वन्ति । वर्तमानत्वञ्च तेषां मते प्रारब्धापरिसमाप्तत्वरूपं भूतभविष्यद्भिन्नत्वं वा । तथा चोक्तम् – “ **वर्तमानार्थे लट् वर्तमाने लट् इति सूत्रात् । प्रारब्धापरिसमाप्तत्वम् , भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्** [352]” इति । तत्र प्रारब्धपरिसमाप्तत्वमित्यत्रांशद्वयम् – **‘ प्रारब्ध इति , अपरिसमाप्तत्वञ्चेति ’** ।

प्रारब्धस्तु तत्तत्फलानुकूलव्यापारध्वंसासमानाधिकरण तत्तत्फलानुकूलकृतिरूपः । ध्वंसासमानाधिकरणतत्तत्फलानुकूलव्यापाररूपो वा ।

अपरिसमात्वत्वञ्च तत्तत्फलानुकूलचरमक्रियाध्वंसप्रागभावाधिकरणकालवृत्ति । एवम्भूतः यः क्रियात्मकोऽर्थस्तत्वमेव वर्तमानक्रियात्वम् । एवञ्चेदं लक्षणं कालं क्रियात्मकमाहुरिति सिद्धान्तानुसारेण ।

येषां नागेशादीनां कालः क्रियात्मको नास्ति , तन्मते द्वितीयं लक्षणं भूतभविष्यद्भिन्नत्वमिति मे प्रतिभाति ।

एवञ्च प्रारब्धापरिसमाप्तत्वरूपवर्तमानस्वीकारे यावदभिमतफलप्रयोजिकायाः क्रियायाः समाप्तिर्न भवति , तावद् वर्तमानत्वम् । अतोऽधिश्रयणादारभ्य फूत्काराद्यधःश्रयणान्तव्यापारसमूहस्य पच्धात्वादिवाच्यत्वेनाधिश्रयणक्रियायाः[353] परिसमाप्तत्वेऽप्यधःश्रयणादिक्रियायाः असमाप्तिदशायां वर्तमानस्याक्षुण्णतयाधःश्रयण-पर्यन्तं पचतीति प्रयोगः

---

[351] **पाणिनीयाष्टाध्याय्याम् ३/२/१२३ ।**

[352] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये पृ.१४०-१४२ ।**

[353] **अयञ्च व्यापारः फूत्कारात्वाधः सन्तापनत्व यत्नत्वादि तत्तद्रूपेण वाच्यः – वैयाकरणभूषणसारे , पृ.१९ ।**

सम्भवति । अभिहितञ्च कौण्डभट्टेनापि – ‘ **पचति**[354] ’ इत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति भवति लट्प्रयोगः ।

वर्तमानत्वविषयेऽस्मिन्नेकाविचिकित्सा जागर्तितराम् , यदध्ययने प्रवृत्ते , तत्समाप्त्यभावे एव मध्ये भोजनादिक्रिया कुर्वति कर्तरि वर्तमानकालप्रयोगो न स्यात् भोजनादिक्रियाया व्यवधानात् । उक्तञ्च वार्तिककृता “ **प्रवृत्तस्याविरामे शिष्या भवन्त्यवर्तमानत्वात्**[355] ” इति ।

व्याख्यातञ्च तत्रैव कैयटेन – “ **इहाधीमह इत्यध्ययनं प्रवृत्तं प्रारब्धं , न च तत् विरतम् । यदा च भोजनादिकं कुर्वन्ति नाधीयते , तदाधीमह इति प्रयोगो न प्राप्नोति । एवञ्चानेन व्याख्यानेन सिद्ध्यति यद् वर्तमानकालस्य प्रयोगस्तत्रैव भवति , यत्र क्रिया प्रारब्धा न तूपरता । यत्र क्रियान्तरव्यवहितत्वेनोपरता सा , तत्र न वर्तमानकालत्वम् । एवञ्च प्रवृत्तेऽध्ययने ततो वितरेऽपि मध्ये भोजनादिनाव्यवाये तत्कालेऽधीते ’ इति प्रयोगो न स्यादिति चेत् ?** [356] ”

अत्रोच्यते पतञ्जलिना – “ **न्याय्यात्वेषा वर्तमानकालता कुतः ? आरम्भानपवर्गात् । आरम्भोत्रानपवृत्तः । एष एव च नाम न्याय्यो वर्तमानकालो यत्रारम्भोऽनपवृत्तः । ....... यं खल्वपि भवान् मुक्तसंशयं वर्तमानकालं न्याय्यं मन्यते , भुङ्क्ते देवदत्त इति , तेनैतत्तुल्यम् । सोऽपि ह्यवश्यं भुञ्जानो हसति वा जल्पति वा पानीयं**

---

[354] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये पृ.१४२ ।**

[355] **पतञ्जलिमहभाष्यवार्त्तिके ३/२/१२३, पृ.१८३ ।**

[356] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/१२३, पृ.१८३ ।**

**वा पिवति । यद्यत्र युक्ता वर्तमानकालता दृश्यते इहापि युक्ता दृश्यताम्** [357] **”** इति ।

अयम्भावः – यत्र क्रियारम्भस्य समाप्तिर्नास्ति , तत्र वर्तमानकालः । अतोऽध्ययनक्रियायां प्रारब्धायां तस्याः समाप्तिपर्यन्तं सत्यपि भोजनादिक्रियाव्यवधाने तस्य वर्तमानकालतास्त्येव व्यवधानरूपेण प्रतीयमानायाः भोजनादिक्रियायाः नान्तरीयकत्वात् । यत्र “ **देवदत्तो भुङ्क्ते** ” इत्यादावश्यरूपेण वर्तमानकालता स्वीक्रियते , तत्रापि भोजनादिक्रियायां हसनजल्पनादिक्रियाव्यवधानं भवत्येव । अतः यथा तत्र वर्तमानत्वं स्वीक्रियते , तथैवात्रापि “ **अधीते** ” इत्यादौ वर्तमानकालत्वं स्वीकरणीयमिति भाष्याशयः ।

### ➢भर्त्तृहरिसम्मतिः

भर्त्तृहरिमते तु एतादृशी कापि क्रिया न सम्भवति , यत्र क्रियान्तरव्यवधानं न स्यात् । निमेषस्वसनादिक्रियायाः सर्वत्र विद्यमानत्वात् । यथा भोजनादिक्रियां कुर्वन्नपि देवदत्तो मध्ये श्वसनादिकां क्रियां करोत्येव । अतो नान्तरीयकत्वेन मध्यवर्तिनीभिः क्रियाभिमुख्यक्रियाया व्यवधानत्वं स्वीकृत्य , तत्र वर्तमानत्वाभावो नाशंकनीयः । अपि तु मध्येऽवश्यरूपेण विद्यमानाः सर्वाः क्रियाः , मुख्यक्रियायाः अङ्गभूता एवेति । उक्तञ्च वाक्यपदीये –

**“ व्यवधानमिवोपैति निवृत्त इव दृश्यते ।**
**क्रियासमूहो भुज्यादिअरन्तरालप्रवृत्तिभिः ॥**
**न च विच्छिन्नरूपोऽपि सो विरामान्निवर्तते ।**
**सर्वैव हि क्रियान्येन संकीर्णैवोपलभ्यते ॥**

---

[357] **पतञ्जलिमहाभाष्ये ३/२/१२३ ।**

**तदन्तरालदृष्टा वा सर्वैवावयवक्रिया ।**

**सादृश्यात् सति भेदे तु तदङ्गत्वेन गृह्यते ॥ [358]" इति ।**

किञ्च यत्राध्ययनादिक्रियायां भोजनादिक्रियया व्यवधानं भवति , तत्र मध्येऽध्ययनादि भौतिकव्यापारस्योपरत्वेऽपि मानसिकव्यापारस्य विद्यमानत्वात् , क्रियासन्तानस्यैक्येन वर्तमानकालोपपत्तिः सम्भवति । तथाचोक्तम् हेलाराजेन –" **संदर्शनादिफलपर्यन्तः क्षणसमूहः क्रिया । तत्र भौतिकव्यापारोपरमेऽप्यन्तरा सन्दर्शनप्रार्थनादेः मानसव्यापारस्य यावत् फलाधिगमः तावद् विराम एव** [359]" इति । तस्मात् क्रियान्तरव्यवधानेऽपि ' **अधीते** ' ' **अधीमहे** ' इत्यादिरूपेण वर्तमानकालप्रयोगो भवत्येव ।

ननु नित्यप्रवृत्ते पर्वतादौ साध्यत्वाभावे क्रियारूपत्वाभावात् , क्रियाधर्मस्य वर्तमानकालस्यापि तत्रासम्भवे तत्र ' पर्वताः सन्ति ' इति प्रयोगो न स्यात् ।

किञ्च , नित्यप्रवृत्तानां पर्वतादीनां भूतकालेन भविष्यत्कालेन च सम्बन्धाभावात् , तत्प्रतिद्वन्द्वीभूतस्य[360] वर्तमानकालस्यापि तत्र सम्बन्धो न सम्भवति । उक्तञ्च कैयटेन – " **नित्यप्रवृत्तस्य भूतभविष्यत्वाभावाद् वर्तमानत्वाभावः , क्रियारूपत्वाभावश्चेति । एवञ्च ' पर्वताः सन्ति ' ' आत्मास्तीत्यादिप्रयोगाणामनुपपत्तिरेवेति चेत्** ? ' उच्यते –

कस्यापि वस्तुनः स्वरूपे आत्मनि वा भेदो न भवति , भेदस्तु भावजातस्य उपाधिसंसर्गकृत एव । एवञ्च नित्यप्रवृत्तेष्वपि कालविभागः सम्भवत्येव । तथाहि –" **पर्वताः सन्ति** " " **नद्यः वहन्ति** " इत्यादौ

---

[358] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे ८२-८४ ।**

[359] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे हेलाराजटीकायां ८२-८३ ।**

[360] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/१२३ , पृ.१८३ ।**

नित्यप्रवृत्तिद्योतकवाक्ये तत्तत्कालस्थितानां राज्ञां क्रियाधारेण कालविभागः कर्त्तुं शक्यते । राज्ञां क्रियासु च त्रैकाल्यं क्रमिकता साध्यमानता च भवति , अतः तत्साहचर्यात् पर्वतादावपि त्रैकाल्यसम्भवे भूतभविष्यवर्तमानादि-कालानां योगो भवत्येव । तथा चोक्तं भर्त्तृहरिणा –

**" परतो भिद्यते सर्वमात्मा तु न विकल्पते ।**
**पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यते ॥**
**प्रसिद्धभेदा व्यापारा विरूपावयवक्रियाः ।**
**साहचर्येण भिद्यन्ते , सरूपावयवक्रियाः ॥** [361]**" इति ।**

अत्र द्वितीयश्लोकेन समाधानान्तरमुपन्यस्तम् । तस्यायम्भावः क्रिया द्विविधा दृश्यते सरूपावयवक्रिया विरूपावयवक्रिया च । यथा पर्वतादि क्रिया ( स्थितिरूपा ) निरूपावयवक्रिया , राज्ञां क्रिया च सरूपावयवक्रिया । तत्र सरूपावयवक्रिया प्रसिद्धपरिणामिनी , विभागसम्भवा च भवति , परिणामिनी क्रियैव क्रियान्तरपरिच्छेदिका सती ' **कालः** ' इत्युच्यते । स्थितिः भूतादिरूपेण राज्ञां भिन्ना क्रिया पर्वतादिस्थितीनां भेदिका सती कालशब्देन व्यवह्रियते । अतो नित्यप्रवृत्तानामपि भावानां वर्तमानादिकालत्रयाणां , क्रियायाश्च योगः सम्भवत्येव ।

अतएवोक्तं कौण्डभट्टेनापि – **" आत्मास्ति ' पर्वताः सन्ति ' इत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्तमानत्वमूह्यम्** [362]" इति ।

---

[361] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का.८०-८१ ।**

[362] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१४३ ।**

## ➢भाष्यसम्मतिः

पर्वताः सन्तीत्यादौ नित्यप्रवृत्ते भावे कालत्रयाणां क्रियायाश्च योऽर्थ प्रतिपादयता पतञ्जलिनोक्तम् – “ [363]**इह हि भूतभविष्यद्वर्तमानानां राज्ञां याः क्रियास्ताः तिष्ठतेरधिकरणम् ’** । इहतावत् **‘ तिष्ठन्ति पर्वताः ’** इति , सम्प्रति ये राजानस्तेषां याः क्रियाः तासु वर्तमानासु । ‘ स्थास्यन्ति पर्वताः ’ इति , इत उत्तरं ये राजानो भविष्यन्ति , तेषां याः क्रियास्तासु भविष्यन्तीषु **‘ तस्थुः पर्वताः ’** इति , इह हि ये राजानो बभूवुस्तेषां याः क्रियास्तास्वतिक्रान्तासु ’ ।

यद्यपि पर्वतादेः संस्थितिरूपाः व्यापाराः सदृशावयवत्वात् दुरवधारभेदा इति तत्र कालभेदाभावस्तथापि तदानीन्तनानां राज्ञां क्रिया विसदृशसन्तानतयावधृतभेदा , इति सहचारिणीभिस्ताभिः पर्वतादिस्थितिर्भिद्यते । तत्र क्रियापदस्य तत्परिच्छेदककालपरत्वेन तदीयकालस्य पर्वतादिस्थितौ आत्मादिनित्यपदार्थ-सत्तायाञ्च आरोप इति भाष्याशयः ।

उक्तञ्च तत्र कैयटेन – “ **प्रसिद्धपरिणामा क्रियैव क्रियान्तर-परिच्छेदात्काल इत्युक्तम्** [364]” इति । तत्र राज्ञां स्थितिर्भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिकेति क्रियारूपत्वं कालयोगश्चोपपन्न इत्यर्थः[365] ।

एवञ्चानेन भर्तृहरिपतञ्जलिकैयटादिव्याख्यानेन प्रारब्धपरिसमाप्त-क्रियाधिकरणसमयत्वमेव वर्तमानत्वम् , एवं विद्यमानध्वंसप्रतियोगि-समयत्वमेव भूतत्वम् , वर्तमानप्रागभावप्रतियोगिसमयत्वमेव भविष्यत्वमेव

---

[363] **पतञ्जलिमहाभाष्ये ३/२/१२३ , पृ.१८४ ।**

[364] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/१२३ , पृ.१८४ ।**

[365] **पतञ्जलिमहाभाष्ये ३/२/१२३ पृ.१८५ ।**

सिद्ध्यति । एवं पर्वताः सन्ति , स्थास्यन्ति पर्वताः , **तस्थुः पर्वताः** इत्यादिरूपेण पर्वतादीनामपि तत्तत्कालयोगः सूपपाद्य इति सिद्धान्तः ।

" **वर्तमाने लट्**[366] " इति सूत्रे भाष्ये " **वर्तमानस्य सत्ता नास्तीति** " पूर्वपक्षमुपस्थाप्य तत्सत्तैव प्रतिपादयता सिद्धान्तरूपेण । तत्र वर्तमानकालस्य सत्ताप्रतिपादयता पतञ्जलिना उक्तम् –

**" क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद्विचेष्टितम् ।**

**तत्समीक्ष्य प्रयुञ्जीत् गच्छतीत्यविचारयन् ॥ "**[367] **इति ।**

सर्वो हि लोकः फलप्राप्त्यर्थं क्रियासु प्रवर्तते । अतः उत्तरदेशसंयोगाद्यर्थं यो व्यापारः समुपजायते , तमेवाभिलक्ष्यीकृत्य लोकैरविचारयद्भिर्गच्छतीति , प्रयुज्यते । तथाहि फलेन तत्कारणीभूतां क्रियामनुमाय , प्रत्यभिज्ञया क्षणिकत्वे निराकृते तादृशव्यापाराणामेकबुद्धि-विषयतयैकत्वे , वर्तमानत्वं तस्यानिर्बाधमेव । " **शब्दज्ञानानुपाती वस्तुशून्योविकल्पै** " इति वैकल्पिक एव बौद्ध समूहो , यमादाय तादृश प्रयोगाणामुपपत्तिः । तत्राविचारन्नित्यस्य कविकल्पकलङ्करहितमित्यर्थं कैयटः[368] आह ।

एवमेव कैयटेनापि वर्तमानकालाभावे भूतभविष्यत्कालयोरपि सत्ता न सम्भवति , अतोऽवश्यमेव वर्तमानकालस्य सत्ता स्वीकरणीयेति प्रतिपादितम् । उक्तञ्च – " **वर्तमानत्वाभावे च भूतभविष्यतोऽप्यभावप्रसङ्गः , वर्तमानो हि भूतत्वं भविष्यत्वञ्च प्रतिपाद्यते** [369]" इति ।

---

[366] **पाणिनीयाष्टाध्याय्यां ३.२.१२३ ।**

[367] **पतञ्जलिमहाभाष्ये पृ. ७२७ ।**

[368] **पतञ्जलिमाहाभाष्यप्रदीपे ३/२/१२३ , पृ.१८५ ।**

[369] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/१२३ , पृ.१८५ ।**

## ➢वर्तमानसामीप्यम्

वर्तमाने लट्विधानात् वर्तमानसामीप्येऽपि लड्विधानमारब्धं पाणिनिना – ‘ **वर्तमानसामीप्ये वर्तमानवद्वा** [370]’ इति । वर्तमानसामीप्ये भूते भविष्यति च लट् भवतीति सूत्रार्थः । तत्र वर्तमानसामीप्यञ्च वर्तमानकालानन्तरं यावत्क्षणं वर्तमानस्य संस्कारो भूतकालेऽप्यनुवर्तते , तावद्भूतकालविषयम् । एवञ्च फलजनकभविष्यत्कालक्रियाविषयो यः संकल्पमानसः वर्तमानस्तद्भविष्यत् क्रियाविषयं वर्तमानसामीप्यम् । एवञ्चोभयत्र लट् यथा स्यात् तदर्थं सूत्रम् । उक्तञ्च भर्त्तृहरिणा –

**“ अध्वनो वर्तमानस्य यः शेषो य उपक्रमो ।**

**तद्वर्तमानसामीप्यं शास्त्रभेदे न दर्शितम् ॥** [371]**” इति ।**

वस्तुतस्तु वर्तमानकाले विहितेन लडादिना पदसंस्कारे क्रियमाणे , पश्चात् वाक्ये पदान्तरसम्बन्धात् तत्सामीप्ये प्रतीयमाने भूतभविष्यतोरपि वर्तमानत्वारोपेण सिद्धौ सूत्रं विनापीष्टप्रयोगोपपत्तिः । एवं ‘ **वसन् ददर्श** ’ इत्यादौ भूतकालेऽपि लट्लकारे जाते तस्य स्थाने ‘ **लटः शतृशानचावप्रथमासमानाधिकरणे** [372]’ इतिसूत्रेण शत्रादेशे ‘ **वसन्** ’ इत्यस्य सिद्धिः ‘ **धातुसम्बन्धे प्रत्ययाः**[373] ’ इतिसूत्रेण धातूनामर्थद्वारा परस्परसम्बन्धे यत्र काले , प्रत्ययाः उक्ताः ततोऽन्यस्मिन् काले विधानात् । एवञ्च साक्षाद् धात्वर्थानां परस्परसम्बन्धाभावादुक्तप्रयोगेषु कारकद्वारा सम्बन्धो बोद्धव्यः । अत एव ‘ **भाव्यासीत्** ’ , ‘ **सोमयाज्यस्य पुत्रो भविता** ’ इत्यादिप्रयोगाणां संगतिरुपपद्यते । तस्माद्

---

[370] **पाणिनीयाष्टाध्याय्यां ३.३.१३१ ।**

[371] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का.१०२ ।**

[372] **पाणिनीयाष्टाध्याय्यां ३/२/१२४ ।**

[373] **पाणिनीयाष्टाध्याय्यां ३/४/१ ।**

वर्तमान एव लट्लकारविधानात् वर्तमानत्वमेव लट्लकारार्थ इति कौण्डभट्टाभिमतिः ।

## ➢नागेशमतम्

आदेशवाचकत्ववादिनां नागेशानां नये तु लटो वाचकत्वं नास्ति , अपि तु लडादेशतिबादीनामेव । लडादेशस्य च वर्तमानकालः कर्तरि प्रत्यये कर्ता , भावकर्मप्रत्ययस्थले भावकर्मणी , शबादितिङ्यगादिसमभिव्याहारे कर्ता यक्चिण्समभिव्याहारे भावकर्मणी , उभयसमभिव्याहारे संख्या चार्थः[374] । अत एव कर्तृकर्मणोराख्यातवाच्यत्वे ' **पचति** ' इत्यत्र कर्तृकर्मणोरुभयोरपि बोधापत्तिः सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति रीत्या एकस्यैव बोधः सम्भवतीत्युच्यते चेत् , तर्हि कर्तृमात्रबोधवत् , कर्ममात्रस्यैव बोधः स्यादिति शङ्कायां समाहितं कौण्डभट्टेनापि –

**" फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।**

**व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ॥ "[375] इति ।**

अयम्भावः तङ्क्चिणादयः फले , शबादयस्तु व्यापार आश्रयस्यान्वयं द्योतयन्ति । एवञ्च यत्र यगादिसमभिव्याहारस्तत्र तिङः कर्मद्योतकत्वम् , यत्र शबादिसमभिव्याहारस्तत्र कर्तृद्योतकत्वमिति ।

अनेन व्याख्यानेन यद्यपि तिङादीनां द्योतकत्वमेव , किन्तु तिङादीनां लडादीनां वा विषये द्योतकत्वं वाचकत्वञ्चेति पक्षद्वयमेव सिद्धान्तितं वैयाकरणनिकाये , उभयोः पक्षयोर्युक्तियुक्तत्वात् ।

तथाहि तत्तद्धातूनामेव वर्तमानोऽर्थः , लट् तु तद्द्योतकः । वर्तमानस्य धात्वर्थत्वेन व्यवहारः कृतः कैयटेन । उक्तञ्च " **उत्पन्नस्यापि**

**[374] परमलघुमञ्जूषायां लादेशार्थविचारे पृ.७३ ।**

**[375] वैयाकरणभूषणसारस्य धात्वर्थनिर्णये का.३ ।**

**नाशादभूतत्वेन भूतभविष्यत् प्रतिद्वन्द्वौ वर्तमानो धात्वर्थः [376]" इति** । न च बहूनां धातूनां वाचकत्वे शक्यतावच्छेदकनानात्वे गौरवापत्तिः स्यादति वाच्यम् , व्यापारसन्तानस्यैव कालत्वेनाभ्युपगमात् , तस्य च धात्वर्थत्वात् । तथा च वर्तमाने द्योत्ये लडादयो भवन्तीति वर्तमाने लडादिसूत्रार्थः । एवञ्च द्योतका एव लडादयः ।

### ➢लिट्लकारार्थः

" **अनद्यतने भूते परोक्षे च विद्यमानक्रियावाचकात् धातोर्लिट् भवति** " इत्यर्थकेन ' **परोक्षे लिट्** [377]' इतिसूत्रेण भूतानद्यतने परोक्षे च लिड्विधानात् अनद्यतनभूतकाल परोक्षत्वञ्च लिडर्थः । तथाचोक्तं नागेशेन –

" **लिट्तिङस्तु भूतानद्यतनकालः परोक्षत्वञ्चाधिकोऽर्थः**[378] " इति ।

### ➢अनद्यतनभूतः

अनद्यतनभूतेत्यत्र अनद्यतनशब्दे बहुव्रीहिः समासः । न विद्यतेऽनद्यतनो यस्मिन् सः अनद्यतनः । अद्यतनाद् भिन्नः कालोऽनद्यतनशब्देनोच्यते । तत्र अद्यतनः कः ? इति विषये दृश्यते विवाद आचार्याणाम् । कैयट-हरदत्त-न्यासकारादीनां मते सम्पूर्णो दिवसः व्यतीतायाः रात्रेश्च चतुर्थो भागः आगामिन्याश्च प्रथमो भागोऽद्यतनपदेन गृह्यते । तथा चोक्तम् – " **रात्रेश्चतुर्थो यामो दिवसश्च सर्वो द्वितीयाश्च रात्रेः प्रथमोऽद्यतन इत्याहुः** [379]" इति ।

---

[376] **महाभाष्यप्रदीपे ३/२/१२३ , पृ.१८३ ।**

[377] **पाणिनीयाष्टाध्याय्यां ३/२/१२५ ।**

[378] **परमलघुमञ्जूषायां लादेशार्थविचारे |**

[379] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/११० , पृ.१७५ ।**

‘ **लुङ्** ’ सूत्रस्य व्याख्यानप्रसङ्गे न्यासकृतापि तदेवार्थः प्रतिपादितः । तथाहि “ **दिवसः सकलोऽतिक्रान्तायाः रात्रेश्चतुर्थो याम आगामिन्याश्च प्रथमो याम इत्येषोऽद्यतनः कालः**[380] ” । एवञ्चात्र कैयटन्यासकारयोः मतैक्यमेव ।

भट्टोजिदीक्षितास्तु अतिक्रान्तायाः रात्रेः उत्तरार्धः आगामिन्याश्च पूर्वार्धेन सहितो दिवसोऽद्यतनकालपदेन गृह्यते ’ इति कथयन्ति । तथा चोक्तम् – “ **अतीताया रात्रेः पश्चार्धेनागामिन्याश्च पूर्वार्धेन च सहितो दिवसोऽद्यतनः** [381]” इति ।

## ➤परोक्षः

अक्ष्णः परम् परोक्षमिति व्युत्पत्त्या निष्पन्ने परोक्षशब्दे अक्षिशब्दः इन्द्रियमात्रस्य वाचकः , न तु नेत्रमात्रस्य । तथा हि निगदितं नागेशेन – “ **वृत्तिविषये त्वक्षिशब्दः सर्वेन्द्रियवचने न चक्षुःपर्यायः** [382]” इति । एवञ्च इन्द्रियजन्यज्ञानाविषयत्वमेव परोक्षत्वमिति फलति । तथा चोक्तं कैयटेन – “ **यद्यपीन्द्रियाविषयोऽर्थः परोक्षशब्दवाच्य इति जानाति** [383]” इति । इति तत्रैव इन्द्रियाविषय इत्यस्य व्याख्यानं कुर्वता नागेशेनोक्तमुद्द्योते – “ [384]**इन्द्रियजन्य ज्ञानाविषय इत्यर्थः** ” इति ।

---

[380] **न्यासे ३/२/११० ।**

[381] **वैयाकरणसिद्धान्तकौमुद्यां पृ.३०१।**

[382] **पतञ्जलिमहाभाष्योद्द्योते ३/२/११५ , पृ.१७७ ।**

[383] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/११५ , पृ.१७७ ।**

[384] **पतञ्जलिमहाभाष्योद्द्योते ३.२.११५ , पृ.१७५ ।**

**➢भाष्यसम्मतिः**

पतञ्जलिना परोक्षविषये चत्वारि मतान्युपस्थापितानि । तत्र केषाञ्चिन्मते वर्षशतात् पूर्वकालिकं वृत्तं परोक्षम् , केषाञ्चिच्च वर्षसहस्रात्पूर्वकालिकं वृत्तम् , केषाञ्चित्तु कुटीरादिव्यवहितमपि वृत्तं परोक्षमेव । केषाञ्चिन्मते तु दिनत्रयात् पूर्वं कृतं वृत्तं परोक्षमित्युच्यते । एवञ्च चत्वारः पक्षाः उपस्थापिताः भाष्ये-

➢**केचित्तावदाहुः**वर्षशतवृत्तं परोक्षमिति ।[385]

➢**अपरे आहुः** वर्षसहस्रवृत्तं परोक्षमिति ।

➢**अपरे आहुः** कुड्यकुटान्तरितं परोक्षमिति ।

➢**अपरे आहुः** द्व्यहवृत्तं त्र्यहवृत्तं चेति ।

किन्तु कैयटेन इन्द्रियजन्यज्ञानाविषयेण साधनेन साधिताः अनद्यतनक्रियावाचिनः अर्थाः परोक्ष एव । अस्मिन् च परोक्षे लिट्लकारस्य साधुत्वात् ( कल पकाया ) इत्यस्मिन्नर्थे ह्यः पपाचे इति वाक्यं शुद्धमेवेति प्रतिपादितम् । तथाहि – " **इन्द्रियागोचरसाधनासाधितानद्यतनक्रियावाचिनस्तु धातोर्लट् प्रत्यय इति निर्णयः । तथा ह्यः पपाचेत्याद्यपि भवति** [386]" इति ।

साक्षात्करोमीति ज्ञानाविषयत्वमेव परोक्षत्वमिति स्वीकृतं कौण्डभट्टेन । अभिहितञ्च – " **परोक्षत्वञ्च साक्षात्करोमीत्येतादृशविषयताशालि-ज्ञानाविषयत्वम्** [387]" इति ।

---

[385] **पतञ्जलिमहाभाष्यप्रदीपे ३.२.११५ , पृ.१७५ ।**

[386] **पतञ्जलिमहाभाष्यप्रदीपे ३.२.११५ , पृ.१७५ ।**

[387] **वैयाकरणभूषणसारे लकारार्थनिर्णये , पृ.१४६ ।**

## ➢परोक्षस्य विशेषणत्वविचारः

एवञ्च भिन्न-भिन्नरूपेण प्रतिपादिते परोक्षे ‘ **कस्य परोक्षत्वे लिड्भवति** ’ इति जिज्ञासायां सम्भाव्यत्वेन त्रयः पक्षाः उपस्थापिता भाष्ये –

▸ **प्रथमः पक्षः**कालस्य परोक्षत्वे लिड् भवति।

▸**द्वितीय पक्षः** धातोरित्यधिकारात् तस्य च शब्दरूपत्वेन श्रोत्रविषयत्वेन प्रत्यक्षत्वात् तदर्थस्य क्रियारूपस्य परोक्षत्वे लिट्।

▸**तृतीय पक्षः** क्रियायाः साधनानां परोक्षत्वे लिडिति।

एवं पक्षत्रये समुपस्थिते कतमः पक्षः श्रेष्ठः इति विचारणायां तृतीयः पक्ष एव सिद्धान्तितो भाष्ये । यतोहि प्रथमः पक्षस्तु सम्भवत्येव नहि ; कालाधिकाराभावेन कालस्य परोक्षत्वे लिडित्यर्थासम्भवात्। तथा चोक्तम् – “ **नवै कालाधिकारोऽस्ति**[388] ” इति।

द्वितीयपक्षोऽपि न युक्तः । क्रिया नामेयमत्यन्तापरिदृष्टानुमानगम्या शक्या[389] पिण्डीभूता निदर्शयितुम् । यथा – ‘ **गर्भो निर्लुठितः** ’ इति भाष्यप्रमाणात् क्रियायाः सर्वथा परोक्षत्वेन तत्र परोक्षत्वस्य विशेषणत्वं न सम्भवति , ‘ **सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्** ’ इत्यभियुक्तोक्तेः । अत एवोक्तं नागेशेन – ‘ **न तु क्रियायां**[390] तस्या अतीन्द्रियत्वेन लिट्सूत्रभाष्ये प्रतिपादनात् व्यभिचाराभावात् ‘ **सम्भवव्यभिचाराभ्यां स्याद् विशेषणामर्थवत्** ’ इति न्यायेन क्रियाया अतीन्द्रियत्वात् व्यभिचाराभावेन न क्रियां विशेषणामिति नागेशाशयः।

---

[388] **पतञ्जलिमहाभाष्ये ३/२/११५ , पृ.१८७ ।**

[389] **पतञ्जलिमहाभाष्ये ३/२/११५ , पृ.१८७ ।**

[390] **परमलघुमञ्जूषायां लादेशार्थविचारे पृ. ७५ ।**

ननु क्रियाया अप्रत्यक्षत्वे परोक्षे इति विशेषणमेव व्यर्थम् , यतोहि कस्याश्चित् क्रियायाः प्रत्यक्षत्वे तादृशक्रियाभिप्रायेण लिट्प्रयोगव्यावर्तनमेव तत्प्रयोजनं सम्भवति , न च काचित् क्रिया प्रत्यक्षा , अतः व्यावर्त्त्याभावात् विशेषणस्य वैयर्थ्यमस्त्येवेति चेन्न , पूर्वोक्तभाष्येण पिण्डरूपेण क्रियायाः प्रत्यक्षत्वाभावेऽपि एकैकस्यावयवस्य प्रत्यक्षत्वसम्भवात् । अतएव ' पश्य मृगो धावति ' इति धावनक्रियायाः दर्शनक्रियाकर्मत्वाभिप्रायकः भाष्यप्रयोगः संगच्छते । तथा चोक्तं कौण्डभट्टेनापि – " **पिण्डीभूतायाः निदर्शयितुमशक्यत्वेऽपि अवयवशः साक्षात्करोमि** [391]" इति प्रतीतिविषयत्वसम्भवात् । अन्यथा ' **पश्य मृगो धावति** ' इत्यत्र तस्या दर्शनकर्मता नस्यादिति प्रतिभाति । इति तस्मात् क्रियायां परोक्षत्वविशेषणमयुक्तमेव ।

अतस्तृतीयपक्षः क्रियायाः साधनानां परोक्षत्वे लिड्भवति ' इति ज्यायान् । तथा चोक्तं भाष्ये – " **यदि तावत् साधनेषु परोक्षेषु ? यथा चेति भवितव्यम् । भवन्ति हि तस्य साधनानि परोक्षाणि । अथ एते क्रियाकृता विशेषाश्चीत्काराः फूत्काराश्च तेषु परोक्षेषु , एवमपि पपाचेति भवितव्यम्** [392]" इति ।

तस्मात् साधनस्य क्रियाकृतविशेषस्य च परोक्षे लिडा भाव्यम् ।

ननु सर्वाः ' **शक्तयः साधनमिति**[393] ' कैयटेन साधनस्य शक्तिरूपत्वे सैव दुरवस्था तस्याः प्रत्यक्षाभावस्य तत्रैव भाष्ये प्रतिपादनादिति चेदुच्यते । शक्तिरूपसाधनस्य यद्यपि प्रत्यक्षो न भवति , किन्तु तस्य द्रव्याश्रितत्वात् , द्रव्यस्य च प्रत्यक्षत्वेन तदाश्रितस्य साधनस्यापि प्रत्यक्षत्वं सम्भवति ।

---

[391] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये पृ. १४७ ।**

[392] **पतञ्जलिमहाभाष्ये ३/२/११५ , पृ.१७९ ।**

[393] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/११५ , पृ.१७८ ।**

अथवा – ‘ **शक्तिशक्तिमतोरभेदविवक्षयासाधनशब्देन शक्तिमन्ति द्रव्याण्युच्यन्ते** [394]’ इति कैयटेन शक्तिमत् साधनमिति पक्षस्यापि समर्थनेन , तस्य च प्रत्यक्षत्वसम्भवात् न कश्चन दोषः ।

तस्मात् साधनानां परोक्षे लिडित्यर्थ एव श्रेयस्करः । उक्तञ्च कौण्डभट्टेनापि “ **व्यावाराविष्टानां क्रियानुकूलसाधनामेवात्र परोक्ष्यं विवक्षितमतो नोक्तदोषः । अयं पपाचेत्याद्यनुरोधात् व्यापाराविष्टानामित्यपि वदन्ति**[395] ” इति ।

नागेशेनापि पक्षोऽयं स्वीकृतः । उक्तञ्च – “ **परोक्षत्वञ्च कारके विशेषणं न तु क्रियायाम्** [396]” इति ।

### ➢उत्तमपुरुषे लिट्लकारव्यवस्था

ननु क्रियाशब्दवाच्याधिश्रयणाधःश्रयणादिव्यापाराणां पिण्डीभूतत्वेन युगपत् प्रत्यक्षाविषयत्वेऽपि क्रमशस्तेषां प्रत्यक्षत्वं सम्भवति , किन्तु यत्रावयवशः अपि क्रियायाः प्रत्यक्षत्वं नास्ति , तत्रैव तस्या परोक्षत्वम् । एवञ्च स्वकर्तृक्रियायाः तादृशपरोक्षत्वासम्भवेन व्यातेने किरणलीमुदयनः इत्यादावुत्तमपुरुषे लिट्प्रयोगानुपपत्तिः । अतएवोक्तं भाष्येऽपि – “ **सर्वथोत्तमो न सिद्ध्यति**[397] ” इति ।

एवञ्चोक्तस्य गतिश्चितनीयेति रीत्या ‘ व्यातेने ’ इत्यादौ लिडुत्पत्तिः कथं स्यादिति चेत् ? अत्रोच्यते कौण्डभट्टैः –

“ **असङ्गतमेव , व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि बहुतरमनः प्रणिधानसाध्यशास्त्रार्थनिर्णयजनक-**

---

[394] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/११५ , पृ.१७८ ।**

[395] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१४८ ।**

[396] **परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७५।**

[397] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/११५ , पृ.१७९ ।**

**शब्दरचनात्मके ग्रन्थेऽनद्यतनत्वातीतत्वयोर्विस्तारक्रियायाः सत्त्वेनानद्यतनातीतत्वयोरभावेन तदर्थकलिड-सम्भवात्** [398]" इति । एवञ्च रीत्या उत्तमपुरुषे लिड्सम्भवत्येव नहीति कौण्डभट्टानामभिमतिः ।

### ➢दीक्षितसम्मतिः

भट्टोजिदीक्षितपादैः तु चित्तविक्षेपादिनोत्तमपुरुषेऽपि पारोक्ष्यमुपपादितम् । भणितञ्च तेन – " **उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम् । सुप्तोऽहं किल विललाप** [399]" इति । बहु जगद् पुरस्तात्तस्य मत्ता किलाहम् ' स्वव्यापारस्य वर्तमानतादशायां व्यासङ्गादिना स्वयमप्रतिसन्धाने , पश्चाच्च कार्येणानुमितौ क्रियायाः पारोक्ष्यसम्भवात् लिट्लकारः सम्भवत्येवेति तेषामाशयः ।

### ➢भाष्यसम्मतिः

वैयाकरणसिद्धान्तप्रवर्तकानां भाष्यकाराणां मते तु मनःसंयुक्तेन्द्रियस्य विषयोपलब्धौ कारणत्वात् , मनःसंयोगाभावे इन्द्रियार्थसन्निकर्षे सत्यपि परोक्षत्वं भवत्येव । अतएव ' **सुप्तमत्तयोरुत्तमः** ' इति वार्तिकव्याख्यानावसरे उक्तं पतञ्जलिना – " **अथवा भवति वै कश्चिज्जाग्रदपि वर्तमानकाल नोपलभते । तद्यथा वैयकरणानां शाकटायनो रथमार्गे आसीनः शकटसार्थं यान्तं नोपलेभे । किं पुनः कारणम् ' कश्चिज्जाग्रदपि वर्तमानकाल नोपलभते ? मनसा**

---

[398] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१४८-१४९ ।**

[399] **वैयाकरणसिद्धान्तकौमुद्यां लकारार्थप्रक्रियायां , पृ.५४४ ।**

**प्रयुक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति मनसः सान्निध्यात्** [400]" इति।

वस्तुतस्तु – ' **अध्यास्त सर्वर्तुसुखामयोध्याम्** [401]' इति भट्टिप्रयोगे तत्काले क्रियायाः तत्साधनस्य वा परोक्षत्वेऽपि लिट्प्रयोगादर्शनात् वैवक्षिकमेव पारोक्ष्यं लिट्प्रयोजकं न तु वास्तवम् । एवञ्च व्यातेने इत्यादावपि ( एतावता सूक्ष्मकालेन ग्रन्थमिमं निर्मास्यामि , यत्र मयापि साक्षात्कर्त्तुं न शक्यते ) इति ज्ञानफलकपारोक्ष्यविवक्षया लिट् सम्भवत्येव ! अतएव स्वयमेवोक्तं कौण्डभट्टेनापि –" **अनद्यतने भूतत्वेन विवक्षिते लङ् । तत्रैव परोक्षत्वविवक्षायां लिट्** [402]" इति । एवञ्च स्वयमेव वैवक्षिकस्य परोक्षत्वस्य लिट् प्रयोजकत्वं प्रतिपादयता , " **व्यातेने** " इत्यादीनामनुपपत्तिं प्रदर्शयतां कौण्डभट्टानामुक्तिश्चिन्त्यैव[403] ; व्यातेने इत्यत्रापि वैवक्षिकपरोक्षत्वस्य सम्भवात् । तत्प्रतिपादितस्य भाष्यविरुद्धत्वाच्चेति।

तस्मात् ' **परोक्षे लिट्** [404]' इति सूत्रसामर्थ्यादनद्यतनभूतत्वं परोक्षत्वञ्च लिडर्थः सर्वत्र सम्भवतीति।

वार्तिककृता त्वत्यन्तापह्नवेपि[405] लिड्विधानं प्रतिपादयन्ति । तत्रात्यन्तत्वञ्च प्रष्टव्यविषयप्रतिकूलकथनाभावेऽपि तदुपपादकात् विपरीतकथनम् । एवञ्च अपह्नवो नामप्रष्टव्यविषयक-निश्चयोत्पत्तिप्रतिबन्धकज्ञानजनकशब्दप्रयोगः । यथा- " **जगन्नाथात्**

---

[400] **पतञ्जलिमहाभाष्यप्रदीपे ३/२/११५ , पृ.१७९ ।**

[401] **भट्टिकाव्ये १,५ ।**

[402] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१६५ ।**

[403] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये पृ.१६५ ।**

[404] **पाणिनीयाष्टाध्याय्यां ३.२.११५ ।**

[405] **पतञ्जलिमहाभाष्यवार्त्तिके ३/२/११५ , पृ.१७९ ।**

**पूर्वभागे स्थिते कलिङ्गदेशे त्वमवात्सीः** " ? इति प्रश्ने ' **नाहं कलिङ्गान् जगाम** ' इति प्रयोगे , ' **जगाम** ' इत्यत्र लिट्प्रयोगः अत्यन्तापह्नवोऽर्थे एव । नाहं जगामेति वाक्यं तत्र प्रष्टव्यवासविषयकनिश्चयात्मकज्ञानस्य प्रतिबन्धकम् , तत्र यद्यपि वाक्यस्य निषेधो न कृतः , किन्तु तदुपपादकस्य कलिङ्गदेशगमनस्य निषेधोऽस्ति।

### ➢लुट्लकारार्थः

' **अनद्यतने लुट्** [406]' इति पाणिन्युनुशासनादनद्यतन भविष्यत्वं लुट्लकारार्थः । उक्तञ्च ' **अनद्यतने भाविनीत्यर्थः** '[407] । आदेशवाचकत्ववादिना नागेशेनापि उक्तम् – " **लुडादेशस्यच भविष्यदनद्यतनार्थोऽधिकः । शेषं लृड्वत्** ' **इति । तत्रानद्यतनम् , अनद्यतनभिन्नमिति पूर्वं प्रतिपादितम् । भविष्यत्वं च वर्तमान**[408]**प्रागभावप्रतियोगिक्रियोपलक्षिततत्वम्** [409]" इति स्वीकृतम् परमलघुमञ्जूषायाम्।

' **परिदेवने स्वस्तनी भविष्यन्त्यर्थे**[410] ' इति वार्तिकेन महाभाष्येऽनुशोचनेऽर्थे भविष्यत्सामान्येऽर्थे च लुड्विधानं प्रतिपादितम् । श्वस्तनीति लुट् लकारस्य भविष्यन्तीति सामान्यभविष्यत्काले विधीयमानस्य लृटः संज्ञा। तथा चोक्तं प्रदीपे – " **श्वस्तनीतिलुटः संज्ञा। भविष्यन्त्यर्थे लृडर्थे भविष्यत्सामान्ये इत्यर्थः**[411] " इति। यथा – इयं कदानुगन्ता , या

---

**406 पाणिनीयाष्टाध्याय्यां ३/३/१५।**

**407 वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१५९।**

**408 परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७६।**

**409 परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७७।**

**410 पतञ्जलिमहाभाष्यवार्त्तिके ३/३/१५ , पृ.२१०।**

**411 पतञ्जलिमहाभाष्यप्रदीपे ३/३/१५ , पृ.२१०।**

एवं पादौ निदधाति ‘ **इति** ’ इयं बालिका यद्येवं पादौ निदधाति , तर्हि कदा गमिष्यन्तीत्यर्थः । एवञ्चानेन भाष्यवार्तिकेनानुशोचनेऽर्थे सामान्यभविष्यत्कालोऽपि लुडर्थ इति ।

### ➢लृट्लकारार्थः

सामान्यभविष्यदेव लृट्लकारार्थः । ‘ **लृट्शेषे च** [412]’ इति सूत्रेण सामान्यभविष्यत्काल एव लृड्विधानात् । अभिहितञ्च कौण्डभट्टेन- ‘ **भविष्यत्सामान्य**[413] ’ इत्यर्थः । ‘ **लृट्शेषे च**[414] ’ इति सूत्रात् । नागेशेनापि अस्मिन्नेवार्थे स्वकीया सम्मति दत्ता । “ **लृट् तिङ्स्तु भविष्यत्सामान्यमेवार्थ**[415] ” इति । “ **भविष्यत्वञ्च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्**[416] ” इति प्रतिपादितम् वैयाकरणभूषणसारे । एवञ्च “ घटो भविष्यति ” इत्यत्र घटाभिन्नाश्रयवृत्तिर्वर्तमानप्रागभावप्रतियोगिसमयावच्छिन्नोत्पत्त्यनुकूलो व्यापार इति बोधः ।

लेट्लोडर्थविचारः “ **लिङर्थे लेट्**[417] ” “ **आशिषिलिङ्लोटौ** [418]” “ **लोट् च** [419]” इति पाणिन्युशासनात् लिङर्थे लिट्लोटोर्विधानेन लेट्लोट्लिङस्तु समानार्था एव । उक्तञ्च कौण्डभट्टेन – “ **एतयोरर्थो**

---

[412] **पाणिनीयाष्टाध्याय्यां ३/३/१३ ।**

[413] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१५० ।**

[414] **पाणिनीयाष्टाध्याय्यां ३/३/१३ ।**

[415] **परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७७ ।**

[416] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१५० ।**

[417] **पाणिनीयाष्टाध्याय्यां ३/४/७ ।**

[418] **पाणिनीयाष्टाध्याय्यां ३/३/१७३ ।**

[419] **पाणिनीयाष्टाध्याय्यां ३/३/१६२ ।**

**लिङर्थ एव , त्रयाणां समानार्थत्वात्** [420]" इति। तत्र कस्तर्हि लिङर्थः , यस्मिन्नर्थे लेटलोटौ विधीयेते ? – इत्याकाङ्क्षायां पूर्वं लिङर्थ एव निरूप्यते।

## ➢लिङर्थविचारः

● **वैयाकरणमतम् :** शब्दिकास्तु " **विधिनिमन्त्रणामन्त्रणाधीष्ट-सम्प्रश्नप्रार्थनेषु लिङ्**[421] " इति पाणिनिसूत्रेण विध्यादिष्वर्थेषु लिङ्विधानेन लोके प्रयोगाच्च विध्यादिरेव विशेषेण लिङर्था इति स्वीकुर्वन्ति । तथा चोक्तम् – ' **लिङादेशस्य**[422] **तु विध्यादिरर्थः** ' इति।

तत्र विधिर्नाम प्रेषणम् , तच्च स्वापेक्षया निकृष्टस्य भृत्यस्य स्वाभिलषितेऽर्थे प्रवर्तनम् । इयमेवाज्ञा । एवञ्च ' **स्वर्गकामो यजेत** ' इत्यादावप्रवृत्तप्रयोज्यस्य तदभिलषिताज्ञातोपायप्रदर्शनोपदेशोऽपि विधिरेव । निमन्त्रणमनियोगकरणम् । आवश्यकश्राद्धभोजनादौ स्वाभिलषिते प्रवर्तनमित्यर्थः । तथा चोक्तं भाष्ये –' **एवं तर्हि यन्नियोगतः कर्तव्यं तन्निमन्त्रणम्** [423]' इति।

आमन्त्रणञ्च स्वाभिलषिते कामचारेण प्रवर्त्यप्रवर्तनम् । कामचारश्च प्रवर्त्यस्यैव । एषैव कामचारानुज्ञा । अतएव निमन्त्रणामन्त्रणयोर्भेदं प्रतिपादयता पतञ्जलिनोक्तम् – " **आमन्त्रणे कामचारः**[424] " इति । व्याख्यातञ्च तत्रैव नागेशेनोद्योते – " **यत्र भोजनाद्यननुष्ठानेऽपि न प्रत्यवायस्तद्विषया प्रवर्तनामन्त्रणमिति तात्पर्यम्** "। " **आमन्त्रणम्**

---

[420] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१५१ ।**

[421] **पाणिनीयाष्टाध्याय्यां ३/३/१६१ ।**

[422] **परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७७ ।**

[423] **पतञ्जलिमहाभाष्ये ३/३/१६१ , पृ.१३६ ।**

[424] **पतञ्जलिमहाभाष्ये ३/३/१६१, पृ.१३६ ।**

– **कामचारानुज्ञा**[425] ” इति प्रतिपादितं कौण्डभट्टेनापि । अधीष्टः सत्कारपूर्वको व्यापारः । यथा – माणवकमध्यापयेत् । इयमेवाभ्यर्थना । उक्तञ्च – “ **अधीष्टं नाम सत्कारपूर्विका व्यापारणा । सम्प्रश्ना सम्प्रधारणम् । प्रार्थना तु स्वाभिलषितदानप्रवर्तिकोक्तिः**[426]” इति ।

अत्रेदमवधेयम् यद्यपि लिङ्विधायके सूत्रे षण्णामुपादानमस्ति , किन्त्वाद्येषु विध्यादिषु चतुर्षु अन्यदीयप्रवृत्तिजननानुकूलव्यापारत्वरूपस्य प्रवर्तनात्वस्यानुस्यूतत्वात् प्रवर्तनात्वमेव विध्याद्यर्थनिष्ठशक्यतावच्छेदकम् , न तु पृथक् पृथक् विधित्वादिकम् ; अनेकशक्यतावच्छेदके गौरवात् , शक्तेर्नानात्वप्रसङ्गाच्च । तथा चोक्तम् –

“ **अस्तिप्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि ।**
**तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया ॥**
**न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।**
**विध्यादीनामुपादानं , चतुर्णामादितः कृतम् ॥** [427]” इति ।

नागेशेनापि उक्तम् – “ **तत्र विध्यादि चतुष्टयस्यानुस्यूतप्रवर्तनात्वेन चतुर्णां वाच्यता ; लाघवात्** [428]” इति ।

कैयटेनापि सिद्धान्तोऽयं प्रतिपादितः प्रदीपे- “ **प्रपञ्चार्थं , न्यायव्युत्पादनार्थवार्थभेदमाश्रित्य भेदेनापादानं विधिनिमन्त्रणादीनां कृतम् । विधिरूपता हि सर्वत्रान्वयिनी विद्यत** [429]-” इति ।

---

[425] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ.१५३ ।**

[426] **पतञ्जलिमहाभाष्ये ३/३/१६१ , पृ.२३६ ।**

[427] **भर्तृहर्युक्तिरियमिति प्रतिपादितं नागेशेन किन्तु मुद्रिते ग्रन्थे नोपलभ्यते ( वाक्यपदीये ) ।**

[428] **परमलघुमञ्जूषायां लादेशार्थविचारे पृ.७७ ।**

[429] **पतञ्जलिमहाभाष्यप्रदीपे ३/३/१६१ , पृ.२३६ ।**

तत्र प्रपञ्चार्थमित्यास्याशयं प्रतिपादयता पतञ्जलिना उक्तम् – **" प्रपञ्चार्थमिति प्रवर्तनात्वस्य शक्यतावच्छेदकत्वे तेन रूपेण विध्यादिष्वेव शक्तिरिति विस्तरेण ज्ञानार्थम्** [430]**" इति भावः ।**

एवञ्च प्रवर्तनात्वेनैव विध्यादीनां वाच्यतेति वैयाकरणसिद्धान्तः ।

स च प्रवर्तनारूपो व्यापारः इष्टसाधनत्व रूप एव । लोके सर्वं एव पुरुषः **'' इदं क्रियमाणं मदिष्टसाधनमिति संप्रधार्यैव "** प्रवर्तत इति सर्वजनीनोऽयमनुभवः । प्रयोजकवाक्यश्रवणसमनन्तरं प्रयोज्यवृद्धस्य प्रवृत्तिर्दृष्ट्वा पार्श्वस्थः बालः स्वप्रवृत्तिसाधनेन प्रथममिष्टसाधनताज्ञानमनुमिनोति । ' प्रयोज्यवृद्धस्य अस्मिन् कर्मणि प्रवृत्तिः , इष्टसाधनताज्ञानपूर्विका , प्रवृत्तित्वात् मदीयप्रवृत्तिवत् । एवमिष्टसाधनाताज्ञाने अनुमिते , तस्य ज्ञानस्य कारणं किमितिजिज्ञासायां तज्ज्ञानस्य लिङ्घटितवाक्यश्रवणसमनन्तरभावित्वात् , तस्मिन् ज्ञाने तद्वाक्यजन्यत्वमवधारयति । एवञ्च लिङादिशब्दादेव तस्य प्रतीयमानत्वात् , इष्टसाधनत्वस्य लिङ्वाच्यत्वम् , तस्य प्रवर्तकत्वाच्च प्रवर्तनारूपत्वमिति निश्चिनोति । तस्मादिष्टसाधनत्वमेव प्रवर्तनात्वेन रूपेण विध्यर्थ इति वैयाकरणसम्मतिः ।

अभिहितञ्च कौण्डभट्टेन – **" प्रवर्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम् । तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः** [431]**"** इति । नागेशेनापि स्वीकृतोऽयं पक्षः- **" प्रवर्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं , तच्चेष्टसाधनत्वस्यैवेति तदेव लिङर्थः**[432] **"** इति ।

---

[430] **वैयाकरणभूषणसारस्य प्रभाटीकायां , पृ. १५४ ।**

[431] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ १५४-१५५ ।**

[432] **परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७७ ।**

यद्यपीष्टसाधनेऽपि चन्द्रमण्डलाद्यानयने , एवं तृप्तिरूपेष्टसाधनेऽपि कृतिसाध्यमधुविषसम्पृक्तान्नभोजने च प्रवृत्त्यभावदर्शनात् , प्रवर्तकज्ञानविषयतावच्छेदेन कृतिसाध्यत्वस्य बलवदनिष्टाननुबन्धित्वस्य च विध्यर्थत्वं वाच्यं , तथापि कृतिसाध्येऽपि वस्तुनि वृथाश्रमजनतयेष्ट-जनकत्वाभावज्ञानेन द्वेषात् प्रतिवन्धकसत्त्वाद् वा प्रवृत्त्यभावदर्शनात् व्यभिचारः । एवञ्चास्तिक कामुकस्य परस्त्रीगमने नरकादिबलवदनिष्ठा-निबन्धित्वेऽपि रागौत्कट्यात् प्रवृत्तिदर्शनेन व्यभिचारः ।

एवञ्चान्वयव्यतिरेकव्यभिचाराभ्यां कृतिसाध्यत्वबलवदनिष्ठा-ननुबन्धित्वयोः प्रवृत्तिप्रयोजकत्वाभावेन प्रवर्तनात्वाभावात् , न लिङ्वाच्यत्वम् । तथाचोक्तं नागेशेन – **“ न तु कृतिसाध्यत्वम् , तस्य यागादौ लोकत एव लाभादित्यन्यलभ्यत्वात् । न च बलवदनिष्ठाननुबन्धित्वं , द्वेषाभावेनान्यथासिद्धत्वात्** [433]” इति ।

इमा एव पंक्तयः कौण्डभट्टेनापि उद्धृता वैयाकरणभूषणसारस्य लकारार्थनिर्णये पृष्ठेऽतः तेषां मतेऽपि कृतिसाध्यत्वस्य बलवदनिष्ठाननुबन्धित्वस्य वा लिङ्वाच्यत्वं नास्ति , अपि त्विष्टसाधनत्वस्यैवेति । मण्डनमिश्रैरप्यस्मिन्नेवार्थे स्वसम्मतिः प्रकटिता ।

**“ पुंसो नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः ।**
**प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्तनाम् ॥** [434]” इति ।

## ➢नैयायिकमतम्

नैयायिकास्तु बलवदनिष्ठाननुबन्धित्वम् , इष्टसाधनत्वम् , कृतिसाध्यत्वञ्च तत्तद्धात्वर्थगतं विध्यर्थ इति स्वीकुर्वन्ति । तथाचोक्तं –

---

433 **परमलघुमञ्जूषायां लादेशार्थविचारे , पृ. ७७-७८ ।**

434 **विधिविवेकश्लोके ।**

**“ किन्तु प्रवर्तकचिकीर्षायां यत्प्रकारज्ञानस्य हेतुत्वं , स तथा , तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्ठाननुबन्धित्वञ्च प्रत्येकमेव , यागपाकादिधर्मिक तन्निश्चयादेव यागादिधर्मिक चिकीर्षोत्पत्त्या तत्र प्रवृत्तेः । एवञ्च यजेत पचेतेत्यादौ यागः कृतिसाध्यः इष्टसाधनो बलवदनिष्टाननुबन्धी च इत्याकारको बोधः[435]” इति ।**

लोके सर्वत्र चेतनस्य प्रवृत्तावुपयुक्तं त्रयमप्यपेक्ष्यते । अन्यथेष्टसाधनत्वबलवदननुबन्धित्वयोः सत्त्वेऽपि कृतिसाध्यत्वज्ञाने सुमेरुशृङ्गाहरणादौ , प्रवृत्तिः न दृश्यते , विषसम्पृक्तमध्वन्नभक्षणादौ , क्षुन्निवृत्तिरूपेष्टसाधनता-ज्ञानकृतिसाध्यताज्ञानयोः सत्त्वेऽपि मरण-सम्पादकत्वेन बलवदनिष्टाजनकत्वज्ञानाभावेन तत्र पुरुषाणां प्रवृत्तिर्न दृश्यते । तथा निष्प्रयोजने जलताडनादौ बलवदनिष्टाजनकत्वकृतिसाध्यत्वयोर्ज्ञनेऽपि इष्टसाधनत्वाभावेन तत्र पुंसां प्रवृत्तिर्न दृश्यते तस्माद्यत्र प्रवृत्तिर्दृश्यते ; तत्र उक्तत्रयं विदित्वैवेति , त्रयाणामेव प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वेन विध्यर्थत्वं स्वीकरणीयम् । प्रतिपादितञ्चैतत् सर्वं शब्दशक्तिप्रकाशिकायाम् - **‘ पङ्गु समुद्रं न तरेदित्यादौ[436]** ’ नञादिना समुद्रतरणादेः पङ्गुप्रभृतिकृति साध्यत्वनिषेधबोधानुरोधादवश्यं लिङर्थः । तथा तृप्तिकामो जलं न ताडयेदित्यादौ तृप्तिकामेष्टसाधनत्वस्य , न कलञ्जं भुञ्जीतेत्यादौ च कलञ्जभक्षणादेर्बलवदनिष्टाजनकत्वस्य निषेधानुपपत्त्या इष्टसाधन-त्वादिकमपि ’ इति ।

---

**[435] शब्दशक्तिप्रकाशिकायां पृ.४१० ।**

**[436] शब्दशक्तिप्रकाशिकायां पृ. ४१०-४११ ।**

व्युत्पत्तिवादेऽपि गदाधरेण त्रयाणां प्रवर्तकज्ञानविषयत्वं स्वीकृतम् । तथाहि – **“ विधिः प्रवर्तकज्ञानविषयो धर्मः , स च धर्मो न्यायनये कृतिसाध्यत्वम् , बलवदनिष्टाननुबन्धित्वसहितमिष्टसाधनत्वञ्च** [437]**”** इति ।

## ➢नैयायिकमतखण्डनम्

**‘ न कलञ्जं भक्षयेद् ’** इत्यादौ कलञ्जभक्षणम् इष्टसाधनत्वाभाववत् कृतिसाध्यत्वाभाववच्च इति अनुभवाभावात् , तत्र नञ् बलवदनिष्टाननुबन्धित्वमात्रस्याभावं बोधयति , एवञ्च तत्र तस्यैव लिङर्थत्वं सम्भवति , अन्येषामपि लिङर्थत्वेऽन्वयानुपपत्तिः । यदि तेषामपि तत्र लिङर्थत्वम् , तर्हि तेषां धात्वर्थ्ये एवान्वयः स्वीकरणीयः ।

एवञ्चैकस्य नञर्थेऽन्वयः , अन्वयो धात्वर्थ इति , बलवदनिष्टाननुबन्धित्वस्यापि , असत्वे नजि धात्वर्थे , तत्सत्त्वे च नञर्थे इति गुरुभूतानेकसमभिव्याहारज्ञानघटित-कार्यकारणभावकल्पनापत्तिः ।

एवं **‘ घटो नास्ति ’** इत्यादौ लिङादिसमभिव्याहाराभावे नञर्थस्याभावस्य प्रथमान्तपदोपस्थाप्ये आश्रयेऽन्वयः लिङादि असमभिव्याहारे च धात्वर्थ एव ।

एवमेवाख्यातार्थस्य कृत्यादेः नञोऽसत्त्वे प्रथमान्तपदोपस्थाप्य एव आश्रयतासम्बन्धेनान्वयः , तत्सत्त्वे तु तदर्थे प्रतियोगिताकत्व सम्बन्धेनेत्यनेकव्युत्पत्ति-कल्पनायामनेके कार्यकारणभावाः कल्पनीयाः । अतः ज्ञानगौरवादुपेक्षणीयं नैयायिकमतमिति ।

---

[437] **व्युत्पत्तिवादे , पृ.३४६ ।**

## ➤ प्रभाकरमतम्

स्वविशेषणवत्ताज्ञानजन्यकार्यताज्ञानस्यैव प्रवर्तकत्वं स्वीकुर्वन्ति , त्रयाणां कारणकल्पनायां कार्यकारणभावत्रयकल्पनायां गौरवात् । उक्तञ्च प्रभाकरमतमुपपादयता विश्वनाथपञ्चाननभट्टाचार्येण ' **कार्यताज्ञानं प्रवर्तकमिति गुरवः** ' इति ।

तत्र कार्यताज्ञानं द्विविधम् । पदार्थनिष्ठयोग्यताज्ञानजन्यं ' **मयेदं कर्त्तुं शक्यमित्येकम्** ' । स्वेष्टसाधनत्व बलवदनिष्टाननुबन्धित्वज्ञानजन्यं ' **ममेदमवश्यं कार्यमिति** ' द्वितीयम् । इदमेव स्वविशेषणवत्ताज्ञानं प्रतिसन्धानजन्यम् । स्वं नियोज्यः तद्विशेषणं काम्ये फलकामना । अतः स्वेष्टसाधत्वबलवदनिष्टाननुबन्धित्व-ज्ञानजन्यकार्यताज्ञानं चिकीर्षाद्वारा प्रवर्तकमिति सिध्यति । प्रवर्तकत्वेन च तस्यैव विध्यर्थत्वम् ।

एवञ्च कार्यत्वमेव विध्यर्थः । ' **तृप्तिकामः पचेत्** ' इत्यस्य ' **तृप्तिकामनियोज्यः पाकः कार्यः**' **इति बोधः । एवं** ' **शुचिसन्ध्यामुपासीत्** ' इत्यादिवैदिकविधौ वेदाधीनकार्यताज्ञानात् योग्यता । तथा च शुचिनियोज्यकं सन्ध्यावन्दनादिकं कार्यमिति बोधः ।

भाट्टमते तु लिङादिशब्दनिष्ठा प्रवर्तना विध्यर्थः । प्रवृत्तिश्च द्वेधा , स्वेच्छाधीना , पराधीना च । तत्राद्यायामिष्टसाधनत्वधीः कारणम् , अन्त्यायां राजगुर्वादेराज्ञा प्रेरणाधीः । ' **राजा अनिच्छन्तं मां प्रेरयति** ' इत्यनुभवात् । प्रवर्तना च प्रवर्तयितुः परप्रवृत्त्यनुकूलो व्यापारविशेषः । स च चेतनस्य राजादेराज्ञादिः ।

अपौरुषये वेदे तु वक्तुरभावादचेतनस्य वेदस्याभिधानात्मकः कश्चित् शब्दसमवेतोऽलौकिको व्यापारः । स च शब्दनिष्ठत्वात् शब्दकारणत्वाच्च शाब्दीभावेनेत्युच्यते । तस्याः प्रवर्तनात्वेनज्ञानं तद्विषयकशक्तिग्रहश्च

प्रयोज्यप्रयोजकवृद्धव्यवहारादेव । तत्रापि वृद्धव्यवहारे वाक्यात् तादृशे ज्ञाने जातेऽप्यवापोद्वापाभ्यां पदानां लिङंशे शक्तिः सिध्यति ।

## ➢आचार्यखण्डदेवमतम्

रहस्यकृताचार्य आचार्यखण्डदेवेन लिङर्थनिरूपणावसरे पक्षत्रयमुपन्यस्तं भाट्टतन्त्ररहस्यात्मके ग्रन्थे । तत्र प्रवृत्त्यनुकूलो व्यापारः प्रवर्तनेति प्रथमपक्षः । अयमत्र प्रवर्तनामित्याकारकत्वरूपविषयिताविशेषः पुरुषाभिप्रायालौकिकोभयसाधारण इति द्वितीयपक्षः । जातिविशेषः इच्छात्वमेव लिङ्वाक्यमिति तृतीयपक्षः । पक्षत्रयेऽस्मिन् इच्छायाः एव लिङर्थत्वं स्वीकरोति खण्डदेवः । अभिहितञ्च ‘ **वस्तुतस्तु इच्छात्वं जातिरेव लिङादि शक्यतावच्छेदिका लाघवात्** [438]’ इति । एवं लिङर्थ इच्छेति स्वीकृत्य तत्पक्षेऽपि ‘ यदीच्छा आत्मामात्र निष्ठा , नाचेतननिष्ठेति विभाव्यते , तदौपनिषदमीश्वरमनङ्गीकृत्य तदीयेच्छैव लिङर्थ इति मतान्तरं खण्डयन् खण्डदेवः आह- “ **लोके लिङादेरिच्छायां शक्तिः , वैदिकस्य लिङादेः अलौकिकप्रेरणायां लक्षणा** [439]” इति ।

## ➢ लङ्लकारार्थः

अनद्यतनभूतार्थवाचिनो धातोर्लङ्भवतीत्यर्थकात् ‘ **अनद्यतने लङ्**[440] ’ इति पाणिन्यनुशासनादनद्यतनभूतत्वमेव लङ्लकारार्थः । उक्तञ्च ‘ **अनद्यतनभूतः**[441] इत्यर्थः , अनद्यतने लङ् इति सूत्रात् । तत्रानद्यतनम्

---

**[438] भाट्टतन्त्ररहस्ये पृ.२२ ।**

**[439] भाट्टतन्त्ररहस्ये पृ.२२ ।**

**[440] पाणिनीयाष्टाध्याय्यां ३/२/१११ ।**

**[441] वैयाकरणभूषणसारस्य लकारार्थनिर्णये , पृ १५२ ।**

अनद्यतनभिन्नमेव पूर्ववत् । भूतत्वञ्च[442] वर्तमानध्वंसप्रतियोगि-क्रियोपलक्षितत्वमिति व्याख्यातं नागेशेन ।

कदाचिदल्पसत्तापरिसमाप्तावपि भूतकालस्य व्यवहारः कृतो भाष्यकृता । तथा चोक्तम् – ‘ **एष च नाम न्याय्यो भूतकालः यत्र किञ्चिदपवृत्तं दृश्यते** [443]’ इति । एवञ्च लङर्थोऽनद्यतनभूतकाल एव । तथा च ‘ **घटोऽभवत्** ’ इत्यत्र घटकर्तृकम् अनद्यतनभूतकालिकं भवनमिति बोधः ।

## ➢ लुङ्लकारार्थः

‘ **लुङ्** [444]’ इति पाणिनिसूत्रानुरोधात् भूतसामान्यमेव लुङ्लकारार्थः । उक्तञ्च नागेशेनापि ‘ **लुङादेशस्य तु भूतसामान्यमर्थः**[445] ’ । तत्र भूतत्वं लङ्लकारार्थाभिन्नमेव , लङ्वाच्यो भूतोऽनद्यतनरूपः , लुङ्वाच्यस्तु सामान्यभूतः इति विशेषः । एवञ्चात्रसामान्यविशेषयोरैक्यात् कदाचित् भूतविशेषेऽपि भूतत्वमात्रविवक्षायां लुङ् भवति ।

## ➢ लृङ्लकारार्थः

“ **लिङ्निमित्ते लृङ्क्रियानिष्पत्तौ**[446] ” इत्यनुशासनात् क्रियाया असिद्धौ हेतुहेतुमद्भावे च भूतं , भविष्यत्वञ्च लृङ्लकारार्थः , लिङ्निमित्ते हेतुहेतुमद्भावः क्रियातिपत्तावित्यस्य क्रियाया असिद्धावित्यर्थः [447]। उक्तञ्च

---

[442] **परमलघुमञ्जूषायां पृ.७८ ।**

[443] **पतञ्जलिमहाभाष्ये ३/१/१०२ , पृ.१७० ।**

[444] **पाणिनीयाष्टाध्याय्यां ३/१/११० ।**

[445] **परमलघुमञ्जूषायां लादेशार्थविचारे , पृ.७८ ।**

[446] **पाणिनीयाष्टाध्याय्यां ३/३/१३९ ।**

[447] **वैयाकरणसिद्धान्तकौमुद्यां पृ. ४०४ ।**

भट्टोजिदीक्षितेन –" **हेतुहेतुमद्भावादि लिङ्निमित्तम्** [448]" । नागेशेनापि उक्तम् – " **लृङादेशस्य तु क्रियानिष्पत्तौ गम्यमानायां हेतुहेतुमद्भावे च गम्यमाने भूतत्वं भविष्यत्वञ्चार्थ** [449]" इति ।

लङ्लिङ्लुङ्लृङिति चतुर्णां ङितां लकाराणामर्थं प्रतिपादयन्नाह कौण्डभट्टः –

" **ह्योभूते प्रेरणादौ च भूतमात्रे लङादयः ।**
**सत्यां क्रियानिष्पत्तौ च भूते भाविनि लृङ्स्मृतः ॥** [450]" इति ।

एवञ्च कालः , कर्ता , कर्म संख्येति चतुर्विधेषु लकारार्थेषु कर्त्राद्यर्थे सर्वेषामेव साम्यम् , किन्तु कालविशेषे भेदो दृश्यते । यद्यपि काल एक एव , किन्तु व्यवहारदृष्ट्या तत्र भेदः कल्प्यते । अभिहितञ्च भर्तृहरिणा –

" **विकल्परूपं भजते तत्त्वमेवाविकल्पितम् ।**
**न चात्रकालभेदोऽस्ति , कालभेदश्च गृह्यते ॥** [451]" इति ।

तत्र कालस्य भेदः लकारार्थनिर्णयानुसारेण त्वित्थम् पूर्वकालो द्विविधः , अद्यतनः , अनद्यतनश्च । तत्राद्यः भूतभविष्यवर्तमानश्चेतिभेदात् त्रिविधः , अनद्यतनो भूतभविष्यद्भेदात् द्विविधः , तस्य वर्तमानत्वे असम्भवात् । वर्तमानोऽपि विविधः वर्तमानकालः वर्तमानसामीप्यञ्चेति ।

भर्तृहरिणा तु कालस्य व्यवहारदृष्ट्यैकादशभेदा स्वीकृताः सन्ति । उक्तञ्च –

" **भूतपञ्चविधस्तत्र भविष्यश्च चतुर्विधः ।**
**वर्तमानो द्विधा ख्यात इत्येकादश कल्पना ॥**[452] " इति ।

---

[448] **भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां पृ. ४०४ ।**

[449] **परमलघुमञ्जूषायां पृ.७८ ।**

[450] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये का. २३ ।**

[451] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य द्रव्यसमुद्देशे का. ८ ।**

लकारार्थस्य प्रतिपाद्यविषयं संक्षिपन्नाह कौण्डभट्टः – ' **अयमत्र**[453] **संग्रहः , कालो द्विविधः , अद्यतनोऽनद्यतनश्च** ' । आद्यस्त्रिविधः भूतभविष्यद्वर्तमानभेदात् । अन्त्यो द्विविधः भूतभविष्यञ्च । तत्र वर्तमानत्वे लट् । भूतत्वमात्रे लुङ् , भविष्यत्तामात्रे लृट् । हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ् , अनद्यतने भूतत्वेन विवक्षिते लङ् । तत्रैव परोक्षत्वविवक्षायां लिट् , तादृशे भविष्यति लुट् ।

एवञ्चैतेषां सर्वेषां चतुर्णामर्थानां वाचकाः लडादयः लकाराः , तदादेशा वेत्यत्र मतभेदो दृश्यते । नागेशेन त्वादेशानामेव वाचकता स्वीकृता लादेशार्थविचारः इति प्रकरणमुपन्यस्तम् परमलघुमञ्जूषायाम् ।

कौण्डभट्टेन तु लकारार्थनिर्णय उपस्थापितस्तेन तेषां मते लत्वेन वाचकता । किन्तु धात्वर्थनिर्णये कर्तृकर्मणोराख्यातस्य वाच्यत्वं स्वीकुर्वता कौण्डभट्टेन कर्तृकर्मणोर्बोधकतारुपा शक्तिः तिङ्ष्वेव स्वीकृता । एवञ्चादेशानां वाचकत्वं लकाराणां वेत्यत्र न कश्चनाग्रहः कौण्डभट्टस्य । प्रकरणनिर्देशस्तु स्थान्यादेशयोरर्थाभेदबुद्ध्यैवेति मे मतिः ।

## ➢तारानाथतर्कवाचस्पतिमतम्

कर्तृकर्मादिवाचकत्वे स्थिते भावलकारस्थले तृतीयैव आश्रयबोधिका नत्वेक लकारस्योभयार्थकत्वं तेन तत्कर्तुस्तृतीयोपपत्तिरन्यथा लकारसामानाधिकरण्यात् प्रथमापत्तेः तिङ् समानाधिकरणे प्रथमेति वार्तिकोक्तेः । अत्र तिङ्समानाधिकरण इति निर्देशात् युष्मद्युपपदे समानाधिकरणे इत्यादिना युष्मत्समानाधिकरण्ये मध्यमपुरुषविधानाच्च प्रथमान्तार्थाख्यातार्थयोरभेदान्वय इत्युपेयत परैरपि लादेशशत्रादेरर्थस्य

---

[452] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य कालसमुद्देशे का.१८ ।**

[453] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये पृ.१६५ ।**

नामार्थेऽभेदान्वयाभ्युपगमेन तत्स्थानिलकारार्थस्यापि तथान्वयौचित्यात् । अत एव लकारादीनां लाघवेनापि कर्तृत्वादौ न शक्तिः कल्प्यते तथासति कर्तृत्वादे आश्रयतयैव नामार्थेऽन्वयस्य वक्तव्यतया तदन्वयिवाचकपदात् प्रथमानुपपत्तेः तिङ्समानाधिकरणे एव प्रथमाया विधानात् लकारेणानभिधानात्तृतीयापत्तेश्च कृत्तद्धितानां संख्यावाचकत्वानियमेन संख्याभिधानानभिधानाभ्यां प्रथमातृतीयादि व्यवस्थायाः कर्त्तुमशक्यत्वाच्च ।

ते च लकाराः **लट्लिट्लुट्लेट्लोट्लृट्** चेति षट् **लङ्लिङ्लुङ्लृङ्** चेति ङितश्चत्वार इति दशविधाः । तत्र लेटोवैदिकप्रयोगमात्रविष्यता इतरेषान्तु सर्वप्रयोगविषयता । तेषान्तु प्रत्येकलक्षणन्तु वक्ष्यमाणार्थवाचित्वे सति लकारादेशत्वम् । अर्थविशेषाश्च सूत्रविशेषादवगन्तव्याः हरिणापि तेषां कतिचिद् अर्थाः संगृहीताः । यथा-

**" वर्त्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति ।**
**विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ।।**
**ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः ।**
**सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृत "** [454] **।।**

इति एतेषाञ्चादित्वमुद्देशक्रमेण बोध्यम् । अत्र श्व इत्यस्य परोक्षे भूते भाविनि चान्वयः । तथा च लटो वर्त्तमानार्थे वर्त्तमाने लडिति सूत्रात् वर्त्तमानञ्चारब्धापरिसमाप्तत्वं प्रयोगसमानकालीनत्वं वा बोध्यमधिश्रयणाधःश्रयणपर्यन्तकाले लट्प्रयोगात् । तच्च क्रियान्वयि

---

[454] **वैयाकरणभूषणसारस्य लकारार्थनिर्णये का.२२ , २३ ।**

क्रियाभेदाय कालस्तु इत्युक्तेः आत्मास्ति पर्वतास्तिष्ठन्तीत्यादौ तु तत्तत् कालिकक्रियाणामनित्यतया तद्विशिष्टे सत्तादौ वर्तमानादिकालान्वयः ।

उक्तञ्च भाष्ये इह भूतभविष्यद्वर्तमानानां राज्ञां क्रियान्तिष्ठतेरधिकरणमिति । क्रियास्तत्तत्कालसम्बन्धरूपास्तिष्ठतेः फलरूपसत्तायाः अधिकरणमित्यर्थः ।

हरिणाप्युक्तं -

**" परतो भिद्यते सर्वमात्मा तु न विकम्पते ।**

**पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते ॥ [455]" इति ।**

आत्मा स्वरूपं न विकल्प्यते इदमेतदात्मकं न वेति न सन्दिह्यते सन्देहाभावादेव भेदस्य सुदूरपराहतत्वात् स्वरूपान्न भिद्यते इति फलितार्थस्तस्मात् स्वरूपतो भेदाभावादेव पररूपेण कालक्रियास्वरूपेण पर्वतादिस्थितिर्भिद्यत इत्यर्थः ।

लिटोनद्यतनभूतत्वं परोक्ष्याञ्चार्थः तच्च क्रियान्वयि । अनद्यतनभूताधिकारे परोक्षे लिडितिसूत्रात् अनद्यनत्वञ्च प्रयोगाधिकरणदिनावृत्तित्वं भूतत्वञ्च वर्त्तमानध्वंसप्रतियोगित्वं परोक्ष्यन्तु साक्षात्करोमीत्यादिज्ञानाविषयत्वं यद्यपि पपाचेत्यादौ शाब्दबोधे नैतस्य भानमानुभविकं तथापि तद्योग्यक्रियादावेव लिटः सामर्थ्यं तेन साक्षात्कृतव्यापारे न लिट्प्रयोगः । उत्तमपुरुषे लिट्प्रयोगस्तु चित्तव्यासङ्गादिनेत्याकरे स्पष्टम् ।

लोटोनद्यतनभावित्वमित्यर्थः भविष्यदधिकारे अनद्यतने लुडिति सूत्रात् भावित्वञ्च वर्त्तमानप्रागभावप्रतियोगित्वं तेन मध्याह्नादौ भाविनि भवितेति न प्रातः प्रयोगः ।

---

[455] **भर्तृहरिवाक्यपदीये कालसमुद्देशे का. ८० ।**

लृटोभविष्यत्त्वमात्रमर्थः ‘ **लृट् शेषे च** [456]’ इति सूत्रात् तेन भविष्यतीत्यादौ भविष्यत्सामान्यार्थावगमः ।

लेटोविध्यादयोर्थाः लिङर्थे लेडितिसूत्रात् जोषिषदित्यादिप्रयोगे हि विध्यार्थावगमः ।

लोटः प्रार्थनादयोऽर्थाः लिङर्थान् विध्यादीनभिधाय ‘ **लोट् च** [457]’ इति सूत्रेण विध्याद्यर्थेष्वेव तस्य विधानात् तथा आशिषि लिङ्लोटौ प्रार्थनातिसर्गप्राप्तकालेषु कृत्याश्चेति सूत्राच्च आशीरादयोऽपि लोडर्था वेदितव्याः सुखं ते भवत्वित्यादौ अप्राप्तप्राप्तीच्छारूपाशीर्वादो धात्वर्थे विषयतयान्वेतीति बोध्यम् ।

लङोनद्यतनभूतत्वमर्थः भूताधिकारे अनद्यतने लङिति सूत्रात् तेन प्रातर्भूतवस्तुनि मध्याह्नादावभवदित्यादिर्न प्रयोगः ।

लिङो विध्यादयोऽर्थाः । विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङिति सूत्रात् तत्र प्रवृत्त्यनुकूलव्यापारो विधिः अनुकूलत्वञ्चात्र प्रवृत्तिजनकतावच्छेदककोटिप्रविष्टत्वेनैव ग्राह्यं तेनेष्टसाधनत्वमेव विधिरिति फलितम् प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्यैव हेतुत्वेन तत्कोटिप्रविष्टतया इष्टसाधनस्यापि तद्धेतुत्वोपगमात् प्रवर्त्तकत्वम् । विधिवाक्यस्य प्रवर्तकत्वन्तु तद्बोधकजनकत्वादिति ।

कृतिसाध्यताज्ञानस्य प्रवर्तकतया लिङर्थत्वापत्तावपि कृतिसाध्यतायाः प्रमाणान्तरगम्यतया वैदिकलिङा बोधयितुमशक्यत्वात् न तदर्थत्वम् । द्विष्टासाधनत्वज्ञानन्तु द्वेषाभावेनान्यथासिद्धतया न प्रवर्तकमिति द्विष्टासाधनत्वस्य न तथात्वम् । तथाहि उक्तं मण्डनमिश्रैः –

---

[456] **पाणिनीयाष्टाध्याय्यां ३.३.१३ ।**

[457] **पाणिनीयाष्टाध्याय्यां ८.१.५२ ।**

**“ पुंसो नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।**
**प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्त्तनाम् ॥** [458] ” इति ।

तेन समुद्रं न तरेदित्यादौ लक्षणयैव कृतिसाध्यत्वं परदारान्न गच्छेदित्यादौ च लक्षणयैव द्विष्टासाधनत्वं लिङोपस्थाप्यं नञा निषिध्यते इत्यवधेयम् । यजेते इत्यादौ च इष्टसाधनताश्रयो याग इति बोधः इष्टञ्चात्र तत्तत् कामादिपदसमभिव्याहारे कामनाविषय एव ग्राह्यस्तद् समभिव्याहारे तु विश्वजिन्यायेन स्वर्गादिफलं वेदे लोके तु यथायथमिष्टं फलं ग्राह्यमिति बोध्यम् ।

निमन्त्रणमावश्यकक्रियासु प्रवर्त्तनम् आमन्त्रणं पुनः कामचारानुज्ञा सा चान्यत्र प्रवृत्तस्य तत्प्रवृत्तिप्रतिवन्धेन स्वाभिलाषितविषये प्रवर्तना । अधीष्टं सत्कारप्रयोज्यप्रवृत्त्यनुकूलव्यापारः । अत्र च लिङः प्रवर्त्तनात्वेनैव सर्वत्र शक्तिस्तेन तथैव बोधः न तु शाब्दबोधे निमन्त्रणत्वादिरूपेण भानं मानाभावादनुभवाभावाच्च सूत्रे तु तेषां पृथग्ग्रहणं प्रवर्त्तनाया एव विषयभेदेन तथा व्यवहर्तव्यताया उपदेशार्थमिति बोध्यं यथोक्तं हरिणा –

**“ अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि ।**
**तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया ॥**
**न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा ।**
**विध्यादीनामुपादानं चतुर्णामादितः कृतम् ॥** [459]” इति ।

एवञ्च भुञ्जीत भवानित्यादौ इष्टसाधनं भवत्कर्तृकं भोजनमित्यादिरीत्या निमन्त्रणामन्त्रणादौ बोधः । संप्रश्नः ज्ञापनेच्छा ज्ञानञ्च प्रयोक्तृनिष्ठं तस्याश्च विषयतया धात्वर्थेऽन्वयः किं भोस्तर्कमधीयीथा इत्यादौ

---

[458] **विधिविवेकश्लोके ।**

[459] **भर्तृहर्युक्तिरियमिति नागेशेन प्रतिपादितं किन्तु मूले ग्रन्थे नोपलभ्यते ( भर्तृहरिवाक्यपदीये ) ।**

त्वत्कर्तृकतर्काध्ययनं मज्ज्ञानानुकूलव्यापारेच्छाविषय इति बोधः किं शब्दस्तु जिज्ञासाद्योतकः । प्रार्थनं स्वाभिलषितविषये प्रवर्त्तनं तच्च देहि याहीत्याद्यभिलापादिरूपं विषयतया च तस्य धात्वर्थेऽन्वयः अभिलापादेरपि अभिलप्यमानविषयत्व स्वीकारान्नायोग्यता । हेतुहेतुमतोर्लिङिति सूत्रविहितलिङो हेतुत्वं जन्यत्वञ्चार्थः तच्चोभयमपि क्रियान्वयि तेनोभयक्रियापदसमभिव्याहारे एव तत्प्रयोगः ज्ञानं चेद्भवेत् सुखं भवेदित्यादौ ज्ञानभवनं सुखभवनजनकं ज्ञानभवनजन्यं व सुखभवनमित्याकारकबोधः।

आशीर्लिङ् पुनराशीरर्थः आशीश्चोक्ता तस्याश्च विषयतया धात्वर्थेऽन्वयः आशीश्च प्रयोक्तृनिष्ठा बोध्या। तेन सुखं ते भूयादित्यादौ भवत् सम्बन्धिसुखकर्तृकभवनं मदिच्छाविशेषविषयः । भूताधिकारे लुङिति सूत्राच्च लुङो भूतसामानमर्थस्तेन प्रातर्भूते पूर्वदिनभूते च मध्याह्नादौ अभूदित्यदिप्रयोगः।

लृङो भूतत्वं भविष्यत्वं जन्यजनकत्वञ्चार्थः लिङ्निमित्ते लृङ् क्रियातिपत्तावितिसूत्रात् लिङ्निमित्तं हेतुहेतुमद्भावः तच्च लृङा द्योत्यधात्वर्थधात्वार्थानिष्पत्तावेवान्वेति एवञ्च लिङ्वत् लृङपि क्रियाद्वयप्रयोगे एव प्रयुज्यते अन्यथा हेतुतादिबोधनासम्भवात् । तथा च वह्निश्चेत् प्राज्वलिष्यदोदनमपक्ष्यदित्यादौ वह्न्याश्रयक प्रज्वलनानिष्पत्ति-प्रयोज्यः ओदनकर्मकपाका निष्पत्तिरिति बोधः। अत्र धातूनामेव तदनिष्पत्तौ लक्षणा लृङस्तु तत्तात्पर्य्यग्राहकत्वं तेन न क्रियामुख्यविशेष्यकत्व-हानिरित्यवधेयम् । लडादीनामेष्वर्थेषु शक्तिर्लक्षणा पुनस्तत्तदर्थेषु सुत्रवार्तिकाद्युक्तेष्विति बोध्यम्।

तथाहि लट् स्मे इत्यादिना शब्दविशेषयोगेन लडादीनां भूतत्ववाचकता क्वचिच्च प्रकरणादिवशात् लडादीनां वर्त्तमानसामीप्यादिवाचकता यथा कदा आगतः असि इति प्रश्ने अयमागच्छामीत्यादौ । क्वचिच्च

आशंसाविषयात्वेन लडादीनामपि वर्त्तमानभविष्यत्त्वादिवाचकत्वं यथा मामुपायंस्त रामेत्यादौ भवत्कर्तृकभाविमदुपयमनं मदिच्छाविषय इत्येवं बोधः । एवं स्मरणविषये लृटोऽतीतत्वमर्थोऽश्रद्धामर्षविषये च लडादेः कालसामान्यवाचकत्वं बोध्यं तथा तात्पर्यवशात् लिङा सामर्थ्यहेतुकक्रियायोग्यताध्यवसायोऽर्थो बोध्यते तस्यापि विषयतयैव क्रियायामन्वयः ।

लिङो विषयत्वमर्थः इच्छामि त्वं गच्छेरित्यादौ त्वत्कर्तृकगमनं मदिच्छाविषयः कामप्रवेदन इतिविहितलिङस्तु इच्छाविषयत्वेन वाक्यप्रतिपाद्यत्वमर्थस्तेन कामो मे त्वं हरिं नमेरित्यादौ हरिकर्मकत्वत्कर्तृकनमनं मदिच्छाविषयत्वेन कामो मे इतिवाक्यप्रतिपाद्य इति बोधः ।

# तृतीयोऽध्याय:

# तृतीयोऽध्यायः

## नामार्थविचारः

**“ निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः ।**

**यत् प्रातिपदिकं प्रोक्तं तन्नाम्नो अतिरिच्यते ॥ [460]”**

अतः प्रातिपदिकमेव हि नाम । कातन्त्र्यमतेषु लिङ्गमस्य पार्यायभूतम् । नामविषये यास्काचार्येण उक्तं – **“ सत्त्वप्रधानानि नामानि[461] ”** इति । तत्र दुर्गाचार्येण लिखितं – **“ लिङ्गसंख्ययोरत्र सद्भाव इति सत्त्वम् ”[462]** इति । नामविषये अन्याचार्यैरुक्तम् –

**“ शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते ।**

**तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥ ”**

नामविभक्त्योरर्थसम्बन्धविषये तैरुक्तम् –

**“ अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः ।**

**तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥**

**निर्देशः कर्म करणं प्रदानमपकर्षणम् ।**

**स्वाम्यर्थोऽथाधिकरणं विभक्त्यर्थाः प्रकीर्त्तिताः ॥[463] ” इति ।**

मुग्धबोधव्याकरणे नामार्थविषये उक्तम् –

**“ स्वार्थो द्रव्यञ्च लिङ्गं च संख्या कर्मादिरेग्व च ।**

**अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः ॥ [464]” इति ।**

**शब्दशक्तिप्रकाशिकायामपि उक्तम् -**

---

[460] शब्दशक्तिप्रकाशिकायां सार्थकशब्दप्रकरणे सं १४ , पृ. १५०, सं.कलेज्- १ खण्डे

[461] निरुक्तवृत्तौ पृ.१२ ।

[462] निरुक्तवृत्तौ पृ.१२ ।

[463] निरुक्तवृत्तौ पृ.१३ ।

[464] मुग्धबोधव्याकरणे तर्कवागीशटीकायां पृ. ३८३ ।

**" येन स्वीयपदार्थस्य मुख्यतः प्रतिपादने ।**

**सोत्तरप्रथमापेक्षया तन्नाम स्यात्तदर्थकम् ॥ [465]" इति ।**

नामार्थविषये सन्ति विप्रतिपत्तयः । केचित् जातिरेव नामार्थः केचिच्च जातिव्यक्तिश्चेति द्विकं प्रातिपदिकार्थः , अन्ये तु जाति व्यक्ति लिङ्गं चेति त्रिकं प्रातिपदिकार्थः , प्रवृत्तिनिमित्तव्यक्तिलिङ्गसंख्या चेति चतुष्कं प्रातिपदिकार्थः। कातन्त्र्ये उक्तम् -

**" शब्दैरेभिः प्रतीयन्ते जातिद्रव्यगुणक्रियाः ।**

**चातुर्विध्यादमूषां तु शब्द उक्तश्चतुर्विधः ॥ [466]" इति ।**

परन्तु दुर्गासिंहेन अस्य क्रमभङ्गः **" जातिक्रियागुणद्रव्य "** इति कृतः । तत्र काव्यादर्शे दीपकचक्रे ल्खितमस्ति –

**" जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना ।**

**सर्ववाक्योपकारश्चेत् तदाहुर्दीपकं यथा ॥** [467]" इति ।

वेलभेलकारेणोक्तं – **" If ( an expression ) standing in one place and denoting either genus or activity or quality or individual can ( syntactically ) serve a number of sentence , that is called " ILLUMINATOR "**

एतद्दृष्ट्वा कौमारसम्प्रदाये प्रसिद्धमस्ति –

**" जातिक्रियागुणद्रव्यैः स्वभावाख्यामीदृशम् ।**

**दण्डिनो मतमाश्रित्य दुर्गेणापीत्युदाहृतम् ॥** [468]" इति ।

---

[465] **शब्दशक्तिप्रकाशिकायां नामनिरूपणे सं १५ , पृ.१५४ ।**

[466] **कातन्त्र्ये ।**

[467] **काव्यादर्शे ।**

[468] **कौमारसम्प्रदाये ।**

प्रवृत्तिनिमित्तव्यक्तिलिङ्गसंख्याकारकञ्चेति पञ्चकं प्रातिपदिकार्थः इति स्वीकुर्वन्ति । इदमेव विचारभेदं मनसि निधाय अभिहितः कौण्डभट्टैः –

**" एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।**

**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥**[469]" इति ।

एकम् जातिः , लाघवेन तस्या एव वाच्यत्वौचित्यात् , अनेकव्यक्तीनां वाच्यत्वे गौरवात् ।

न च व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः , एवं हि एकस्यामेव व्यक्तौ शक्त्यभ्युपगमे , व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम् , जात्या तु सहाश्रयत्वमेव संसर्ग इति लाघवम् ।

**➢प्रभाटीकाकारमतम्**

सुपां प्रातिपदिकप्रकृतिकत्वात् प्रत्ययेन प्रकृतिस्मरणात् प्रसङ्गसङ्गत्या नामार्थ निरूपयति नामार्थमिति । एकशब्दस्य एकत्वगुणविशिष्टार्थकतया तस्य चानियतत्वादाह एकं जातिरिति । तेनाकाशत्वाभावत्वादीनां जातित्वभावेऽपि न क्षतिः । प्रवृत्तिनिमित्तत्वञ्च – " **वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारतावत्त्वरूपम्** [470]" इति । घटत्वरूपे घटशब्दस्य प्रवृत्तिनिमित्ते वाच्यत्वस्य , वाच्यो यो घटस्तद्वृत्तित्वस्य , समवायेन घटत्वविशिष्टघटोपस्थितौ उपस्थितीयप्रकारतावत्त्वस्य च सत्त्वेन लक्षणसमन्वय इति नैयायिकाः ।

नन्वेवमपि घटशब्देन पुंस्त्वेन पुंस्त्वोपस्थितौ पुंस्त्वत्वेऽतिव्याप्तिरिति चेन्न , प्रातिपदिकविशिष्टत्वं प्रवृत्तिनिमित्तत्वमिति परिष्कारेणादोषात् ।

---

[469] **वैयाकणभूषणसारे नामार्थनिर्णये का.सं.२५ ।**

[470] **प्रभाटीकायाम् ।**

वैशिष्ट्यञ्च स्ववाच्यत्वस्ववाच्यवृत्तिस्वजन्यशब्दबोधीयमुख्यविशेष्यतानिरूपितप्रकारताश्रयत्वैतत्त्रितयसम्बन्धेन । निरूपितत्वञ्च साक्षात्परम्परासाधारणम् । पुंस्त्वत्वे तृतीयसम्बन्धाभावान्नातिव्याप्तिः , **' पुंस्त्वविशिष्टो घटो '** इत्येव बोधात् । यद्यपि जातेर्नार्थत्वे **' जात्याख्यायाम्** [471]**'** इति सूत्रम् , सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् ' इति भाष्यञ्च मानमस्ति तथापि पराभिमतां युक्तिमाह – लाघवेनेति । लाघवस्य गौरवसापेक्षत्वादाह – गौरवादिति अनन्तव्यक्तिषु शक्तिकल्पने , जातौ शक्तेः शक्यतावच्छेदकत्वस्य च कल्पनागौरवादिति भावः । न च जातिशक्तिवादेऽपि गोत्वस्य शक्यत्वे तन्निष्ठशक्यतावच्छेदकं गोत्वत्वं वाच्यम् । गोत्वत्वञ्च ' गवेतरासमवेतत्वे सति सकलगोसमवेतत्वरूपम् ।

तथा च तस्य व्यक्त्याद्यनेकपदार्थघटिततया अतिगौरवमिति वाच्यम् , तादात्म्येन गोत्वरूपाया जातेरेव शक्यतावच्छेदकत्वात् शब्दार्थयोस्तादात्म्याङ्गीकारे शब्दगतजातेर्गोतत्वस्याखण्डधर्मरूपत्वस्वीकारेण तस्यैवावच्छेदकत्वे गौरावाभावाच्च । किञ्च जातेः शक्यत्वे शक्तिनिरूपिकाया जातेरैक्येन शक्तेरेकत्वम् ।

ननु व्यक्तेः शक्यत्वेऽपि एकव्यक्तिनिरूपितैव शक्तिरस्तु । तथात्वेऽपि शक्तिनिरूपिकाया व्यक्तेरैक्येनैकेव शक्तिः सिद्ध्येदित्याह नचेति । शक्तिनिरूपिकायाः जातेः , प्रत्येकं व्याक्तेश्चैकत्वाद् विनिगमनाविरहात् अर्थात् एकतरपक्षसाधिका युक्तिर्विनिगमना तस्या विरहात् अभावाद् व्यक्तिरपि वाच्या स्यादिति भावः ।

ननु नात्र विनिगमनाविरहः जातिशक्तिसाधकलाघवरूपविनिगमनायाः सत्त्वादित्याह एवं हीति यत्किञ्चिदेकव्यक्तिनिरूपितशक्तौ स्वीकृतायामपि

---

[471] **पाणिनीयाष्टाध्याय्यां १.२.५८ ।**

व्यक्त्यन्तरस्य शाब्दबोधविषयोपपत्तये लक्षणा स्वीकार्या । जातेः शक्यत्वेऽपि ‘ **गामानय** ’ इत्यादिव्यवहारस्य व्यक्तिविषयकतया व्यक्तिबोधाय लक्षणा स्वीकार्या इति लक्षणास्वीकारसाम्येऽपि जातिशक्तिवादे व्यक्तिबोधाय स्वा ( जाति ) श्रयत्वरूपः शक्यसम्बन्धः । व्यक्तिशक्तिवादे स्व ( व्यक्ति ) समवेता ( जाति ) श्रयत्वरूपः शक्यसम्बन्धः । ‘ **शक्यसम्बन्ध एव लक्षणा** ’ इति व्यक्तिशक्तिवादिनो लक्षणास्वरूपे गौरवम् , जातिशक्तिवादिनश्च लक्षणास्वरूपे लाघवरूपं विनिगमकमस्तीति भावः । ‘ **शक्यसम्बन्धमूलिका लक्षणा** ’ ‘ **न तु शक्यसम्बन्धरूपा** ’ इति मतेऽपि लक्षणाप्रयोजकसम्बन्धे लाघवं जातेः शक्यत्वे बोध्यम् ।

## ➢कौण्डभट्टमतम्

किञ्चैवं विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्यायाज्जातिरेव वाच्येति युक्तम् , व्यक्तिबोधस्तु लक्षणया । एवञ्च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति ।

यद्वा केवलव्यक्तिरेव एकशब्दार्थः , केवलव्यक्तिपक्षे एवाणग्रहणस्य , एकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्धत्वात् । युक्तञ्चैतत् – व्यवहारेण व्यक्तावेव तद्ग्रहणात् । सम्बन्धितावच्छेदकस्य ( सम्बन्धितावच्छेदिकायाः ) जातैरैक्याच्छक्तिरप्येकैवेति न गौरवमपि ।

न चैवं घटत्वमपि वाच्यं स्यात् , शक्यतावच्छेदकत्वात् , तथा च ‘ **नागृहीतविशेषण** ’ न्यायात् तदेव वाच्यमस्त्विति शङ्क्यम् , अकारणत्वेऽपि कारणतावच्छेदकत्ववत् , अलक्ष्येऽपि लक्ष्यतावच्छेदकत्व-वत्तथात्रापि सम्भवात् । उक्तञ्च –

**" आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।**

**शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ॥** [472]" इति ।

वस्तुतस्तु **" न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थः "** इति भाष्याद्विशिष्टं वाच्यम्[473] ।

एकमित्यस्य चायमभिप्रायः – शक्तिज्ञाने च विषयतावच्छेदिका जातिरेकैव । तथा च घटविशिष्टबोधे घटत्वांशे अन्याप्रकारकघटत्वशक्ति-ज्ञानत्वेन हेतुनेति कार्यकारणभाव इत्यादि प्रपञ्चितं भूषणे ।

## ➢प्रभाटीकाकारमतम्

नन्वेवम् ' **एकं नामार्थः** ' इति पक्षो विरुद्ध्येतात आह – एकमित्यस्य चेति – कारणदले एकस्या जातेरेव निवेशो न तु व्यक्तेः । तथाहि – ' **घटत्वविशिष्टघटविषयकबोधं प्रति घटत्वविषयकशक्तिज्ञानं कारणम्** ' इति घटत्वशक्तिज्ञानत्वेन कारणता , लाघवात् ।

न तु घटत्वविशिष्टशक्तिज्ञानत्वेन कारणता । तथा सति शक्तिज्ञाननिष्ठकारणताया अवच्छेदकत्वं वैशिष्ट्ये घटे च कल्पितं स्यात् , तादृशज्ञाने उभयोः प्रकारीभूतत्वात् । घटत्वशक्तिज्ञानत्वेन कारणत्वे तु घटत्वस्यैव ज्ञाने प्रकारतया तत्रैव कारणतावच्छेदकत्वं कल्प्यते इति ' **एकम्** ' इतिपक्षस्य एकं घटत्वादिकमन्तर्भाव्य कार्यकारणभाव इत्येवमभिप्रायस्तदाह – शक्तिज्ञाने चेति । विषयतयेति विषयतानिरूपकत्वसम्बन्धेन , प्रकारितासम्बन्धेन वा शक्तिज्ञाने प्रकारीभूता घटत्वादिजातिरेव शक्तिज्ञाननिष्ठकारणतावच्छेदिका , नतु वैशिष्ट्यं घटश्चेति भावः । एवञ्च ' **एकम्** ' इत्यस्य केवला जातिरेव

---

[472] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२०५ , चौ.सं.प्र ।**

[473] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२०८ , चौ.सं. प्र ।**

नामार्थस्तदोक्तकार्यकारणभावः । यदा तु ‘ **एकम्** ’ इत्यस्य केवलव्यक्तिरेवार्थस्तदा घटत्वविशिष्टघटबोधं प्रति केवलघटशक्तिज्ञानं कारणम् । अत्रापि एकं व्यक्तिरूपं कारणतावच्छेदकमिति न विरोधः ।

यत्तु इतिमतं न युक्तम् , जात्याश्रयत्वेनानुगमे द्रव्यत्वजात्याश्रयत्वेनाप्युनुगत्वापत्तौ घटादिपदादपि द्रव्यत्वेन बोधापत्तेः । तत्तत्पदज्ञानत्वेन हेतुता तु न , पर्यायान्तरादपि तादृशबोधस्यावश्यक-त्वात्तत्पदज्ञानाभाने बोधानापत्तेरिति तन्न , यत्किञ्चिज्जात्याश्रयत्वेनानुगमे उक्तदोषसत्त्वेऽपि गोत्वादिनानुगमे दोषाभावात् , तत्तत्पदज्ञानत्वेन हेतुत्वे दोषाभावाच्च । न च पर्यायान्तरादपि बोधनापत्तिः , कार्यैक्येऽनेककारणस्थले तत्तत्कार्णाव्यवहितोत्तरत्वस्य कार्यदले निवेशनादोषादिति पञ्चोलिनः । न च व्यक्तीनामानन्त्यादवच्छेदकैक्यानुपपत्तिः जात्यानुगतीकृतत्वेनैक्याक्षतेः ।

घटत्वविशिष्टघटस्य वाच्यत्वे चेत्यर्थः । उक्तकार्यकारणभावं दर्शयति – घटत्वविशिष्टेति । ‘ **घटत्वविशिष्टबोधे** ’ इत्येव पाठः प्रामाणिकः , ‘ **घटत्वप्रकारकविशिष्टबोधे** ’ इति पाठे प्रकारपदस्य वैयर्थ्यात् , विशिष्टपदेनैव तल्लाभात् । ‘ **घटत्वप्रकारकघटत्वविशिष्टबोधे** ’ इति पाठे प्रकारकान्तं व्यर्थम् । घटत्वांशेऽन्याप्रकारकेति – ‘ **घटो घटपदशक्यः** ’ इत्याकारकमेव घटत्वांशेऽन्याप्रकारकघटत्वशक्तिज्ञानम् ।

अयमाशयो घटत्वविशिष्टो घटो घटपदशक्यः इत्याकारकन्तु घटत्वांशेऽन्याप्रकारकं शक्तिज्ञानन्तु न युक्तम् , घटत्वपदस्य घटत्वावच्छिन्ने शक्तत्वात् । घटत्वांशेऽन्याप्रकारकञ्च घटत्वे यत्किञ्चिन्निष्ठप्रकारता-निरूपितविशेष्यतानाश्रयत्वरूपम् । घटत्वांशेऽन्याप्रकारत्वञ्च कार्यदले , कारणदले च निवेशनीयम् । तेन ‘ **घटत्वं घटपदशक्यम्** ’ ‘ **जातिर्घटपदशक्या** ’ इत्याकारकघटत्वशक्तिज्ञानान्न घटत्वविशिष्टघट-विषयको बोधः । उक्तशक्तिज्ञाने घटत्वे घटत्वत्वं प्रकारः , जातौ जातित्वं

प्रकार इत्यन्याप्रकारकघटत्वशक्तिज्ञानाभावान्न घटत्वविशिष्टघटविषयको बोधः। एवं घटो घटपदशक्य इत्याकारकशक्तिज्ञानान्न जातिमान् घटः , घटत्वत्वेन घटत्वविशिष्टो घट इति च बोधः , कार्यदले घटत्वे घटत्वत्वस्य जातित्वस्य च प्रकारीभूतत्वात् ।

## ➢नागेशमतम्

अत्र मीमांसकाःशब्दानां जातौ शक्तिर्लाघवात् व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात् । " **नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते** [474]" इति न्यायस्य विशेषणे शक्तिर्विशेष्ये लक्षणा इति तात्पर्यात् । किञ्चैकस्यां व्यक्तौ शक्त्युपदेशे व्यक्त्यन्तरे तद्बोधाप्रसङ्गात् । गामानयेत्यादावन्वयानुपपत्त्या तदाश्रयलक्षकत्वेन निर्वाहश्चेत्याहुः ।

## ➢किरणवलीकारमतम्

शब्दस्य वाचकत्वशक्तिर्जातौ व्यक्तौ वा स्यादिति प्राचीनो विवादः । तत्र जातिर्हि पदार्थस्यासाधारणो धर्मः , व्यक्तिषु द्रव्यविशेष एव । कथ्यते हि पुराकाले वाजप्यायनो नामाचार्यो जातौ शक्तिं मन्यते स्म । उक्तं च महाभाष्ये – " **आकृत्यभिधानाद्वैकं विभक्तौ वाजाप्यायनः** [475]" इति । तद्वीपरीतं संग्रहकृद् व्याडिस्तु व्यक्तावेव । तन्मते शब्दो हि द्रव्यस्य वाचकः । उक्तं यथा महाभाष्ये – " **द्रव्याभिधानं व्याडिः** " इति । भगवान् पाणिनिस्तूभयमेव मन्यते स्म इति तदीयाभ्याम् " **जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्** [476]" " **सरूपाणामेकशेष एकविभक्तौ** [477]"

---

[474] **परमलघुमञ्जूषायां नामार्थविचारे १७२ , पृ. २९१ , चौ.सु.प्र।**

[475] **पतञ्जलिमहाभाष्ये १.२.६४।**

[476] **पाणिनीयाष्टाध्याय्यां १.२.५८।**

[477] **पाणिनीयाष्टाध्याय्यां १.२ ६४।**

सूत्राभ्यां ज्ञायते । तत्राद्येन जातावपरेण व्यक्तौ शक्तिः स्वीकृता । वार्त्तिककृत्कात्यायनोऽपि " **आकृतिग्रहणात्सिद्धम्** [478]" " **सवर्णेऽणग्रहणमपरिभाष्यमाकृतिग्रहणाद-नन्यत्वम्** [479]" इत्यादिवचनैर्जातौ रूपसामान्याद्वा सिद्धमित्यादिवचनैर्व्यक्तावपि शक्तिं मन्यते । महाभाष्यकृदपि क्वचिद् गोशब्देन जातेः क्वचित्तु व्यक्तेरपि गोत्वं मन्यते । उक्तं यथा महाभाष्ये – " **एवं हि कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति अस्त्यत्र काञ्चिद् गां पश्यसीति । स पश्यति चायं गाः पृच्छति च – काञ्चिदत्र गां पश्यसीति । नूनमस्य द्रव्यं विवक्षितमिति तद्यदा द्रव्याभिधानं तदा बहुवचनं भविष्यति , यदा सामान्याभिधानं तदैकवचनं भविष्यति** [480]" इति । तत्र मीमांसकाः हि जातिशक्तिवादिनः । व्यक्तयो ह्यनन्तास्तत्र शक्तिस्वीकारे शब्देष्वनन्तवाचकताशक्तिः कल्पनीया भवति । तद्वीपरीतं जातिस्त्वेकैव , तेन तत्र शक्तिस्वीकारे एकयैव शक्त्या निर्वाहाद् लाघवदृष्ट्या जातौ शक्तिः स्वीकार्येति तेषां मतम् । तथा च एकाव्यक्तिविषयकशक्त्या अन्यव्यक्तिबोधस्वीकारे गोव्यक्तिविषयकशक्त्या महिषव्यक्तिविषयक-बोधापत्त्या व्यभिचारदोषश्च । तन्निरासाय शब्दाद्धि यद्व्यक्तिविषयक-शक्तिज्ञानं ततो बोधोऽपि तद्व्यक्तिविषयक एव । तेन सर्वासामेव व्यक्तीनां बोधाय भवत्यनन्तशक्तिकल्पना आवश्यकी । जातेरेकत्वाज्जातौ शक्तिस्वीकारे त्वेकयैव शक्त्या निर्वाहाल्लाघवम् । जातेर्ज्ञानमन्तरा व्यक्तेर्ज्ञानं न भवति तद्विना च न व्यवहारः इति उभयत्र शक्तिः स्वीकार्येति चेन्न , विशेष्यज्ञानं प्रति विशेषणज्ञानस्यैव हेतुत्वमतः प्राधान्याद्विशेषणे एव

---

[478] **कात्यायनैः ।**

[479] **कात्यायनैः ।**

[480] **पतञ्जलिमहाभाष्ये ।**

शब्दशक्तिर्न तु विशेष्ये । अत्र विशेषणं जातिव्यक्तिस्तु विशेष्यः । न हि विशेषणज्ञानं विना विशेष्यज्ञानं सम्भवतीति प्रथमं विशेषणभूतजातेरेव बोधः । ततश्च विशेष्ये लक्षणा । यतो हि विशेषणे क्षीणशक्तिरभिधा विशेष्यं न गच्छति तेन तत्र लक्षणैव । अभिधया जातेरुपस्थितिलक्षणया व्यक्तेरित्याशयः । अपरञ्च एकस्यां व्यक्तौ शक्तिस्वीकारे व्यक्त्यन्तरे तदभावेन कथं तस्य बोधः स्यात् । गामानय इत्यादौ जातौ शक्तिस्वीकारे जातेरुपस्थित्यसम्भवात्मकं निर्वाह इति चेन्न , वाक्ये तथान्वयासिद्ध्या स्वसिद्धयो जात्या स्वाश्रयभूतव्यक्तेराक्षेपात्तल्लक्षकत्वेन सर्वं सुस्थमिति । यथोक्तम् –

**“ आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः ।**
**आकृतेः प्रथमज्ञाने तस्या एवाभिधेयता ॥**
**व्यक्त्याकृत्योरभेदाच्च व्यवहारोपयोगिता ।**
**लिङ्गसङ्ख्यादिसम्बन्धः समानाधिकरण्यधीः ॥**
**सर्वं समञ्जसं ह्येतद् वस्त्वनेकान्तवादिनः ।**
**लक्षणा चाभ्युपेतव्या जातेस्तेनाभिधेयता ॥** [481]” इति ।

## ➢ पण्डितश्रीनित्यानन्दपन्तपर्वतीयमतम्

तत्तत्पदार्थसाधारणो धर्मो जातिरित्यर्थः । तेन अभावत्वाकाशात्वादीनां नित्यानेकसमवेतत्वरूपजातित्वाभावेऽपि न क्षतिः । जातेः शब्दशक्यत्वे मानन्तु “ **जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्** [482]” इति सूत्रे “ **सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् सिद्धम्** [483]” इति वार्तिकम् ।

---

[481] **किरणवल्यां तन्त्रवार्तिके आकृत्यधिकरणे ।**

[482] **पाणिनीयाष्टाध्याय्यां १.२.५८ ।**

[483] **कात्यायनवार्तिकम् ।**

“ **आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायणः** [484]” इति सरूपसूत्रस्थं भाष्यञ्चेति भावः । युक्तमप्याह लाघवादिति । एकस्याः एव शक्तेरेकस्या एव सम्भवादिति भावः । ननु शक्तिग्राहकशिरोमणिना व्यवहारेन व्यक्तावेव तत्परिच्छेदात्कथं जातौ तत्सिद्धिरत आह व्यक्तिनामनन्त्येनेति । पूर्वव्यवहारेण व्यक्तौ शक्तिग्रहेऽप्यानन्त्यात् तावतीषु शक्तिग्रहासम्भवात्तत्तदा-श्रयभेदभिन्ननानाशक्तिकल्पने गौरवात्पश्चाज्जातावेव निर्धार्यते इति भावः ।

ननु “ **नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते** [485]” इति न्यायेन उभयत्र शक्तेः प्रतीयमानत्वात्कथं जातावेव शक्तिरित्यत आह विशेषणे इति ।

गामानयेत्यादाविति अत्रादिना “ **ब्राह्मणा न हन्तव्यः** [486]” इत्यादेः सङ्ग्रहो बोध्यः । एवञ्च सर्वत्र लक्षणयैव स्वाश्रयत्वसम्बन्धेन व्यक्तिभानसम्भवे तत्र शक्तिकल्पनं निष्फलमेव ।

## ➢शब्दार्थरत्ने तारानाथतर्कवाचस्पतिमतम्

नामत्वं नाम सुवुत्पत्तिनिमित्तशब्दत्वम् ङ्याप्प्रातिपदिकादित्यधिकारे सुपो विधानेन नाम्नां तन्निमित्तत्वावगतेः । अत्र ङ्यावन्तयोरपि नामत्वोपगमेन तयोः पृथक्ग्रहणं प्रयोजनान्तरार्थमित्याकरे स्पष्टम् । एवञ्च धातुभ्योऽपि सुवुत्पत्तिवारणाय सूत्रकारेण प्रातिपदिकसंज्ञा कृतेत्यवधेयम् । यथा – अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इतिनामसंज्ञाविधायकं सूत्रम् ।

तथा वाक्यस्यापि सिद्धान्ते अर्थवत्त्वेन तद्वारणाय कृत्तद्धितसमासाश्चेति नियमसूत्रमारब्धं सूत्रयोश्चैक्यवाक्यतयायमर्थो लभ्यते कृत्तद्धितभिन्न-प्रत्ययान्तान्यत्वे सति समासातिरिक्तसमाससदृशभिन्नत्वे सति

---

484 **पतञ्जलिमहाभाष्ये १.२.६४ ।**

485 **परमलघुमञ्जूषायां नामार्थविचारे १७२ , पृ. २९१ , चौ.सु.प्र ।**

486 **पतञ्जलिमहाभाष्ये १.२.६४ ।**

धातुप्रत्ययभिन्नार्थवच्छब्दत्वं प्रातिपदिकत्वमिति समाससदृशत्वञ्च स्वातन्त्र्येण प्रयोगार्हार्थवत्पूर्वापरावयवत्वं समासस्यापि प्रायशस्तथारूपत्वात्।

तथा च पुत्रकाम्या बहुगुडेत्यादिकृत्तद्धितादौ पुत्रगुडयोः प्रयोगार्हार्थवत्वेऽपि वहुकाम्ययोस्तथात्वाभावेन न तद्व्युदासः । अत्रार्थवदितिविशेषणेन तयोरर्थान्तरे प्रयोगार्हवृत्तिमत्त्वेऽपि न क्षतिः। एतदेव नामत्वलक्षणमित्यन्ये।

तानि च नामानि प्रक्रियादशायां चतुर्विधानि रूढ़लक्षकयौगिकयोगरूढ़भेदात् । तत्र रूढ़त्वं नामाखण्डशक्त्या अर्थबोधकत्वं यथा – गोघटादेः तत्र हि समुदायशक्त्यैव गोत्वाद्यवच्छिन्नस्य बोधनात्। लक्षकत्वं नाम प्रागुक्तलक्षणावृत्त्यर्थबोधकत्वं यथा – गङ्गापदादेः गङ्गातीरादेस्तत्र लक्षाणायैव बोधात् । यौगिकत्वं तु खण्डशक्त्या उपस्थापितार्थयोर्योगेनार्थबोधकत्वं यथा – पाचकादेः तत्र प्रकृतिप्रत्ययाभ्यां स्वावयवाभ्यामुपस्थापितयोः पाकतत्कर्त्तृयोगेन पाककर्त्तृरूपार्थबोधनात् एवं राजपुरुषादेरपि तत्रापि स्वावयवाभ्यां राजपुरुषशब्दाभ्यामुपस्थापितयोः राजसम्बन्धिपुरुषयोर्योगेन राजसम्बन्धिपुरुषबोधनात् । योगरूढ़त्वं च तथाभूतयोगेनार्थबोधकत्वे सति समुदायशक्त्या विशिष्टार्थबोधकत्वं यथा पङ्कजादेः । तत्र च पङ्कजनिकर्त्तृरूपयौगिकार्थस्य अवयवैरुपस्थापनात् समुदायेन च पद्मत्वावच्छिन्नस्योपस्थापनात् विशिष्टार्थबोधनादिति विवेकः। तत्र रूढ़्यादीनामवान्तरभेदाविस्तरभयान्न लिखिताः सिद्धान्ते कृत्तद्धितसमासादिवृत्तौ समुदायशक्तिस्वीकारेण रूढ़त्वं योगरूढत्वं वेत्याकरे द्रष्टव्यम्। रूढ़लक्षकयौगिकयोगरूढ़भेदात्त्रैविध्यमेव नाम्नामिति बोध्यम्।

तत्र नाम्नां जात्यादयोः वक्ष्यमाणा एकैकाः समुदिता वा सामान्यतोऽर्था वेदितव्याः । तथाहि उक्तं हरिणा–

**“ एकं द्विकं त्रिकञ्चैव चतुष्कं पञ्चकं तथा ।**
**नामार्था इति सर्व्वेऽमी पक्षाः शास्त्रे व्यवस्थिताः ॥** [487]” इति ।

तत्र एकादिपञ्चकपर्यन्ताः नामार्थाः मतभेदेन शास्त्रादौ व्यवस्थापिता इत्युक्तम् । तत्र अन्वयव्यतिरेकाभ्यां जातेः सर्वत्र सत्त्वात् तया च व्यक्त्याक्षेपेण तद्बोधसम्भवात् । जातिश्च सर्वसाधारणी वक्ष्यमाणलक्षणा बोध्या तेन न गगनादिशब्दानां तथात्वव्याघातः । अथवा व्यक्तीनामानन्त्यात् व्यभिचाराच्च तत्र शक्तिग्रहस्य दुःशक्यत्वेऽपि जातेरुपलक्षणतया तदनुगमसम्भवेन तत्र शक्तिग्रहस्य सुशक्यत्वात् जात्युपलक्षितव्यक्तिरेव नामार्थ इत्यप्येकनामार्थपक्षः । उक्तञ्च -

**“ आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।**
**शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ॥** [488]” इति ।

एकमनुगतं जात्यादिकं सुकरसम्बन्धः सुशक्यशक्तिग्रहः तत्र हेतूः न च व्यभिचरिष्यतीति व्यभिचाराभावादित्यर्थः । जातिविशिष्टा व्यक्तिरेव वा नामार्थः । अत्र पक्षे शक्यतया एकधर्मावच्छिन्नत्वादर्थैक्यमिति बोध्यम् । इत्येवं त्रिधा भेद एकपक्षस्य ।

कौण्डभट्टैरुक्तं- तदेतदभिप्रेत्याह ‘ **द्विकमिति**[489] ’ जातिव्यक्ती इत्यर्थः । पूर्वपक्षाद् बिरोधपरिहारः पूर्ववत् ।

---

[487] **वैयाकरणभूषणसारे नामार्थनिर्णये का. २५ ।**

[488] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२०५ ।**

[489] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२०९ ।**

## ➢प्रभाटीकाकारमतम्

प्रातिपदिकार्थ इति सूत्रे ‘ **प्रवृत्तिनिमित्तम् , तदाश्रयश्च प्रातिपदिकार्थः** ’ इति शेखरकाराः। जातिव्यक्तिश्च पृथक्पदार्थ इति भावः। ‘ **एकं नामार्थः** ’ इति पक्षादित्यर्थः। द्विकादिविषयकसर्वशक्तिज्ञानस्य जातिशक्तिज्ञानत्वेनैव कारणता लाघवादिति शाब्दबोधीयकारणतावच्छेदकं जातिरूपमेकमेवेति सर्वपक्षे विरोधपरिहार इत्याह पूर्ववदिति।

## ➢नागेशमतम्

तन्न। गोत्वमस्तीत्यर्थेऽन्वयानुपपत्त्यभावेन गौरस्तीति प्रयोगे व्यक्तिभानानापपत्तेः। व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजातेरुपलक्षणत्वेन तदैक्येन च तादृशजात्युपलक्षितव्यक्तौ शक्तिस्वीकारेणानन्तशक्तिकल्पनाविरहेणागौरवात्। लक्ष्यतावच्छेदकतीरत्वादिवच्छक्यतावच्छेदकस्या अवाच्यत्वे दोषाभावात्। “ **नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते** [490]” इति न्यायस्य विशेषणविशिष्टविशेष्यबोधे तात्पर्येऽपि त्वदुक्ततात्पर्ये मानाभावात्। जातेरुपलक्षकत्वेन तदाश्रयसकलव्यक्तिबोधेन व्यक्त्यन्तरबोधाप्रसङ्ग-भङ्गाच्च। तदाह –

**“ आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।**
**शब्दः सुकरसम्भवो न च व्यभिचरिष्यति॥ [491]” इति।**

युक्तं ह्येतत् –

**“ शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ [492]”**

---

[490] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२०५।**

[491] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२०५।**

[492] **न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे पृ.२६६।**

इत्येतेषु शक्तिग्राहकशिरोमणिव्यवहारो व्यक्तावेव शक्तिं ग्राहयति । गवादिपदेन लोके व्यक्तेरेव बोधात् ।

वस्तुतस्तु न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थ इति सरूपसूत्रभाष्याद् विशिष्टमेव वाच्यं , तथैवानुभवात् । अनुभवसिद्धस्यापलापानर्हत्वाच्च ।

## ➢किरणवलीकारमतम्

मीमांसकसम्मतं जातिशक्तिवादं प्रदूष्य व्यक्तिशक्तिवादमतं प्रतिपादनाय तदित्यादिना । तज्जातौ शक्तिरिति मतम् । अन्वयस्य अनुपपत्तिरसिद्धिस्तस्या अभावेन गौरस्ति । व्यक्तेः द्रव्यविशेषस्य भानस्यावभासनस्य अनापत्तेरप्राप्तेः । गौरस्तीत्यादौ गोत्वमस्तीत्यर्थे-ऽन्वयलाभाल्लक्षणावृत्त्यविषयत्वेन न हि तया व्यक्तेर्बोध इति । व्यक्तीनामपरिमितत्वे शक्यताया अवच्छेदिका या जातिस्तस्याः । तदैक्येन जात्यैक्येन अपि च तादृश्या तथाविधाया जात्या उपलक्षितायां व्यक्तौ । शक्तिसमर्थनेन अपरिमितशक्तिपरिकल्पनाभावेन गौरवाभावात् अनन्त एव व्यक्त्यस्तथापि शक्यतावच्छेदिकाया जातेरुपलक्षणरूपेण तया सहैक्येन च जात्युपलक्षितव्यक्तौ शक्तिस्वीकारे न ह्यनन्तशक्तिकल्पनाप्रसङ्गो गौरवञ्च । न हि शक्यतावच्छेदकस्य । वाच्यत्वे दोषो लक्ष्यतावच्छेदकतीरत्वादिवत् । "**नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते**[493]" इति न्यायस्य तात्पर्यन्तु विशेषणविशिष्टविशेष्यबोधे एव न तु विशेषणे शक्तिर्विशिष्ये लक्षणेति । जात्युलक्षकतदाश्रयव्यक्तौ शक्तिस्वीकारे न च तया व्यक्त्यन्तर-बोधाप्रसङ्गः ।

अयमाशय वस्तुत एव न जातिर्व्यक्तिं विना स्पष्टीभवति , न च जातिं विना व्यक्तेरस्तित्वं सम्भवति । व्यक्तिर्हि जातेः शरीरं जातिर्हि

---

[493] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२०५ ।**

व्यक्तेरसाधारणः प्राणपदो धर्मः । एकं विना अपरस्य सत्त अभाज्जातिविशिष्टव्यक्तिर्व्यक्तिविशिष्टजातिर्वा पदार्थो न तु जातिरेव केवला न च व्यक्तिरेवेति।

### ➢पण्डितश्रीनित्यानन्दपन्तपर्वतीयमतम्

व्यक्तीनां नानात्वादपरिच्छेद्यत्वेऽपि , एकम् अनुगतजात्यादिधर्मम् , उपलक्षणम् अशक्यत्वेऽपि शक्यव्यावर्तकम् , अभ्युपगम्य गवाद्यात्मकः , सुकरसम्बन्धः सुग्राह्यागवादिनिष्ठवाच्यतासम्बन्धः । शक्तिग्रहाविषयव्यक्ति बोधयिष्यति कारिकार्थः । गोत्वादिसामान्यलक्षणया सर्वास्वेव व्यक्तिषु शक्त्यवधारणादिति भावः। एतदेवार्थं प्रपञ्चयति – शक्तिग्रहमिति।

पाचकः पक्ता इत्यादौ व्याकरणात् । ‘ **गोसदृशो गवयः** ’ इत्यादावुपमानात् । हरिशब्दस्य इन्द्रादौ , कोशात् , पिकशब्दस्य कोकिलादावाप्तवाक्यात् । प्रयोज्यप्रयोजकवृद्धव्यवहारात् गमनायेत्यादौ तटस्थबालकस्य गोशब्दादौ । “ **यदान्या औषधयो म्लायन्ते अथैते मोदैमानास्तिष्ठन्ति** ” इतिवाक्यशेषात् यवपदस्य दीर्घशूकपदार्थे । घटशब्दस्य कलशे शक्तिर्विवरणात्। ‘ **सहकारतरौ पिक रौति** ’ इत्यत्र प्रसिद्धसान्निध्यात्पिकशब्दस्य कोकिले शक्तिरिति निश्चयो बोध्यः।

प्रयोजकवृद्धेनोक्तो ‘ **गामानय** ’ इति यदा प्रयोज्यवृद्धो गामानयेति , बधानेत्युक्तो बध्नाति , एवं मुञ्चेत्युक्तस्ताम् मोचयति , तदा पार्श्वस्थबालको अवधारयति “ **सास्नादिमानयं भावो गोपदवाच्य** ” इति । एवमावापोद्वापाभ्यां सर्वत्र शक्तिग्रहः सुलभः । स च व्यवहारो व्यक्तिविषयक एवेति तस्मात्केवलव्यक्तिरेव शब्दस्य वाच्येति तात्पर्यम्।

यद्यपि “ **आकृतिपदार्थस्य द्रव्यं न पदार्थः , द्रव्यपदार्थकस्य चाकृतिर्न पदार्थः , इत्युभयोरुभयं पदार्थः** ” इति

भाष्याद्विशकलितयोरेवाकृतिव्यक्तयोः शक्तिग्रहविषयता लभ्यते , तथापि " **कस्यचित् किञ्चिद्गुणभूतं किञ्चित् प्रधानम्** " इत्युत्तरभाष्यपर्यालोचनया तत एव विशिष्टे शक्त्यवधारणात् तथोपादानमविरुद्धमित्यतः सिद्धान्तमाह – वस्तुतस्तिष्ठति । आकृतिः पदार्थो यस्येति बहुव्रीहिः । तेनात्र अन्यपदार्थः शब्दः । आकृतिवाचकस्य द्रव्यं नार्थ इति न , अपि तु सोऽपीति भाष्याशयः । तथा च न केवलायां जातौ व्यक्तौ वा शक्तिः , किन्तु विशिष्टे एवेति भावः ।

## ➢शब्दार्थरत्ने तारानाथतर्कवाचस्पतिमतम्

जातिव्यक्तिश्च पृथक् नामार्थः अत्रापि मतद्वयम् । जातिव्यक्त्योः पर्य्यायेणैव नामार्थता तेन विकल्पेन कदाचित् जातेरेव कदाचिच्च व्यक्तेर्बोध इत्येकं मतम् । तयोः समुच्चयेन बोधेऽपि तात्पर्यवशात् कदाचित् जातेः कदचिच्च व्यक्तेर्विशेषत्वमेकपदोपात्तत्वेन तथात्वौचित्यात् । तेन गौर्नित्या गौश्चलतीत्यादौ विनैव लक्षणां नित्यत्वान्वये जातेश्चलनान्वये च व्यक्तेर्विशेषत्वमुपपद्यते इत्यपरमतम् । उक्तञ्च भाट्टैः -

**" नियोगेन विकल्पेन द्वे वा सह समुच्चिते ।**

**सम्बन्धः समुदायो वा विशिष्टा वैकयेतरेति ॥[494]" इति ।**

अस्यायमर्थः नियोगेन जातिरेव तदुपलक्षितव्यक्तिरेवेति नियमेनैकैव नामार्थः । विकल्पेन द्वे वा पर्यायेण जातिव्यक्तोर्वा द्वे एव नामार्थौ । सह समुच्चिते मिलिते ते द्वे एव पृथक् शक्ये । सम्बन्धः जातिव्यक्तोर्विशिष्टबोधहेतुः संसर्गस्तत्समुदायो वा नामार्थस्ते च त्रय एव पृथक् शक्याः । एकया जात्या विशिष्टा इतरा व्यक्तिरेव नामार्थः । अयञ्च पक्षः एकनामार्थतापक्षेऽभिहितः अत्र च द्वे वा विकल्पेनेति पक्ष्यस्यैव

---

[494] **भाट्टैः ।**

व्याकरणे ग्राह्यता कौस्तुभादौ दर्शिता तेन सरूपैकशेषे व्यक्तिमात्रपक्षावलम्बनं जातावेकवचनमित्यादौ जातिमात्रार्थस्य ग्रहणमिति बोध्यम् ।

तत्र प्रथमो पक्षो मीमांसकानाम् । ते हि शब्दानां जातावेव शक्तिं स्वीकुर्वन्ति , व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात् । ननु –

**" शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥** [495]"

इति शक्तिग्राहकेषु प्रमाणेषु व्यवहार एव शिरोमणिः । व्यवहारेण च व्यक्तावेव संकेतग्रहो न तु जातौ । तथाहि – व्यवहारेण शक्तिग्रहप्रकार इत्थं बोद्धव्यः – " **गामानयेत्युत्तमबृद्धेन ( पित्रादिना )** " वाक्यप्रयोगे मध्यमबृद्धेन देशाद्देशान्तरं नीयमानं सास्नादिमन्तमर्थं दृष्ट्वा बालः अनेन मध्यमबृद्धेन अस्माद्वाक्यादेवंविधोऽर्थः प्रतिपन्नः इति तच्चेष्टयानुमिनोति । पश्चाच्च " **प्रत्यक्षानुमानार्थापत्ति** " इति प्रमाणत्रयेण उत्तमबृद्धमध्यमबृद्धयोः व्यवहारेण च शब्दानां तत्तदर्थेषु सम्बन्धावधारति बालः । उक्तञ्च काव्यप्रकाशे अन्विताभिधानवादीनां मतममुपपादयता मम्मटेन -

**" शब्दबृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।**
**श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥**
**अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम् ।**
**आर्थापत्त्यावबोधेत सम्बन्धं त्रिप्रमाणकम् ॥** [496]" इति ।

एवञ्च सर्वसम्मतसंकेतग्रहप्रकारेण व्यक्तावेव संकेताग्रहो न तु जातौ , तर्हि कथं जातेः पदार्थत्वंस्वीक्रियत इति चेत् ? अत्रोच्यते पूर्वं व्यवहारेण

---

[495] **न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे पृ.२६६ ।**

[496] **काव्यप्रकाशपञ्चमोल्लासे पृ.२२२ ।**

व्यक्तौ शक्तिग्रहे अपि आनन्त्यात् , तत्तद्व्यक्तिषु शक्तिग्रहासम्भवात् तत्तदाश्रयभेदभिन्ननानाशक्तिकल्पने गौरवात् ,पश्चात् जातावेव निश्चीयते । एकव्यक्तिविषयकशक्तिज्ञानादपरव्यक्ति-विषयकशब्दबोधस्वीकारे तु ' **अश्वव्यक्तिविषयकशक्तिज्ञानाद् गोव्यक्तिविषयक-बोधापत्त्या तद्व्यक्तिविषकबोधं प्रति तद्व्यक्तिविषयकशक्तिज्ञानस्य** ' हेतुतया अवश्यमेव कल्पनीयतया , एकव्यक्तिविषयकज्ञानादपरव्यक्ति-विषयकबोधानुदयापत्त्या सकलव्यक्तिभानार्थं सकलव्यक्तिषु शक्तिकल्पनायां गौरवस्य स्पष्टतया , जातावेव शक्तिकल्पनाया औचित्यात् ।

न च जातौ शक्तिस्वीकारेऽपि , गोशब्दस्य गोत्वस्य शक्यत्वे शक्यतावच्छेदकं गोत्वम्, तच्च गवेतरासमवेतत्वे सति सकलगोसमवेतत्वरूपम् । तथा च जातिशक्तिवादेऽपि शक्यतावच्छेदकस्य व्यक्त्याद्यनेकपदार्थघटिततया अतिगौरवापत्तिरिति वाच्यम् , तत्पक्षे तादात्म्येन गोत्वजातिरेव शक्यतावच्छेदकत्वात् , तस्य च एकत्वेन गौरवाभावात् ।

किञ्चैकस्यां व्यक्तौ शब्दस्य शक्तिस्वीकारेऽपि , व्यक्त्यन्तरस्य वृत्तिज्ञानाधीनोपस्थित्यभावेन शाब्दबोधविषयतानुपपत्तिः । यतो हि " **घटपदात् समवायेन सम्बन्धिनः उपस्थितस्याकाशस्य शाब्दबोधे भानाभावाय तत्पदजन्यतद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति , तत्पदनिष्ठवृत्तिज्ञानाधीनतद्विषयकोपस्थितिः कारणम्** " इति कार्यकारणभावस्य सर्वैरेव स्वीकृतत्वात् ।

एवञ्च यथा वृत्तिज्ञानाधीनोपस्थित्यभावात् घटपदेनाकाशस्य बोधो न भवति तथैव व्यक्त्यन्तरस्य लक्षणां विना वृत्तिज्ञानाधीनोपस्थित्यभावात् शाब्दबोधे भानं न स्यात् । लक्षणायां च व्यक्तिशक्तिवादे

स्वसमवेताश्रयत्वसम्बन्धः , जातौ शक्तिस्वीकारे व्यक्तौ लक्षणायां सहाश्रयत्वसम्बन्धः ' इति जातिशक्तिवादे शक्यसम्बन्धरूप[497] लक्षणायामपि लाघवम् ।

शक्यसम्बन्धमूलिका लक्षणा , न तु शक्यसम्बन्धरूपेति मतेऽपि जातेः शक्यत्वे लक्षणाप्रयोजकसम्बन्धे लाघवम् ।

ननु व्यक्तौ शक्तिस्वीकारेऽपि न कश्चन दोषः , यतोहि –

एकव्यक्ति निरूपिता शक्तिरितिपक्षे , एतद् व्यक्तिनिरूपिता शक्तिः व्यक्त्यन्तरनिरूपिता वेत्यत्र एकतरपक्षसाधिकायुक्तेरभावात् , जात्याश्रयत्वेनानुगतीकृतासु सर्वासु व्यक्तिषु शक्तिः इति न व्यक्त्यन्तरे लक्षणायां गौरवम् , लक्षणाया एव निष्प्रयोजनत्वात् , नाप्यानन्त्य दोष इति चेत् ?

उच्यते जात्या अनुगतीकृतासु व्यक्तिषु शक्तिरिति स्वीकारे , जातिविशिष्टव्यक्तौ शक्तिः सिद्ध्यति , तथाहि विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात् , उपजीव्यत्वेन जातावेव शक्तिरुचिता । " **नागृहीतविशेषणा बुद्धिः विशेष्यमवगाहते** " इति " **विशेष्यं नाभिधागच्छेत् क्षीणशक्तिविशेषणे** " इति न्यायात् ।

ननु जातिमात्रे शक्तिस्वीकारे व्यक्तिभानं न सम्भवति । " **पीनो देवदत्तः दिवा न भुङ्क्ते** " इत्यत्र रात्रिभोजनवत् , जात्या व्यक्तेराक्षेपश्चेत्तदा , ' **गां पश्यति** ' इत्यादौ गोव्यक्तेः

---

497 " **लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तिः । " – न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे पृ.२८५ ।**
**लक्षणायाः शक्यसम्बन्धेन तस्या अपि अभिधापुच्छभूतत्वात् " । - वामिनीटीकायां काव्यप्रकाशपञ्चमोल्लासे ।**

प्रत्ययार्थकर्मत्वान्वयानुपपत्तिः , ‘ **प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्** ’ इति नियमात् । यथा कथञ्चित् उपस्थिते प्रकृत्यर्थे प्रत्ययार्थान्वयः स्वीक्रियते चेत्तदा – ‘ **घटं पश्यति** ’ इत्यादौ शब्दाश्रयतयोपस्थिताकाशेऽपि दर्शनकर्मत्वान्वयापत्तिरिति चेत् ? अत्रोच्यते – लक्षणयैव व्यक्तेर्बोधः । व्यक्तेर्बोधो लक्षणया भवतीति प्रतिपादितं भूषणेऽपि । उक्तञ्च तत्र कौण्डभट्टैः- “ **व्यक्तिबोधस्तु लक्षणया । एवञ्च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते** [498]” इति । सापि लक्षणा निरूढा एव । अतः कुत्रचिदन्वयानुपपत्त्यभावेऽपि न क्षतिः , तत्र तस्याः अनपेक्षणात् । उक्तञ्च – “ **एवञ्च गौरस्ति इत्यादौ अन्वयानुपपत्त्यभावेऽपि न दोषः , निरूढलक्षणायां तदनपेक्षणात्** [499]” इति ।

वस्तुतस्तु निरूढलक्षणायामन्वयानुपपत्तिः न अपेक्ष्यते इत्यत्र विनिगमनाविरहः । निरूढलक्षणायामपि शक्यार्थबाधस्यावश्यकत्वं प्रतिपादितं मञ्जूषायाम् । तत्र निरूढलक्षणास्वरूपं प्रतिपादयता नागेशेन भणितम्- “ **असति प्रयोजने शक्यार्थबाधप्रतिसन्धानपूर्वकं तत्सम्बन्ध्यपरार्थबोधे निरूढलक्षणा इति व्यवहारः** [500]” इति । स च शक्यार्थबाधः क्वचिदन्वयानुपपत्तिरूपः क्वचिच्च तात्पर्यानुपपत्तिरूपः । तत्र यद्यपि तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वं स्वीकुर्वन्ति नैयायिका[501] , किन्तु वेदस्यापौरुषेयत्वपक्षे , ‘ **आयुर्वै धृतम्** ’ इत्यादौ कस्यचिदपि वक्तुरभावात् , तदिच्छारूप तात्पर्यस्याप्यभावत्वे , तात्पर्यानुपपत्त्यभावः सुतरां सिद्ध्यति ,

---

[498] **वैयाकरणभूषणसारनामार्थनिर्णये पृ.२३० ।**

[499] **वैयाकरणभूषणसारनामार्थनिर्णये प्रभाटीकायां पृ.२३० ।**

[500] **वैयाकरणसिद्धान्तलघुमञ्जूषायां लक्षणनिरूपणे पृ.१०१ ।**

[501] **लक्षणाशक्यसम्बन्धस्तात्पर्यानुपपत्तिः – न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे पृ.२८५ ।**

अतः उक्तस्थले लक्षणासिद्ध्यर्थं लक्षणायामन्वयानुपपत्तेरपि बीजत्वमवश्यमेव स्वीकार्यम् । उक्तञ्च – **“ वेदस्यापौरुषेयत्वे यजमानः प्रस्तरः**[502] **” ‘ आयुर्वै धृतम् ’** इत्यादौ वक्तुरभावात् तात्पर्यानुपपत्तेरप्य-सम्भवेनान्वयतात्पर्यान्यतरानुपपत्तेः लक्षणाबीजत्वमुचित-मित्युपाध्यायाः ’ । तस्मात् सामान्यरूपेण लक्षणायामन्वायानुपत्ते-स्तात्पार्यानुपपत्तेर्वा बीजत्वं स्वीकृतमस्ति , निरूढलक्षणायामन्वयानुपपत्तिः न अपेक्ष्यते इति प्रमाणाभाव एव दृश्यते । अतएव काव्यप्राकाशेऽपि लक्षणानिरूपणप्रसङ्ग उक्तं मम्मटेन –

**“ मुख्यार्थबाधे तद्योगे , रूढितोऽथ प्रयोजनात् ।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ॥**[503]**”** इति ।

अत्र सामान्यरूपेण लक्षणायां मुख्यार्थबाधस्य हेतुत्वमुपपादितमस्ति । एवञ्च **‘‘ गौरस्तीत्यादौ ’ लक्षणासिद्धये जातिशक्तिवादे व्यक्तिबोधाय निरूढालक्षणाश्रियते इत्यभिप्रायकं प्रभाकारोक्तं न संगच्छते , किन्तु व्यक्तिबोधस्तु लक्षणया ”** इति भूषणसारे[504] लक्षणापदेन सामान्यलक्षणैव गृह्यते । **“ गौरस्ति ”** इत्यादौ तु तात्पर्यानुपपत्त्या लक्षणा भविष्यति । व्यक्ति सत्ताबोधनेच्छया प्रयुक्तात् **‘ गौरस्ति ’** इति वाक्यात् जातिमात्रस्य सत्ताप्रतीतौ तात्पर्यानुपपत्तेस्तत्र विद्यमानत्वात् । उक्तञ्च तत्रैव दर्पणे –

**“ तात्पर्यानुपपत्तिसत्त्वाच्च न व्यक्तिलक्षणानुपपत्तिः** [505] **”** इति ।

जातिशक्तिवादे व्यक्तिबोधः श्रुतार्थापत्त्या भवतीति केषाञ्चिन्मतम् । तेषामयमभिप्रायः –

---

[502] **वैयाकरणसिद्धान्तलघुमञ्जूषायां लक्षणनिरूपणे टिप्पण्यां पृ. १६ ।**

[503] **काव्यप्रकाशद्वितीयोल्लासे का.सं.९ ।**

[504] **वैयाकरणभूषणसारनामार्थनिर्णये पृ. २३९ ।**

[505] **वैयाकरणभूषणसारनामार्थनिर्णये दर्पणव्याख्यायां पृ.२३१ ।**

यथा ‘ **पीनोदेवदत्तः दिवा न भुङ्क्ते** ’ इत्यत्र अर्थापत्त्या रात्रिभोजनस्य ज्ञानं भवति । अर्थापत्तिस्तु अनुपपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थान्तरकल्पनमेव । यथोक्तम् उदाहरणे दिवा अभुञ्जाने अनुपपद्यमानं पीनत्वं तदुपपादकं रात्रिभोजनं कल्पयति ।

सा च अर्थापत्तिर्द्विविधा श्रुतार्थापत्तिः , अर्थार्थापत्तिश्च । तत्र श्रुतार्थापत्तौ शब्दस्यैवाक्षेपो भवति ,तच्छब्देन चानुपपद्यमानार्थोपपादकोऽर्थो अभिधया प्रतीयते । यथा - ‘ **पीनोदेवदत्तः दिवा न भुङ्क्ते** ’ इत्यत्र श्रुतार्थापत्त्या ‘ **रात्रौ भुङ्क्ते** ’ इति शब्द एव अध्याह्रियते ,न तु रात्रिभोजनम् । तेन शब्देन च रात्रिभोजनमभिधयोच्यते ।

एवं रीत्या जातिशक्तिवादेऽपि ‘ **गामानय** ’ इत्यादौ गोत्वानयनान्यथानुपपत्त्या व्यक्तिबोधकः ‘ **गौः** ’ शब्दोऽध्याह्रियते , तेन चाभिधयैव ‘ गोरूपा व्यक्तिः ’ प्रतीयते । अतो व्याक्तेर्न शाब्दबोधविषयतानुपपत्तिः ।

अनुसृतश्चायं पन्था भट्टोजिदीक्षितेनापि ‘ **आदिरन्त्येन सहेता** [506]’ इति सूत्रव्याख्यावसरे । तत्सूत्रार्थे तेनोल्लिखितम् – “ **अन्त्येनेतासहितादिर्मध्यगानां स्वस्य च संज्ञा स्यात्** ” इति । तत्र मध्यमानामित्यर्थः आक्षेपादेव प्रतीयते । उक्तञ्च – “ **आद्यन्ताभ्यामवयवाभ्यामवयवी समुदाय आक्षिप्यते , तस्य च युगपल्लक्ष्ये प्रयोगाभावादवयवेष्वतरन्ती संज्ञा मध्यगेषु विश्राम्यति , नत्वाद्यन्तयोः , संज्ञा स्वरूपान्तर्भावेण तयोः पारार्थ्यनिर्णयात्** [507]” इति । एवञ्च यदि तत्रापि श्रुतार्थपत्त्याक्षेपो न स्वीक्रियते ,तदा घट

[506] **पाणिनीयाष्टाध्याय्यां १.१.७१ ।**

[507] **प्रौढमनोरमायाम् पृ. ३६-३७ चौ.प्र ।**

पदादाक्षिप्तस्याकाशस्य शाब्दबोधे भानाभावावत् ‘ मध्यगानामित्यस्यापि शाब्दबोधविषयत्वानुपपत्तिः , आक्षिप्तस्य शाब्दबोधे भानं न भवतीति सर्वसम्मतसिद्धान्तात् ।

तस्मात् मध्यगानामित्यत्र शाब्दबोधविषयत्वं प्रतिपादयता दीक्षितेनाप्युक्तः प्रकारः स्वीकृतः ।

वस्तुतस्तु “ **जातिविशिष्टव्यक्तिविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति जातिधर्मिकशक्तिग्रहकारणम्** ” इति कार्यकारणभावस्वीकारादेव न व्यक्तिभानानुपपत्तिः । नाप्यशक्यभानापत्तिः , तस्य जातिवैशिष्ट्याभावात् । तादृशकार्यकारणभावस्वीकारे गौरवम् , प्रमाणाभावश्चेत्युच्यते चेत् , तर्हि मास्तु व्यक्तौ लक्षणा मास्तु व्यक्तेर्भानम् । ‘ **गामानय** ’ इत्यादौ केवलायां जातावसम्भवन्त्यानयनादिक्रिया व्यक्तिसाहित्येन निष्पाद्यते , समाहारे पाणिपादसाहित्येन वादनक्रियावत् । उक्तञ्च “ **तद्धितार्थोत्तरपदसमाहारे** ” इति सूत्रे भाष्ये पतञ्जलिना –“ **अथेह गौरनुवन्ध्योऽजोऽग्निषोमीयः इति कथमावृत्तौ चोदितायां द्रव्ये आरम्भणालम्भनप्रोक्षणविशसनानि क्रियन्ते – “ असम्भवाद् आकृतौ आरम्भणादीनां सम्भवो नास्तीतिकृत्वा आकृतिसहचरिते द्रव्ये आरम्भ्यणादीनि क्रियन्ते । ...... अथवा अव्यतिरेकाद् द्रव्याकृत्योः** [508]” इति ।

ननु जातिप्रवृत्तिनिमित्तानां शब्दानां जातौ संकेतग्रहसम्भवेऽपि गुण , क्रिया यदृच्छा शब्दानां कथं जातौ संकेतग्रह इति चेदत्रोच्यते –

गुण , क्रिया , यदृच्छा शब्देष्वपि जातेरनुसन्धानं सम्भवति । यथा- हिम-पयः-शंखादिषु , भिन्नभिन्नरूपेण स्थितेषु शुक्लादिषु , यद्वशात् शुक्लः

---

[508] **पतञ्जलिमहाभाष्ये २.१.५१ ।**

शुक्लः इत्येकाकारप्रतीतिर्दृश्यते , तत् शुक्लत्वादि सामान्यमेव , ‘ **अनुवृत्तिप्रत्ययहेतुः सामान्यम्** ’ इति तल्लक्षणात् । यथा असंख्येषु घटादिपदार्थेषु ‘ **अयं घटः** ’ इत्येकाकारप्रतीतिर्दर्शनात् तत्र घटत्वरूपा जातिः स्वीक्रियते , तथैव भिन्नाश्रयेण स्थितेषु शुक्लादिषु ‘ **शुक्लः शुक्लः** ’ इत्येकाकारप्रतीत्या तत्रापि शुक्लत्वादिजातिरवश्यमेव स्वीकार्या । एवमेव गुड-तण्डुलादिभिन्नभिन्नपदार्थेषु विद्यमानपाकक्रियासु ‘ **पाक** ’ इत्यनुगतप्रतीत्या तत्रापि पाकत्वादि सामान्यमवश्यमेव स्वीकार्यम् ।

ननु ‘ **नित्यत्वे सत्यनेकसमवेतत्वं जातिः** ’ इति सर्वसम्मतत्वात् जातेरनेकसमवेतत्वमावश्यकम् , अतएवाकाशत्वादिकं न जातिः , अनेकसमवेतत्वाभावात् , किन्तु उपाधिरेव । एवं रीत्या यदृच्छाशब्दानां वाच्यार्थरूपा व्यक्तिरेकैव , तेषु स्फोटरूपवाचकः शब्दोऽप्येकः , अतस्तत्रानेकसमवेतत्वरूपायाः जातेः कल्पनासम्भवात् , कथं यदृच्छाशब्दानां जातौ संकेतग्रहः इति चेद् ? उच्यते -

बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषूच्चारयितृभेदेन भिन्नेष्वेक-व्यक्तिवाचकशब्दव्यक्तिष्वनेकत्वस्वीकारेण, तत्र जातिसम्भवा । एवञ्च “ **प्रतिक्षणपरिनामिनो हि सर्वे भावा ऋते चितिशक्तेः**[509] ” इति सिद्धान्तानुसारेण प्रतिक्षणं परिवर्तनशीलासु यदृच्छाशब्दानां वाच्यार्थासु व्यक्तिषु भेदकल्पनया तत्राप्यनुगतप्रतीते कारणमनेकसमवेतत्वरूपा जातिः स्वीकर्त्तुं शक्यते । अतः सर्वेषां जाति-गुण-क्रिया-यदृच्छाशब्दानां जातावेव संकेतग्रहः ,जातिरेव प्रवृत्तिनिमित्तमिति मीमांसकानां राद्धान्तः । इदमेव मीमांसकसिद्धान्तं प्रतिपादयता आचार्यमम्मटेन भणितं काव्यप्रकाशे–

---

[509] **काव्यप्रकाशद्वितीयोल्लासे आचार्यविश्वेश्वरकृतहिन्दीव्याख्यायां ४८ ।**

**" हिम-पयः-शंख्याद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन ' शुक्लः शुक्लः [510]'** इत्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादिसामान्यम् । गुणतण्डुलादिपाकादिष्वेवमेव पाकात्वादि । बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये ।

इममेव जातिपक्षं मनसि निधाय अभिहितं भट्टपादैः –

**" आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्व दोषतः ।**
**सन्देहाच्चरमज्ञानाच्चित्रबुद्धेरभावतः ॥**
**अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः ।**
**आकृतेः प्रथमज्ञानात्तस्याः एवाभिधेयता ॥**
**व्यक्त्याकृत्योरभेदाच्च , व्यवहारोपयोगिता ।**
**लिङ्गसंख्यादिसम्बन्धः सामानाधिकरण्यधीः ॥**
**सर्वं समञ्जसं ह्येतद् वस्त्वनेकान्तवादिनः ।**
**लक्षणा वाभ्युपेतव्या , जातेस्तेनाभिधेयता ॥**[511] " इति ।

अयम्भावः [512]नहि अनन्तासु व्यक्तिषु संज्ञित्वं शक्यतेऽवगन्तुम् । व्यभिचाराच्च व्यक्तीनामशब्दार्थत्वम् नियमलक्षणत्वासम्बन्धस्यानियमेतद-योगात् । अनन्ताश्च शब्दव्यक्तयोऽनन्तासु व्यक्तिषु कल्प्याः । जात्युपलक्षणत्वे अपि अभिधेयानाम् अनन्तात्वाच्छक्त्यानन्त्यमस्त्येव । व्युत्पत्तिकाले हि जातिरूपलक्षणम् , नत्वभिधानसमये । अभिधानं हि प्रातिस्विकेनैव रूपेण व्यक्तीनाम् । तद्यथा –

[510] **काव्यप्रकाशद्वितीयोल्लासे पृ.४८ ।**

[511] **तन्त्रवार्त्तिके आकृत्यधिकरणे ।**

[512] **शास्त्रदीपिकायाम् आकृत्यधिकरणे ।**

अक्षत्रयमेकापवरकस्थमेकापवरकस्थिति एव उपलक्ष्य कश्चिद् कञ्चिदाह – **‘ य एतस्मिन्नपवरकेऽधुना आसते ते त्रयोऽक्ष शब्दाभिधेयाः ’** इति । तत्र यद्यपि व्युतपत्तिसमयेऽपवरकस्थितिः नाम एकमुपलक्षणं लभ्यते , तथापि शाब्दस्तदानादरेण व्यक्तित्रयमेव स्वरूपेणाभिधत्ते , इति भवति शक्तित्रयम् । एवमिहापि यद्यपि व्युत्पत्तिसमये जातिरेकोपलक्षणमासीत् , तथापि शब्दस्तामस्पृशन्नेव नानारूपाव्यक्तीः स्वेन रूपेणाभिधत्ते , इति स्यादेव शक्त्यानन्त्यम् । अपि यद् व्यपदेश्यं धर्मिरूपमभिधेयं ततो गोशब्दोच्चारणका व्यक्तिः प्रतीयमानापि नाश्वादिव्यक्तिभ्यो व्यवच्छिन्ना प्रतीता स्यात् , नहि असाधारणमाकारमन्तरेण द्रव्यं द्रव्यान्तरव्यवच्छिन्नं प्रतीयते । तत्र गौरित्युच्यते सर्वत्राविशिष्टा प्रतीतिः स्यात् । अथ अभिधानसमय एव जातिरुपलक्षणमित्यभिदधदेव हि व्यक्तिशब्दो जातिमुपलक्षणमादाय तज्जातीयरूपेणाभिधत्ते गोजातीयमिति ततः प्रथमं जातिरभिधातव्या । नहि अनभिधाय जातिं तज्जातीयत्वरूपेन व्यक्तिरभिधातुं शक्यते । ततश्च विशिष्टाभिधानमेव वाचोयुक्त्यन्तरेणापन्नम् , न शुद्धाभिधानम् । विशिष्टाभिधाने च पूर्वततरं विशेषेणाभिधातव्यम् । तदभिधाने च तत एवात्यन्ताविनाभूतव्यक्तिप्रतिपत्तिसिद्धेर्न तत्राभिधानशक्तिकल्पनावसरः । किञ्च गोशब्द उच्चारिते व्यक्तिषु संशयो भवति , न कस्याचिन्निर्णयः । यत्र च संशयो , न तस्याभिधेयता , शब्दस्य निश्चायकत्वात् । सामान्यं तु निर्णीयत इति भवत्यभिहितम् । नन्वसत्यपि व्यक्तिविशेषनिर्णये व्यक्तिमात्रं निर्णीयते एव । किमिदं व्यक्तिमात्रं सामान्यम् ? विशेषो वा ? द्वि आकारैव हि वस्तुषु बुद्धिर्व्यावृत्यनुगतरूपा । तत्र विलक्षणबुद्ध्यालम्बनं च व्यक्तिः , समानबुद्ध्यालम्बनं च सामान्यम् । न तदुभयातिरिक्तं व्यक्तिमात्रं नाम किञ्चिदस्ति वस्तुनो रूपम् । सामान्यमेव तु अनेन मात्रशब्देनाभिधीयत इति तदेवाभिधेयम् । प्रथमं च सामान्यमेव शब्दाद्गम्यते , पश्चाच्च

व्यक्तिष्वाकाङ्क्षामात्रं जायते । ततस्तदेवाभिधेयं , न व्यक्तिविशेषः । विचित्राश्च खण्डमुण्डादिरूपा व्यक्तयः इति विचित्रा गोशब्दोच्चारणे बुद्धिः स्यात् । एकाकारा तु उत्पद्यते अतोऽभिधेया जातिः । अन्वयव्यतिरेकाभ्यां चैवमेव युक्तम् । व्यवहारङ्गता जातेः व्यक्त्यनतिरेकादुपपद्यते । अतोऽभिधेया जातिः । नहि जातिर्नाम व्यक्तेरर्थान्तरभूतं किमपि तत्त्वम् । अपि तु वस्त्वेव ह्येकमुभयात्मकं व्यक्त्यानुगतरूपतया बुद्ध्यते । तत्र सामान्यं शब्दार्थः । अयमर्थः –

सामान्यात्मना वस्तु शब्दादवगम्यते , न विशेषात्मनेति । यच्च सामान्यात्मना शब्देन बोधितं , तस्य क्रियासम्बन्धश्च उद्योते । शक्नोति तत्तत्क्रियायां साधयितुम् । अतस्तदेव क्रियाश्रयविशेषरूपमपि । लिङ्गसंख्याकारकसम्बन्धः सामानाधिकरण्यं सर्वमनेकान्ताश्रयेणैव सुपरिहारम् । यदा तु भेद एव जातिव्यक्त्योस्तदा सर्वमिदं लाक्षणिकव्यक्त्याश्रयेणोपपद्यते । यत्र तु ‘ **पशुना यजेत** ’ ‘ **अरुणया क्रीणाति** ’ इत्येवमादौ करणत्वश्रवणम् , तत्र जातिगुणयोरेवामूर्तयोरपि द्रव्यपरिच्छेदेन मुख्यमेव करणत्वमुपपन्नम् । अधिकरणसम्प्रदानादिरूपत्वं चामूर्तस्यासम्भवादभेदं लक्षणां वाश्रित्य समर्थनीयम् । आह च –

**“ तेन तल्लक्षितव्यक्तेः क्रियासम्बन्ध चोदना ।**
**जातिव्यक्त्योरभेदौ वा , वाक्यार्थेषु व्यवस्थितः ॥**
**तस्मात् सामान्यमेवाभिधेयम् न व्यक्तिरिति सिद्धम् ॥ ” इति ।**

सरूपाणामिति सूत्रे भाष्ये अपि स्वीकृतोऽयं जातिपक्षः । उक्तञ्च तत्र **“ एका आकृतिः सा चाभिधीयते** [513]” इति । **“ प्रख्याविशेषात् ”** इति वार्तिकस्य व्याख्यावसरे जातेः सत्ता प्रतिपादिता कैयटेनापि । उक्तञ्च -

---

[513] **पतञ्जलिमहाभाष्ये १.२.६४ ।**

**“ प्रख्या बुद्धिः , तस्याः अविशेषादेकरूपत्वात् , तद्विषयस्याप्यैक्यं प्रतीयते । गुणप्रमाणादिभिन्नेष्वपि गोपिण्डेषु गौर्गौरित्येकाकारप्रत्ययोदयात्तद-वश्यमेकेनालम्बनेन सामान्येन भाव्यमिति जातिसद्भावः , एकत्वञ्चावसीयते** [514]” इति ।

जातेः शब्दशक्यत्वे , **जात्याख्यायामेकस्मिन्**[515] **बहुवचनान्यतरस्याम्** ’ इति सूत्रं ‘ **सवर्णेऽण्ग्रहणमपरिभाष्यम् आकृतिग्रहणात् सिद्धम्** ’ इति भाष्यवार्तिकं[516] च प्रमाणम् ।

जातेर्वाच्यत्वस्वीकार एव ‘ **ब्राह्मणो न हन्तव्यः** ’ इत्यत्राभीष्टप्रत्ययोत्पत्तिः व्यक्तिवादपक्षे तु एकस्मिन्नेव ब्राह्मणो हनननिषेधः स्यात् । उक्तञ्च महाभाष्ये–

**‘ ब्राह्मणो न हन्तव्यः ’ ‘ सुरा न पेया ’ इति ब्राह्मणमात्रं च न हन्यते , सुरामात्रं च न पीयते । यदि द्रव्यं पदार्थः स्यात् , एकं ब्राह्मणमहत्वा , एकां च सुरामपीत्वा अन्यत्र कामचारः स्यात् , तस्मात् सामान्यमेव शब्दशक्यम्**[517] ” इति । न च ‘ नागृहीतविशेषणबुद्धिः विशेष्य उपजायते ’ इति न्यायेन विशिष्ट एव शक्तिः प्रतीयते , तर्हि कथं जातावेव शक्तिस्वीकारः इति वाचम् , विशेषणे शक्तिः , विशेष्ये ( व्यक्तौ ) च लक्षणेति तन्न्यायस्य तात्पर्यात् । उक्तञ्च परमलघुमञ्जूषायां–

---

[514] **पतञ्जलिमहाभाष्यप्रदीपे १.२.६४ ।**

[515] **पाणिनीयाष्टाध्याय्यां १.२.५८ ।**

[516] **पतञ्जलिमहाभाष्यवार्त्तिके १.१.६९ ।**

[517] **पतञ्जलिमहाभाष्ये १.२.६४ ।**

**" नागृहीतविशेषणा बुद्धिः विशेष्ये उपजायते ' इति न्यायस्य विशेषणे शक्तिर्विशेष्ये लक्षणेति तात्पर्यात्** [518]" इति।

ननु जातिशक्तिवादपक्षे ' **गामनय** ' इत्यादावन्वयोपपत्तये व्यक्तौ लक्षणा स्वीक्रियते , तत्तु न युक्तम् , युगपत् वृत्तिद्वयविरोधाद् इति चेन्न , सति तात्पर्ये युगपद्वृत्तिद्वयविरोधस्याकिञ्चित्करत्वात् । अतएव " **गङ्गायां घोषमीनौ स्तः** " इत्यादौ वृत्तिद्वयाभ्युपगमेऽपि कश्चिद्दोषः।

तस्माद् जातेः शक्यत्वे न कश्चन दोषः इति मीमांसकानां सिद्धान्तः । तत्र जातिः प्रवृत्तिनिमित्तस्यापि उपलक्षणम् । तेन आकाशत्वादीनां जातित्वाभावेऽपि न क्षतिः ।

ननु एकस्याः शक्यसम्बन्धरूपायां लक्षणायाः लक्ष्यलक्ष्यतावच्छेदकयोरसम्भवेन यथा लक्ष्यतावछेदकतीरत्वादीनां लक्षणां विनापि[519] लक्ष्यतावच्छेदकज्ञानं प्रति लक्ष्यार्थोपस्थितिः कारणम् इति कार्यकारणभावेनैव लक्ष्यतावच्छेदकप्रतीतिर्भवति , तथैव जातेरशक्यत्वेऽपि शक्यतावच्छेदकज्ञानं प्रति शक्यार्थोपस्थितिः कारणम् ' इति कार्यकारणभावेन जातेः प्रतीतिसम्भवे तत्र शक्तिकल्पनमनुचितम्। उक्तञ्च नागेशेन – " **लक्ष्यतावच्छेदकतीरत्वादिवत् शक्यतावच्छेदकस्या-वाच्यत्वे दोषाभावात्** [520]" इत्युच्यते चेत्तदा **" एकं द्विकं त्रिकं चाथ** " इत्यादौ **" एकं व्यक्तिरेव शब्दार्थः" ।** अयमपि पक्षः शास्त्रसम्मत एव। उक्तञ्च कौण्डभट्टेन–

---

**518 परमलघुमञ्जूषायां नामार्थनिर्णये पृ.१०७।**

**519 लक्ष्यतावच्छेदके न लक्षणा , उभाभ्यामनारोपितैकसम्बन्धस्यासम्भवात् – वैयाकरणसिद्धान्तलघुमञ्जूषायां लक्षणानिरूपणे पृ. ९७ ।**

**520 परमलघुमञ्जूषायां नामार्थनिर्णये पृ. १०७ ।**

“ **केवलव्यक्तिरेव एकपदार्थः** [521]” इति ।

“ **अणुदित्सवर्णस्य चाप्रत्ययः**[522] ” इतो सूत्रेऽण्ग्रहणस्य एकशेषारम्भस्य च व्यक्तिपक्ष एव चारितार्थ्यात् अन्यथा जातिपक्षे एकेनैवानेकस्य बोधसम्भवेऽण्ग्रहणस्यैकशेषारम्भस्य च वैयर्थ्यं स्पष्टमेव । यदि “ **जातिपक्षमाश्रित्याण्ग्रहणं प्रत्याख्यातं**[523] **भाष्ये** , सरूपसूत्रस्य न शास्त्रीयप्रक्रियामात्रोपयोगित्वमेव[524] व्यवस्थापितम् इत्युच्यते चेत् , तर्हि –

‘‘ **शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च ।**
**वाक्यस्य शेषात् विवृतेर्वदन्ति , सान्निध्यतः सिद्धपदस्य वृद्धाः ॥** [525]”

इत्यादिषु शक्तिग्राहकेषु प्रधानभूतेन व्यवहारेण व्यक्तावेव शक्तिग्रहे व्यक्तेर्वाच्यत्वस्यौचित्यात् । भणितञ्च नागेशेनापि – “ **शक्तिग्राहकशिरोमणिव्यवहारो व्यक्तावेव शक्तिं ग्राहयति** [526]” । गवादिपदेन लोके व्यक्तेरेवबोधात् –

वैयाकरणभूषणसारेऽप्युक्तम् – “ **युक्तञ्चैतद् व्यवहारेण व्यक्तावेव तद्ग्रहणात् । तस्मात् व्यक्तिरेव वाच्येति युक्तम्** [527]” **इति** ।

किञ्च व्यक्तिपक्षमाश्रित्यापि वार्तिकमारब्धे भाष्ये – ‘‘ **द्रव्याभिधानं व्याडिः** [528]” इति । व्यख्यातञ्च कैयटेन –

---

[521] **वैयाकरणभूषणसारनामार्थनिर्णये पृ. २३१ ।**

[522] **पाणिनीयाष्टाध्याय्यां १.१.६९ ।**

[523] **सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् १.१.९ भाष्यवार्त्तिके ।**

[524] **एकशेषश्च प्रत्याख्यातस्तथापि असहविवक्षायामपि शास्त्रमात्रक्रियोपयोगीत्याशयेन पृथगुक्तः – शब्दरत्ने पृ. १० ।**

[525] **न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे पृ.२६६ ।**

[526] **परमलघुमञ्जूषायां नामार्थविचारे पृ. १०८ ।**

[527] **वैयाकरणभूषणसारनामार्थनिर्णये पृ. २३२ ।**

**“ जातेर्वृत्तिविकल्पाक्षमत्वेनाभावं मन्यमानो व्याडिर्द्रव्यमेव शब्देनाभिधीयते**[529] ” इति मन्यते । तत्र जातिपक्षं दूषयता नागेशेनाभिहितम् - **“ जातिर्न तावद्द्रव्येषु व्यासज्यवृत्तिः , एकाश्रयनाशे अप्रतीत्यापत्तेः । किं च ‘ गामालभेत ’ इत्यादि चोदनासु सर्वद्रव्यलम्भापत्तिः** [530]” इति । प्रत्येकसमाप्तौ तु द्रव्यान्तरे तदनापत्तिस्तत्रापि सत्त्व एकाकृतिरिति प्रतिज्ञाहानिरित्यर्थः ।

किञ्च प्रवर्तकवाक्येषु द्रव्यस्यारम्भणात् द्रव्याभिधानस्यैवौचित्यं , जातिवादे च दूषणं प्रतिपादितं भगवता पतञ्जलिना । तथाहि – **“ चोदनासु च तस्यारम्भान्मन्यामहे द्रव्यमभिधीयत इति । ‘ गौरनुबन्ध्योऽजोग्निषोमीय ’ इति । आकृतौ चोदितायां द्रव्य आरम्भणालम्भनप्रोक्षणविशनादीनि क्रियन्ते** [531]” इति । व्याख्यातञ्चैतत् तत्रैव कैयटेनापि– **“ आकृतिवादिपक्षे शब्देनाकृतिश्चोद्यते द्रव्येषु कार्यं प्रवर्तते । अयुक्तं चैतत् । नह्यन्यचोदनेऽन्यस्य कार्ये क्रियमाणे यथोक्तं कृतं भवति । तस्मात् द्रव्यमेव शब्देनोच्यते इति न्याय्यम्** [532]” इति ।

**“ स्थानतः आन्तर्यादीकारस्य यकारः** [533]” इतिवदता भट्टोजिदीक्षितेनापि व्यक्तिपक्षः स्वीकृतः । अयम्भावः – **‘ सुधी उपास्य ’**

---

[528] **पतञ्जलिमहाभाष्यवार्त्तिके १.२.६४ ।**

[529] **पतञ्जलिमहाभाष्यप्रदीपे १.२.६४ ।**

[530] **पतञ्जलिमहाभाष्योद्द्योते १.२.६४ ।**

[531] **पतञ्जलिमहाभाष्ये १.२.६४ ।**

[532] **पतञ्जलिमहाभाष्यप्रदीपे १.२.६४ ।**

[533] **वैयाकरणसिद्धान्तकौमुद्यां अच्सन्धिप्रकरणे पृ.१५ ।**

इत्यत्र ‘ **इको यणचि**[534] ’ इत्यनेन यण्प्राप्तः । तत्रोद्देश्यकोटाविक्पदेन लक्षणया[535] षट्षष्टिर्गृह्यते , यण् पदेन च सप्त । एवञ्चोद्देश्यविधेययोः समानसंख्यकत्वाभावेन ‘ **यथासंख्यमनुदेशसमानाम्** [536]’ इत्यनेन तत्र व्यवस्था न सम्भवति , अतः तत्रान्तर्यादेव स्थान्यादेशयोर्व्यवस्था कार्या । जातिपक्षे तु ‘ **इ** ’ इत्यादिपदेनैव इतजात्यवच्छिन्नसकलव्यक्तिभानसम्भवेन लक्षणा न भविष्यति , फलाभावात् । एवञ्चोद्देश्य कौटौ ‘ **इ उ ऋ लृ** ’ इति चत्वार एव वर्णाः , आदेश कोटावपि ‘ **य-व-र-ल** ’ इति चत्वार एव । तथाहि उद्देश्यविधेययोः समसंख्याकत्वेन यथासंख्येतिसूत्रेणैवेष्टसिद्धौ , स्थानतः आन्तर्यादित्युक्तिरसंगता स्यात् । तस्मात् व्यक्तिपक्षः शास्त्रसम्मतः इति कैश्चिदपि वक्तुं न शक्यते । भर्तृहरिणापिप्रत्यपादि –

**“ आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम् ।**
**शब्दः सुकरसम्बन्धः न च व्यभिचरिष्यति ॥**[537] ” इति ।

अयम्भावः – भावानां पदार्थानां ( व्यक्तीनाम् ) नानात्वादनुगतत्वेऽप्येकमनुगतधर्ममुपलक्षणं कृत्वा घटात्मकः शब्दः सुग्राह्यवाच्यतासम्बन्धो न व्यभिचरिष्यति , अर्थात् शक्तिज्ञानविषयां व्यक्तिं न बोधयिष्यति । तस्मात् व्यक्तौ संकेतो युज्यत एव ।

न च व्यक्तेरानन्त्यादानन्त्यादिदोषः स्यादिति वाच्यम् , सम्बन्धितावच्छेदक-जातेरनुगतत्वात् , तदवच्छिन्नाया एकस्या एव शक्तेरभ्युपगमेनानन्तशक्तिरूप-गौरवस्याभावात् । उक्तञ्च परमलघुमञ्जूषायाम् –“ **व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजाते-**

---

[534] **पाणिनीयाष्टाध्याय्यां ६.१.७७ ।**

[535] **“ प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढालक्षणा ” – प्रौढमनोरमायां पृ.१२४ ।**

[536] **पाणिनीयाष्टाध्याय्यां १.३.१० ।**

[537] **भर्तृहरिवाक्यपदीये । मुद्रितग्रन्थेषु नोपलभ्यते ।**

**रुपलक्षणत्वेन तदैक्येन च तादृशजात्युपलक्षितव्यक्तौ शक्तिस्वीकारेणानन्तशक्तिकल्पनाविरहेणागौरवात्** [538]" इति । प्रतिपादितञ्चैतत् नागेशेन सरूपसूत्रे भाष्यस्योद्द्योतेऽपि - " **तत्तत्संस्थानाद्युपलक्षितमधिष्ठान- चैतन्यमेव द्रव्यमिति नानन्त्यव्यभिचारौ** [539]" इति।

किञ्च गोपदस्य जातावेव शक्तिस्वीकारे ' **गामानय** ' इत्यादौ जातेरानयनादिक्रियायामन्वयायोग्यत्वेन शाब्दबोधानुपपत्तिः , जात्याक्षिप्तव्यक्तेराक्षेपात् तत्र नान्वयानुपपत्तिरिति तु वक्तुं न शक्यते , यतो हि तत्राक्षेपोऽर्थापत्तिरूप एव स्वीकार्यः , अन्यथा तु घटपदाक्षिप्ताकाशवत् व्यक्तेरपि बोधो न स्यात् । स च अर्थापत्तिरूपाक्षेपः प्रकृतेः न सम्भवति । तथाहि -

" **उपपाद्यज्ञानेनोपपादककल्पनार्थापत्तिः'** । यथा ' **पीनोदेवदत्तः दिवा न भुङ्क्ते** ' इत्यत्र पीनत्वमुपपाद्यम् , रात्रिभोजनञ्चोपपादकम् , एवञ्च पीनत्वज्ञानेन रात्रिभोजनं ज्ञायते । प्रकृते च व्यक्तिज्ञानेन विना जातिज्ञानं नोपपद्यते , इति जातिज्ञानमुपपाद्यं, व्यक्तिज्ञानञ्चोपपादकम् । परन्तु तत्रैव व्यभिचारः , व्यक्तिज्ञानमन्तरेणापि ' **गोत्वमस्ति** ' इति वाक्यात् जातिज्ञानसम्भवात् । जातिसत्तायाः व्यक्तिसत्तासापेक्षत्वेऽपि जातिज्ञानस्य व्यक्तिज्ञानानपेक्षणात् । एवञ्चाक्षेपस्यासम्भवे व्यवहारानुपपत्त्या जातिशक्तिवादो न स्वीकार्यः ।

---

[538] **परमलघुमञ्जूषायां नामार्थविचारे पृ. १०७ ।**

[539] **पतञ्जलिमहाभाष्योद्द्योते १.२.६४ पृ. १४ ।**

## ➢नामार्थविषये महिमभट्टाभिमतिः

महिमभट्टास्तु क्रियाशब्दानामिव ,जातिशब्दानां गुणशब्दानां द्रव्यवाचकशब्दानामपि क्रिया एव प्रवृत्तिनिमित्तं स्वीकुर्वन्ति । तेषां मते घटनक्रियायुक्तमेव घटत्वं घटशब्दस्य प्रवृत्तिनिमित्तम् , न तु केवलं घटत्वम् । केवलं जातिप्रवृत्तिनिमित्तवादिमते जातेर्नित्यत्वेन प्रलयकाले अथवा ध्वंसकालेऽपि जातेः विद्यमानत्वात् घटशब्द प्रयोगापत्तिः , नैतद् दृश्यते , अपि तु घटशब्दस्य प्रयोगस्तदैव भवति , यदा घटरूपः पदार्थः घटनादिक्रियया स्वरूपमासादयति । यदीयं व्यवस्था न स्वीक्रियते , तदा पटोऽपि घटपदव्यपदेश्यः , घटश्च पटपदव्यपदेश्यः स्यात् , आव्यक्तावस्थायां घटपटयोः परस्परं भेदकत्त्वाभावात् । यतोहि पटस्य घटपदव्यपदेश्यत्वे व्यवहारिकी एवापत्तिः सम्भवति , व्यवहारश्च स्वरूपावाप्त्यनन्तरं दृश्ये पदार्थ एव भवति । अतोऽव्यक्तावस्थायां घटपटयोः परस्परं व्यपदेश्यव्यपदेशकत्वं मा भूत् , अतः क्रिया एव प्रवृत्तिनिमित्तं शब्दानामिति स्वीकार्यम् । इदमेव स्वाभिमतं प्रकटयता महिमभट्टेन प्रत्यपादि - **" केचित्तु पुनरेषां क्रियैवैका प्रवृत्तिनिमित्तमिति क्रियाशब्दत्वमेव सर्वेषां नामपदानामुप-गच्छन्ति[540] " इति** ।

तथाहि घटादिशब्दाः स्वार्थप्रवर्तमाना घटनादिक्रियायामेवान्वय-व्यतिरेकाभ्यां प्रवृत्तिनिमित्तभावेनावालम्बमाना दृश्यते । न घटत्वादि सामान्यम् । सा चैषा घटनादिक्रिया घटत्वसामान्ययोगादन्यथा वास्तु । नैतावता तस्याः प्रवृत्तिनिमित्तत्व- व्याघातः । न च सत्यपि घटत्वसामान्ये स्वयमघटन् घटात्मतानापद्यमान एवासौ घटव्यपदेशविषयो भवितुमर्हति । एवं हि पटोऽपि घटव्यपदेशविषयः स्यात् , घटनक्रियाकर्त्तृत्वाभावाविशेषात् ।

---

[540] **व्यक्तिविवेके पृ. ३० ।**

नहि शुक्लत्वमनापद्यमान एवार्थ , ‘ **शुक्ल** ’ इति व्यपदेष्टुं शक्यते , अपचन्नेव पाचक ’ इति । तस्मात् घटनक्रियाकर्त्तृत्वलक्षणमेव घटत्वं घटशब्दस्य प्रवृत्तौ निमित्तमवसेयम् , न घटत्वमात्रम् । तदेव चेह घटनमित्युक्तम् ” इति ।

अयम्भावः मृदवस्थायां घटपटयोरभेदात् पटेऽपि घटत्वस्य विद्यमानत्वात् ,घटत्वमेव यदि शब्दप्रवृत्तिनिमित्तं स्यात् , तदा पटस्यापि घटव्यपदेश्यत्वापत्तिः । अतोऽवयवानां संयोगरूपा या घटनादिक्रिया तद्विशिष्टमेव घटत्वं प्रवृत्तिनिमित्तम् । एवं स्वीकारे पटे घटत्वस्य विद्यमानत्वेऽपि तादृशक्रियाविशिष्टत्वाभावेन न पटे घटव्यपदेशः । तस्मात् घटेऽपि घटपदव्यपदेशस्तदैव स्यात् , यदा घटः तादृशः घटनादि क्रियाविशिष्टः स्यात् । एवञ्च घटादिशब्दस्य घटनादिक्रियैव प्रवृत्तिनिमित्तमिति महिमभट्टाशयः ।

### ➢महिमभट्टमतखण्डनम्

वस्तुतस्तु क्रियायाः प्रवृत्तिनिमित्तत्वस्वीकारे न काचन वाचोयुक्तिः । न च घटत्वसामान्यस्य प्रवृत्तिनिमित्तत्वे पटेऽपि घटव्यपदेशः स्यादिति वाच्यम् , मृदवस्थायां घटपटयोरभेदात् पटे घटत्वस्य विद्यमानेऽपि तस्य प्रत्यक्षाभावात् , घटत्वस्य प्रत्यक्षं प्रति तादृशावयवसंस्थानस्य कारणत्वेन तस्य पटेऽविद्यमानत्वात् ।

किञ्च पटे घटस्य शक्तिग्रहासम्भवात् , न पटे घटशब्दव्यपदेशः । यद्यपि ‘ **घटः घटपदशक्यः** ’ इति शक्तेः घटत्वविशिष्टस्य विषयीकरणात् , पटे च घटत्वस्य विद्यमानत्वात् तत्रापि घटनिरूपिता शक्तिरस्ति , किन्तु तस्याः शक्तेर्ग्रहणं न भवति ।

**“ शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहरतश्च । वाक्यस्य शेषाद् विवृतेर्वदन्ति, सान्निध्यतः सिद्धपदस्य वृद्धाः ॥[541]”** इति शक्तिग्राकप्रमाणेषु शक्तिग्राहकशिरिमणिना व्यवहारेण कम्बुग्रीवादिमत्व्यक्तावेव घटनिरूपितायाः शक्तेर्ग्रहणं भवति , न तु पटे , अतः पटे शक्तेर्विद्यमानत्वेऽपि तद्ग्रहासम्भवात् न पटे घटपदव्यपदेशापत्तिः । तस्मात् पटे घटपदव्यपदेशापत्त्या क्रियायाः प्रवृत्तिनिमित्तत्वस्वीकारो न विचारसहः इति मे मतिः ।

किञ्च क्रियायाः प्रवृत्तिनिमित्तत्वे विनष्टे उत्पत्स्यमाने च घटे तादृशक्रियाया अभावात् ‘ **घटो नष्टः** ’ ‘ **घटो भविष्यति** ’ इति सर्वानुभवसिद्धव्यवहारोऽपि ना संगच्छते , तत्र क्रियारूपप्रवृत्तिनिमित्ताऽभावेन घटशब्दप्रयोगस्यासम्भवात् ।

### ➢नामार्थविषये बौद्धमतम्

बौद्धास्तु ‘ **अपोहः शब्दार्थः** ’ इति स्वीकुर्वन्ति । तत्रापोहस्त्वतद्व्यावृत्तिः , सा च तद्भिन्न भिन्नत्वरूपा । यतोहि क्षणभङ्गवादिनां बौद्धानां मते ‘ नित्यत्वे सति , अनेकसमवेतत्वरूपा जातिस्तु सम्भवत्येव नहि अतः नानासु घटव्यक्तिषु ‘ **अयं घटः अयं घटः** ’ इत्येकाकारप्रतीतेः कारणमपोह एव । स एव शब्दार्थः इति बौद्धानामभिप्रायः । इदमेव बौद्धमतं प्रकटयता मम्मटेन भणितं काव्यप्रकाशे – ‘ **अपोहो वा शब्दार्थः कैश्चिदुक्तः**[542] ’ इति ।

---

541 **न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे पृ. २६६ ।**

542 **काव्यप्रकाशद्वितीयोल्लासे पृ.४९ ।**

## ➢बौद्धमतखण्डनम्

बौद्धाभिमतोऽपोहवादोऽपि न युक्तियुक्ततामावहति , यतोहि तद्भिन्नभिन्नत्वरूपापोहस्वीकारेऽन्योन्याश्रयदोषः ।

तथाहि ‘ **तद्भिन्नभिन्नत्व** ’ इत्यस्य तन्निष्ठप्रतियोगिताकभेदाश्रय-प्रतियोगिकभेदाश्रयोऽर्थः । तत्र प्रथमभेदीयप्रतियोगिताच्छेदको धर्मो घटत्वरूपः , तस्य किं स्वरूपं बौद्धानां मते ? यदि सोऽपि “ **तद्भिन्नभिन्नत्वरूपः** ” एव स्वीक्रियते , तर्हि भेदज्ञाने प्रतियोगिज्ञानस्य कारणत्वात् , घटत्वज्ञाने घटज्ञानमपेक्ष्यते , घटज्ञाने च भेदीयप्रतियोगितावच्छेदकतया घटत्वज्ञानमपेक्ष्यते ’ इति स्वज्ञप्त्यधीन-ज्ञप्तिकत्वरूपः अन्योन्याश्रयः स्पष्टतया प्रतिभाति । एवमन्योन्याश्रयदोष-ग्रस्तत्वादपोहवादोऽयं न सर्वसम्मतिमभजत् ।

## ➢वेदान्तिनां मतम्

वेदान्तिनस्तु जातावेव शक्तिं स्वीकुर्वन्ति , व्यक्तिबोधस्तु लक्षणयैव भवति । यथा – “ **नीलो घटः** ” इत्यत्र नीलपदस्य नीलगुणविशिष्टे लक्षणा भवति , तथैव जातौ गृहीतशक्तिकस्य शब्दस्य व्यक्तौ लक्षणा ।

उक्तञ्च वेदान्तपरिभाषायाम् – “ **तच्च जातेरेव न व्यक्तेः व्यक्तीनामानन्त्येन गुरुत्वात् । कथं तर्हि गवादिपदात् व्यक्तिभानमिति चेत् , जातेर्व्यक्तिसमानसंवित् संवेद्यतयेति ब्रूमः । यद्वा गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती , न तु ज्ञाता , जातौ तु सा ज्ञाता हेतुः , न च व्यक्त्यंशे शक्तिज्ञानमपि कारणं , गौरवात् । जातिशक्तिमत्त्वज्ञाने सति व्यक्तिशक्तिज्ञानं विनापि व्यक्तिविलम्बाभावाच्च । अतएव न्यायमतेऽन्वये शक्तिः स्वरूपसतीति सिद्धान्तः । ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति जातिरेव वाच्या , अथवा**

**व्यक्तेर्लक्षणया अवगमः । यथा ' नीलो घटो ' इत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा , तथा जातिवाचकस्य तद्विशिष्टे लक्षणा तदुक्तम् अनन्यलभ्यः पदार्थ** [543] " इति ।

### ➢नैयायिकसम्मतिः

नैयायिकास्तु जात्याकृतिविशिष्टव्यक्तावेव शक्तिं स्वीकुर्वन्ति । अयमभिप्रायः तेषां पदानां यदि जातावेव शक्तिः स्वीक्रियते चेत् , तदा जातिपदयोरेव सम्बन्धग्रहेण पदश्रवणानन्तरम् ' **एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्** ' इति रीत्या पदरूपैकसम्बन्धिज्ञानाज्जातिरूपसम्बन्ध्यन्तरमेव स्मर्यते , न तु व्यक्तिरिति पदजन्यव्यक्तिस्मरणाभावेन शाब्दबोधे व्यक्तेर्भानं न स्यात् , तद्विषयकशाब्दबोधं प्रति , तत्पदजन्य वृत्तिज्ञानाधीनोपस्थितेः कारणत्वात् । तस्मात् शक्तिं विना व्यक्तेः शाब्दबोधे भानं न स्यात् , **' गामनय '** इत्यादौ तु तद्भानमनुभवसिद्धमतः व्यक्तौ शक्तिरावश्यकी ।

ननु व्यक्तौ पदस्य शक्तेरभावेऽपि तत्र लक्षणायाः स्वीकारेण पदश्रवणानन्तरं लक्षणारूपसम्बन्धेन सम्बन्धिन्या व्यक्तेरपि स्मरणे पदजन्यव्यक्तिस्मरणसम्भवान्नकाप्युनुपपत्तिरिति चेन्न , ' गामनय ' इत्यादौ गोत्वजातेरानयनाद्यन्वयानुपपत्त्या तत्र लक्षणासम्भवेऽपि " गौरस्तीत्यादावन्वयानुपपत्त्यभावाल्लक्षणायाः असम्भवात् " । न चान्वयानुपपत्त्यभावेऽपि व्यक्तिसत्ताबोधेनेच्छया प्रयुक्ते ' गौरस्ति ' इत्यत्र जातिमात्रबोधे तात्पर्यानुपपत्तेर्विद्यमानत्वात् लक्षणा भवत्येव , लक्षणायां तात्पर्यानुपपत्तेः हेतुत्वादिति वाच्यम् , अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधदर्शनात् तत्र लक्षणास्वीकारेऽनुभवविरोधात् ।

---

[543] **वेदान्तपरिभाषायाम् आगमपरिच्छेदे ।**

व्यक्तिशक्तिवादनये आनन्त्यादिदोषोऽपि नास्ति , सकलव्यक्तिषु एकस्या एव शक्तेः स्वीकारात् । ननु ईश्वरेच्छारूपायाः शक्तेर्व्यक्तिरूपविषयभेदेन कथमेकत्वमिति चेत्तर्हि – गोत्वादिरूपेणानुगतासु सकलव्यक्तिष्वेकशक्तिस्वीकारे बाधकाभावः । अर्थादाश्रयभेदेऽपि शक्यतावच्छेदकस्यैकत्वे न शक्तिभेदः । अतः शक्यतावच्छेदकस्य गोत्वादिरूपधर्मस्यैक्यात् न शक्तिभेदः ।

ननु शक्यतावच्छेदकत्वं प्रवृत्तिनिमित्तत्वम् । तच्च वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितीयप्रकारताश्रयत्वम् । एवञ्च शक्यतावच्छेदके गोत्वादौ शक्तिस्वीकरणमावश्यकम् , व्यक्तिशक्तौ तु गोत्वम् । एवञ्च व्यक्तिभाननियामकत्वं जातिभानसामग्र्या एव कल्प्यते । त्स्मादावश्यकत्वात् जातावेव शक्तिः स्वीक्रियतामिति चेदत्रोच्यते –

जातिवादिनो मीमांसकाः एवं प्रष्टव्याः यद् – “ **भवतां मते किं गौः गोपदशक्या** ” इति व्यक्तिविशेष्यकः शक्तिग्रहः अथवा “ **गोत्वं गोपदशक्यमिति जातिविशेष्यकः शक्तिग्रहः । नाद्यः तथा शक्तिग्रहे व्यक्तौ शक्तेः स्वतः सिद्धत्वात् । न द्वितीयः “ गोत्वं गोपदशक्यमिति** ” गोत्वविशेष्यकशक्तिग्रहे गोत्वप्रकारकपदार्थोपस्थिते-रभावात् ’ इष्टो गोत्वप्रकारकः शब्दबोधो न स्यात् । घटत्वविशिष्टे घटे गृहीतशक्तिकस्य पुंसः घटपदात् घटप्रकारक घटत्वविशेष्यकशाब्दबोधवारणाय “ **तत्प्रकारकतद्विशेष्यकशाब्दबोधं प्रति तत्प्रकारकतद्विशेष्यकवृत्तिज्ञानाधीनोपस्थितिः कारणमिति** ” कार्यकारणभावस्य सर्वसम्मतत्वात् । एवञ्च गोत्वविशेष्यकशक्तिग्रहे गोत्वविशेष्यक एव शाब्दबोधो , न तु गोत्वप्रकारकः ।

ननु " **गौः गोपदशक्या** " इत्येव शक्तिज्ञानम् । तत्र गवादौ स्वाश्रयाश्रयत्वसम्बन्धेन शक्तिप्रकारः इति तादृशशक्तिज्ञानस्य शाब्दबोधहेतुत्वे न कश्च दोषः इति वदन्तो जातिशक्तिवादिनः इत्थं वाच्याः , गोत्वादिजातौ शक्तिस्वीकारे गोत्वत्वमेव शक्यतावच्छेदकं स्यात् , निरवच्छिन्नशक्त्यस्वीकारात् ।

तच्च गोत्वत्वं गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम् । एवञ्च सकलगोव्यक्तीनां शक्यतावच्छेदके प्रविष्टत्वेन भवतां मतेऽतिगौरवात् । न चाकाशपदे प्राचां मते निरवच्छिन्नशक्तिवज्जातावपि निरवच्छिन्नशक्तिस्वीकारे न गौरवापत्तिरिति वाच्यम् , एवमपि स्वाश्रयाश्रयत्वसम्बन्धेन शक्तिप्रकारकधीहेतुत्वापेक्षया , साक्षात्सम्बन्धेन तत्प्रकारकधीहेतुत्वे लाघवात् । तस्मात् जातौ शक्तिस्वीकारे गौरवात् , जात्याकृतिविशिष्टव्यक्तावेवशक्तिरिति नैयायिकानामुद्घोषः । प्रपञ्चितञ्चैतत् न्यायसिद्धान्तमुक्तावल्याम् -

**" तत्र जातावेव शक्तिर्नतु व्यक्तौ , व्यभिचारदानन्त्याच्च । व्यक्तिं विना जातिभानस्यासम्भवाद् व्यक्तेरपि भानमिति केचित् । तन्न , शक्तिं विना व्यक्तिभानानुपपत्तेः । न च व्यक्तौ लक्षणा , अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधात् । न च व्यक्तिशक्तावानन्त्यम् , सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात् । न चानुगमः , गोत्वादेरेवानुगमकत्वात् । किञ्च " गौः शक्येति " शक्तिग्रहो यदि , तदा व्यक्तौ शक्तिः । यदि ' गोत्वं शक्यमिति ' शक्तिग्रहः तदा गोत्वप्रकारकं पदार्थस्मरणं शाब्दबोधश्च न स्यात् , समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् । किञ्च गोत्वे यदि शक्तिः , तदा गोत्वत्वं शक्यतावच्छेदकं**

**वाच्यम् , गोत्वत्वं तु गवेतरसमवेतत्वे सति सकलगोसमवेतत्वम् , तथा च गोव्यक्तीनां शक्यतावच्छेदके अनुप्रवेशात् तत्र गौरवम् । तस्माज्जात्याकृतिविशिष्टव्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति**[544] **"** इति ।

### ➢गौतमसम्मतिः

न्यायसूत्रकृता गौतमेनापि शब्दशक्तिपरीक्षाप्रकरणे विशिष्ट एव शक्तिः सिद्धान्तिता । तथाहि सूत्रम् –**' व्यक्त्याकृति जातयस्तु पदार्थः '** । अत्र तु शब्दः विशेषणार्थः । तेनायमेव विशेष्यते , यत् व्यक्त्याकृतिजातिनियतेनाङ्गाङ्गिभावः नास्ति । क्वचित् व्यक्तेः , क्वचिच्च जातेः प्राधान्यम् । कुत्र व्यक्तेः , कुत्र च जातेः प्राधान्यमिति चेत् ? उच्यते यत्र भेदविवक्षा , विशेषज्ञानं च करणीयं भवति , तत्र व्यक्तिः प्रधानम् , जात्याकृत्याङ्गम् । यत्र तु भेदोऽविवक्षितः , सामान्यञ्च ज्ञानं तत्र जातिः प्रधानमङ्गन्तु व्यक्ताकृती । आकृतेः प्राधान्यं कुत्र भवतीति विषये यद्यपि भाष्यकृता न किमप्युक्तम् , किन्तु तत्तदाचार्यैः मृद्गवादिष्वाकृतेः प्राधान्यं प्रत्यपादि ।

उक्तसूत्रस्य व्याख्यानं कुर्वता वात्स्यायनेन भणितम् – **" तु शब्दः विशेषणार्थः । किं विशिष्यते ? प्रधानाङ्गभावस्यानियमेन पदार्थत्वमिति । यदा हि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानम् , अङ्गं तु जात्याकृती । यदा तु भेदोऽविवक्षितः सामान्यगतिश्च , तदा जातिः प्रधानम् , अङ्गं तु व्यक्त्याकृती । तदेतद्बहुलं प्रयोगेषु । आकृतेश्च प्रधानभाव उत्प्रेक्षितव्यः** [545]**" इति ।**

---

[544] **न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे पृ. २७६-२८० ।**

[545] **वात्स्यायनभाष्ये २.२.६८ ।**

यद्यपि " **या शब्दसमूहत्यागपरिग्रह संख्या वृद्ध्यपचयवर्ण-समासानुबन्धानाव्यक्तावुपचाराद्व्यक्तिः**[546] " इति सूत्रेण व्यक्तिवादोऽपि प्रतिपादितः , किन्तु पूर्वपक्षरूपेणेदं सूत्रमुपन्यस्तमस्ति । अतएवाग्रे तस्य प्रतिषेधसूत्रमस्ति ' **न तदनवस्थानात्** [547]' व्याख्यातञ्चैतत्तत्रैव भाष्ये– " **न व्यक्तिः पदार्थः । कस्मात् ? अनवस्थानात् , या शब्दप्रकृतिभिर्यो विशेष्यते स गोशब्दार्थः । या गौस्तिष्ठति या गौर्निषिण्णा इति न द्रव्यमात्रमविशिष्टं जात्या विनाभिधीयते , किं तर्हि ? जातिविशिष्टम् । तस्मान्न व्यक्तिपदार्थः । एवं समूहादिषु द्रष्टव्यम्** [548]" इति ।

एवं व्यक्तेरपदार्थत्वे कथं तद्विषयको व्यवहारः उत्पद्यत इत्याकाङ्क्षायां तत्रैव उक्तम् – " **यदि न व्यक्तिः पदार्थः , कथं तर्हि व्यक्तावुपचार इति । निमित्तादतद्भावेऽपि तदुपचारः** " इति ।

एवमेव सत्त्वव्यवस्थासिद्धेराकृत्यपेक्षितत्वादाकृतेरपि पदार्थत्वमुपपादितम्- " **आकृतिः**[549] **, तदपेक्षत्वात् सत्त्वव्यवस्थान-सिद्धेः** " इति ।

अयम्भावः समीपस्थद्रव्याणां विकृष्टद्रव्याणाञ्चावयवव्यूह एवाकृतिः । तस्यां गृह्यमाणायामेव ' **अयं गौः** ' ' **अयमश्वः** ' इति सत्त्वव्यवस्थोपपद्यते । तस्मात् यस्य ग्रहणात् सत्त्वव्यवस्था भवति , तमपि शब्दोऽभिधातुमर्हति , अतः आकृतिरपि शब्दार्थः ।

**एवमाकृतेः पदार्थत्वमुपपाद्य तत्रैव खण्डितं भाष्ये** [550] **।**

---

[546] **न्यायदर्शने २.२.६२ ।**

[547] **न्यायदर्शने २.२.६३ ।**

[548] **वात्स्यायनभाष्ये २.२.६३ ।**

[549] **न्यायदर्शने २.२.६५ ।**

**“ नैतदुपपद्यते यस्य जात्या योगस्तत्र जातिविशिष्टमभिधीयते गौरिति । न चावयवव्यूहस्य जात्यायोगः , कस्य तर्हि ? नियतावयवव्यूहस्य द्रव्यस्य । तस्मान्नाकृतिः पदार्थः** ” इति ।

जातिवादसमर्थनपरमपि सूत्रं सूत्रितं तत्रैव **“ व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः**[551] ” । अयम्भावः – **“ गां प्रोक्षय ” “ गामनय ” “ गां देहि ”** इत्यादीनि प्रोक्षणानयनदानादिकर्माणि मृद्गवके न प्रयुज्यन्ते , जातेरभावात् , व्यक्ताकृती तु वर्तते एव । यदि जातेः पदार्थत्वं न स्यात् , तदा मृद्गवकेऽपि प्रोक्षणादीनां प्रसङ्गः प्राप्नोति , व्यक्त्याकृत्योर्विद्यमानत्वात् । तस्मात् जातिरपि पदार्थः एवं जातेः पदार्थत्वं प्रतिपाद्य खण्डितम् – **“ न आकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः**[552] **”** इति । व्याख्यातञ्चैतत् तत्रैव वात्स्यायनेन – **“ जातेरभिव्यक्तिराकृतिव्यक्तौ अपेक्षते , नागृह्यमाणायामाकृतौ व्यक्तौ च जातिमात्रं शुद्धं गृह्यते , तस्मान्न जातिः पदार्थः** [553]**” इति** ।

एवञ्च न केवलं व्यक्तिः , न वा आकृतिः , न वा जातिः पदार्थः , अपि तु जात्याकृतिविशिष्टव्यक्तिरेव पदार्थः – इति नैयायिकाणां राद्धान्तः तत्र गुणविशेषाश्रितं द्रव्यं व्यक्तिरित्युच्यते । यस्माच्च जातितल्लिङ्गानि च ज्ञाप्यन्ते सा चाकृतिः । समानबुद्धिप्रसवात्मिका जातिरिति तेषां स्वरूपम् ।

---

[550] **वात्स्यायनभाष्ये २.२.६५ ।**

[551] **न्यायदर्शने २.२.६६ ।**

[552] **न्यायदर्शने २.२.६७ ।**

[553] **वात्स्यायनेन व्याख्यातं न्यायदर्शने २.२.६७ ।**

तथा च सूत्राणि – **“ व्यक्तिगुणविशेषाश्रयो मूर्त्तिः ” “ आकृतिजाति लिङ्गाख्या ” “ समानप्रसवात्मिका जातिः [554]”** इति।

## ➢आचार्यमम्मटमतम्

साहित्यशास्त्रतत्त्वविदः आचार्यमम्मटास्तु जाति-गुण-क्रियायदृच्छेति चतुर्विधं शब्दानां प्रवृत्तिनिमित्तं स्वीकुर्वन्ति । तत्र यद्यपि **“ गां नय अश्वञ्चानय ”** इत्यादिप्रवृत्तिनिवृत्त्यादिरूपव्यवहारा व्यक्तावेव सम्भवन्ति , अतस्तत्रैव शब्दसंकेतो युज्यते , किन्त्वानन्त्यात् , व्यभिचाराच्च न व्यक्तौ संकेत इति प्रतिपादितम् । तथाहि यदि व्यक्तौ शक्तिः स्वीक्रियते , तदा व्यक्तिविशेषे शक्तिग्रहेऽपि व्यक्त्यन्तरबोधो न स्यात् , संकेतग्रहाभावात् , तत्रापि शक्तिः कल्प्यते चेत् , तदा नानाव्यक्तिषु शक्तिकल्पने महद्गौरवम् । यदि सर्वासु गोरूपादिषु व्यक्तिषु शक्तिर्न स्वीक्रियते , किन्तु कासुचिदेवेत्युच्यते चेत् , तर्हि व्यभिचारः ।

व्यभिचारो हि नाम नियमभङ्गः । तथाहि यत्र यस्य शब्दस्य संकेतग्रहः , तस्य तेन शब्देन बोधो भवतीति नियमः । एवञ्च संकेतग्रहं विनापि कासाञ्चिद् गोव्यक्तीनां गोशब्दात् बोधे , उक्तनियमभङ्गरूपव्यभिचारः सम्भवत्येव।

किञ्च यदि व्यक्तौ संकेतग्रहः स्वीक्रियते , तदा **‘ गौ शुक्लः चलो डित्थः ’** इत्यादीनां विभिन्नप्रवृत्तिनिमित्तकानां शब्दानां विषयविभागो न स्यात् , सर्वेषां संकेतग्रहविषयभूताया व्यक्तेरैक्यात् । तस्मादुपाधावेव शक्तिः । उपाधिश्च द्विविधः – वस्तुधर्मः यदृच्छासन्निवेशितश्च । वस्तुधर्मोऽपि द्विविधः , सिद्धो साध्यश्च । सिद्धोऽपि द्विविधो विशेषाधानहेतुः , प्राणप्रदश्च । तत्र विशेषाधानहेतुर्गुणं , प्राणप्रदो जातिः । एवञ्च जातिगुणक्रियायदृच्छेति

---

[554] **न्यायदर्शने २.२.६९-७१ ।**

चत्वारि प्रवृत्तिनिमित्तम् शब्दानामिति मम्मटाशयः । प्रतिपादितञ्चैतत् सर्वं काव्यप्रकाशे -

" **यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव , तथाप्यानन्त्याद् व्यभिचारान्न तत्र संकेतः कर्त्तुः न युज्यते इति गौः शुक्लः चलो डित्थः इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपधावेव संकेतः । उपाधिश्च द्विविधः वस्तुधर्मः , वक्तृयदृच्छासन्निवेशितश्च । वस्तुधर्मोऽपि द्विविधः सिद्धः साध्यश्च । उक्तं हि वाक्यपदीये – " न हि गौः स्वरूपेण गौर्नाप्यगौः , गोत्वाभिसम्बन्धात्तु गौः " इति । द्वितीयो गुणः , शुक्लादिना हि लब्धासत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरीभूतावयवः क्रियारूपः । डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यते इति सोऽयं संज्ञारूपो यदृच्छात्मकः** [555]" इति ।

स्वकीयेऽस्मिन् सिद्धान्ते भाष्यसम्मतिरपि प्रदर्शिता मम्मटेन । तथाहि भाष्यम्– " **चतुष्टयीशब्दानां प्रवृत्तिः जातिशब्दाः गुणशब्दाः क्रियाशब्दाः , यदृच्छाशब्दाश्चतुर्थाः** [556]" इति । व्याख्यातञ्च तत्रै नागेशेनोद्द्योते – " **शब्दानामर्थे या प्रवृत्तिः , सा प्रवृत्तिनिमित्तभेदात् प्रकारचतुष्टयवतीत्यर्थः**[557] " इति ।

---

[555] **काव्यप्रकाशद्वितीयोल्लासे पृ. ४५ ।**

[556] **महाभाष्ये ऋलृक्सूत्रस्थे ।**

[557] **नागेशभट्टेन उद्द्योतटीकायां व्याख्यातं महाभाष्ये ऋलृक्सूत्रस्थे ।**

## ➢वैयाकरणसम्मतिः

वस्तुतस्तु – **" न हि आकृतिपदार्थकस्य द्रव्यं न पदार्थः**[558] **"** इति सरूपसूत्रस्य भाष्यात् जातिविशिष्टं द्रव्यं , द्रव्यविशिष्टा जातिः वेति विशिष्ट एव वाच्यता , तथैवाभवादिति वैयाकरणानां सम्मतिः । यद्यप्युभयोरुभयं पदार्थः ' इति भाष्योक्त्या जातिव्यक्तयोः पृथक् वाच्यता प्रतीयते , तथापि – **' कस्यचित्किञ्चित् प्रधानभूतं , किञ्चिद्गुणभूतम् । आकृतिपदार्थस्य आकृतिः प्रधानभूता , द्रव्यं गुणभूतम् , द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता** [559]' इति उत्तरभाष्याद् विशिष्टशक्तावेवभाष्यतात्पर्यं प्रतीयते । अत एवोक्तं भूषणे– **" वस्तुतस्तु न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः इति भाष्याद् विशिष्टं वाच्यम्** [560]**"** इति । नागेशेनापि उक्तम्– **" वस्तुतस्तु न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः इति सरूपसूत्रभाष्याद्विशिष्टमेव वाच्यम् तथैवानुभवात् । अनुभवसिद्धस्यापलापानर्हत्वाच्च** [561]" इति । एवञ्च न केवलायां जातौ व्यक्तौ वा संकेतोऽपि तु विशिष्ट एवेति तात्पर्यम् । विशकलितयोर्जातिव्यक्त्योः शक्यत्वे , अनुभवस्मरणयोः समानविषयकत्व-नियमेन गोपदात् **' गोत्वम् '** इत्याकारकनिर्विकल्पकस्मरणापत्तिः ।

ननु विशिष्टे शक्तिस्वीकारे यदा जातेः प्राधान्यं विवक्ष्यते , तदा द्विवचनबहुवचनादयो नोत्पत्स्यन्ते , जातेरैक्यादिति चेदुच्यते – यदि जातेः प्राधान्यविवक्षा , तदा द्रव्यगतं द्वित्वादिकमादाय द्विवचनादिप्रयोगः । व्यक्तिविशिष्टजातिबोधे च व्यक्तिनिष्ठा प्रकारता निरवच्छिन्नैव । सा

---

[558] **पतञ्जलिमहाभाष्ये १.२.६४ ।**

[559] **पतञ्जलिमहाभाष्ये १.२.६४ ।**

[560] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २३६ ।**

[561] **परमलघुमञ्जूषायां नामार्थविचारे पृ. १०८ ।**

निरवच्छिन्ना अपि प्रकारता जात्यानुगतीकृता , अतएवैकस्या व्यक्तेः प्रकारत्वेऽपि व्यक्त्यन्तरे न कार्यान्वयानुपपत्तिः ।

### ➢ प्रभाटीकाकारमतम्

यद्वा ‘ **जातिः पदार्थः** ’ इति पक्षे विषयितया व्यक्तिरिति पक्षेऽपि विषयितया जातिविशिष्टव्यक्तिरिति मते प्रकारितया , विशेष्यितया वा , त्रिकं पदार्थ इति पक्षे ‘ **विषयितयावच्छेदकत्वं शक्तिः** ’ इत्यभ्युपगमेन विरोधपरिहारः , अवच्छेदकतात्वेनावच्छेदकत्वस्यैक्यात् । वस्तुतस्तु ‘ **स्वमोर्नपुंसकात्** [562]’ ‘ **ह्रस्वो नपुंसके प्रातिपदिकस्य** [563]’ इत्यादिप्रामाण्येन ‘ **वेधाः** ’ ‘ **वाग्** ’ ‘ **मधु** ’ इत्यादौ प्रकृतिमात्रेण पुंस्त्वादेर्बोधेन च लिङ्गमपि प्रातिपदिकार्थ इत्याशयेनाह – त्रिकमिति ।

ननु-

“ **स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥** ” [564]

इत्यादिनोक्तमवयवसंस्थानविशेषरूपं लिङ्गं न शास्त्रीयप्रक्रियानिर्वाहकम् , ‘ **दारान्** ’ ‘ **स्वसा** ’ इत्यादौ नत्व-टापोरभावप्रसङ्गात् । उक्तवचने केशपदं योनिपरम् ‘ **लोमशः** ’ इतिपदं लिङ्गपरम् , केशादिपरत्वे गत्वादिष्वव्याप्तेः । न चाहार्यारोपेण तत्प्रतीत्या नत्वादिकार्योपपत्तिः , आरोपाभावेऽपि तादृशप्रयोगाणामिष्टत्वात् । आहार्यरोपश्च बाधसमकालिकेच्छाजन्यज्ञानरूपः । ‘ **रक्तः स्फटिकः** ’ इत्यत्र यथा ‘ **स्फटिको रक्तत्वाभाववान्** ’ इति बाधसत्त्वेऽपि

---

[562] **पाणिनीयाष्टाध्याय्यां ७.१.३३ ।**

[563] **पाणिनीयाष्टाध्याय्यां १.२.४७ ।**

[564] **पतञ्जलिमहाभाष्ये ४.१.३ ।**

‘ **रक्तत्ववान् स्फटिकः** ’ इति इच्छाजन्यज्ञानं जायते । अत एव भाषुअकृता निर्णीतं लिङ्गमाह – सत्त्वरज इति । पदार्थमात्रस्य सत्त्वरजस्तमस्त्रित्रयात्मकप्रकृतेरेवोत्पत्तिः । तथा च सर्वेषु पदार्थेषु कस्यचिद्गुणस्याधिक्यम् , कस्यचिन्नूनत्वम् , स्थितिश्च । तत्राधिक्यं पुंस्त्वम् , न्यूनत्वं स्त्रीत्वम् स्थितिमात्रं नपुंसकत्वम् गुणानामुत्कर्षापकर्ष-साम्यावस्थात्रयसाधारणस्थितिमात्रं नपुंसकत्वमिति यावत् ।

साम्यावस्थायां स्पृष्टेरभावेन व्यवहाराभावाद् गुणत्रयस्य स्थितिमात्रमित्यर्थः । इदञ्च लिङ्गमर्थनिष्ठं केवलान्वयी सर्वं लिङ्गं सर्वेष्वर्थेषु वर्तते । अत एव एकस्मिन्नपि ‘ **अयं पदार्थः** ’ ‘ **इयं व्यक्तिः** ’ ‘ **इदं वस्तु** ’ इति लिङ्गत्रयप्रतीतिः । ननु लिङ्गस्यार्थनिष्ठत्वे ‘ **पुँल्लिङ्गः शब्दः** ’ इत्यादिव्यवहारानुपपत्तिः , तादृशव्यवहारस्योपनिमित्तकत्वात् , पुंस्त्वादिकं लिङ्गं प्रतीयतेऽस्मादिति यौगिकत्वाद्वा ।

अन्ये तु उपचयापचयादेर्विरुद्धस्य एकत्रार्थे आत्मा , ब्रह्म इत्यादिनिर्विकाराणि चासम्भवात् शब्दनिष्ठमेव तदित्याहुः , पुंस्त्वविशिष्टोऽयमर्थो इति तु आरोपात् । तस्मात्-

“ **तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः ।**
**अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः ॥**[565] ”

इति वाक्यपदीयाज्जातिरेव लिङ्गमित्याहुः ।

ननु तस्य केवलान्वयित्वेनाव्यावर्तकतया लौकिकस्त्रीत्वविशिष्टया छाग्यापि ‘ **पशुना यजेत** ’ इति श्रुतिबोधित्यागापत्तिरिति चेन्न , ‘ **छागो वा मन्त्रवर्णनात्** ’ इति मीमांसकोक्तेन मन्त्रेषु पुंस्त्वस्य वर्णनरूपलिङ्गेन लौकिकपुंस्त्वविशिष्टेनैव याग इति निर्णयसम्भवात् ।

---

[565] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य लिङ्गसमुद्देशे ४ ।**

किञ्च नियतपुँल्लिङ्गादिशब्दानां लौकिकलिङ्गविशिष्टे शास्त्रीये लिङ्गे शक्तिस्वीकारेणानतिप्रसङ्गाच्च ।

अर्थनिष्ठत्वे च अचेतनचेतनवाचकानां मध्वादिशब्दानां मक्षिकादौ पुन्नपुंसकत्वे , वसन्ते च पुंस्त्वमिति व्यवस्थाया अनुपपत्तिः । एवं ‘ स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्त्रियां धने ’ इत्यादिषु अपि अर्थनिष्ठत्वे नियमोच्छेदापत्तिः । शब्दनिष्ठत्वे च ह्रस्वत्वदीर्घत्वोदात्तत्वानुदात्तत्ववत् स्त्रीत्वपुंस्त्वविरुद्धधर्मवत्त्वत् शब्दा भिद्यन्ते । केषाञ्चिदनेकलिङ्गव्यवहारस्तु समानानुपूर्वीकत्वेन तेषां तन्त्रेणानुकरणादुपपद्यते । एवञ्च समानानुपूर्वीकेषु तटादिषु लिङ्गत्रयम्, छागादिषु लिङ्गद्वयम् , पदार्थादिष्वेकमिति सर्वत्र मुख्य एव लिङ्गव्यवहारः । जात्यादिभेदेन भिन्ना ये शब्दास्तेषु शब्देषु स्थितं यल्लिङ्गं तत् स्वा ( लिङ्गं ) श्रयशब्दवाच्यम् ।

### ➢नागेशमतम्

लिङ्गमपि नामार्थः प्रत्ययानां द्योतकत्वात् । अन्यथा वागुपादानादिशब्देभ्य इयं तव वागिति स्त्रीत्वबोधनापत्तेः । अयमिति व्यवहारविषयत्वं पुंस्त्वम् । इयमिति व्यवहारविषयत्वं क्लीवत्वम् । इति विलक्षणं शास्त्रीयं स्त्रीपुंनपुंसकत्वम् । अत एव खट्वादिशब्दवाच्यस्य स्तनकेशादिमत्वरूपलौकिकस्त्रीत्वाभावेऽपि तद्वाचकाट्टाबादि-प्रत्ययः ।

यद्यपि खट्वादिशब्दवाच्यार्थस्य न हि स्तनकेशादिस्त्रीत्वचिह्नवत्त्वं तथापि शास्त्रीयलिङ्गस्य विलक्षणत्वादेव खट्वादिशब्दात् स्त्रीत्वद्योतकटाबादिप्रत्ययाः भवन्तीति । लिङ्गस्य नामार्थत्वविषये शब्दशास्त्रेऽपि बहुशः प्रतिपादितमस्ति । कतिपये प्रत्यया हि लिङ्गमाश्रित्य विधीयन्ते आदेशाश्च । यथा हि “ **स्वमनोर्नपुंसकात्**[566] ” “ **ह्रस्वो नपुंसके**

---

[566] **पाणिनीयाष्टाध्याय्यां ७.१.२३ ।**

**प्रातिपदिकस्य** [567]" " **तस्माच्छसो न पुंसि**[568] " इत्यादिसूत्रेषु तत्तल्लिङ्गवाचकस्य ग्रहणं दृश्यते । कैयटेनापि उक्तम् - " **अर्थधर्मत्वाल्लिङ्गस्य नपुंसकार्थाभिधायित्वादस्थ्यादयो नपुंसकशब्देन अभिधीयन्ते** [569]" इति । नैतावन्मात्रमपि तु " **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** [570]" इति लिङ्गमात्राधिक्ये प्रथमाविभक्तिर्विधीयते । एतेन अपि प्रातिपदिकस्यैव लिङ्गवाचकत्वं ध्वन्यते । रामाशब्दादौ टाभादेर्लिङ्गवाचकत्वभानं तु प्रत्ययद्योत्यार्थप्राधान्येनैव । यदि टाबादेरेव स्त्रीत्ववाचकत्वं स्यात्तदा ' **स्त्रियाम्** [571]' इत्यधिकृत्य टाबादयः न स्युः । यद्यपि लोके-

**" स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥** [572]"

इति लिङ्गनिर्णयः शास्त्रे तु न तथा । शास्त्रे हि लिङ्गं विवक्षाधीनमेव । तत्रापि कथ्यते संस्त्यानविवक्षायां स्त्रीप्रसवविवक्षायां पुमान् उभयोरविवक्षायां नपुंसकमिति अथवा गुणानां हि तिरोभावविवक्षायां स्त्री आविर्भावविवक्षायां पुमान् अभावविवक्षायां नपुंसकम् अथवा गुणानामाधिक्ये पुमान् तेषामपचयविवक्षायां स्त्री उभयोरभावविवक्षायां नपुंसकमिति । लिङ्गस्य विवक्षाधीनत्वादेव एक एव शब्दः त्रिष्वेव लिङ्गेषु व्यवहारः । यथा – तटः तटी तटम् इति । यत्र प्रचण्डत्वविवक्षा तत्र तटः , यत्र

---

[567] **पाणिनीयाष्टाध्याय्यां १.२.४७ ।**
[568] **पाणिनीयाष्टाध्याय्यां ६.१.१०३ ।**
[569] **कैयटकृतायां प्रदीपटीकायाम् ।**
[570] **पाणिनीयाष्टाध्याय्यां २.३.४६ ।**
[571] **पाणिनीयाष्टाध्याय्यां ४.१.३ ।**
[572] **पतञ्जलिमहाभाष्ये ४.१.३ ।**

चाह्लादकताविवक्षा तत्र तटी स्त्रीति नामेव पेशलमित्युक्तेः , यत्र च नोभयविवक्षा तत्र तटमिति । यथाह हरिरपि –

**“ भाववत्त्वदृशः शिष्टाः शब्दार्थेषु व्यवस्थिताः ।**

**यद्यद् धर्मेऽङ्गतामेति लिङ्गं तत्तत्प्रचक्षते ॥** [573]” इति ।

एवमेव दार पत्नी कलत्रमिति सर्वेऽपि एकस्यैव पत्न्यर्थस्य बोधकाः किन्तु प्रकृत्यनुसारेण त्रिष्वेव लिङ्गेषु प्रयुक्ताः । एवमेव गृहाः गृहाणि च । आह्लादकत्वादेव स्थलीति । उभयप्रकृतिकत्वात्मनो नपुंसकम् । केनचिदुच्यते –

**“ नपुंसकमिति ज्ञात्वाप्रियायै प्रेषितं मनः ।**

**स तु तत्रैव रमते हताः पाणिनिना वयम् ॥** ” इति ।

### ➢पण्डितश्रीनित्यानन्दपन्तपर्वतीयमतम्

लौकिकलिङ्गमेव नामार्थः । तच्च -

**“ स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।**

**उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥** [574]”

इत्यादिनावयवविशेषसंस्थानरूपम् । दारानित्यादौ पुंस्त्वारोपेण तत्प्रयुक्तकार्यम् । **“ रात्राह्नाहाः पुंसि** [575]” इत्यादिलिङ्गानुशासनस्यैवोक्तार्थे मानत्वात् । अतएव **‘ पशुना यजेत ’** इत्यनेन न पशुस्त्रियागमिति भावः ।

परे तु –

**“ स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।**

**एतयोरन्तरं यच्च तदभावे नपुंसकम् ॥**[576] ”

---

[573] **भर्तृहरिवाक्यपदीये ३.१३.२७ ।**

[574] **पतञ्जलिमहाभाष्ये ४.१.३ ।**

[575] **पाणिनीयाष्टाध्याय्यां २.४.२९ ।**

[576] **पतञ्जलिमहाभाष्ये ४.१.३ ।**

इत्यत्र केशशब्दस्य भगवाचकत्वाद्भगवत्त्वं स्त्रीत्वम् , लोमशः पुरुषः इत्यत्र लोमन् शब्दस्य शिश्नवाचित्वाच्छिश्नवत्त्वं पुंस्त्वम् । तत्तदाकारमात्रधारकत्वं नपुंसकत्वम् । इति परिभाषितलिङ्गस्यासार्वत्रिकत्वेन दारानित्यादौ नत्वानापत्त्या , " **स्त्रियाम्** [577]" इति सूत्रे " **अवश्यं कश्चित् स्वकृतान्त आस्थेयः** " इत्यादिना सार्वत्रिकगुणावस्थारूपपारिभाषिकलिङ्गस्य शास्त्रीयकार्योप-योगितायाः भाष्यकृताभ्युपगमे अपि गुरुसंज्ञाविज्ञानान्नात्वादिशास्त्रप्रवृत्तौ लौकिक-लिङ्गस्याप्याश्रयणं पुमादिसंज्ञानां संख्यासंज्ञाया इव अधिकसंग्रहार्थं प्रवृत्तत्वेऽपि मतसिद्धार्थनिरासार्थमप्रवृत्तेः । अतएव –

" **आविर्भावतिरोभावस्थितिश्चेत्यप्यपायिनः ।**

**धर्मा मूर्त्तिषु सर्वासु लिङ्गत्वेन व्यवस्थिताः ॥** [578]"

इत्यत्रापि नालौकिकलिङगमपि समुच्चारितवान् हरिः । तत्र सति सम्भवे सामानाधिकरण्यसम्बन्धेन लौकिकपुंस्त्वविशिष्टशास्त्रीयलिङ्ग एव पुमादिशब्दानां शक्तिः न केवलाशास्त्रीये , नापि लौकिके असम्भवे तु शास्त्रीय एव । अतएव ' पशुना यजेत ' इत्यादौ पशुस्त्रिया कृते यागे वैगुण्यम् । तत्र लौकिकपुंस्त्वविशिष्ट-शास्त्रीयपुंस्त्वस्यैव शब्देन प्रतिपादनादित्याहुः ।

प्रत्ययानां वाचकत्वाङ्गीकारे ' **इत्यर्थः** ' । " **प्रकृतिप्रत्ययार्थयोः सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्यैव प्राधान्यम्** " इति न्यायेन प्रत्ययार्थस्य लिङ्गस्य प्राधान्यापत्तेश्चेत्यपि दूषणमत्रावसेयम् । पूर्वोक्तलौकिकलिङ्गतो विलक्षणमिति भावः । अतएव ईदृग्विलक्षणपुंस्त्वादिस्वीकारादेव ।

---

[577] **पाणिनीयाष्टाध्याय्यां ४.१.३ ।**

[578] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य लिङ्गसमुद्देशे का. १३ ।**

## ➢शब्दार्थरत्ने तारानाथतर्कवाचस्पतिमतम्

लिङ्गसहितं प्रागुक्तद्वयमित्यर्थः लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म एव तद्विशेषश्च पुं नपुंसकत्वादिः । तथा हि सर्वेषां त्रिगुणप्रकृतिकार्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु लिङ्गविशेष इति कल्प्यते स च विशेषः शास्त्रे इत्थभ्यधायि । विकृतसत्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं सत्वस्याधिक्ये पुंस्त्वम् अल्पत्वे स्त्रीत्वमिति । एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपात् असति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्वत्र तस्य विशेषणत्वं शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थौचित्यात् -

**" न सोऽस्ति प्रत्ययलोके यः शब्दानुगमादृते ।**
**अनुबिद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ [579]"**

इति प्रागुक्तेः शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा । नोचेत् श्रोत्रादिभिः सिद्धोऽपि असौ अर्थेऽवभासते इति हर्य्युक्तेश्च शब्दानां नामार्थतावगतेः । तथा प्रातिपदिकार्थः । अभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः । युक्तञ्चैतत् पुंलिङ्गः शब्द इतिव्यवहारात् स्वमोर्नपुंसकादिति सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्मत्वमन्यथा एतेषु लिङ्गाद्यन्वयापत्तेः व्यवहारसूत्रनिर्देशासङ्गत्यापत्तेश्च । तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्मविशेषरूपभेदकसद्भावात् । उक्तञ्च भाष्ये एकार्थे शब्दान्यत्वादृष्टं लिङ्गान्यत्वमिति । एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्व्विकत्वेनैव वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति ।

---

[579] **भर्तृहरिवाक्यपदीये १.१२४ ।**

“ **त्रिकं प्रातिपदिकार्थः** [580]” इति पक्षे तु जातिर्व्यक्तिर्लिङ्गञ्च नामार्थः । तच्च पुंस्त्वस्त्रीत्वनपुंसकत्वरूपं लिङ्गं द्विविधम् , लौकिकम् , शास्त्रीय व्यवहारः हेतुश्च । तत्र लौकिकलिङ्गं–

**“ स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।**

**उभयोरन्तरं यच्च , तदभावे नपुंसकम् ॥** [581]” इति ।

इति भाष्योक्त्या अवयवसंस्थानविशेषमेव । तत्रकेशशब्दस्य भगवाचकत्वं , लोमशब्दस्य च लिङ्गवाचकत्वम् । एवञ्च भगवत्त्वं स्तनवत्त्वं स्त्रीत्वं , लिङ्गत्वं पुंस्त्वम् , उभयोरभाववत्वञ्च नपुंसकत्वमित्यर्थः । किन्त्वेतल्लिङ्गं न शास्त्रीयकार्यनिर्वाहकम् , ‘ **खट्वा** ’ इत्यादावचेतने तादृशस्त्रीत्वस्याभावेन टावाद्यनुपपत्तिः । अतः शास्त्रीयनिर्वाहकं लिङ्गञ्च सत्त्वरजस्तमसानुपचयः पुंस्त्वं , तेषामपचयः स्त्रीत्वं , तेषां स्थितिर्नपुंसकत्वञ्चेति नागेशाशयः[582] ।

“ **संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः** ” इति भाष्येऽपि[583] प्रसवसंस्त्यानशब्दाभ्यामुपचयापचयावेवोक्तौ पतञ्जलिना । व्याख्यातञ्च तत्रैव कैयटेन– “ **सस्त्यानमिति तिरोभावः , प्रवृत्तिराविर्भावः साम्यावस्थास्थितिः**[584] । परमलघुमञ्जूषायान्तु **- “ अयमिति व्यवहारविषयत्वं पुंस्त्वम् ” इयमिति व्यवहारविषयत्वं स्त्रीत्वमिदमिति व्यवहारविषयत्वं क्लीवत्वमिति विलक्षणं शास्त्रीयं**

---

**[580] वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२१० ।**

**[581] पतञ्जलिमहाभाष्ये ४.१.३ ।**

**[582]अचेतनखट्वा वृक्षादिसाधारणं लिङ्गन्तु , सत्त्वादीनां गुणानामुपचयापचयस्थितिरूपं क्रमेणपुंस्त्रीनपुंसकाख्यम् – लघुशब्देन्दुशेखरे स्त्रीप्रत्यये पृ. २६४ ।**

**[583] पतञ्जलिमहाभाष्ये ४.१.३ ।**

**[584] पतञ्जलिमहाभाष्यप्रदीपे ४.१.३ ।**

**स्त्रीपुंन्नपुंसकत्वम्** [585]" इति शब्दव्यवहारविषयत्वेन लिङ्गव्यवस्था-प्रतिपादितास्ति।

एवञ्च " **प्रतिक्षणं परिणामिनो हि सर्वे भावा ऋते चितिशक्तेः** " इति सिद्धान्तात् चितिशक्तिं विना सर्वेषामेव पदार्थानां प्रतिक्षणपरिणामित्वेना-विर्भावतिरोभावधर्मकत्वं , मध्ये स्थितेरप्यवश्यम्भावितेन स्थितिधर्मत्वञ्च सर्वेषां सम्भवति । अतो गुणानामुपचयापचयादिरूपं लिङ्गं चेतनाचेतनसाधारणम् । तादृशलिङ्गस्वीकारे न खट्वादीनां टाबाद्यनुपपत्तिः । उक्तञ्च परमलघुमञ्जूषायां –" **अतएव खट्वादिशब्दवाच्यस्य स्तनकेशादिमत्त्वरूपलौकिकस्त्रीत्वाभावेऽपि तद्वाचकात् टाबादि प्रत्ययः** [586]" इति।

ननु गुणानामुपचयाद्यवस्थात्रयस्य पदार्थमात्रवृत्तित्वेन सर्वेषां शब्दानां सर्वलिङगकत्वापत्तिरिति चेदुच्यते कस्यचिच्छब्दस्योपचयावस्थावैशिष्ट्येन बोधकत्वम् ' कस्यचिदपचयावस्थावैशिष्ट्येन , कस्यचित्स्थित्य-वस्थावैशिष्ट्येन , कस्यचिदवस्थाद्वयवैशिष्ट्येन , कस्यचिच्चावस्था-त्रयवैशिष्ट्येन बोधकत्वमिति लिङ्गानुशासनेन वृद्धव्यवहारेण न निर्णीयते। एवञ्च ये शब्दाः अवस्थाद्वयवैशिष्ट्येन बोधकाः ते द्विलिङ्गकाः , ये तु अवस्थात्रयवैशिष्ट्येन बोधकाः ते एव सर्वलिङ्गकाः , अन्ये तु नियतलिङ्गा एवेति न कश्चन दोषलेशः ।

न च विकाररहिते ब्रह्मणि , आत्मनि चोपचयादिरूपलिङ्गस्याभावात् पुंस्त्वनपुंसकत्वव्यवहारानुपपत्तिरिति वाच्यम् , ब्रह्मणि तादृशलिङ्ग-

---

585 **परमलघुमञ्जूषायां नामार्थविचारे पृ. १०९ ।**

586 **परमलघुमञ्जूषायां नामार्थविचारे पृ. १०९ ।**

विशिष्टस्यापि निखिलप्रपञ्चस्यारोपितत्वेनोपचयादिरूप-लिङ्गस्यापि परम्परासम्बन्धेन तत्र विद्यमानत्वेन दोषाभावात् । कौण्डभट्टेनापि अभिहितम्– " **सत्त्वरजस्तमोगुणानां साम्यावस्था-नपुंसकत्वम् , आधिक्यं पुंस्त्वमपचयः स्त्रीत्वम्** [587] " इति । एवञ्च ' **स्तनकेशवती** ' इत्यादिना प्रतिपादितं लिङ्गं लौकिकं गुणानामुपचयादिरूपञ्च शास्त्रीयकार्यनिर्वाहकमिति सिद्धान्तः ।

वस्तुतस्तु ' **स्तनकेशवती नारी** [588]' इत्यादिना प्रतिपादितस्य लिङ्गस्यापि शास्त्रीयकार्यनिर्वाहकत्वे नास्ति काचन विप्रतिपत्तिः । न च ' **खट्वा** ' इत्यादौ चेतनरहिते तादृशस्त्रीत्वस्याभावात् टाप् न स्यादिति वाच्यम् लिङ्गानुशासनेन " **रात्राह्नाहाः पुंसि** [589]" इत्यादिसूत्रेण तत्तल्लिङ्गविधानसामर्थ्यात् , तादृशलिङ्गस्याचेतनादावारोपेण दोषाभावात् । गुणानामुपचयादिरूपस्य लिङ्गस्याविकारिणि ब्रह्मण्यारोपादिवत् ।

तच्च लिङ्गं शब्दनिष्ठम् , तत्तच्छब्दाभिधेयञ्च [590]। लिङ्गस्य शब्दनिष्ठत्वे च ' **तस्माच्छसो नः पुंसि** [591]' ' **स्वमोर्नपुंसकात्** [592]' ' **ह्रस्वो नपुंसके प्रातिपदिकस्य** ' [593] इति सूत्राणि कुर्वतां महर्षिपाणिनीनामपि सम्मतिः । तथाहि –

---

[587] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २४४ ।**

[588] **पतञ्जलिमहाभाष्ये ४.१.३ ।**

[589] **पाणिनीयाष्टाध्याय्यां २.१.२९ ।**

[590] **तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यञ्च - वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २४४ ।**

[591] **पाणिनीयाष्टाध्याय्यां ६.१.१०३ ।**

[592] **पाणिनीयाष्टाध्याय्यां ७.१.२३ ।**

[593] **पाणिनीयाष्टाध्याय्यां १.२.४३ ।**

प्रथमसूत्रार्थः पुंसि वर्तमानात् शब्दात् विहितस्य पूर्वसवर्णदीर्घात्परस्य शसोऽवयवस्य सस्य न भवति। द्वितीयसूत्रार्थस्तु नपुंसके विद्यमानादङ्गात् परयोः स्वमोर्लुक् भवति । तृतीयसूत्रस्यायमर्थः – क्लीवेऽजन्तस्य प्रातिपदिकस्य ह्रस्वो भवति । एवञ्च तादृशेऽर्थे सति यदि लिङ्गस्य शब्दनिष्ठत्वं न स्वीक्रियते , तदा शब्दानां तत्तल्लिङ्गे विद्यमानाभावात् सूत्रार्थासंगतिः , प्रयोगासिद्धिश्च स्यात् । अतो लिङ्गस्य शब्दनिष्ठत्वमवश्यमेव स्वीकार्यम् । अतएव " **पुंल्लिङ्गः शब्दः** " इत्यादिलोकव्यवहारोऽपि संगच्छते। महाभाष्यकृता पतञ्जलिनापि उक्तम् – " **एकार्थशब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्च** [594]" इति।

अयम्भावः एकस्मिन्नेवार्थे पुष्यः , तारका , नक्षत्रम् सर्वलिङ्गदर्शनात् ' **कुटीरः** ' इत्यादौ रेफरूपस्यावयवस्योपजनेऽपि लिङगभेददर्शनादन्यदेव शब्दनिष्ठं लिङ्गम्।

किञ्चोपचयापचयादिरूपस्य विरूद्धधर्मस्यैकस्मिन्नेवार्थ आत्मा ब्रह्म इत्याद्यविकारिण्यर्थे चासम्भवात् लिङ्गस्य शब्दनिष्ठत्वमेव स्वीकार्यम् , अन्यथैकस्य एव शब्दस्यैकस्मिन्नेवार्थे विभिन्नलिङ्गव्यवहारः असंगतः स्यात् । शब्दनिष्ठत्वे च ह्रस्वत्वदीर्घत्वोदात्तत्वानुदात्तत्ववत् स्त्रीत्वपुंस्त्वादिविरुद्धधर्मवत्वात् शब्दाः भिद्यन्ते। केषाञ्चिदनेकलिङ्गत्व-व्यवहारस्तु समानानुपूर्वीकेषु तटादिषु लिङगत्रयं छागादिषु लिङ्गद्वयं , रामादिष्वेकमेव लिङ्गम् । उक्तञ्च कौण्डभट्टेन – " **केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानाम-भेदारोपात्** [595]" इति । तद्व्याख्यातृणां प्रभाकाराणान्तु –

---

[594] **पतञ्जलिमहाभाष्ये पाणिनीयसूत्रे ४.१.३।**

[595] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २४५।**

**" वस्तुतस्तु लिङ्गभेदेन भिन्न एव शब्दो भेदस्त्वरोपित एव** [596]" इति सम्मतिः । तस्मात् गुणानामुपचयापचयादिरूपं पारिभाषिकं लिङ्गं शास्त्रीयकार्योपयोग्यवश्यमेव स्वीकार्यम् , अतएव **अवश्यं कश्चित् स्वकृतान्तः आस्थेयः** " इति भाष्ये[597] उक्तम् । तस्यायम्भावः " **स्तनकेशवती** " इति स्मृत्युक्तलक्षणलक्षितस्य लिङ्गस्यासार्वत्रिकत्वेन , ' **दारान्** ' इत्यादौ नत्वं न स्यात् , अतः सार्वत्रिकगुणावस्थारूपपारिभाषिकं लिङ्गं शास्त्रीयकार्योपयोग्यावश्यमेव स्वीकार्यम् ।

तच्च लिङ्गं शब्दवाच्यं शब्दनिष्ठञ्च । तस्य शब्दनिष्ठत्व एवैकस्मिन्नेवार्थे अयं पदार्थः , इयं व्यक्तिः , इदं वस्तु ' इति लिङ्गत्रयविषयको व्यवहार उपपद्यते । अन्यथा तु पुरुषरूपार्थस्य पुंस्त्वविशिष्टत्वेन तत्र ( इयमेव ) व्यवहारसंगतिः स्यादिति सिद्धान्तः ।

### ➢लिङगस्यार्थनिष्ठता

वस्तुतस्तु - ' **स्तनकेशवती नारी** ' इत्यादिलौकिकलिङ्गवत् , गुणानामुपचयापचयादिरूपं पारिभाषिकं लिङ्गमप्यर्थनिष्ठमेव । न च लिङ्गस्यार्थनिष्ठत्व उपचयादिरूपस्य विरुद्धधर्मस्यैकस्मिन्नसम्भवेनैकस्य शब्दस्य सर्वेषु लिङ्गेषु व्यवहारो च स्यादिति वाच्यम् , उपचयादिविवक्षाया एव प्रयोगनियामकत्वेन , यदोपचयविवक्षा , तदा पुंल्लिङ्गः , यदा अपचयविवक्षा तदा स्त्रीलिङ्गः , यदा च सामान्यविवक्षा तदा नपुंसकमिति विवक्षयैव सर्वलिङ्गस्य व्यवहारोपपत्तिसम्भवात् । अतएव ' **सामान्ये नपुंसकम्** ' इत्यादिव्यवहाराः संगच्छन्ते । उपचयापचयसत्त्वेऽपि तदविवक्षायां नपुंसकमिति भावः । ' **आत्मा** ' ' **ब्रह्म** '

---

[596] **वैयाकरणभूषणसारे नामार्थनिर्णये प्रभाटीकायां पृ.२४५ ।**

[597] **पतञ्जलिमहाभाष्ये ४.१.३ ।**

इत्याद्यविकारिण्यर्थेऽपि सर्वसाध्यसत्वेन परम्परया तत्राप्युपचयापचययोः सम्भवात् ।

" **तस्माच्छसो नः पुंसि**[598] " इत्यादौ तु पुंसि विद्यमानार्थवाचकाच्छब्दात् विहितस्य शसोऽवयवस्य पूर्वसवर्णदीर्घात्परस्य न भवतीत्यर्थेन लिङ्गस्यार्थनिष्ठत्वेऽपि न सूत्रार्थासंगतिः । अतएव " **ह्रस्वो नपुंसके प्रातिपदिकस्य** [599]" इति सूत्रं व्याकुर्वता नागेशेन भणितम् – " **क्लीवपदार्थे वर्तमानस्याजन्तस्येत्येव सामर्थ्यात्प्रातिपदिकलाभे प्रातिपदिकस्येत्येतत् सत्त्वप्रधानस्येत्यर्थकम्** [600]" इति ।

तत्र किन्नाम सत्त्वप्रधानत्वम् ? इत्याकाङ्क्षायामुक्तं तत्रैव शेखरदीपिकाख्ये टिप्पणे नित्यानन्दपर्वतीयेन – " **सत्त्वप्रधानत्वञ्च यत्किञ्चित् प्रधानतानिरूपिताप्रधानत्वासमानाधिकरण-लिङ्गान्वयितावच्छेदकरूपावच्छन्न –प्रधानताप्रयोजकत्वम्** [601]" इति । आभ्यां नागेशनित्यानन्दपर्वतीयोक्ताभ्यां व्याख्यानाभ्यां लिङ्गस्यार्थनिष्ठत्वमेव सिद्ध्यति । तस्मादर्थनिष्ठं लिङ्गं शब्दवाच्यमिति मे मतिः ।

भर्तृहरिणा तु स्त्रित्वादिरूपा जातिरेव लिङ्गमित्युक्तम् । तथा च –

" **तिस्रो जातय एवैता केषाञ्चित् समवस्थिताः ।**
**अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥**[602] " इति ।

**कौण्डभट्टैरुक्तं चतुष्कं – संख्यासहितं त्रिकमित्यर्थः**[603] **।**

---

[598] **पाणिनीयाष्टाध्याय्यां ६.१.१०३ ।**

[599] **पाणिनीयाष्टाध्याय्यां १.२.४७ ।**

[600] **लघुशब्देन्दुशेखरे अजन्तनपुंसकलिङ्गप्रकरणे पृ . २८६ ।**

[601] **नित्यानन्दपर्वतीयेन ।**

[602] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य लिङ्गसमुद्देशे का.४ ।**

### ➢प्रभाटीकाकारमतम्

संख्यामात्रस्य विभक्त्यर्थत्वम् , शेषचतुष्टयस्य प्रातिपदिकार्थत्वम् आहुः । तत्र घटत्वविशिष्टे घटे , लिङ्गे , संख्यायां , कारके च खण्डशः शक्तिः । घटे लिङ्गसंख्ययोर्विशेषणतया अन्वयः । कारकस्य तु विशेष्यत्वम् । लिङ्गसंख्याविशिष्टे घटादौ शक्तिकल्पनायान्तु संसर्गस्यापि शक्तिविषयतापत्त्या गौरवम् , ‘ **राजपुरुषः** ’ इत्यादौ संख्यानवच्छिन्न-बोधासिद्धिश्च । विशकलिते शक्तिस्वीकारे तु न संख्यानवच्छिन्न-बोधानुपपत्तिः , संख्याविषयकतात्पर्यग्राहका-भावेनानुपस्थितेः । परे तु घटे लिङ्गादिविशिष्टे च शक्तिरिति न संख्यानवच्छिन्नबोधानुपपत्तिः ।

### ➢नागेशमतम्

संख्यापि नामार्थो विभक्तीनां द्योतकत्वात् । अत एव “ **आदिर्ञिटुडवः** [604]” इति सूत्रे आदिरिति बहुत्वे एकवचनम् । वाच्यत्वेऽन्वयव्यतिरेकाभ्यां जसं विना नामार्थबहुत्वप्रतीत्यभावापत्तेः ।

### ➢किरणवलीकारमतम्

संख्यायाः आपि प्रातिपदिकार्थत्वं प्रतिपादयति । एकत्वादि प्रातिपदिकार्थ एव सुबादीनां संख्यायाः प्रकाशकत्वात् न तु वाचकत्वादिति । अस्माद्धेतोः हि “ **आदिर्ञिटुडवः** [605]” इति सूत्रे आदिः बहुवचनविवक्षायामपि एकवचनविवक्षा भवति , अर्थस्तु आदिस्था ञिटुडवः इत्रि । संख्याया विभक्तेर्वाच्यार्थत्वे तद्भावे तद्भावोऽन्वयः तदभावे तदभावो व्यतिरेकस्ताभ्याम् जस्विभक्तिं विना आदिरित्येकवचनेन नामर्थे

---

**[603] वैयाकरणभूषणसारे नामार्थनिर्णये , पृ.२१५ , चौ.सं.प्र ।**

**[604] पाणिनीयाष्टाध्याय्यां १.३.५ ।**

**[605] पाणिनीयाष्टाध्याय्यां १.३.५ ।**

बहुत्वस्य प्रतीतेरभावस्य आपत्तेः प्राप्तेरिति । वाच्यत्वे सति संख्याया अत्र एकवचनेन बहुवचनप्रतीतिर्नैव स्तात् किन्तु तस्याः प्रत्ययद्योतकत्वेनात्र तद्बोधः । नैयायिकास्तु संख्या विभक्त्यर्थो लाघवादिति मन्यन्ते । अन्ये तु सा सविभक्तिकप्रातिपदिकार्थ इत्यपि आमनन्ति । यथाह हरिरपि –

**" वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः ।**

**यद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः ॥** [606]" इति ।

## ➢पण्डितश्रीनित्यानन्दपन्तपर्वतीयमतम्

वैयाकरणानां मते प्रकृतीनामेव संख्यावाचकत्वम् , विभक्तयस्तु द्योतका एवेति भावः । न चान्वयव्यतिरेकाभ्यां विभक्तीनामेव संख्यावाचकत्वकल्पनमुचितमिति वाच्यम् । ' **दधि पश्य** ' ' **मधु आनय** ' इत्यादौ विभक्तिं विनापि संख्याकारकप्रतीत्या व्यतिरेकव्यभिचारात् । नैयायिकानां मते संख्यापि विभक्तेरर्थः , न प्रकृतेरर्थः । अनन्यप्रकृतीनां शक्ततावच्छेदकत्वकल्पनापेक्षया विभक्तीनां तत्कल्पने लाघवम् । वस्तुतस्तु -

**" वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः ।**

**यद्वा संख्यावतोऽर्थस्य समुदायोऽभिदायकः ॥**[607] "

इति हरिकारिकावलात् न संख्यावाचिका प्रकृतिः , न वा विभक्तिः । किन्तु घट इति विभक्त्यन्तसमुदायः संख्याविशिष्टवाचकः । शक्ततावच्छेदकस्तु तत्तदानुपूर्वीति न कश्चिद्दोष इति ।

प्रकृतेः जसं विनापि बहुत्वप्रतीतेर्व्यतिरेकव्यभिचारः स्पष्ट एवेति भावः ।

---

[606] **भर्तृहरिवाक्यपदीये २.१६४ ।**

[607] **भर्तृहरिवाक्यपदीये २.१६४ ।**

**➢शब्दार्थरत्ने तारानाथतर्कवाचस्पतिमतम्**

संख्यासहितं जात्यादित्रिकमित्यर्थः । तत्र च नामार्थसंख्यानुवादेनैव विभक्त्यर्थसंख्याबोधात् नान्यतरवैयर्थ्यं सम्भेदेनान्यतरवैयर्थ्यमित्युक्तेः । यत्र च वृत्ति शब्देषु विभक्तिविशेषो नास्ति तत्र यौगिकत्वयोगरूढत्वं स्वीकर्त्रोर्मतेऽपि संख्याविशेषानवगमात् संख्यात्वेनैकत्वसंख्यायाः नामार्थतया तथैव तत्र बोधः न तु द्वित्वादेरिति बोध्यम् । तथाहि उक्तं हरिणा-

**" अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः ।**
**कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद् यथोच्यते ॥ [608]" इति ।**

कपिञ्जलानालभेतेति वाक्ये बहुत्वसंख्यायां प्रथमोपस्थापितत्वात् त्रित्वस्यैव यथा ग्रहणं तथा संख्यायां प्रथमोपस्थितत्वादेकत्वग्रहणमिति फलितार्थः वृत्तौ नामार्थसंख्यैवाभेदसंख्येति व्यपदिश्यते नास्ति भेदो विशेषग्रहो यस्या इति व्युत्पत्तेः । उक्तञ्च वाक्यपदीये –

**" भेदानां वा परित्यागात् संख्यात्मा स तथाविधिः ।**
**व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते ॥**
**अगृहीतविशेषेण यथा रूपेण रूपवान् ।**
**प्रख्यायते न शुक्लादि भेदापोहस्तु गम्यते ॥** [609]" इति ।

भेदानां विशेषाणामेकत्वत्वादीनां परित्यागादग्रहणात् तद्रूपात् व्यापारात् संख्यात्मा संख्या स्वरूपं स एकत्वादिः तथाविधिः अभेदैकत्वपदव्यपदेश्य इत्यर्थः । स क इत्यपेक्षायामाह जातिभागस्य एकत्वत्वादेः भेदापोहेन विशेषाग्रहेण वर्त्तते य इति । तत्र दृष्टान्तो यथा - रूपवान् घट इत्यादौ रूपत्वादिनैव रूपबोधः न शुक्लत्वादिना तथा संख्यात्वेनैव एकत्वबोध इति समुदितार्थः । तथा च विशेष

---

[608] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य वृत्तिसमुद्देशे का. ९९ ।**

[609] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य वृत्तिसमुद्देशे का. १०१, १२० ।**

धर्मप्रकारकप्रतीतिविषयसंख्यैव वृत्तौ नामार्थः असति बाधके तु प्रथमोपस्थितत्वादेकत्वरूपैव तत्र सा गृह्यते इयमेव संख्यानुद्भूतावयत्वेन मञ्जूषादौ व्यवहृता । अलुक्समासादौ च विभक्त्या विशेषरूपेण तदुपस्थापनात्तथैव बोधः ।

**➢संख्याऽपि नामार्थः**

‘ **चतुष्कं प्रातिपदिकार्थः** ’ इति पक्षे संख्या अपि नामार्थः । विभक्तयस्तु द्योतिका एव । विभक्तीनां वाच्यत्वे तु ‘ **आदिर्ञिटुडवः** [610]’ इति सूत्रे ‘ **आदिः** ’ इत्येकवचनासंगतिः तत्र बहुत्वस्य विवक्षाणात् । सूत्रार्थस्तु उपदेशे धातोराद्याः ञिटुडवः इत्संज्ञकाः भवन्ति । एवञ्च विभक्तिवाच्यत्वेऽन्वयव्यतिरेकाभ्यां बहुवचनविभक्तिसत्त्व एव बहुत्वं प्रतीयते , न तु तदभावे । उक्तसूत्रे तु एकवचनविभक्तिप्रयोगेऽपि नामार्थबहुत्वप्रतीतेर्विभक्तीनां द्योतकत्वमेव न्याय्यम् । उक्तञ्च नागेशेन अपि– “ **संख्यापि नामार्थः , विभक्तीनां द्योतकत्वात् । अतएव “ आदिर्ञिटुडवः ” इति सूत्रे आदिरिति बहुत्व एकवचनम् । वाच्यत्वेऽन्वयव्यतिरेकाभ्यां जसं विना नामार्थबहुत्वप्रतीत्य-भावापत्तेः**[611] ” इति ।

ननु संख्यायाः प्रकृत्यर्थेऽनन्तानां प्रकृतीनां शक्ततावच्छेदकत्व-कल्पने गौरवात् , स्वल्पविभक्तीनां शक्ततावच्छेदकत्वं लाघवात् , विभक्तय एव संख्यावाचिकाः , न तु प्रकृतिरिति चेन्न , धातुप्रत्ययप्रत्ययान्ततदादिभिन्नो योऽर्थवान् शब्दः तत्त्वं प्रातिपदिकत्वमिति अनुगतस्यप्रातिपदिकत्वस्य शक्ततावच्छेदकत्वे गौरवाभावात् , न चानन्तशक्ततावच्छेदकत्वाभावे

---

**610 पाणिनीयाष्टाध्याय्यां १.३.५ ।**

**611 परमलघुमञ्जूषायां नामार्थविचारे पृ. २९७ ।**

शक्त्यानन्त्यम् । तस्मात् प्रकृतीनामेव संख्यावाचकत्वम् , विभक्तयस्तु द्योतिका एव ।

अन्वयव्यतिरेकाभ्यां विभक्तयो वाचिकाः । तथाहि **‘ रामः ’** इत्यत्र सोः सत्त्व एवैकत्वप्रतीतिः , **‘ रामौ ’** इत्यादौ तदाभावे नैकत्वप्रतीतिरित्यन्वयव्यतिरेकः । तस्मादन्वयव्यतिरेकयोरेव बोधकत्व-जनकत्वयोर्नियामकत्वात् **‘ सु ’** आदिविभक्तीनामेव संख्यावाचक-त्वमुचितमिति तु न युक्तम् – **‘ दधि पश्य ’ ‘ मधु आनय ’** इत्यादौ विभक्तिं विनापि संख्याकारकयोर्बोधात् व्यतिरेकव्यभिचारेणान्य-लभ्यत्वाच्च न संख्या विभक्तेरर्थः ‘ अनन्यलभ्यो हि शब्दार्थः ’ इति नियमात् ।

तत्र **‘ विभक्तिस्मरणाद् बोधः ’** इति कथनमपि अनुचितमेव , तद्वाचकविभक्तिमजानतोऽपि तादृशबोधोत्पत्तिदर्शनात् । **‘ एकत्वादयो विभक्त्यर्थाः** [612]’ इति भाष्यस्य तु विभक्तिद्योत्यत्वेन बोधिता इत्यर्थः । उक्तञ्च तत्रैव नागेशेन –“ **वस्तुतस्तु एकत्वादयो विभक्त्यर्थाः ” इत्यस्य सूत्रे प्राधान्येन विभक्तिद्योत्यत्वेन बोधिताः इत्यर्थः । एवं कर्मादयो विभक्त्यर्था इत्यस्यापि** [613]” इति । तस्मात् संख्याप्रातिपदिकार्थः ।

**कौण्डभट्टैरुक्तं पञ्चकं – कारकसहितं चतुष्कमित्यर्थः**[614] **।**

### ➢प्रभाटीकाकारमतम्

पञ्चकं नामार्थ इति स्वीकारे “ **नामार्थप्रकारकबोधं प्रति बिभक्तिजन्योपस्थितिः कारणम् ” इति** कार्यकारणभावविलयापत्तिः ,

---

[612] **पतञ्जलिमहाभाष्ये २.३.१ ।**

[613] **महाभाष्योद्द्योते पाणिनीयसूत्रे २.३.१ ।**

[614] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २१५ ।**

इष्टापत्तेश्च , द्योत्यार्थमादाय तदुपपत्तेश्च । लिङ्गानुशासनस्येति वक्ष्यमाणयुक्त्या संख्याकारकयोर्विभक्त्यर्थत्वेऽपि लिङ्गस्य तु लिङ्गानुशासनप्रामाण्यात् ‘ **गीः** ’ ‘ **पुः** ’ इत्यादौ प्रत्ययं विनापि बोधदर्शनाच्च नामार्थत्वमेव युक्तम् ।

### ➢नागेशमतम्

कारकमपि प्रातिपदिकार्थ इति पञ्चकं प्रातिपदिकार्थः । ननु अन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यमिति चेन्न । दधि तिष्ठति , दधि पश्य इत्यादौ कर्मादि कारकप्रतीतेः प्रत्ययं विनापि सिद्धत्वात् । न च लुप्तप्रत्ययस्मरणात्तत्प्रतीतिरिति वाच्यं प्रत्ययलोपमजानतोऽपि नामत एव तत्प्रतीतेः ।

### ➢किरणवलीकारमतम्

कारकस्यापि नामार्थत्वेन जातिव्यक्तिलिङ्गसंख्याकारकाणि इति पञ्च नामार्था । न च कारकः प्रत्ययार्थः इति वाच्यं तल्लुकस्थले दधि अस्ति , दधि पश्य इत्यादौ लुकमजानतोऽपि तद्बोधात् ।

### ➢पण्डितश्रीनित्यानन्दपन्तपर्वतीयमतम्

**“ एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकन्तथा ।**
**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥**[615] ”

इत्यनेन स्वार्थद्रव्यलिङ्गसंख्याकारकाणां नामार्थबोधनात् । स्पष्टं चेदं ‘ **अनभिहिते** [616]’ इति सूत्रभाष्ये ।

---

[615] **वैयाकणभूषणसारे नामार्थनिर्णये का.सं.२५ ।**

[616] **पाणिनीयाष्टाध्याय्यां २.३.१ ।**

## ➤शब्दार्थरत्ने तारानाथतर्कवाचस्पतिमतम्

कारकसहितं चतुष्कमित्यर्थः । तदेतदन्यत्रस्पष्टतयोच्यते-

**“ स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च ।**
**अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमाः ॥** [617]” इति ।

चतुष्कादिमतद्वये विभक्तेर्निरर्थकत्वं द्योतकत्वं वेति बोध्यम् । द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः । स्याद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायक इत्युक्तेर्विभक्तेर्द्योतकताया एव स्वीकारादिति ।

अत्र च जातिद्रव्ये न वैशेषिकमतसिद्धे जातिसामान्यादिवाचकनाम्नां वाच्यस्य द्रव्यनात्मकतया तत्र च जात्यभावेनार्थबोधानुपपत्तेः किन्तु पारिभाषिके एव । तत्र जातिर्नाम तु अतलादिबोध्या ब्रह्मसत्तादिरूपा उपाधिसामान्यविशेषणधर्मादिपदवाच्या व्यक्तिर्वृत्तिर्धर्मविशेषः अनुगतिकाकारप्रतीतिजनकतया च तस्या एकत्वम् । सम्बन्धभेदात् सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते इत्यादिप्रागुक्तवाक्यपदीयात् सत्ता ब्रह्मसत्तेत्यर्थः । सामान्यमेकत्वकरं विशेषश्च पृथकत्वकृदिति तुल्यार्थता हि सामान्यं विशेषश्च विपर्य्यय इति चोक्तेः । एकत्वकरमेकाकारप्रतीतिजनकमेवं तुल्यार्थता अपीति मञ्जूषा । एवञ्चाकाशादिपदानामपि सामान्यार्थकता तत्तदुपाधिभेदेन भिन्नासु आकाशव्यक्तिष्वनुगताकारबुद्धि-जनकतयाकाशत्वजातिसिद्धेः यथोक्तं हरिणा-

**“ संयोगादिद्रव्यभेदेन कल्पितेषु पृथक्स्थितेः ।**
**तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥** [618]” इति ।

---

[617] **वैयाकरणभूषणसारे नामार्थनिर्णये दर्पणटीकायां पृ. २५१ ।**

[618] **भर्तृहरिवाक्यपदीये ।**

द्रव्यन्तु व्यक्तिः विशेष्यं लिङ्गसंख्याद्यन्वयि सत्त्वादिपदाभिधेयम् वस्तूपलक्षणं यत्रेत्यादिप्रागुक्तेः । इत्येवं सामान्यतो नामार्था निरुपिताः विशेषतस्तु कोषादौ।

एवञ्च कारकमपि प्रातिपदिकार्थः इति नागेशाशयः । उक्तञ्च – " **कारकमपि प्रातिपदिकार्थ इति पञ्चकं प्रातिपदिकार्थः** [619]" इति । ' **अनभिहिते** [620]' इति सूत्रं कुर्वता पाणिनिनापि संख्याकारकयोर्नामार्थत्वं स्वीकृतम् । संख्याकारकयोर्विभक्त्यर्थत्वे तु सूत्रवैयर्थ्यमेवोपपादितम् – तथा चोक्तं भाष्ये–" **यद्येकत्वादयो विभक्त्यार्थाः , अथ हि कर्मादयो विभक्त्यर्थाः , नार्थोऽनभिहिताधिकारेण** [621]" इति । तस्मात् संख्याकारकयोर्नामार्थत्वे पाणिनेरपि सम्मतिरस्ति । एवञ्च पञ्चकं प्रातिपदिकार्थः । ननु ' **पञ्चकं प्रातिपदिकार्थः** ' **इति स्वीकारे नामार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितिः कारणम्** ' इति कार्यकारणभावविलयापत्तिरिति चेन्न , द्योत्यार्थमादाय तदुपपत्तेः ।

भर्त्तृहरिणा तु न केवलायाः प्रकृतेः विभक्तेर्वा संख्यावाचकत्वं स्वीकृतम् , किन्तु ' **घटः** ' इति विभक्त्यन्तसमुदाय एव संख्याविशिष्टघटवाचक इति तेषामभिप्रायः । तथा चोक्तं वाक्यपदीये–

" **वाचिका द्योतिकाः वा स्युः द्वित्वादीनां विभक्तयः ।**
**यद्वा संख्यावतोऽर्थस्य समुदायोऽभिधायकः ॥** [622]" इति ।

---

[619] **परमलघुमञ्जूषायां नामार्थविचारे पृ. २९८ ।**

[620] **पाणिनीयाष्टाध्याय्यां २.३.१ ।**

[621] **पातञ्जलमहाभाष्ये पा.सू.२.३.१ ।**

[622] **भर्तृहरिवाक्यपदीये २.१६४ ।**

## ➢कौण्डभट्टमतम्

लिङ्गानुशासनप्रामाण्यात् ‘ **गीः**’ ‘ **पू** ’ इत्यादौ प्रत्ययं विनापि स्त्रीत्वादिकस्य बोधदर्शनात् लिङ्गस्य नामार्थत्वं स्वीकुर्वन्ति[623]। अतएव वागादिशब्देभ्यो टाबादिकं विनापि स्त्रीत्वस्य , रामज्ञानादिशब्देभ्यः व्युत्पत्तिपक्षे पुंन्नपुंसकयोर्बोधः सर्वजनीनानुभवसिद्धः संगच्छते । उक्तञ्च -

**“ स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्याकर्मादिरेव च ।**

**अमी पञ्चैव नामार्थस्त्रयः केचिदग्रिमाः ॥ [624]” इति ।**

एवञ्च लिङ्गस्य नामार्थत्वमेव युक्तम् । संख्याकारकयोस्तु प्रकृतिप्रत्यययोरन्यतमस्य वाच्यत्वे तुल्यवलत्वात् कदाचित् विभक्तिवाच्यत्वं प्रकृतिवाच्यत्वञ्च सम्भवति । भणितञ्च भूषणसारे - **‘ अतएवैषु पक्षेषु न निर्वन्धः**[625] ’ इति । हरिणापि **- ‘ द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः** [626]’ इत्यनेन पक्षद्वयमेव प्रतिपादितम् । विभक्तीनां द्योतकत्वं वाचकत्वं वेति मतभेदो संख्याकारकयोरेव न तु लिङ्गस्य , **‘ द्वित्वादीनाम् ’** इत्युक्तेः ।

ननु संख्याकारकयोर्विभक्तिवाच्यत्वपक्षे ‘ **दधि पश्य** ’ इत्यादावमादि विभक्तिं विना संख्याकारकयोर्बोधो न स्यात् । **‘ विभक्तिस्मरणाद्बोधः ’** इति तु न वक्तुं युक्तम् । **“ उच्चारितशब्दः प्रत्ययायको नानुच्चारितः**[627] ” इति भाष्यविरोधात् , इति चेदुच्यते , तत्र तत्र लुग्बिधायकशास्त्रबलेन प्रकृतेरेव संख्याकारकयोः शक्तिकल्पनान्न दोषः ।

---

**[623] लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्च - वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २५० ।**

**[624] वैयाकरणभूषणसारे नामार्थनिर्णये दर्पणटीकायां पृ.२५१ ।**

**[625] वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २१६ ।**

**[626] भर्तृहरिवाक्यपदीये २.१६४ ।**

**[627] पतञ्जलिमहाभाष्ये १.१.३९**

विभक्तिवाच्यत्वे सुप्त्वाद्यनेकधर्माणां शक्ततावच्छेदकत्वे गौरवम् , संख्याकारकयोः प्रातिपदिकवाच्यत्वे तु संकेतसम्बन्धेन नामपदत्वं प्रातिपदिकपदवत्त्वमेव शक्ततावच्छेदकमिति प्रकृतिवाच्यत्वे लाघवम् इत्यपि अविचारितरमणीयमेव , संकेतसम्बन्धेन नामपदत्वं घटादिपदवत्त्वं वा शक्ततावच्छेदकमित्यत्र विनिगमनाविरहेण , प्रकृतिवाच्यत्वपक्षेऽपि लाघवाभावात् ।

तस्मात् संख्याकारकयोर्विभक्तिवाच्यत्वं प्रकृतिवाच्यत्वञ्चेति उभयपक्षः , किन्तु जातिव्यक्तिलिङ्गञ्चेति प्रातिपदिकार्थमेवेति कौण्डाभट्टाभिप्रायः ।

ननु लिङ्गस्यापि प्रातिपदिकार्थत्वस्वीकारे " **प्रातिपदिकार्थलिङ्गपरिमानवचनमात्रे प्रथमा** [628]" इति सूत्रे लिङ्गग्रहणस्य वैयर्थ्यापत्तिः , प्रातिपदिकार्थेनैव लिङ्गस्यापि ग्रहणसम्भवादिति चेदत्रोच्यते उक्तसूत्रस्य प्रातिपदिकार्थविषयेऽपि मतभेदः प्राचीननव्ययोर्दृश्यते ।

तत्र प्राचीनास्तु – लिङ्गग्रहणसामर्थ्यान्नियतोपस्थितिकः[629] प्रातिपदिकार्थः इति स्वीकुर्वन्ति । तस्यायमर्थः – यस्मिन् प्रातिपदिके उच्चरिते यस्यार्थस्य नियमेन भानं भवति सः प्रातिपदिकार्थः इति । यद्यपि परिष्कृतोऽयं प्रातिपदिकार्थ बृहद्रूपेण न्यायभाषया तत्तट्टीकाग्रन्थेषु किन्तु विस्तरभयात् प्रकृतेऽनुपयोगाच्च नोल्लिख्यते । एवञ्च प्राचीनानां मते नियतलिङ्गानां शब्दानां लिङ्गमपि प्रातिपदिकार्थ एव । उक्तञ्च – " **अलिङ्गाः नियतलिङ्गाश्च प्रातिपदिकार्थमात्रे इत्यस्योदाहरणम्**

---

[628] **पाणिनीयाष्टाध्याय्यां २.३.४६ ।**

[629] **वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे पृ. १५६ ।**

। **यथा – उच्चैः नीचैः , कृष्णः , श्री ज्ञानम्** [630] । अत्र **' कृष्ण ' ' श्री ' ' ज्ञान '** पदेभ्यो जातिव्यक्तिलिङ्गानाञ्च उपस्थितिनियता , पुंस्त्व-स्त्रीत्व-नपुंसकत्वरूपस्य लिङ्गस्य तत्र नियतत्वात् । एवञ्च प्राचीनमते प्रातिपदिकार्थेति सूत्रे नियतलिङ्गानां शब्दानां वाच्यस्य लिङ्गस्यापि प्रातिपदिकार्थरूपेण ग्रहणं न सम्भवति , तटशब्दोच्चारणे कस्यापि लिङ्गस्य नियमेनोपस्थित्यभावात् । तस्मात् तेभ्यः अनियतलिङ्गेभ्यः शब्देभ्यः प्रथमा सिद्ध्यर्थं सूत्रे लिङ्गग्रहणात् । उक्तञ्च तत्रैव **" अनियतलिङ्गास्तु लिङ्गमात्राद्याधिक्यस्य "** तटः , तटी , तटम् ।

एवञ्च लिङ्गस्य प्रातिपदिकार्थत्वस्वीकारेऽपि प्रातिपदिकार्थेति सूत्रे लिङ्गग्रणं कुर्वता पाणिनिना सह न कश्चन विरोधः ।

### ➢नागेशसम्मतिः

प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थ इति स्वीकुर्वन्ति । अर्थात् तेषां मते तत्तत्पदप्रवृत्तिनिमित्तविशिष्टः तत्प्रातिपदिकार्थः । तत्र वैशिष्ट्यञ्च स्वावच्छिन्नविषयताश्रयत्वं , स्वतादात्म्यमेतदन्यतरसम्बन्धेन । भणितञ्च नागेशेन - **' परे त्वत्र सूत्रे प्रातिप्रदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्च** [631]**'** इति । एवञ्च नागेशमते घटः रामः इत्यादौ पुंस्त्वं , पुंस्त्वत्वयोर्वा न प्रातिपदिकार्थत्वम् , तस्य प्रवृत्तिनिमित्तत्वाभावात् ।

प्रवृत्तिनिमित्तत्वञ्च – प्रातिपदिकविशिष्टत्वम् । वैशिष्ट्यञ्च स्ववाच्यत्व स्ववाच्यवृत्तित्व , स्ववाच्योपस्थितिप्रकारतावत्त्व । तत्र

---

[630] **वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे पृ. १५६ ।**

[631] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४२५ ।**

प्रकारतावैशिष्ट्यञ्चस्वानाश्रयत्व , स्वावच्छेदकानाश्रयत्व एतदन्यतर-सम्बन्धेन।

पुंस्त्वपुंस्त्वत्वयोस्तु न प्रवृत्तिनिमित्तत्वं , घटपदनिष्ठशक्तिज्ञानाधीनोपस्थितिप्रयोज्यशाब्दबोधीयपदार्थान्तरनिष्ठप्रकारतानिरूपितविशेष्यत्वासामानाधिकरणापदार्थसम्बन्धावच्छिन्न प्रकारतायाः पुंस्त्वनिष्ठत्वात् । यतोहि घटघटत्वयोः सम्बन्धो घटपदवाच्यः , किन्तु घटपुंस्त्वयोः सम्बन्धो न घटवाच्यः । अतो घटनिष्ठविशेष्यतानिरूपिता या पुंस्त्वनिष्ठाप्रकारता सा अपदार्थसम्बन्धावच्छिन्ना । एवञ्चापदार्थसम्बन्धावच्छिन्नप्रकारताश्रयत्वं पुंस्त्वे , न तु घटत्वे । अतो घटत्वं प्रवृत्तिनिमित्तम् , किन्तु पुंस्त्वं न प्रवृत्तिनिमित्तमिति भावः ।

एवं शब्दप्रवृत्तिनिमित्तत्वन्तु भेदभेदत्वयोर्नाव्याहतम् । **‘ पार्थ एव धनुर्धरः’** इत्यत्र ‘ पार्थत्वावच्छिन्न प्रतियोगिकभेदसम्बन्धाभाववान् धनुर्धरः इति बोधात् । प्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतायाश्च , अभावत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतायाश्च भेदे सत्त्वात् , विशेषत्वासमानाधिकरणप्रकारताया अभावात् ।

एवञ्च **‘ सत्कृतालंकृतां कन्यां यो ददाति सः कूकुदः ’** अत्र सत्कारपूर्वकालंकारविशिष्टकन्याकर्मकदानकर्तृत्ववाचक कूकुदशब्दस्य सत्कारादय प्रवृत्तिनिमित्तम् । पशुशब्दस्य लोमलाङ्गूलवति विशिष्टे शक्तिस्वीकारात् , तस्य लोमत्वादयः प्रवृत्तिनिमित्तम् ।

तस्मात् नागेशमते प्रवृत्तिनिमित्ततदाश्रययोरेव प्रातिपदिकार्थत्वेन लिङ्गरहिताः ’ लिङ्गप्रवृत्तिनिमित्तकाः वा प्रातिपदिकार्थमात्रस्योदाहरणानि

। उक्तञ्च –" **एवञ्च प्रातिपदिकार्थ इत्यस्यालिङ्गा लिङ्गप्रवृत्तिनिमित्तकाश्चाव्यय-पुमादयः उदाहरणम्** [632]" इति।

एतादृशव्याख्याने नागेशमतेऽपि लिङ्गस्य प्रातिपदिकार्थत्वमस्त्येव। लिङ्गस्य प्रातिपदिकार्थत्वेन लिङ्गग्रहणस्य वैयर्थ्यं मा भूदेतदर्थमेव तादृशं प्रातिपदिकार्थत्वं स्वीकृतमस्तीति । अतएवाभिहितं तत्रैव – " **अतएव लिङ्गग्रहणं सार्थकम् , अन्यथा " स्वमोर्नपुंसकात्** [633] " **इत्यादिशास्त्रप्रामाण्येन लिङ्गस्यापि प्रातिपदिकार्थतया तद्वैयर्थ्यस्पष्टमेव। अतएव ' स्त्रियाम्** [634]' **इति सूत्रे स्त्रीत्वे द्योत्ये इत्यर्थ इतिभाष्ये सिद्धान्तितम्** [635] " इति । तस्मात् स्त्रीत्वे द्योत्ये इतिभाष्यसिद्धान्तात् लिङ्गस्य प्रातिपदिकार्थत्वं सर्वैरेव स्वीकृतम्। अन्यथा प्रत्ययवाच्यत्वे तु स्त्रीत्वे वाच्ये टाव् स्यादित्यर्थो भवेत् , किन्तु नायं सिद्धान्तभूतः अर्थः , अतः लिङ्गं नामार्थ इत्यत्र नास्ति वादिनां विवादः।

### ➢शब्दस्यापि प्रातिपदिकार्थत्वम्

वैयाकरणैः शक्यार्थो बौद्ध एव स्वीकृतः[636]। अतएव ' **घटोऽस्ति** ' ' **घटो नास्ति** ' इत्यादौ ' **अस्ति** ' ' **नास्ति** ' क्रिययोः सार्थक्यम्। बौद्धार्थाभावे तु ' **घटः** ' इत्यनेनैव वाह्यसत्ताविशिष्टस्य घटरूपार्थस्य बोधे ' **अस्ति** ' इति प्रयोगो निरर्थकः स्यात्। एवञ्च बौद्धार्थस्य बौद्धशब्देन

---

[632] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४२८।**

[633] **पाणिनीयाष्टाध्याय्यां ७.१.२३।**

[634] **पाणिनीयाष्टाध्याय्यां ४.१.३।**

[635] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४२८।**

[636] **" एवं शक्यार्थोऽपि बुद्धिसत्ता समाविष्ट एव , मे तु वाह्यसत्ता समाविष्टः "। - वैयाकरणसिद्धान्तलघुमञ्जूषायां बौद्धार्थनिरूपणे पृ. २०३।**

तादात्म्यात्[637] शब्दोच्चारणे शब्दज्ञानजन्यायामर्थाकारान्तःकरणवृत्तौ , शब्दाकारस्यापि विषयीकरणात् शब्दस्यापि शाब्दबोधविषयत्वमिति वैयाकरणानामभिप्रायः । उक्तञ्च नागेशेन –

" **बौद्धार्थस्य बौद्धेन शब्देनाविभागात्तन्मूलाभेदाध्यवसायेन- शब्दार्थाकारवृत्तौ जायमानायां स्वाकारस्यापि समर्पणमिति शब्दस्यापि विषयता** [638] " इति । भर्तृहरिणापि उक्तम् –

" **न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुबिद्धमिवज्ञानं सर्वं शब्देन भासते ॥** [639]" इति ।

अयम्भावः लोके एतादृक् किमपि ज्ञानं नास्ति , यत् शब्दमविषयीकृत्य प्रतीयते । शाब्दमशाब्दं वा सर्वं ज्ञानं शब्दानुस्यूतमेव प्रतीयते । एवञ्चानुव्यवसायात्मकज्ञानेऽपि शब्दविषयकज्ञानस्य विषयत्वेन , ज्ञानस्य शब्दविषयकत्वं सिद्ध्यति ।

ननु ' **अनुबिद्धमिव** ' इत्यत्रेव शब्दप्रयोगेन वस्तुतो नानुबिद्धमिति प्रतीयते , तर्हि अकथमनया कारिकया शब्दस्य ज्ञानविषयत्वे हरिसम्मतिर्ज्ञाता स्यादिति चेत् ? अत्रोच्यते – वैयाकरणनिकाये निखिलायं विश्वरूपप्रपञ्चः शब्दस्य परिणामः स्वीकृतः । उक्तञ्च–

" **शब्दस्य परिणामोऽयमित्याम्नायविदोविदुः ।**
**छन्दोभ्य एव प्रथममेतद् ' विश्वं व्याववर्तत ॥** [640]" इति ।

एवञ्च शब्दज्ञानयोः वस्तुद्वयभावादनुबिद्धमिवेत्यत्र ' **इव** ' शब्दप्रयोगः । अथवा " **शब्दज्ञानयोस्तादात्म्यादेव सर्वं ज्ञानं**

---

637 " **वस्तुतो बौद्धः एवार्थः पदमपि बौद्धम् , तयोर्भेदः** " – **वैयाकरणसिद्धान्तलघुमञ्जूषायाम् ।**

638 **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. ३८ ।**

639 **भर्तृहरिवाक्यपदीये १.१२४ ।**

640 **भर्तृहरिवाक्यपदीये १.१२१ ।**

**शब्दानुस्यूतं प्रतीयते । तत्र ज्ञाने शब्दनिरूपितं तादात्म्यमारोपितमेवेति बोधनेच्छया ' इव ' शब्दप्रयोगः "** इति ।

## ➢ किरणवलीकारमतम्

शब्दस्य स्वस्वरूपबोधकप्रतिपादनाय प्रकरणमारभते विशेषणतयेत्यादिना । अर्थस्य विशेषणरूपेण शब्दः अपि च शाब्दबोधे द्योतते । युधिष्ठिर आसीत् इत्यादौ युधिष्ठिरशब्दवाच्यार्थभूतः कश्चित् आसीदिति बोधात् । शब्दस्य स्वं रूपमपि शब्दार्थः । अर्थज्ञानात्प्रागेव तद्बोधकशब्दस्वरूपज्ञानमावश्यकं भवति , शब्दस्वरूपोपस्थापनाभावे न हि तदर्थज्ञानसम्भवः । तथाहि हरिणा उक्तं –

**" न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुबिद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ [641]"  इति ।**

लोके सः प्रत्ययः नास्ति यः शब्दानुगमादृते , सर्वं ज्ञानं शब्देन अनुबिद्धमिव भासते इत्यन्वयः । अर्थात् जगति सदृशः ज्ञानं नैव विद्यते यः शब्दाश्रयात् विना भवेत् निखिलप्रकारः प्रत्ययः शब्देन सह संस्पृष्टः इव द्योतते । पुनरपि हरिणा उक्तम् -

**" ग्राह्यत्व ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा ।**
**तथैव सर्वं शब्दानामेते पृथगिव स्थिते ।**
**विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते ॥ [642]" इति ।**

यथा तेजसः ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तथैव सर्वशब्दानाम् एते पृथक् अवस्थिते इत्यन्वयः । येन प्रकारेण तेजोद्रव्यस्य ज्ञानविषयत्वं घटादिविषयकज्ञानजनकत्वम् अपि द्वे ग्राह्यग्राहकत्वरूपे शक्ती स्तः तथैव

---

[641] **भर्तृहरिवाक्यपदीये १.१२४ ।**

[642] **भर्तृहरिवाक्यपदीये १.५५ ।**

सर्वविधशब्दानां ग्राह्यग्राहकत्वरूपे शक्ती स्तः शक्तिशक्तिमतो-रभेदान्नित्यमात्मभूते अपि पृथक् भिन्ने इव स्थिते प्रतिभासमाने स्तः इति। स्वं प्रकाशयन्नेव शब्दः सर्वं प्रकाशयतीति भावः। अत्रोच्यते यद्यपि घटे ग्राह्यत्वमेव न ग्राहकत्वमिन्द्रियेषु ग्राहकत्वमेव न ग्राह्यत्वमिति ग्राह्यत्वग्राहकत्वशक्त्योर्विरोध इव भासते तथापि प्रदीपादौ तयोः समावेशस्यापि दर्शनादुभयोरेकत्रावस्थानमविरुद्धमिति शब्दे ग्राह्यत्वं ग्राहकत्वञ्च स्वभावादिति कारिकाशयः [643]।

शब्दैः विषयत्वम् अनादृत्य अर्थः न प्रकाश्यते इत्यन्वयः। अनादृत्येत्यत्र अनापन्नैरिति पाठे तु विषयत्वम् अनापन्नैः शब्दैः अर्थः न प्रकाश्यते इत्यन्वयः। विषयत्वं नाम ग्राह्यत्वमनादृत्य अनाश्रित्य अप्राप्तैरिति। श्रोत्रेन्द्रियागृहीतैः शब्दैः सत्तामात्रेण नार्थः प्रकाशयितुं शक्यते इति वाक्यपदीयवचनाच्चेति। अतः एव हि विष्णुमुच्चारय इत्यादौ अर्थस्योच्चारणं न सम्भवति। तेन शब्दस्य प्रतीतिः यथार्थस्योच्चारणासम्भवेन शब्दस्योच्चारणं क्रियते तथा शब्दप्रतीतिरिति। तेन शब्दोऽपि विष्णुशब्दस्यार्थः एवेति शब्दस्यापि शब्दार्थत्वसिद्धिः। हरिरप्याह –

**“ यथा प्रयोक्तुः प्राग्बुद्धिः शब्देष्वेव प्रवर्तते।**
**व्यवसायो ग्रहीतॄणामेव तेष्वेव जायते॥** [644]” इति।

[643] **भर्तृहरिवाक्यपदीये १.४४।**
[644] **भर्तृहरिवाक्यपदीये १.५३।**

## ➢पण्डितश्रीनित्यानन्दपन्तपर्वतीयमतम्

घटमानयेत्यादिशाब्दबोधे घटादिशब्दस्य भाने प्रमाणाभावेन तस्य प्रातिपदिकार्थत्वसाधनमनुचितमित्याशङ्कां प्रहरति शब्दोऽपीति । तत्र हरिकारिकां प्रमाणयति –

**“ न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुबिद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ [645]” इति ।**

अनुव्यवसायो यथा अनविशिष्टज्ञानं विषयीकरोति , तथा शब्देन विशिष्टमपीत्यर्थः । वैशिष्ट्यञ्चार्थबोधद्वारकं बोध्यम् । घटपदजन्यबोधानन्तरं घटं शाब्दयामीत्येवानुव्यवसायान्न कलशं कुम्भं वेति ।

वस्तुतस्तु शब्दार्थयोस्तादात्म्यं वास्तविकमेव , न तु आरोपितम् । न चैवं खड्गाद्युच्चारणे मुखोच्छेदापत्तिः अग्न्युच्चारणे दाहापत्तिश्च स्यादिति वाच्यम् , तादात्म्यन्नाम- **‘ तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् ’** इति नागेशोक्त्या[646] तादात्म्यं भेदाभेदघटितम् । अतएव ‘ पदं श्रुतमर्थं वदति इति सामानाधिकरण्येन प्रयोगः , भेदविवक्षया च **‘ अस्यार्थस्यायं वाचकः ’** इति वैयधिकरण्येन प्रयोगः संगच्छते । एवञ्च तादत्म्यस्य भेदाभेदघटितत्वे भेदस्य वास्तविकत्वाभेदस्य च आरोपितत्वस्वीकारे दोषाभावात् ।

अथवा शब्दार्थयोस्तादात्म्येऽपि ‘ **मुखोच्छेदादिकारणता-वच्छेदकीभूतसंयोगादिसम्बन्धस्य शब्देऽसम्भवात् न मुखोच्छेदाद्यापत्तिः** ’ । एवञ्च शब्दार्थयोस्तादात्म्येनार्थविषयकज्ञाने शब्दस्य विषयत्वं भवत्येव । तस्माच्छब्दस्यापि ज्ञानविषयत्वं

---

**[645] भर्तृहरिवाक्यपदीये १.१२४ ।**

**[646] वैयाकरणसिद्धान्तलघुमञ्जूषायां शक्तिनिरूपणे पृ.३४ ।**

शब्दशक्यत्वञ्च सिद्ध्यति । अतएव ‘ **घटमनुच्चारय** ’ ‘ **विष्णुमनुच्चारय** ’ ‘ **अर्थं वदति** ’ इत्यादि व्यवहारः संगच्छते । शब्दस्य ज्ञानाविषयत्वे तु अर्थे उच्चारणकर्मत्वस्यासम्भवेन ‘ विष्णुमुच्चारय ’ इत्यादौ शाब्दबोधानुपपत्त्या तादृशप्रयोगोऽसंगतः स्यात् । उक्तञ्च कौण्दभट्टेन–

“ **विष्णुमुच्चारय ’ इत्यादावर्थोच्चारणासम्भवेन , विनाशब्दविषयं शाब्दबोधासंगतिश्च सोऽपि प्रातिपदिकार्थः**[647] ” इति ।

शब्दस्यापि शब्दशक्यत्वे तु विष्णुरूपार्थबोधकं शब्दमुच्चारय इति बोधे न काप्यनुअपपत्तिः ।

एवञ्च सर्वेषां शब्दानां शब्देऽर्थे च एकवृन्तगतफलद्वयन्यायेन खण्डशः शक्तिः । शब्दार्थयोस्तु परस्परं विशेष्यविशेषणभावः । क्वचित् ‘ **घटमुच्चारय** ’ इत्यादौ वाचकत्वसम्बन्धेनार्थः शब्दे विशेषणम् , ‘ **घटमानय** ’ इत्यादौ च स्ववाच्यत्वसम्बन्धेन शब्दोऽर्थे विशेषणम् ।

ननु शब्दस्य शब्दशक्यत्वाभावेऽपि ‘ **घटमुच्चारय** ’ इत्यादौ लक्षणया शाब्दबोधसम्भवे न काप्यनुपपत्तिरिति चेन्न ‘ **जबगडदशमुच्चारय**[648] ’ इत्यादौ जबगडदशेति समुदायस्य शक्यार्थाभावेन , शक्यसम्बन्धरूपायाः शक्यतावच्छेदकारोपरूपाया वा लक्षणाया असम्भवात् । अतएवोक्तं कौण्डभट्टेन –“ **न च लक्षणया निर्वाहः निरूढलक्षणाया**

---

[647] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २५४ ।**

[648] **माहेश्वरसूत्रम् ।**

**शक्त्यनतिरेकात् , जवगडदशमुच्चारय इत्यादौ शक्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च** [649]" इति ।

किञ्च शब्दस्याशक्यत्वे ' **गावमुच्चारय** ' इत्यादीनां भाषाशब्दानां साधुत्वं न स्यात् । इष्टापत्तिस्तु न वक्तुं शक्यते, " **न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति यो हि मन्यतेऽपशब्दपदार्थकशब्दोऽपशब्दो भवतीति तस्यापशब्द इत्येवापशब्दः स्यात्** [650]" इति भाष्यादनुकरणस्य साधुत्वं प्रतिपादितम् । एवञ्च ' **गाव** ' इत्यादिभाषाशब्दानां शक्यार्थाभावेन लक्षणाया असम्भवात् । एवञ्च वृत्तिमत्त्वरूपार्थवत्त्वाभावात् प्रातिपदिकसंज्ञाया आभावे तस्य साधुत्वं न स्यात् । शब्दशक्यत्वे तु अनुकार्यानुकरणयोर्भेदविवक्षायां शब्दरूपार्थबोधकत्वेनार्थवत्त्वात् प्रातिपदिकसंज्ञायां तस्य साधुत्वं सम्भवति ।

ननु अनुकार्यानुकरणयोर्भेदविवक्षा अभेदविवक्षा चेति पक्षद्वयं सम्भवति , तथैव शिष्टप्रयोगात् । तथाहि – ' **भुवो वुग् लुङ्लिटोः**[651] ' इति सूत्रे ' **भूवः** ' इतिनिर्देशो भेदपक्षज्ञापकः , ' **भू सत्तायामिति**[652] ' निर्देशोऽभेदपक्षज्ञापकः । एवञ्च पक्षद्वये भेदविवक्षायामेव शब्दस्य प्रातिपदिकार्थत्वम् । उक्तञ्च – " **यद्यनुकार्यानुकरणयोर्भेदविवक्षा , तदा शब्दोऽपि प्रातिपदिकार्थः** [653]" **इति** ।

---

[649] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ.२५५ ।**

[650] **पतञ्जलिमहाभाष्ये ।**

[651] **पाणिनीयाष्टाध्याय्याम् ६.४.८८ ।**

[652] **धातुपाठे सं १ ।**

[653] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २२० ।**

## ➢किरणवल्यामुक्तम्

शाब्दबोधे हि शब्दस्वरूपमप्याभासितं भवति , यथा ह्यनुकरणशब्दादनुकार्यशब्दस्य स्वरूपं ज्ञायते । स भू इत्थमाहेत्यादिवाक्ये श्रोतुस्तस्यैव प्रतीतिर्भवति , यद्धिः प्रथमः प्रवक्ता भूपदोच्चारणं कृतवानिति । अत्र भू इत्येतस्य भूपदरूपोऽर्थे । भूशब्दस्य स्वरूपातिरिक्तो नान्यो यतो हि वस्तुस्तदतिरिक्तस्य नान्यस्य विवक्षा एतादृशे वाक्ये भवति । अतः शब्दस्य स्वरूपमपि वाक्ये शब्दस्यार्थ एवेति । तादृशो वाचकः शब्दोऽनुकरणशब्दः इत्युच्यते , यस्योच्चारणं केवलमेतन्निमित्तमेव क्रियते यत्ततः समानवर्णानुपूर्वीयुक्तवाच्यभूतानुकार्यशब्दरूपस्य प्रतीतिर्भवेदिति । तेनैवोक्तं – " **स्वसदृशशब्दमात्रबोधतात्पर्यकोच्चारणविषयत्वमनु-करणत्वम्** [654]" इति ।

" **अनुकार्यत्वञ्च स्वसदृशशब्दप्रतिपाद्यत्वे सति शब्दत्वम्** [655]" इति ।

तेन तादृशो वाच्यभूतः शब्दोऽनुकार्यशब्द यस्य ज्ञानं तत्समानानुपूर्वीयुक्तं वाचकभूतानुकरणशब्दाद् भवति । यथा ' **भू इत्थमाह** ' इत्यादिवाक्ये भूशब्दोऽनुकरणशब्दो यतो हि स तत्सदृशानुकार्यभूशब्दस्य वाचकोऽनुकार्यस्तु भू इति एतस्मात्प्रतीतो भूशब्दः । अनुकार्यानुकरणयोः पारस्परिकसम्बन्धविषये द्वौ पक्षौ स्तः । प्रथमपक्षानुसारेणोभौ भिन्नौ मतौ , द्वितीयपक्षानुसारेणाभिन्नावपि । प्रथमपक्षानुसारेण अनुकार्यशब्दो वाच्यो यदानुकरणशब्दस्तस्य वाचकः । वाच्यभूतानुकार्यशब्दरूपार्थबोधनाद-नुकरणशब्दस्यार्थवत्ता भवति , यतो ह्यनुकार्यशब्दातिरिक्तो न कोऽपि अन्योऽनुकरणशब्दार्थस्तत्र । अर्थवत्त्वाद्ध्यनुकरणशब्दस्य प्रातिपदिकसंज्ञा तदा सुबुत्पत्तिश्च भवति , येन तस्य साधुत्वं सम्पद्यते ।

---

[654] **परमलघुमञ्जूषायां नामार्थविचारे पृ.३०० ( चौ.सु.भा.प्र ) ।**

[655] **परमलघुमञ्जूषायां नामार्थविचारे पृ.३०० ( चौ.सु.भा.प्र ) ।**

इत्थमनुकार्यशब्दप्रतीतेरेव तस्मादनुकरणशब्दोऽनुकार्यशब्दव्यक्ति-शक्तिमानिति । यथा हि ‘ **भुवो बुग् लुङ्लिटोः** [656]’ इति सूत्रे भूशब्दोऽनुकरणशब्दो यस्य भूधातुरनुकार्यशब्दः । उभयोर्भिन्नत्वादेवानुकरणभूतभूशब्दोऽत्र न धातुः । तस्य धातुसंज्ञाभावादनुकार्यभूधातुर्बोधकत्वादर्थवत्त्वेनानुकरणभूतभू इत्येव एतस्य प्रातिपदिकसंज्ञा ततो ङस्विभक्तेरुतपत्तिश्च । अनुकार्यानुकारणयोरभिन्नत्वे तु भू इत्येतस्य धातुसंज्ञात्वेन न प्रातिपदिकसंज्ञा , न च ततः सुबुत्पत्तिरिति विभक्त्यन्तभूशब्दस्य प्रयोग एव निर्दिशति , यद्भौ अनुकार्यानुकरणशब्दौ भिन्नावेवेति ।

‘ **भू सत्तायाम्** [657]’ इत्यत्र भूशब्दस्त्वनुकार्यानुकरणयोरभेदपक्ष-ज्ञापकः । अत्र निर्विभक्तिप्रयोगोऽपि नासाधुस्तथैव शिष्टप्रयुक्तत्वात् ।

## ➢पण्डितश्रीनित्यानन्दपन्तपर्वतीयमतम्

अतएव “ **उदेति सविता ताम्रताम्र एवास्तमेति च** ” इत्यादौ न पौनरुक्त्यम् । तत्पदानुपाद्साने उदयास्तयोः शाब्दबोधे ऐकरूप्यानिर्वाहादिति भावः । शब्दस्यापि शाब्दबोधे भानादेवेत्यर्थः । स्वशब्देनात्रानुकार्यपरिग्रहः । स्वम् अनुकार्यः , तत्सादृश्यञ्च स्ववृत्त्यनुपूर्वीमत्वेनेति बोध्यम् । अर्थेऽपि स्वसदृशशब्दप्रतिपाद्यत्वस्य सत्त्वात्तत्रातिव्याप्तिस्तद्वारणाय शब्दत्वं निवेश्यमिति भावः । अनुकरणस्यानुकार्यनिरूपितशक्तिकल्पनया वृत्तिमत्त्वरूपार्थवत्त्वस्यानुकरणे सत्वेन भेदपक्षे स्वादिविधिरुपपद्यते । तेन “ **भुवो बुग् लुङ्लिटोः** [658]” “**क्षीयो दीर्घात्** [659]” इत्यादिनिर्देशाः

---

[656] **पाणिनीयाष्टाध्याय्यां ६.४.८८ ।**

[657] **धातुपाठे सं.१ ।**

[658] **पाणिनीयाष्टाध्याय्यां ६.४.८८ ।**

सङ्गच्छन्त इति भावः । अयञ्च पक्षः “ **मतौ छः सूक्त:**[660] ” इति सूत्रभाष्ये स्पष्टः । राम तु इत्यत्र अप्रवृत्तनित्यविधिः “ **ससजुषो रुः** [661]” इत्यादिविधिः , तदुद्देश्यतावच्छेदकाक्रान्तत्वात्तस्यापरिनिष्ठितत्वम् । राम इत्यस्य तु “ **ससजुषो रुः** [662]” इत्यादिशास्त्रीयोद्देश्यतावच्छेदकानाक्रान्त-त्वात्परिनिष्ठितत्वमिति भावः गोसदृशपिण्डालोचनेन गवयज्ञानवदिति ।

अभेदविवक्षायान्तु न शब्दस्य प्रातिपदिकार्थत्वमिति शब्दस्य ज्ञानविषयत्वमसार्वत्रिकमिति चेद् ? अत्रोच्यते –

अनुकार्यानुकरणयोर्भेदविवक्षायामनुकरणेनानुकार्यस्य पदानुप-स्थितत्वात् ’ अनुकरणमनुकार्यस्य बोधकम् , एवञ्च तत्पक्षेऽनुकरणेऽनुकार्यनिरूपिता बोधकतारूपा शक्तिः स्वीकार्या , अभेदपक्षे तु भेदनिबन्धननिरूप्यनिरूपकत्वयोरसम्भवेनानुकरणे वृत्तिरसम्भवा , अपि तु तत्रानुकरणस्य श्रावणप्रत्यक्षे , यथानुकरणस्य प्रत्यक्षविषयता तथैवानुकार्यस्यापि , तयोरभेदात् । एवञ्च स्वानुकार्यप्रत्यक्षरूपा यानुकरणात्मकशब्दजन्योपस्थितिः , तामादाय शब्दस्य शाब्दबोधविषयत्वं सम्भवति । उक्तञ्च –

“ **शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा ।**

**नो चेच्छोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते ॥** [663]” इति ।

ननु घटपदादुपस्थितस्याकाशस्य शब्दबोधविषयतावारणाय , शाब्दबोधविषयतां प्रति वृत्तिज्ञानाधीनोपस्थितिविषयतायाः

---

[659] **पाणिनीयाष्टाध्याय्यां ८.२.४६ ।**

[660] **पाणिनीयाष्टाध्याय्यां ५.२.५९ ।**

[661] **पाणिनीयाष्टाध्याय्यां ८.२.६६ ।**

[662] **पाणिनीयाष्टाध्याय्यां ८.२.६६ ।**

[663] **वैयाकरणभूषणसारकारिकारिकायां का. २६ ।**

कारणत्वेनाभेदपक्षे चानुकरणे शक्तेरभावात् कथं शब्दस्य शाब्दबोधविषयतेति चेदुच्यते – **आश्रयतासम्बन्धेन शक्तेः शब्देऽपि विद्यमानत्वान्न काप्यनुपपत्तिः ।**

नन्वेवं शक्तेर्विद्यमानत्वे वृत्तिमत्त्वरूपार्थवत्त्वमादाय प्रातिपदिकसंज्ञा-यामभेदपक्षेऽपि अनुकरणशब्दात् सुबुत्पत्तिः स्यादितिवाच्यम् , निरूपकतासम्बन्धेन वृत्तिमत्त्वरूपार्थवत्त्वस्य " **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** [664]" इति सूत्रेण प्रातिपदिकसंज्ञायाः विधानात् , प्रकृते न सुबुत्पत्त्यापत्तिः । शाब्दबोधविषयता च निरूपकता आश्रयता अन्यतरसम्बन्धेन शक्तिमतः इति कल्पनान्न काप्यनुपपत्तिः । उक्तञ्च – " **निरूपकताश्रयतान्यतरसम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यते , इत्यनवद्यम् , सम्बन्धस्य निरूप्यत्वात्** [665]" इति ।

एवञ्च वृत्तिरूपसम्बन्धस्य शब्दार्थोभयनिष्ठत्वात् वृत्तिरूपसम्बन्धवत्त्वं यथार्थस्य , तथा वृत्तिमदर्थबोधकत्वेन शब्दस्यापि वृत्तिरूपसम्बन्धवत्त्वे बोधविषयत्वम् । उक्तञ्च– " **पदादर्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्च** [666] " इति । भर्तृहरिणापि उक्तं -

> **" ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा ।**
> **तथैव सर्वशब्दानामेते पृथगवस्थिते ॥** [667]" इति ।

श्लोकेऽस्मिन् ' **पृथगवस्थिते** ' इत्यनेन ' **द्वे शक्ती सर्वत्रैव तिष्ठतः** ' इत्यत्र नियमाभावो द्योत्यते । अर्थात् यथा लोके विषयसत्त्वे दीपादिरूपतेजसि

---

[664] **पाणिनीयाष्टाध्याय्यां १.२.४५ ।**

[665] **वैयाकरणभूषणसारे नामार्थनिर्णये , पृ. २४५ ।**

[666] **वैयाकरणभूषणसारे नामार्थनिर्णये पृ. २५८ ।**

[667] **भर्तृहरिवाक्यपदीये १.५५ ।**

अस्तिशक्तिद्वयम् , विषयासन्निधाने तु ग्राह्यत्वमेव , एवञ्च शब्दानामर्थस्य बाधाभावे शक्तिद्वयं , बाधे तु ग्राह्यत्वमेवेति बोद्ध्यम् ।

तस्माच्छब्दस्य बोधविषयत्वमवश्यमेव स्वीकरणीयम् । अतएवोक्तं पतञ्जलिनापि– **" न वा एतत्प्रयोजनमस्ति । किं कारणम् ? शब्दपूर्वको ह्यर्थे सम्प्रत्ययः । अतश्च शब्दपूर्वकः । योऽप्यसावाहूयते नाम्ना , नाम च यदा तेन नोपलब्धं भवति , तदा पृच्छति – किं भवानाह इति । शब्दपूर्वकश्चार्थस्य प्रत्ययः** [668]" इति ।

**" मन्त्र , ऋषि , यजुषीति यदुच्यते , मन्त्रशब्दे ऋक्शब्दे यजुषशब्दे च तस्य कार्यस्य सम्भवो नास्तीति कृत्वा मन्त्रादिसहचरितो योऽर्थस्तस्य गतिर्भविष्यति , साहचर्यात्** " इति भाष्यस्य[669] व्याख्यानावसरे मन्त्रादिसहचरित इति प्रतीकमादाय कैयटेनोक्तम् – **" साहचर्यञ्च शब्दानुविद्धस्यैवार्थस्यावगमकम् "** [670] इति ।

किञ्च ' **पिकपदं पिकरूपार्थो शक्तम्** " इति शक्तिग्रहवतः पुंसः पिकपदादर्थबोधे जाते ' **अयं पिकः** ' इत्येवानुव्यवसायो भवतीत्यनुभवसिद्धम् । शाब्दबोधे शब्दस्य भानास्वीकारे तु ' **पिकपदशक्तिग्रहवतः पुंसः** ' ' **अयं कोकिलः** ' इत्यनुव्यवसायापत्तिः ' **अयं कोकिलः** ' ' **अयं पिकः** ' इत्यनुव्यवसायज्ञानयोः समानविषयकत्वेनैक्यात् । शब्दस्य शाब्दबोधभानस्वीकारे तु न तादृशापत्तिः , यतोहि – पिकपदाज्जाते बोधे पिकपदस्यापि विषयत्वेनानुव्यवसायस्य पिकपदविषयकत्वमावश्यकम् , अनुव्यवसायपूर्व-

---

[668] **पतञ्जलिमहाभाष्ये पा.सू . १.१.३८ ।**

[669] **पतञ्जलिमहाभाष्ये पा.सू . १.१.३९ ।**

[670] **पतञ्जलिमहाभाष्यप्रदीपे पा.सू . १.१.६८ ।**

बोधयोः समानविषयकत्वनियमात्। **‘ अयं कोकिलः ’** इत्यनुव्यवसाये तु न पिकशब्दविषयता , अतः पिकपदादुत्पन्ने ज्ञानेऽयं कोकिल इत्यनुव्यवसायोऽसम्भवः। उक्तञ्च नागेशेन–

**“ किञ्च पिकपदशक्तिग्रहवतः ‘ अयं कोकिलः ’ इत्यनुव्यवसायापत्तिः , तव पिकत्वकोकिलत्वयोरभेदात् । मम तु तत्तत्पदभानान्न दोषः** [671]” इति।

## ➢गौतमसम्मतिः

प्रत्यक्षलक्षणं कुर्वता गौतमेन सूत्रितम् – “ **इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्** [672]” इति । तत्र ‘ **अव्यपदेश्यम्** ’ इत्यस्य व्याख्यानं कुर्वता भाष्यकृतोक्तम् “ **अव्यपदेश्यत्वञ्च व्यपदेशाविषयकत्वम् । व्यपदेशश्चार्थवाचकः शब्दः** [673]” **इति** । एवञ्चानेन व्याख्यानेन शब्दस्य शाब्दबोधविषयकत्वं स्वीकृतमेव।

वात्स्यायनेन अपि उक्तम् – “ **शब्दविषयकत्वेन प्रत्यक्षस्य शाब्दत्वापत्तिः** [674]” इति।

किञ्च यद् घटादिज्ञानं यद् घटपदादिविषयकं , तद् घटादिज्ञानं तद्घटपदादिजन्यशाब्दबोधीयविषयताकमिति विषयताभाननियमनिर्वाहाय पदभानमावश्यकम् । उक्तनियमास्वीकारे तु घटचक्षुः सन्निकर्षेण जायमानं

---

[671] **वैयाकरणसिद्धान्तलघुमञ्जूषायां बौद्धार्थनिरूपणे पृ. ३३०।**

[672] **न्यायदर्शने १.१.४ ।**

[673] **भाष्ये न्यायदर्शने १.१.४ ।**

[674] **वात्स्यायनभाष्ये १.१.४ ।**

प्रत्यक्षं , घटत्वप्रकारकं घटविशेष्यकं भवति , तथैव घटप्रकारकघटत्व-विशेष्यकमपि स्यात् । तन्मा भूदेतदर्थमुक्तनियमः आवश्यकः ।

एवञ्च ' **घट** ' इति प्रत्यक्षे घटपदस्यापि भानात् घटपदजन्यशब्दबोधीयविषयतासमानविषयताकमेव प्रत्यक्षं भवति । शाब्दबोधीया विषयता च घटत्वे प्रकारताख्या , घटे च विशेषताख्या । अतो घटचक्षुः सन्निकर्षे घटत्वप्रकारकघटविशेष्यकमेव प्रत्यक्षं सम्भवति । उक्तञ्च नागेशेन–

" **किञ्च प्रत्यक्षादावपि विषयताभाननियमनिर्वाहाय पदभानमावश्यकम् । यज्ज्ञानं यत्पदादिविषयं तत् तज्जन्यबोध-विषयतासमानविषयताकमिति नियमात्** [675]" इति ।

संयुक्तविशेष्यतादिसन्निकर्षेण तु न विषयताभाननियमनिर्वाहः ' **घटस्य रूपम्** ' " **घटो रूपवान्** " इति रूपविशेष्यक, रूपकारक प्रत्यक्षस्यैकेनैव सन्निकर्षेण जायमानतया कस्या अपि विषयतायाः नियतत्वाभावात् । तस्मात् विषयताभाननियमनिर्वाहायापि शाब्दबोधे शब्दभानमवश्यमेव स्वीकार्यम् ।

एवञ्च सर्वेषां भाष्यकैयटनागेशकौण्डभट्टादीनां मतेन शब्दस्य बोधविषयत्वेन तस्य नामार्थत्वं सिद्ध्यति । एवञ्च शब्दास्यापि नामार्थत्वे " **षोढाप्रातिपदिकार्थ** " इति सिद्धान्तः ।

---

[675] **वैयाकरणसिद्धान्तलघुमञ्जूषायां बौद्धार्थनिरूपणे पृ. ३३५ ।**

# चतुर्थोऽध्यायः

# चतुर्थोऽध्यायः

## सुबर्थविचारः

### ( कारकाणि )

‘ **विवक्षावशाद् कारकाणि भवन्ति** ’ इति सर्वजनविदितं तथ्यमादाय कारकनिकाये विवक्षायास्तारतम्यं दृश्यते । अस्माकं दैनन्दिनजीवनचर्चायां भावविनिमय एव मुख्यत्वं धत्ते । विनिमयोऽयं येन केनापि प्रकारेण चरितार्थतां भजते । वागव्यवहारस्तथा मौनीभाव इति द्विधा विभज्यते । मौनीभावे इङ्गिताकारचेष्टा विद्यन्ते । तथाह्युच्यते – ‘ **आकारेङ्गितेन चेष्टितेन वा** [676] ’ इति । विभागद्वयमध्ये वागव्यवहारो श्रेयान् । अन्तःस्पन्दनं भावमासाद्य वहिःप्रकाशमानं सुष्ठुतामाप्नोति । वहिःप्रकाशे शब्दार्थद्वारैव तत्स्पन्दनं शोभनतां भजते । कविकुलललामभूतेन महाकविना पार्वतीपरमेश्वरवत् वागर्थौ शस्येते रघुवंशे—

**‘ वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।**

**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥** [677]’ इति ।

काव्यादर्शकृता दण्डिनापि शब्दव्यवहारस्य अलौकिकी चमत्कारिता सप्रशंसमौद्गीता-

**‘ इदमन्धं तमःकृत्स्नं जायते भुवनत्रयम् ।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥** [678]’इति ।

---

[676] **महाभाष्यपश्पशाह्निके ।**

[677] **रघुवंशे १/१ ।**

[678] **काव्यादर्शे १/४ ।**

शब्दार्थव्यवहारो भाषाप्रयोगे सार्थकपदवीं लभते । भाष्यतेऽनयेति भाषा । शब्दानां यथान्वितानां व्यवकारेण उत्पन्नं वाक्यं वक्तुर्भावादिकं यथायथं विनिर्णयति । तद्वशाद् श्रोता तदनुकूलं व्यापारं साधयति इतो कृत्वा चलति लोकव्यवहारः । एतेन वक्तुरभिप्रायः सदा स्फुटो भवेद् , श्रोतुश्च तद्विषयकमनुध्यानं कर्तव्यम् । नोचेत् , केनापि किमपि फलं नासाद्यते । लोकयात्रायां परस्परसाहचर्यप्रदर्शनाय भावविनिमयो यथा स्वच्छन्दतां वैशद्यं स्पष्टतां च भजेत तदर्थं भाषाव्यवहारे वक्तुः इच्छा एव परिगणयितव्या ।

विवक्षैका लौकिकं तथ्यम् । दृष्टार्थस्य लोकतः प्राप्तत्वाद् तद्विधानं शास्त्रादिषु न लभ्यते । परन्तु अदृष्टार्थस्य अत्यन्तमप्राप्तत्वात्तद्विधानं शास्त्रेषूपलभ्यते । तदुक्तं- **' अदृष्टार्था त्वधीतिर्विहितत्वात्** [679]**'** इति । एतदर्थमेव शास्त्रादिषु **' विवक्षा भवति ' ' विवक्षा दृश्यते '** इत्यादिवचनं प्राप्यते ।

वस्तुतः विवक्षायाः परिसरः सार्वत्रिक एव । शब्दव्यवहारविषये विवक्षायाः गौरवं सदानुभूयते । महाभारत-रामायण-पुराणादिषु शास्त्रेष्वपि विवक्षाशब्दस्य व्यवहारो यथा दृष्टस्तथैव दर्शनादिषु शास्त्रेष्वपि दृश्यते । यदेव भवतु नाम पाणिनीये शब्दशास्त्रे विशेषतः कारकप्रकरणे विवक्षायाः अवसरः कुत्र कथं योजितः स एव प्रेक्षितव्यः ।

कारकाणां व्यवहारः प्रायः वक्तुः इच्छाधीनः , न तु वस्तूनां स्थित्यनुसारमेव । कथ्यन्ते हि विश्वब्रह्माण्डमिदं शक्तीनां समूह एव । अतः द्रव्यानां सन्ति विविधाः शक्तयः । परन्तु एकस्मिन्नेव क्षणे एका शक्तिरेव वक्तुः बुद्धिविषयो भवति । न च सर्वासां शक्तीनां बुद्धिनिरूपितत्वमवगन्तव्यं , सर्वेषां कारकाणां युगपत्प्राप्त्यापत्तेः । तथाहि उक्तं हरिणा-

---

[679] **सायणाचर्यकृतायामृग्भाष्यभूमिकायां स्वाध्यायप्रकरणे ।**

" **शक्तिमात्रासमूहस्य विश्वस्यानेकधर्मणः ।**

**सर्वदा सर्वथा भावात् क्वचित् किञ्चिद् विवक्ष्यते ।।** [680]" इति ।

तथा सति संकर्यापत्तिरिति निर्बाधा । अत्र कारणं हि ' **घटं पश्य** ' ' **घटेन जलमानय** ' ' **घटे जलं निधेहि** ' इत्यादौ उदाहरणे कर्मकरणाधिकरणानां नियमपूर्वकव्यवस्था दृश्यते । तत्र क्वचित् कर्मत्वशक्तिः विवक्ष्यते क्वचित् करणत्वशक्तिः । एवं कारकत्वशक्तेः उत्पत्त्यनुसारं सर्वेषां कारकाणां कर्त्तृत्वविवक्षापि भवति ।

महाभाष्यकृता पतञ्जलिनापि क्वचित् सतः अविवक्षा , क्वचिच्च असतो विवक्षा कृता । तथाहि ' **अलोमिका एडका** ' तथा ' **अनुदरा कन्या** ' इत्यादौ ' **अलोमिका** ' तथा ' **अनुदरा** ' इति पदेन लोमरहितायाः उदररहितायाः च बोधः साधारणतया भवति । परन्तु भाष्यकारेण पूर्वोक्तपदद्वयेन अल्परोमाल्पोदरविशिष्टाया एव विवक्षा कृता । तथा च ' **समुद्रः कुण्डिका** ' इत्यत्र कुण्डिकोत्तरणं समुद्रोत्तरणसमम् अथवा समुद्रपरिमितं जलमेव कुण्डिकायां वर्तते इति समुद्रकुण्डिकयोः समानाधिकरण्यमसदेव । परन्तु कुण्डिकायां पानीयवाहुल्यात् समुद्रत्वं विवक्षितं , समुद्रस्य वा सुतरत्वात् कुण्डिकात्वमिति । तथाहि – " **सतोऽप्यविवक्षा भवति । तद्यथा – अलोमिका एडका । अनुदरा कन्येति । असतश्च विवक्षा भवति । समुद्रः कुण्डिका । विन्ध्यो वर्धितकमिति** [681]" इति ।

---

[680] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे ३.७.२ ।**

[681] **पातञ्जलमहाभाष्ये कारकाह्निके १.४.२४ ।**

भाष्यकारेण अध्रुवतायाः योऽविवक्षाप्रसङ्गः आलोचितः तदपेक्षया **' क्तस्य च वर्त्तमाने** [682]**'** इति सूत्रस्थभाष्यव्याख्यानमाश्चर्यजनकम् । तत्र कर्मादीनां कारकाणामेव अविवक्षा स्वीक्रियते । यस्तु शेष इत्यभिधां भजते । तद्यथा **' छात्रो हसति '** इत्यत्र **' छात्र '** इति कर्त्तृसंज्ञकः । परन्तु तस्याविवक्षितत्वात् छात्रस्य हसितमिति षष्ठी भवति । एवं **' मयूरो नृत्यति '** इत्यस्य मयूरस्य नृत्यम् , तथा **' कोकिलो व्याहरति '** इत्यस्य कोकिलस्य व्याहृतमिति प्रयोगः ।

वस्तुतः कारकाणां प्रयोगः बुद्ध्यवस्थाश्रितः । बुद्धौ यदा किमपि वस्तु निरूप्यते तदेव तत् शब्दविषयको भवति । बुद्धौ तद्वस्तुनः यादृशं निरूपणं भवति तद्रूपमेव शब्दे प्रकटी भवति । न केवलं सत्पदार्थनिरूपणमेव बुद्धेर्विषयः इति वाच्यम् , असतोऽपि कल्पना बुद्धिव्यापारत्वात् । किञ्च , भाविकालनिरूपितस्य कार्यस्य पूर्वकल्पना तु साध्यते एवास्माभिः । अतः यथा बुद्धिनिरूपितस्य तथैव कल्पनाया अपि योगो भाषाप्रयोगक्षेत्रे भवति । अत्र प्रमाणं हि भर्त्तृहरिः । तथाहि उच्यते –

**" साधनं व्यवहारश्च बुद्ध्यवस्थानिबन्धनः ।**
**सन्नसन्वार्थरूपेषु भेदो बुद्ध्या प्रकल्प्यते ॥** [683]**"** इति ।

ज्ञानेच्छाकृतिरिति वृत्तित्रयभेदेन च बुद्धेः बहवो भेदाः , तत्र विवक्षारूपायाः बुद्धेः शब्दशक्तिनिमित्तिका ये अवस्थाविशेषाः कर्त्रादितत्तत्कारकविषयकविवक्षाविशेषरूपाः प्रतिनियतविभक्तिकसुबन्त-तिङन्तशब्दनिबन्धनाः तन्निबन्धनः कर्त्रादिकारकव्यवहारः । तथाहि पूर्वमर्थं विवक्षति , ततो बुद्धौ तमर्थः तत्तत्कारकशक्तिमत्तया निरूपयति ' ततः तद्बोधानुगुणं शब्दं प्रयुङ्क्ते इति हि क्रमः ।

---

[682] **पाणिनीयाष्टाध्याय्यां २.३.६७ ।**

[683] **भर्तृहवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे ३.७.३ ।**

**स्थाली पचतीत्यत्र** पाकक्रियां प्रति स्थाल्याः एव स्वातन्त्र्यं विवक्षितम् । तत्र स्थाली नियोगे कर्त्तृसापेक्षत्वं नास्ति । अतः स्थाल्याः स्वतन्त्ररूपेण विवक्षितत्वात् कर्त्तृत्वं सिध्यति । ' **स्थाल्या पचति** ' इत्यत्र पाकक्रियां प्रति स्थाल्याः करणत्वम् एव । वस्तुतः एतेन एतदेव विवक्षितं यदिन्धनं विनापि स्थाल्याः गुणेनैव पाकक्रिया सम्पन्ना भवति । तस्मात्तस्य करणत्वम् । एवमधिकरणत्वं तु सिद्धमेव । तत्र हेलाराजेनोक्तं – " **स्थाली पाकेऽनपेक्षितकर्त्तृविनियोगा स्वातन्त्र्येण विवक्षिते इति कर्त्री , इन्धनोपकारानपेक्षया तस्या एव साधकतमत्वविवक्षायान्तु करणम् , वास्तवाधारविवक्षायां त्वधिकरणमिति सर्वमुपपद्यते** " [684] इति ।

एवं कारकस्य विवक्षाधीनत्वादेकस्यैव युगपद् ईप्सिततमत्वसाधकतमत्वादिविरुद्धधर्मविवक्षया बुद्ध्याभेदः परिकल्प्यते । तद्यथा निगदितं कविकुलललामभूतेन महाकविना कालिदासेन " **आत्मानमात्मना वेत्सि** [685]" इति । वस्तुतः आत्मातिरिक्तं कर्मकरणादिकं किमपि नास्ति , तथाप्यत्र भेदकल्पना क्रियते कविना । बुद्ध्या एकैकस्य पदार्थस्य भिन्नत्वं तथा भिन्नानां पदार्थानामपि एकरूपता दृश्यते । तथाहि –

" **बुद्धैकं भिद्यते भिन्नमेकत्वं चोपगच्छति** [686]" इति ।

एवमभिरूपता धर्मो हि यथा पञ्चाले तथा कुरावपि समानतया वर्तते । परन्तु आभिरूप्येण समानेन गुणेन कर्मभिः सह पञ्चालानां बुद्धैकत्वं समुदायभावमापद्य आभिरूप्यस्यातिशय्यात् कुरुभ्यः पञ्चालान् पृथक् क्रियते इति ।

---

[684] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे ३.७.३ ।**

[685] **कुमारसम्भवे २.१० ।**

[686] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे ३.७.३ ।**

प्रधानक्रिया खलु कर्मकरणादिसमूहसाध्या भवति । अतः प्रधानक्रियानिष्पत्तिमात्रे तादृशनिष्पत्तिसामान्ये कर्त्तृत्वं सर्वेष्वेव कर्मकरणादिषु कारकेष्वस्ति । अवान्तरक्रियाविशेषरूपव्यापारभेदापेक्षायान्तु कर्मकरणादित्वस्य उत्पत्तिरिति । अत्र प्रमाणं खलु तावत् –

**" निष्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके ।**

**व्यापारभेदापेक्षायां करणादित्वसम्भवः ॥** [687]" इति ।

पचतीत्यत्र तु यदा कः कथं पचतीति जिज्ञासापूर्विका विवक्षा जायते तदा प्रधानक्रियानिष्पादने विभिन्नानि व्यापाराणि कारकाणि यथायथं स्वस्वव्यापारातिशयेन कर्मकरणादिसंज्ञा प्रतिलभन्ते इति ।

अतः सामान्यस्य विशेषवत्वनियमेन सामान्यभूतक्रियानिरूपित-कर्त्तृत्वरूपं कारकत्वं यथा सर्वेषां कर्मकरणादीनां कारणम् , तथैव विशेषक्रियामादाय कर्मत्वकरणत्वादिकमस्त्येव । अत्र दृष्टान्तो हि – " **पितरौ पुत्रं जनयत** " इत्यत्र जननावान्तरभेदे अविवक्षिते पुत्रस्य जन्मनि जनिक्रियासामान्ये मातापित्रोः द्वयोरपि कर्त्तृत्वमुच्यते । अवान्तरक्रियाभेदविवक्षायान्तु " **अयमस्यां बीजमाधत्ते** " " **इयमस्मात् पतद्बीजं धारयति** " इति गर्भाधानरूपायां जन्यावान्तरक्रियायां पितुः कर्त्तृत्वम् , मातुस्तु अधिकरणत्वम् । बीजपतनक्रियायान्तु पितुः अपादानत्वम् , बीजधारणक्रियायान्तु मातुः कर्त्तृत्वमिति भेदः । अतः " **ब्राह्मणाद् वैश्यकन्यायामम्बष्ठो नाम जायते** [688]" इत्यादिप्रयोगस्यापि शुद्धत्वं सङ्गच्छते ।

---

[687] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे ३.७.१८ ।**

[688] **मनुसंहितायाम् – १०.८ ।**

“ **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङ्सोसाम्ङ्योस्सुप्**[689]” इति सूत्रे पाणिनिना निर्दिष्टानामेकविंशतिभेदेन भिन्नानां सुपामर्थाः , तदर्थानां कारकत्वाकारकत्वविचारोऽध्यायेऽस्मिन्प्रस्तूयते । परमलघुमञ्जूषायां ‘ **कारकविचारः**’ वैयाकरणभूषणसारे ‘ **सुबर्थनिर्णयः** ’ शब्दार्थरत्ने ‘ **कारकप्रकरणम्** ’ इति नाम्ना प्रकरनत्रयस्योपस्थापितत्वात् । तत्र किन्नाम कारकमित्यत्र मतभेदः आचार्याणां दृश्यते।

## ➢नैयायिकमतम्

नैयायिकास्तु विभक्त्यर्थद्वारा क्रियान्वयित्वकारकत्वमिति स्वीकुर्वन्ति। उक्तञ्च – **“ इत्थं च क्रियान्वयित्वमित्यपि प्राचीनलक्षणं संगच्छते । तत्तद्विभक्ति-जन्योपस्थितिविशेष्यतापन्नं कर्त्तृत्वं करणत्वं सम्प्रदानत्वमपादानत्वम-धिकरणत्वं नानाविधं कारकपदस्य शक्यम्**[690]” इति । तथा च क्रियाविषयतानिरूपितविभक्त्यर्थविषयताश्रयत्वं कारकत्वमिति तेषां परिष्कृतोऽर्थः । तथा च “ **स्तोकं पचति** ” इत्यादौ क्रियाविशेषणानां स्तोकादीनां न कारकत्वं , विभक्त्यर्थद्वारा क्रियान्वयित्वभावात् । एवञ्च “ **चैत्रस्य तण्डुलं पचति** ” इत्यादौ चैत्रादीनामपि न कारकत्वं , विभक्त्यर्थद्वारा क्रियान्वयित्वभावात्।

## ➢वैयाकरणानां सम्मतिः

प्राचीनवैयाकरणास्तु क्रियान्वयित्वमेव कारकत्वं स्वीकुर्वन्ति , कारकेति महासंज्ञया – “ **करोति स्वसम्बन्धेन क्रियायां**

---

[689] **पाणिनीयाष्टाध्याय्यां सू.४.१.२।**

[690] **विभक्त्यर्थनिर्णये पृ. १८-१९।**

**विशेषरूपतामापादयतीति "** । अत एव कारकाणां **" क्रियायामन्वयः "** इति व्यवहारः संगच्छते । **ब्राह्मणस्य पुत्रं पृच्छतीत्यादौ** तु ब्राह्मणादीनां न कारकत्वं , क्रियान्वयित्वभावात् । एवञ्च **" कटे आस्ते , स्थाल्यां पचती "** त्यादावधिकरणस्य कारकत्वं निश्चप्रचमूहं , कर्त्तृकर्मद्वारा तस्यापि क्रियान्वयित्वात् ।

### ➢नागेशमतम्

नागेशास्तु- **" क्रियानिष्पादकत्वं कारकत्वमिति स्वीकुर्वन्ति "**[691] **इति** । तत्र निष्पायत्युत्पादयतीति व्युत्पत्त्या निष्पादको जनकः । एवञ्च क्रियाजनकत्वमेव कारकत्वमिति लभ्यते । उक्तञ्च – **" कारकत्वं क्रियाजनकत्वम् , भाष्ये करोति क्रियां निर्वर्तयतीति व्युत्पत्तिप्रदर्शनात्**[692]**" इति ।** तत्र जनकत्वं कारकत्वरूपम् । कारणत्वञ्च अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमाना-धिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् । **चैत्रस्य तण्डुलं पचति " ब्राह्मणस्य पुत्रं पन्थानं पृच्छती** "त्यादौ चैत्रब्राह्मणादीनामन्यथासिद्धत्वेन क्रियाजनकत्वभावान्न कारकत्वम् । यथा घटं प्रति कुलालजनकस्य कारणत्वं न भवति तद्वत् । उक्तञ्च – **" ब्राह्मणस्य पुत्रं पन्थानं पृच्छती " त्यादौ ब्राह्मणस्य न कारकत्वम् । पुत्रेणान्यथासिद्ध्या तत्त्वाभावात्**[693]" इति ।

सम्प्रदानस्य त्वनुमतिप्रकाशनद्वारा क्रियाजनकत्वात् कारकत्वं सम्भवत्येव । तथाहि अनुमतिसत्त्वे दानस्य प्रवृत्तिः अनुमत्यभावे

---

[691] **तत्र क्रियानिष्पादकत्वं कारकत्वम् , परमलघुमञ्जूषायां कारकविचारे पृ. २५५ ।**

[692] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४३२-४३४ ।**

[693] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४३४ ।**

दानप्रवृत्त्यभावः , इत्यन्वयव्यतिरेकाभ्यां सम्प्रदानस्य दानप्रवृत्तिं प्रत्यनुमतिप्रकाशनद्वारा कारकत्वमस्त्येवेति न कारकत्वहानिः । ननु यत्र सम्प्रदानं नास्ति , तत्र सम्प्रदानानुपस्थितिदशायामनुमतिप्रकाशनाभावे सम्प्रदानस्य क्रियाजनकत्वाभावेन कारकत्वानापत्तिः , अनुमतिप्रकाशनद्वारैव तस्य क्रियां प्रति कारणत्वादितिचेदुच्यते – तादृश सम्प्रदानस्यापि दानकर्त्तुर्बुद्धिस्थत्वावश्यकत्वेन विषयविधया तस्यापि तज्जनकत्वात् । उक्तञ्च – " **असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन स्वज्ञानपूर्वकालकत्वेनैव जनकत्वम्** [694]" इति ।

उद्द्योतेऽप्युक्तम् – " **सम्प्रदानादीनामपि स्वज्ञानद्वारा जनकत्वं बोध्यम्**[695] " इति । एवमधिकरणकारकस्यापि ' **कटे आस्ते** ' इत्यादिस्थितिं प्रति कारणत्वात् क्रियाजनकत्वेन कारकत्वमक्षुण्णमेव । तस्मात् क्रियाजनकत्वमेव कारकत्वमिति **नागेशाशयः** ।

कारकाणाञ्च क्रियायामेवान्वयः , क्रियायाः तज्जनकरुपकारकस्य च परस्परं साकाङ्क्षत्वात् । उक्तञ्च – " **अतएवैषां क्रियायामेवान्वयः । क्रियाजनकमितिज्ञाने का सा क्रियेत्याकाङ्क्षोदयेन क्रियायाः जनकाकाङ्क्षया च तत्रैवान्वयस्यौचित्यात्** [696]" इति ।

भाष्यसम्मतिः यद्यपि पाणिनिना कारकस्य किमपि लक्षणं न कृतम् , किन्तु " **कारके** [697]" इति सूत्रितम् । लघ्वर्थं हि संज्ञाकरणमिति सिद्धान्तसत्त्वेऽपि " **कारके** [698]" इति महासंज्ञाकरणात् तत्र केनापि विशिष्टार्थेनावश्यमेव भाव्यम् । तथा चोक्तं भाष्ये –" **कारक इति महती**

---

[694] **परमलघुमञ्जूषायां कारकविचारे पृ. ४३४ ।**

[695] **पतञ्जलिमहाभाष्योद्द्योते ।**

[696] **परमलघुमञ्जूषायां कारकविचारे पृ. ४३४ ।**

[697] **पाणिनीयाष्टाध्याय्यां सू. १.४.२३ ।**

[698] **पाणिनीयाष्टाध्याय्यां सू. १.४.२३ ।**

**संज्ञा क्रियते , संज्ञा च नाम यतो न लघीयः त महत्याः संज्ञायाः करणे एतत् प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायते , करोतीति कारकमिति**[699] ” इति ।

तद्व्याख्यानं कुर्वता कैयटेन भणितं- “ **साध्यत्वेन क्रियैव शब्दात्प्रतीयत इति क्रियाया निर्वर्तकस्य कारकसंज्ञापादानादिसंज्ञा च प्रवर्तते** [700]” इति । तस्मात् क्रियाजनकत्वं कारकत्वमिति लक्षणं भाष्यसम्मतमस्ति ।

ननु क्रियाजनकत्वस्यैव कारकत्वे पटं करोति घटं स्मरतीत्यादौ पटे क्रियाजनकत्वाभावात् , घटे च स्मरणजनकत्वासम्भवादुक्तवाक्यस्य घटपटयोः कारकत्वं न स्यादितिचेन्न , तन्तिनिष्ठजनकत्वस्य पट आरोपात् । एवञ्च द्वितीयस्थले सम्बन्धिज्ञाननिष्ठजनकत्वस्य घट आरोपेण दोषाभावात् ।

अथवा वैयाकरणसम्प्रदाये बौद्धार्थस्यैव पदशक्यत्वेन शाब्दबोधविषयो भवति । तद्बोधतात्पर्येणैव च शब्दानामुच्चारणं भवति । एवञ्च “ **कर्मणि द्वितीया** [701]” इत्यादिसूत्राणां क्रियाजनककर्मादिरूपार्थ-विषयकबोधतात्पर्येणोच्चरितात् घटादिपदात् द्वितीया भवतीत्यर्थः । सूत्राणां प्रवृत्तिविषयता अपि तत्तद्बौद्धार्थरूपरूषिते बाह्यार्थे । एवञ्च “ **घटं करोतीत्यादौ बाह्यार्थाभावेऽपि बौद्धार्थस्य क्रियाजनकत्वान्न कारकत्वानुपपत्तिः बौद्धार्थस्य क्रियाजनकत्वे बाह्यार्थे जनकत्वव्यवहारः आरोपेणैवोपपादनीय** ” इति । उक्तञ्च – “ **घटं करोति स्मरतीत्यादौ बौद्धघटादेः पूर्वकालत्वेन**

---

[699] **पातञ्जलमहाभाष्ये १.४.२३ पृ.२४२ ।**

[700] **पातञ्जलमहाभाष्यप्रदीपे १.४.२३ पृ.२४२ ।**

[701] **पाणिनीयाष्टाध्याय्यां सू. २.३.२ ।**

**स्मृत्यादिनिष्पादकत्वं बोध्यम्** [702]" इति । तस्मात् क्रियाजनकत्वं कारकत्वमिति पक्षे न कश्चन दोषः ।

➢**अन्याचार्यसम्मतिः**

भोजैः क्रियानिमित्तस्यैव कारकत्वमिति स्वीकृतम् । उक्तञ्च – " **क्रियानिमित्तं कारकम्** " [703] अत्र निमित्तत्वञ्च साक्षादेव । परम्परयानिमित्तत्वस्वीकारे तु चैत्रस्य तण्डुलं पचतीत्यत्रानुमत्यादि-प्रकाशनद्वारा चैत्रस्यापि परम्परया क्रियानिमित्तत्वेन कारकत्वापत्तिः । साक्षान्निमित्तता तु कर्तरि तण्डुले च वर्तते अतः साक्षान्निमित्तत्वं स्वीकारे नोक्तदोषः । यत्तु नागेशेन परमलघुमञ्जूषायां – " **ननु क्रियानिमित्तत्वं कारकत्वमित्यादिना , क्रियानिमित्तं खण्डितं , तत्तु साक्षात्परम्परा-साधारणं निमित्तत्वमित्यभिप्रायेणेति बोध्यम्** [704]" इति ।

आचार्यवात्सायनः कारकस्वरूपं प्रतिपादयन् उक्तं – " **एवञ्च सति न द्रव्यमात्रं कारकं न क्रियामात्रम् , किं तर्हि क्रियासाधनम् , क्रियाविशेषयुक्तं कारकम् , यत् क्रियासाधनं स्वतन्त्रं स कर्त्ता , न द्रव्यमात्रं , न क्रियामात्रम् । क्रियया व्याप्तुमिष्यमाणतमं कर्म , न क्रियामात्रम् । एवं साधकतमादिष्वपि** [705]" इति ।

एवञ्च सर्वसम्मते क्रियाजनकत्वरूपकारकत्वस्वरूपे अवश्यरूपेण प्रविष्टायाः क्रियायाः उपस्थितत्वात्तत्स्वरूपं निरूप्यते ।

---

[702] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४३४ ।**

[703] **सरस्वतीकण्ठाभरणे १.१.४२ ।**

[704] **परमलघुमञ्जूषायां कारकविचारे सं.१४७ , पृ.२५७ ।**

[705] **न्यायभाष्ये २.१.१६ ।**

# क्रियास्वरूपविमर्षः

क्रियास्वरूपविषये वाक्यपदीये एव पर्याप्तरूपेण विचारः कृतः भर्त्तृहरिणा। क्रियास्वरूपं विवृण्वता भर्त्तृहरिणोक्तम् –

**“ यावत् सिद्धमसिद्धं वा , साध्यत्वेन प्रतीयते ।**

**आश्रितक्रमरूपत्वात् , सा क्रियेत्यभिधीयते ॥** [706]” इति।

अयम्भावः भूतकालावच्छिन्ने अपाक्षीदित्यादौ , वर्त्तमानकालावच्छिन्ने पचतीत्यादौ भविष्यत्कालावच्छिन्ने पक्ष्यतीत्यादौ यावत् साध्यत्वेनाभिधीयते , साधिश्रयणाद्यवयवानां क्रमरूपा , पूर्वापरीभूतावयविका क्रियेति व्यवह्रियते। एवञ्च व्याख्यानेनानेन क्रियाया रूपद्वयं ज्ञातं भवति –

**१. क्रिया तु साध्यत्वस्वभावा।**

**२. पूर्वापरीभूतावयविका ( अधिश्रयणादि क्रमयुक्ता वा )** इति।

तस्याः साध्यत्वस्वभावे मानमुपपादयता कौण्डभट्टेनापि उक्तम् – **“ न च साध्यत्वेन अभिधाने मानाभावः , “ पचति , पाकं करोति , कृतिः ” इत्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोः दर्शनस्यैव मानत्वात् । तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम्** [707]” इति।

अवान्तरव्यापारयुक्ता च क्रिया भवति। यथा एकस्यामेव पाकक्रियाया काष्ठयोजनमधिश्रयणम् , फूत्कारः , अधःश्रयणमित्यादिका सर्वा एवावान्तरक्रिया पाकक्रियान्तर्भूता । अतएव फूत्कारादिकर्त्तरि देवदत्तेऽपि **“ देवदत्तः पचतीति ”** व्यवहारो भवति । एवञ्च **“ देवदत्तः दारुणा**

---

[706] **भर्तृहरिवाक्यपदीये ३.८.१ ।**

[707] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पृ.१२ ।**

**ओदनं पचति** ” इत्यादौ सर्वेषामेव कारकाणामवान्तव्यापारो भवति , सो व्यापारः क्रियेत्युच्यते । एतेषां सर्वेषामवान्तरव्यापाराणां किमपि फलमवश्यमेव भवति । एतेषामवान्तरक्रियाफलानां पूर्णतायामेव पूर्णा क्रियासिद्धिर्भवति । अत एव कारकाणां प्रवृत्तिविशेषः क्रियेति प्रवादोऽपि संगच्छते । कारकप्रवृत्तिविशेषस्य क्रियात्वं हेलाराजेनापि स्वीकृतम् । तथा चोक्तम् – “ **फलजननेनैव साधारणात्मिका क्रिया प्रवृत्तिविशेषः**[708] ” इति ।

अन्यत्राप्युक्तम् – “ **शब्देन साध्यतमा अभिधीयमानः समाश्रितक्रमः पौर्वापर्यवान् अर्थः क्रिया** [709]” इति ।

तस्मात् क्रियासमुदायेनैव पूर्णफलमुपलभ्यते , न तु केनचिदप्येकेनावान्तर-व्यापारेण । एवञ्च पाकक्रियान्तर्गतेषु सर्वेषु फूत्काराद्यवान्तरव्यापारेषु जातेष्वेव क्रियाफलसिद्धिर्भवति ।

नन्वेवं फूत्काराद्यनेकावान्तरव्यापाराणां समुदायः क्रियेत्युच्यते “ **क्रियावचनो च धातुः** ” इति । एवञ्च पचादिधातूनां नानार्थकतापत्तिः । तथाहि नानार्थत्वं नामनानाधर्मावच्छिन्नशक्यतानिरूपितैकधर्मा-वच्छिन्नशक्ततावत्त्वम् । यथा च प्रकृते पचादिधातूनां फूत्कारात्वादिनानाधर्मेण शक्यत्वे , शक्यता फूत्कारात्वादिनानाधर्मा-वच्छिन्ना , पचादिनिष्ठा शक्तता च पचत्वाद्येकधर्मावच्छिन्नेति भवति नानार्थत्वमिति चेत् ? अत्रोच्यते – “ **यद्यपि क्रियायामवन्तरव्यापारो भवति , परन्तु बुद्धिविशेषेण तत्रैकत्वबोधः । यथा पदेषु नानावर्णानां विद्यमानत्वेऽप्येकं पदमित्येकत्वव्यपदेशः , यथा वालातचक्रेष्वेकत्व-बुद्धिर्भवति** ” इति । उक्तञ्च भर्तृहरिणा –

---

[708] **भर्तृहरिवाक्यपदीये हेलाराजटीकायां ३.८.१ ।**

[709] **भर्तृहरिवाक्यपदीये हेलाराजटीकायाम् ३.८.३ ।**

**“ गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।**
**बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥** [710]” इति ।

अयम्भावः क्रमेणोत्पत्तिमतां फूत्कारादिव्यापाराणां समूहालम्बनात्मिकया बुद्ध्या प्रकल्पिताभेदविशिष्टः समुदायः , क्रियेति व्यपदिश्यते । कौण्डभट्टेनापि उक्तम् –“ **न च नानार्थतापत्तिः , तदादि न्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात् । आख्याते क्रियैकत्वव्यवस्था अप्यवच्छेदकबुद्धिविशेषैक्यमादायैव** [711]” इति ।

### ➢भाष्यसम्मतिः

भाष्यकृतापि क्रियाया अप्रत्यक्षत्वं स्वीकृतम् । तथा च भाष्यम् “ **क्रियानामेयमत्यन्तापरिदृष्टाशक्या पिण्डीभूतानिदर्शयितुम् । यथा गर्भो निर्लुठितः सासावनुमानगम्या** [712]” **इति ।**

कैयटेनापि उक्तम् – “ **आख्यातपदवाच्या पूर्वापरीभूतावयवा साध्यमानावस्था भूतभविष्यद्वर्त्तमानसदसदनेकावयवसमूहरूपासद्वस्तुविषयेन्द्रियग्राह्या न भवति** [713]” इति ।

क्रियाभावयोरैक्यं स्वीकृत्य भावस्वरूपं प्रतिपादयता भगवता यास्केनोक्तम् – “ **पूर्वापरीभूतं भावमख्यातेनाचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्ग पर्यन्तम्** [714]” इति ।

---

[710] **भर्तृहरिवाक्यपदीये ३.८.८ ।**

[711] **वैयाकरणभूषणसारे धात्वार्थप्रकरणे पृ. १९,२० ।**

[712] **पतञ्जलिमहाभाष्ये १.३.१ पृ.११५ ।**

[713] **पतञ्जलिमहाभाष्यप्रदीपे १.३.१ पृ.११५ ।**

[714] **निरुक्ते १.१ ।**

### ➢हरिसम्मतिः

क्रियानिष्पत्तेः कारणभूत द्रव्यशक्तिः , साधनशब्देन कारकशब्देन वा उच्यते । साध्यते अनेन क्रियेति साधनशब्दस्य , करोति क्रियामिति कारकशब्दस्य च व्युत्पत्तेः । उक्तञ्च हरिणा –

**“ स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे ।**

**क्रियाणामभिनिष्पत्तौ सामर्थ्यसाधनं विदुः ॥** [715]” इति ।

### ➢तत्पक्षे भाष्यसम्मतिः

**“ यदि तावद्गुणसमुदायः साधनं , साधनमप्यनुमानगम्यम् ”** इति भाष्ये[716]ऽपि गुणसमुदाय इत्यत्र समुदायशब्दः करणादिशक्तीनां द्योतकः । करणादिशक्तीनामपि क्रियासिद्धौ सामान्यरूपेन निमित्ततया तासामपि साधनत्वात् । उक्तञ्च कैयटेन – “ **समुदायग्रहणं सर्वासां करणादिशक्तीनां क्रियासिद्धौ निमित्तत्वाविशेषात् साधनत्व-प्रतिपादनार्थम् । तेन यावदुक्तं सर्वाः शक्तयः साधनमिति** [717]” इति ।

## कारकभेदः

सा च साधन ( कारक ) शक्तिः ’ एका अनेका वेति विषये दृश्यते वादिनां विवादः । तत्रानेकत्ववादिनः शक्तेः षड्विधत्वं स्वीकुर्वन्ति । सा च शक्तिर्नित्या भेदाभेदसमन्विता चास्ति । यथा अर्थेषु जातिस्तिष्ठति , तथैव तेष्वर्थेषु क्रियासिद्धये शक्तयोऽपि तिष्ठन्ति । एवञ्च द्रव्यभेदेन षड्भेदातिरिक्ता अपि भेदाः सम्भवन्ति , तथा अपि अन्येषां सम्भावितानां सर्वेषां भेदानामेषु

---

[715] **वाक्यपदीयस्य तृतीयकाण्डे साधनसमुद्देशे का. सं.१ ।**

[716] **पतञ्जलिमहाभाष्ये ३.२.११५, पृ.१३८ ।**

[717] **पतञ्जलिमहाभाष्यप्रदीपे ३.२.११५ , पृ.१३८ ।**

षड्विधेष्वेवान्तर्भावात् , तस्याः षड्विधत्वमेव युक्तम् । उक्तञ्च वाक्यपदीये –

**" नित्या षट्शक्तयोऽन्येषां भेदाभेदसमन्विताः ।**
**क्रियासंसिद्धयेऽर्थेषु जातिवत् समवस्थिताः ॥**
**द्रव्याकारादिभेदेन ताश्चापरिमिता इव ।**
**दृश्यन्ते तत्त्वमासां तु , षट्शक्तिर्नातिवर्तते ॥**[718]
**इमा एव षडशक्तयः षड्कारकाण्युच्यन्ते ।**

**➢भर्तृहरिसिद्धान्तः**

शक्तिः कर्त्तृत्वरूपेति हरिसिद्धान्तः । सैव कर्त्तृत्वशक्तिरवान्तरव्यापार-विवक्षारूपनिमित्तभेदात् करणसम्प्रदानादिरूपेण भिद्यते । तथा चोक्तम् –

**" निमित्तभेदादेकैव भिन्नाशक्तिः प्रतीयते ।**
**षोढाकर्त्तृत्वमेवाहुस्तत् प्रवृत्तेर्निबन्धनम् ॥**[719] " इति ।

कियाजनकत्वं कारकत्वमिति सिद्धान्तात् , सर्वेषां कारकाणां येन केनापि रूपेण कर्त्तृत्वं भवत्येव । यथा पुत्रोत्पत्तौ पित्रोरेव कर्त्तृत्वं भवति , किन्तु विवक्षावशात् पितरि कर्त्तृत्वं , मातरि चाधिकरणस्य सम्भवति । दुष्यन्तः शकुन्तलायां पुत्रमुत्पादयत् । कदाचिच्च मातरि कर्त्तृत्वं पितरि चापदानत्वं स्वीक्रियते " **शकुन्तला दुष्यन्तात् पुत्रमुत्पादयत्** " इति । एवञ्च विवक्षावशात् कारकाणां व्यवस्था भवति । अतएव विवक्षातः कारकाणि इति प्रवादः संगच्छते । हरिणापि भणितम् –

**" निष्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके ।**
**व्यापाराभेदापेक्षायां करणादित्यसम्भवः ॥**

---

718 **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. सं. ३५-३६ ।**
719 **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. सं.३७ ।**

**पुत्रस्य जन्मनि यथा पित्रोः कर्त्तृत्वमुच्यते।**
**अयमस्यामियं त्वस्मादिति भेदो विवक्षया॥** [720]" इति।

## ➢नागेशमतम्

" **कर्त्तुः कारकान्तरप्रवर्तनं व्यापारः, क्रियाफलेनोद्देश्यत्वरूपव्यापारश्च कर्मणः। करणस्यक्रियाजनका-व्यवहितव्यापारः, प्रेरणानुमत्यादिव्यापारः सम्प्रदानस्य, अवधिभावोपगमव्यापारोऽपादनस्य, कर्त्तृकर्मव्यवहितक्रियाधारण-व्यापारोऽधिकरणस्य** [721]" इति।

## ➢वात्सायनमतम्

कारकलक्षणं प्रतिपादयता तेनोक्तम् – " **तथा च कारकशब्दाः निमित्तवशात् समावेशेन वर्तन्त इति। वृक्षस्तिष्ठतीति स्वस्थितौ वृक्षः, स्वातन्त्र्यात् कर्त्ता। वृक्षं पश्यतीति दर्शनेनाप्तुमिष्यमाणत्वात् कर्म। वृक्षेन चन्द्रमसं ज्ञापयतीति ज्ञापकस्य साधकतमत्वात् करणम्। वृक्षायोदकमासिञ्चति इति असिच्यमानेनोदकेन वृक्षमभिप्रैतीति सम्प्रदानम्। वृक्षात् पर्णं पततीति ध्रुवमपायेऽपादानमिति अपादानम्। वृक्षे वयांसि सन्ति इति आधारोऽधिकरणम् इति अधिकरणम्** " [722] इति।

---

[720] भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. सं.१८,१९।

[721] वैयाकरणसिद्धान्तलघुमञ्जूषायां कारकप्रकरणे २४।

[722] न्यायभाष्ये २.१.१६।

## ➢वाचस्पतिमिश्रसम्मतिः

अवन्तव्यापारभेदादेकैव कर्त्तृत्वशक्तिः , करणत्वादिरूपेण विभज्यत् इति सिद्धान्तः महानैयायिकानां वचस्पतिमिश्रमहोदयानामपि मान्यः । भणितिश्च तेषामियम् – “ **यस्य हि व्यापारं प्राधान्येन धातुराख्यातप्रत्ययो वा अभिधत्ते सः स्वतन्त्रः कर्त्ता ! तथाहि विक्लिन्दतीत्यत्र तण्डुलादयः कर्त्तारः , पचतीत्यत्र देवदत्तादयः । तत् कस्य हेतुः ? एकत्र तण्डुलादेः व्यापारः उपात्तः , अपरत्र देवदत्तादेः । प्राधान्येन चाशेषकारकनिर्वर्त्यत्वं क्रियाया इति । अत्रान्तरे व्यापारभेदेऽपि प्रधानक्रियोद्देशेन समस्तकारकप्रवृत्तेः** [723]” इति ।

## ➢भाष्यसम्मतिः

विवक्षयैव कारकाणि भवन्तीति भाष्येऽपि सिद्धान्तितम् । अतएव “ **वृक्षस्य पर्णं पतति** ” इत्यादौ अपादानसंज्ञा प्राप्नोति इत्याक्षेप उक्तम् “ **यदा चापायो विवक्षितो भवति , तदापादानसंज्ञा तद्यथा – वृक्षाद् पर्णं पतति** [724]” इति ।

इदमत्रावधेयम् यत्र विवक्षाभेदादपादानादिकारकाणां विभिन्नप्रयोगो भवति तदा विवक्षा , वाक्यार्थश्च भिद्यते । अपादानकारके यादृशो वाक्यार्थो न तादृशोऽधिकरणकारके । विषयोऽयं विस्तृतरूपेण वर्णितः भगवता पतञ्जलिना - ‘‘ **द्रोणं पचति , आढकं पचतीति सम्भवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते । तत्र तदा परिवर्तते । एषोऽधिकरणस्य पाकः । एतदधिकरणस्य कर्त्तृत्वम् । .......एधाः पक्ष्यन्त्या विक्लित्तेर्ज्वलयिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि**

---

[723] **न्यायवार्त्तिकतात्पर्यटीकायां पृ. ३१ ।**

[724] **पतञ्जलिमहाभाष्ये १.४.२३ , पृ.२४१ ।**

**पचन्तीत्युच्यन्ते । तत्र तदा परिवर्तन्ते । एषः करणस्य पाकः । एतत्करणस्य कर्त्तृत्वम्** [725]” इति ।

विवक्षाभेदात् कारकभेदे वाक्यार्थस्य भेदः भाष्ये प्रदीपे च प्रतिपादितः । तथाहि – “ **तयोः स्वातन्त्र्यपारतन्त्र्ययोः पर्यायेण वचनं भविष्यति । वचनाश्रया च संज्ञा भवष्यति । तद्यथा बलाहकाद् विद्योद्यते विद्युत् । बलाहके विद्योद्यते । बलाहको विद्योद्यते** [726]” इति । व्याख्यातञ्च तत्र कैयटेन – “ **निस्सरणाङ्गे विद्योद्यते द्युतिर्वर्तते पृथग्भावश्च विवक्षित इत्यपादनत्वम् । ....... स्थित्यङ्गे द्योतनेऽत्र द्युतिर्वर्तते । बलाहके स्थित्वा ज्योती रूपा विद्युद् विद्योत इत्यर्थः** [727] ” । ...विद्युतो बलाहकस्य चाभेदविवक्षायामयं प्रयोगः ।

**“ सामान्यं कारकं तस्य सप्ताद्या भेदयोनयः।**

**षट् कर्माख्यादिभेदेन शेषभेदस्तु सप्तमी ॥** [728]” **इति ।**

क्रियाजनकत्वं कारकत्वं षट्सु कर्त्रादिष्वेव । ‘ **षष्ठी शेषे** ’ [729] इति सूत्रेण विहितायाः षष्ठ्याः कारकत्वं नास्ति , सूत्रे ‘ **शेषे** ’ शब्दस्य कारकप्रातिपदिकार्थभिन्नवाचित्वात् , कारकव्यतिरिक्ते एव षष्ठ्याः विधानात् । तथा चोक्तम् “ **कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषस्तस्य षष्ठी** [730]” **इति** । तस्मात् क्रियाजनकत्वरूपकारकाणि षडेव – कर्त्ता , कर्म , करण , सम्प्रदानापादानाधिकरणभेदात् ।

---

[725] **पतञ्जलिमहाभाष्ये १.४.२२, पृ.२४३ ।**

[726] **पतञ्जलिमहाभाष्ये १.३४.२३ , पृ.२४४ ।**

[727] **पतञ्जलिमहाभाष्येप्रदीपे १.४.२३ , पृ.२४४ ।**

[728] **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. सं.४४ ।**

[729] **पाणिनीयाष्टाध्याय्याम् सू.२.३.५० ।**

[730] **वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे , पृ.१८९ ।**

## ➢शब्दार्थरत्नकारमतम्

अपादानसम्प्रदानकरणाधिकरणकर्मकर्त्तृभेदात्थ्कारकं षड्विधम् । एतेषाञ्च एकस्यां क्रियायामुभयप्राप्तौ विप्रतिषेधे परं कार्यमित्युक्तेरुत्तरोत्तर-प्रावल्यं तदुक्तं हरिणा-

**“ अपादानसम्प्रदानकरणाधिकरणकर्मणाम् ।**

**कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते ।।** [731]**” इति ।**

गुणप्रधाणक्रिययोरेकस्मिन् द्रव्ये उभयशक्तिप्रसङ्गे तु प्रधानेन व्यपदेशाभवन्तीतिन्यायात् कार्यस्य प्रधानानुरोधित्वात् प्रधानशक्तिबोधिकैव विभक्तिर्ज्जायते गुणक्रियाशक्तिस्तु तात्पर्यवशादेव तत्र प्रतीयते तदुक्तं हरिणा-प्रधानतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् । शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यति । प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते । यथा गुणे तथा तद्वदनुक्तापि प्रतीयते इति स्थित्वाश्वेन गच्छतीत्येव प्रयोगः ।

## कर्त्ता

कर्त्तुः स्वरूपं प्रतिपादयता पाणिनिना सूत्रितम् – “ **स्वतन्त्रः कर्त्ता** [732]” इति । अयमर्थः ‘ **क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्त्तृसंज्ञको भवति** ’ इति । तत्र स्वातन्त्र्येणेत्यत्र स्वतन्त्रशब्दः प्रधानवाची । स्व आत्मा तन्त्रं प्रधानं यस्येति व्युत्पत्तेः । तथाचोक्तम् कैयटेन – “ **स्वशब्द आत्मवाची स्व आत्मा तन्त्रं प्रधानं यस्य स्वतन्त्र उच्यते** [733]” इति ।

भाष्यकृता पतञ्जलिनापि स्वातन्त्र्यस्य प्रधानमेवार्थः कृतः । अभिहितञ्च ‘‘ **अयं तन्त्रशब्दः अस्त्येव विताने वर्तते । तद्यथा**

---

731 **भर्तृहरिवाक्यपदीये ।**

732 **पाणिनीयाष्टाध्याय्यां सू.१.४.५४ ।**

733 **पतञ्जलिमहाभाष्यप्रदीपे १.४.५४ ।**

**आस्तीर्णं तन्त्रम् , प्रोतं तन्त्रमिति । वितानमिति गम्यते । अस्ति प्राधान्ये वर्तते । तद्यथा स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते । स्वप्रधान इति गम्यते । तद् यः प्रधाने वर्तते तन्त्रशब्दः तस्येदं ग्रहणम्** [734]" इति ।

एवञ्च स्वातन्त्र्यञ्च नाम प्रधानीभूतधात्वर्थाश्रयत्वम् । ननु कर्मणि प्रत्यये " **देवदत्तस्य ओदनः पच्यते** " इत्यादौ देवदत्तनिष्ठव्यापारस्य नव्यमते प्राधान्याभावः । यतो हि नव्यानां मते तत्र फलविशेष्यक एव बोधः । अतएवोक्तम् नागेशेन –" **कर्माख्याते तु चैत्रेण ग्रामो गम्यते** [735]" इत्यत्र चैत्रकर्तृक व्यापारजन्यैकत्वावच्छिन्न ग्रामाभिन्नकर्मनिष्ठसंयोगः इति बोधः । एवञ्च तत्र ' **देवदत्तस्य प्राधानीभूतधात्वर्थाश्रयत्वाभावात् कर्तृत्वं न स्यादिति उच्यते चेत्** ' तर्हि तत्र " **देवदत्तस्य कर्तृत्वसिद्धये उक्तलक्षणे कर्तृप्रत्ययसमभिव्याहारे** " इत्यपि विशेषणं देयम् । तथा चोक्तं नागेशेन – " **स्वातन्त्र्यञ्च कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम् । पक्वस्तण्डुलो देवदत्तेन इत्यत्र फलस्य प्राधान्येऽपि देवदत्तस्य कर्तृत्वसिद्धये कर्तृप्रत्यय समव्याहारे** [736]" इति ।

नन्वेवमपि " **पाचयत्योदनं देवदत्तेन यज्ञदत्तः** " इत्यादौ प्रयोज्यस्य देवदत्तादेः कर्तृत्वं न स्यात् । तथाहि णिजन्तस्थले णिच्प्रत्ययस्य द्योतकत्वेन पाचि इत्यत्र धातोः विक्लित्त्यनिकूलव्यापारानुकूलव्यापार एवार्थः । एवञ्च प्रयोज्यव्यापारस्य द्वितीयव्यापारनिष्ठ विशेष्यतानिरूपित प्रकारताश्रयत्वेन प्रकारतासमानाधिकरण विशेष्यतारूप मुख्यविशेष्यताभावात् मुख्यविशेष्यताश्रयत्वरूप प्रधानत्वस्य प्रयोज्यव्यापारे असत्त्वेन प्रधानीभूतधात्वर्थाश्रयत्वं देवदत्तादेः प्रयोज्यस्य न स्यात् । तथाचोक्तं

---

[734] **पतञ्जलिमहाभाष्ये १.४.५४ ।**

[735] **परमलघुमञ्जूषायां कारकनिरूपणे , पृ.२५४ ।**

[736] **लघुशब्देन्दुशेखरे कारकप्रकरणे , पृ.४७६ ।**

पतञ्जिलना – “ **स्वतन्त्रस्य कर्त्तृसंज्ञायां हेतुमुपसंख्यानं कर्तव्यम् । पाचत्योदनं देवदत्तो यज्ञदत्तेनेति । किं पुनः कारणं न सिद्ध्यति ? अस्वतन्त्रत्वात्** [737]” इति ।

व्याख्यातञ्च कैयटेन – “ **यथा कर्त्तृसन्निधौ करणादीनां नास्ति स्वातन्त्र्यं , तथा प्रयोजकसन्निधौ प्रयोज्यस्य पारतन्त्र्यात् , स्वातन्त्र्याभावात् कर्त्तृसंज्ञाया अप्रसङ्गात् पाचत्योदनं देवदत्तेनेति कर्त्तृतृतीया न प्राप्नोति** ” इति । **एवञ्च णिजन्तस्थले कथं देवदत्तादीनां कर्त्तृत्वमिति चेत् ?** [738] अत्रोच्यते – “ **णिजन्तस्थले णिचप्रत्ययो वाचक एव , न तु द्योतकः । एवञ्च णिजन्तप्रकृतिभूतः यः पच्धातुः तद्वाच्यविक्लित्त्यनुकूलव्यापारस्य प्राधान्यात् तदाश्रयत्वेन देवदत्तादेः प्रयोज्यस्य कर्त्तृसंज्ञा , पाचि निरूपित कर्त्तृत्वं च प्रयोजकस्येति न काप्यनुपपत्तिः ।** अतएवोक्तं नागेशेन ‘ **णिचस्तु वाचकत्वमेव** ’ **अतस्तत्र ण्यन्तधातु तत्प्रकृतिधातु एतदुभयवाच्यव्यापारयोः स्वार्थं प्रति प्राधान्यात् देवदत्तेन यज्ञदत्तः पाचयति इत्यादौ प्रयोज्यव्यापाराश्रयस्यापि कर्त्तृत्वसिद्धिः । द्योतकत्वे तु नैतत् सिद्ध्येत्** [739]” इति ।

प्रयोज्यव्यापाराश्रयस्य कर्त्तृत्वाभावेऽपि करणस्तितीयैव निर्वाह इति तु न युक्तम् , प्रयोज्यस्य करणत्वाविवक्षायामपि “ **देवदत्तः शतेन बन्धयतीत्यादौ** “ **अकर्त्तृर्यणे पञ्चमी** [740]” इत्यनेन प्राप्तां पञ्चमीं बाधित्वा कर्त्तृत्वप्रयुक्त तृतीयार्थं कर्त्तृसंज्ञायाः आवश्यकत्वात् ।

---

[737] **पतञ्जलिमहाभाष्ये १.४.५४ , पृ.२७८ ।**

[738] **पतञ्जलिमहाभाष्यप्रदीपे १.४.५४ , पृ.२७८ ।**

[739] **लघुशब्देन्दुशेखरे कारकप्रकरणे , पृ.४७६-४७७ ।**

[740] **पाणिनीयाष्टाध्याय्यां २.३.२४ ।**

कर्तृत्वप्रयोजकं स्वातन्त्र्यञ्च विवक्षाधीनम् । अतः स्थाली पचति , काष्ठानि पचन्ती इत्यादौ स्थाल्यादीनां वस्तुतः स्वातन्त्र्याभावेऽपि स्वातन्त्र्येण विवक्षितत्वात् कर्तृसंज्ञा । अतएव ‘ **स्वतन्त्रः कर्त्ता** ’[741] इति सूत्रस्य वृत्तौ विवक्षितोऽर्थः कर्त्ता स्यात् इत्युक्तम् ।

कर्मणः कर्तृत्वविवक्षायामोदनः स्वयमेव पच्यते इत्यादौ कर्मकर्त्तरि प्रधानीभूतधात्वर्थफलाश्रयत्वेन कर्तृत्वं बोध्यम् ।

अथवा स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं वा स्वातन्त्र्यम् । कर्त्तुः स्वेच्छाधीना भवति । अन्येषां कारकाणान्तु प्रवृत्तिनिवृत्तिश्च कर्त्रपेक्षया । अत एव सर्वेषां कारकाणां सामान्येन क्रियोत्पादकत्वेऽपि कर्त्तुरेव स्वातन्त्र्यम् , न त्वन्येषां कारकाणाम् । तथा च कर्त्तरि किं कृतं प्राधान्यमित्यपेक्षायामुक्तं भाष्ये - “ **कथं पुनर्ज्ञायते कर्त्ता प्रधानमिति ? यत्सर्वेषु साधनेषु सन्निहितेषु कर्त्ता प्रवर्तयिता भवति** [742]” इति ।

व्याख्यातञ्च कैयटेनापि – “ **तदधीन प्रवृत्तिनिवृत्तित्वात्करणादीनां तस्य च प्रागन्यतः शक्तिलाभात्प्रतिनिध्यदर्शनात् करणाद्यभावेऽप्यास्ते शेते इत्यादौ केवलस्य कर्त्तुर्दर्शनात् कर्त्तृरहितानां करणादीनामदर्शनात् प्राधान्यं कर्त्तुः** [743]” इति ।

## ➢भर्त्तृहरिसम्मतिः

भर्त्तृहरिणा कर्त्तुः स्वातन्त्र्येऽनेकाः युक्तयः उपन्यस्ताः । तद्यथा कर्त्रा सर्वकारकापेक्षया पूर्वमेव शक्तिर्लभ्यते । कर्त्तान्यानि कारकाणि न्यग्भावयति । अन्येषां कारकाणाञ्च प्रवृत्तिनिवृत्ती कारकाधीने भवतः । कर्त्तुः कोऽपि

---

741 **पाणिनीयाष्टाध्याय्यां २.४.५४ ।**

742 **पतञ्जलिमहाभाष्ये १.४.२३ , पृ.२४५ ।**

743 **महाभाष्यप्रदीपे १.४.२३ , पृ.२४५ ।**

प्रतिनिधिर्न भवत्येषां कारकाणाञ्च प्रतिनिधयः भवन्ति , सत्यामावश्यकतायां तेषां स्थाने प्रतिनिधयः उपस्थाप्यन्ते । एवञ्चान्यैरपि कारणैः कर्त्तुरन्यकारकापेक्षया स्वातन्त्र्यं प्रतिपादितम् । उक्तञ्च –

**" प्रागन्यतःशक्तिलाभात् न्यग्भावापादानादपि ।**
**तदधीनं प्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ॥**
**अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।**
**आरादप्युपकारित्वे स्वातन्त्र्यं कर्त्तुरिष्यते ॥** [744]"

तस्मादन्येषां कारकाणां कर्त्रधीनप्रवृत्तिनिवृत्तिकत्वेन स्वेच्छाधीन-प्रवृत्तिनिवृत्तिकत्वरूपस्वातन्त्र्यस्वीकारे नातिव्याप्तिः ।

न चोक्तरूपस्वातन्त्र्यस्वीकारे णिजन्तस्थले " **पाचयत्योदनं देवदत्तेन यज्ञदत्तः** " इत्यादौ प्रयोज्यकर्त्तुः स्वेच्छाधीनप्रवृत्तिनिवृत्ति-कत्वाभावादव्याप्तिः स्यादिति वाच्यम् , तत्रापि स्वार्थसत्त्व एव प्रवृत्तिः , तदभावे चाप्रवृत्तिरितिस्वीकारेणादोषात् । अतएव –

**" निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये ।**
**अभिप्रायानुरोधोऽपि स्वार्थस्यैव सिद्धये ॥** [745]" इति ।

तच्च प्रवृत्तिनिवृत्तिकत्वरूपं स्वातन्त्र्यमारोपितमनारोपितं वेत्यत्र न कश्चनाग्रहः । अतः स्थाली पचति , काष्ठानि पचन्ति इत्यादौ स्थाल्यादौ तस्यारोपात् , कर्त्तृसंज्ञा भविष्यतीति न कश्चन दोषः पक्षेऽस्मिन् । तथा चोक्तम् –

" **स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं वा स्वातन्त्र्यम् । तच्च प्रयोजकसन्निधानेऽपि प्रयोज्यस्य । तत्सन्निधानेऽपि स्वार्थसत्त्वे प्रवृत्तेस्तदभावेऽप्रवृत्तेश्च । निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये ।**

---

[744] **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १०१,१०२ ।**

[745] **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १२४ ।**

**अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये । तत्वारोपितमनारोपितं च संज्ञा निमित्तम् । आद्यं स्थाल्यादौ । अन्त्यं पुरुषे** [746]" इति ।

## ➢तारानाथतर्कवाचस्पतिमतम्

कर्त्तृत्वं नामधातूपात्तव्यापाराश्रयत्वं धातुनोक्तक्रिये नित्यं कारके कर्त्तृतेष्यते इति हर्य्युक्तेः । स च द्विविधः स्वतन्त्रः तत्प्रयोजकश्चेतिभेदात् । तत्र स्वातन्त्र्यं नामेतरव्यापारानधीनव्यापारवत्त्वं कारकान्तरप्रयोजक-व्यापारवत्त्वं वा यथोक्तं हरिणा -

" **प्रागन्यतः शक्तिलाभात् प्राग्भावापादानादपि ।**
**तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात् ।।**
**अदृष्टत्वात् प्रतिनिधेः प्रविविके च दर्शनात् ।**
**आरादप्युपकारित्वात् स्वातन्त्र्यं कर्त्तुरिष्यते ।।** [747]" इति ।

अयम्भावः इतरव्यापारात् प्रागपि स्वव्यापारसत्त्वात् कारकान्तराणां स्वाधीनप्रवृत्तिनिवृत्त्योर्दशनात् दात्रादेः कुठारादिवत् स्वस्य प्रतिनिध्यसम्भवात् कारकान्तरप्रयोगेऽपि स्ववाचकपदप्रयोगात् साक्षाद्धातूपात्तफलजनकव्यापारवत्त्वाच्च कर्त्तुः स्वातन्त्र्यमिति । पाचयतीत्यादावपि प्रयोज्यस्य पाके स्वातन्त्र्यमस्त्येव वेतनादिलाभरूप-स्वार्थसिद्धय एव तस्य प्रवृत्तेः ' **निमित्तेभ्यः प्रवर्त्तन्ते सर्व एव स्वभूतये** ' अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये इति हरिणा स्वार्थसिद्ध्यर्थप्रवृत्त्यैव स्वातन्त्र्यव्यवस्थापनादित्यलम् ।

---

[746] **वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे टिप्पण्यां पृ. १७१ ।**
[747] **भर्तृहरिवाक्यपदीयस्य साधनसमुद्देशे १०१,१०२ ।**

### ➢नैयायिकमतखण्डनम्

नैयायिकास्तु कृत्याश्रयत्वं कर्त्तृत्वं स्वीकुर्वन्ति । कृत्याश्रयत्वञ्च समवायेनैव । एवञ्च “ **घटः पचती** ” त्यादौ कालिकादिसम्बन्धेन घटे कृतेर्विद्यमानत्वेऽपि न कर्त्तृत्वम् , तन्न युक्तम् कृतेश्चेतन एव विद्यमानत्वेनाचेतनानां “ **रथो गच्छति** ” इत्यादौ रथादीनां कर्त्तृत्वं न स्यात् , कृत्याश्रयत्वाभावात् । तथाचोक्तं कौण्डभट्टैः - “ **कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा दण्डः करोति इत्यत्राव्याप्तम्** [748]” इति ।

## कर्त्तुः भेदाः

कर्त्तुः भेदत्रयं स्वीकृतम् कौण्डभट्टैः – “ **शुद्धः , प्रयोजको हेतुः , कर्मकर्त्ता च । तद्यथा रामः गच्छतीत्यत्र रामः शुद्धकर्त्ता , रामः पचतीत्यत्र रामः प्रयोजककर्त्ता , देवदत्तो यज्ञदत्तं गमयतीत्यत्र यज्ञदत्तादेः कर्मकर्त्तृत्वञ्च** [749]” इति ।

यद्यपि यज्ञदत्तादीनां “ **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ** [750] ” इति सूत्रेण कर्मसंज्ञा भवति , तया च संज्ञया कर्त्तृसंज्ञायाः बाधोऽपि भवति , किन्तु णिच्प्रकृतिधात्वर्थव्यापाराश्रयत्वेन तस्य कर्त्तृत्वलक्षणाक्रान्तत्वात् यज्ञदत्तः कर्मकर्त्तेति व्यवहारः । अभिहितञ्च – “ **अयञ्च त्रिविधः शुद्धः , प्रयोजकहेतुः , कर्मकर्त्ता च । मया हरिः**

---

[748] **वैयाकरणभूषणसारे सुबर्थनिर्णये पृ.१६८ ।**

[749] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१७० ।**

[750] **पाणिनीयाष्टाध्याय्यां सू. १.४.५२ ।**

**सेव्यते , कार्य्यते हरिणा , गमयति कृष्णं गोकुलम्** [751]" इति ।
दुर्गासिंहेन कातन्त्रवृत्तौ कर्मकर्तुः लक्षणं क्षीयते –

**" क्रियमाणान्तु यत्कर्म स्वयमेव प्रसिद्धति ।**
**सुकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद्विदुः ॥** [752]" **इति ।**

**➢सिद्धान्तः**

वस्तुतस्तु मुख्यरूपेण कर्त्तुः द्वैविध्यमेव । तत्र प्रथमः स्वतन्त्रः कर्त्ता , यः पाणिनिना ' **स्वतन्त्रः कर्त्ता** [753]' इति सुत्रेण प्रतिपादितः । द्वितीयस्तु हेतुकर्त्ता , यः " **तत्प्रयोजको हेतुः** [754]" इति सूत्रेण प्रतिपादितः । स्वीकृतश्चायं भेद जीवगोस्वामीमहोदयैरपि तथा चोक्तम् " **यस्यैव व्यापारतया क्रिया विवक्ष्यते , तत् स्वतन्त्र्यम् , यच्च तस्यापि प्रेरकतया तत् प्रयोजकम् , तच्च कारकं कर्त्तृसंज्ञं स्याद्** [755]" इति ।

प्रयोजकहेतुकर्त्तुः स्वरूपं प्रतिपादयता भर्त्तृहरिणा भणितम् –

**" प्रेषणाध्येषणे कुर्वन् तत्समर्थानिवाचरन् ।**
**कर्त्तैव विहितां शास्त्रे हेतुसंज्ञां प्रपद्यते ॥** [756]" इति ।

तत्र स्वतन्त्रः कर्त्ता त्रिविधः – अभिहितोऽनभिहितः , कर्मकर्त्ता च । तत्र प्रथमस्तावत् देवदत्तः पचति , द्वितीयः देवदत्तेन गम्यते , तृतीयस्तु ओदनः पच्यत इत्यत्र ओदनः कर्मकर्त्ता । प्रयोजकहेतुकर्त्ता च द्विविधः

---

[751] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१७० ।**
[752] **दुर्गासिंहेन कातन्त्र्यवृत्तौ ।**
[753] **पाणिनीयाष्टाध्याय्यां सू. १.४.५४ ।**
[754] **पाणिनीयाष्टाध्याय्यां सू. १.४.५५ ।**
[755] **हरिनामामृतवृत्तौ ।**
[756] **भर्तृहरिवाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १२५ ।**

चेतनरूपोऽचेतनरूपश्चेति । तद्यथा – पाचयत्योदनं गोपेन कृष्णः , भिक्षावासयति इति क्रेमेणोदाहरणं बोद्धव्यम् ।

➢**प्रथमार्थस्वरूपम् :** प्रथमायाः शक्तिग्राहकं सूत्रम् "**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** [757]" इति । यस्मिन् प्रातिपदिके उच्चरिते यस्यार्थस्य नियमेनोपस्थितिर्भवति स प्रातिपदिकार्थः । तेन शक्यलक्ष्यगौणानां सर्वेषां संग्रहः । '**कृष्णः सुन्दरः**' इत्यादौ प्रकृत्यर्थानुवादिका विभक्तिः । अभेदः संसर्गः । कृष्णाश्रितः सुन्दर इति बोधः । लिङ्गं तु प्रातिपदिकस्यैवार्थः । प्रत्ययाः द्योतकाः इति निरूपितं नामार्थवादे । संख्या अपि वाच्या द्योत्या वेति तत्रैव निरूपितम् । '**सिंहो माणवकः**' ,'**द्रोणो ब्रीहिः**' इत्यादौ सिंहद्रोणादिपदानां सिंहसदृशे द्रोणपरिच्छेद्यादौ च लक्षणा । प्रथमा तदनुवादिका अभेदः , अभेदः संसर्गः । सिंहसदृशाभिन्नो ब्रीहिः इति बोधः । अत्र सूत्रे प्रातिपदिकशब्देन तत्प्रकृतिकलिङ्गबोधकप्रत्ययविशिष्टमपि गृह्यते । "**प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्**" इति परिभाषणात् । तेन इन्द्राणीत्यादौ प्रथमासिद्धिः ।

तस्मात् प्रातिपदिकार्थश्चैत्रादिरेव प्रथमार्थः । तथा चोक्तं नागेशेन – "**सूत्रमते तु कर्त्तृकर्माद्यर्थकप्रत्ययेन कर्त्रादेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ एवार्थः । प्रथमा वाच्यः प्रातिपदिकार्थश्च व्यक्तिरूपः । अभिहितञ्च गिरिधरभट्टाचार्यैः प्रातिपदिकार्थः सत्ता व्यक्तिरिति यावत्** [758]" इति ।

---

[757] **पाणिनीयाष्टाध्याय्यां सू. २.३.४६ ।**

[758] **परमलघुमञ्जूषायां कारकविचारे पृ.९१ ।**

ननु चैत्रादिरूपोऽर्थः प्रकृतेरेव , एवञ्च प्रथमार्थोऽपि यदि चैत्रादिरेव , तदा कथं परस्परान्वयः , भेदसम्बन्धास्याव्युत्पन्नत्वात् , अभेदसम्बन्धस्य च तत्रासम्भवात् । यतो हि “ **घटो घटः** ” इत्यत्राभेदसम्बन्धेन बोधवारणाय “ **अभेदसम्बन्धावच्छिन्न तद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यता-सम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति , तद्धर्मभेदः कारणमिति , कार्यकारणभावः स्वीक्रियते** ”, एवञ्च यथा “ **घटो घटः** ” इत्यत्र शाब्दबोधो न भवति , तत्रैव अत्रापि प्रकृतिप्रत्ययार्थयोरभेदान्न परस्परमन्वयः इति चेदुच्यते प्रकृतिप्रत्ययार्थयोरभेदस्थले न प्रकृत्यर्थचैत्रादेः प्रथमार्थचैत्रादावन्वयोऽपि तु तत्र प्रातिपदिकं , प्रथमार्थविशेषे तात्पर्यग्राहकमेव । प्रथमोपस्थापितस्तु चैत्रादिप्रातिपदिकार्थः बोध्यः ।

न च “ **स्तोकं पचतीत्यादौ स्तोकादीनामर्थस्य पाकेऽभेदान्वयाय “ अभेदसम्बन्धेन निरर्थकसुप्समभिव्यहृतनामार्थप्रकारकशाब्द-बुद्धित्वावच्छिन्नं प्रति निरुक्तनामसमभिव्याहृतपदजन्योपस्थितिः कारणमिति कार्यकारणभाव-स्वीकारेणैव इष्टसिद्धिः स्यादिति वाच्यम् , चैत्रपदोत्तरप्रथमायाः निरर्थकत्वस्य पाणिन्यादि-विरुद्धत्वात्** ” इति ।

### ➢प्रथमार्थे कात्यायनसम्मतिः

कात्यायनास्तु प्रथमायाः प्रातिपदिकार्थे प्रातिपदिकस्य तात्पर्यग्राहकत्व-मात्रकल्पनायां शाब्दबोधजनकत्वानुपपत्तिः , अतोऽभिहित-कारकत्वमेव प्रथमार्थ इति स्वीकुर्वन्ति । तथा नागेशेनोक्तम् - “ **तत्रोक्ते तु कारकमात्रे प्रथमैव । “ तिङ्समानाधिकरणे प्रथमा ” “ अभिहिते प्रथमा ” इति वार्त्तिकद्वयात्** [759]” । तथा च कर्त्तृत्वादिरूपे प्रथमार्थे

---

[759] **परमलघुमञ्जूषायां कारकविचारे पृ.९१ ।**

रामादिप्रातिपदिकार्थः भेदसम्बन्धेनैवान्वेति । यथा चोक्तं खण्डदेवेन " **तस्मिंश्च कर्त्तृत्वादिरूपे प्रथमार्थे प्रातिपदिकार्थश्चैत्रादिः भेदसम्बन्धेनैवान्वेति** [760] " इति ।

न च व्यापारान्वितस्य कर्त्तृत्वादेः तिङैरेवोक्तत्वात् पुनः प्रथमयोत्पन्नस्य कर्त्तृत्वादिविषयकबोधस्य वैयर्थ्यापत्तिरिति वाच्यम् , रामत्वावच्छिन्नवृत्तित्वेन कर्त्तृत्वादेः तिङाबोधितत्वात् । तिङ्जन्यस्य कर्त्तृत्वेन कर्त्तृत्वप्रकारकबोधस्य प्रथमोत्पत्तिप्रयोजकत्वात् , न तस्य वैयर्थ्यम् । तिङा कर्त्तृत्वेन कर्त्तृत्वप्रकारकबोधाभावे तु तृतीयाद्यापत्तिः । तस्मात् कर्त्तृत्वाद्यभिधानस्यैव प्रथमाप्रयोजकत्वादभिहितकारकत्वं प्रथमार्थः इति कात्यायनसम्मतिः ।

तत्र कर्त्तृकर्मत्वाद्यभिधानमपि निपात तिङ्कृत्तद्धितसमासैरेव । उक्तञ्च " **अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैः क्वचिन्निपातेनाभिधानम्** [761]" इति ।

कात्यायनमतेन प्रथमाविभक्तेरर्थं निरूपयता खण्डदेवेन तु तिङ्निपाताभिहितकर्त्तृत्वकर्मत्वयोरेव प्रथमार्थत्वं स्वीकृतम् । तथा चोक्तं – " **तिङ्निपाताभिहितकर्त्तृत्वकर्मत्वयोरेव प्रथमार्थत्वात् । अतएव " प्रासाद आस्त "** [762] इत्यत्र धातूत्तरघजाऽधिकरणत्वस्योक्तत्वेऽपि न सप्तमीविरोधः । न वा ' **पक्वं भुङ्क्ते , इत्यत्र क्त प्रत्यनेन कर्तृत्वस्याभिधाने द्वितीयानापत्तिः** ' इति ।

वस्तुतस्तु निपाताभिहितकर्मत्वं प्रथमार्थः इत्यसङ्गतम् । निपातेन कर्मत्वस्याभिधाने प्रमाणाभावात् , मानाभावाच्च । " **विषवृक्षोऽपि**

---

[760] **भाट्टतन्त्ररहस्ये पृ.७१ ।**

[761] **वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे पृ.१६० ।**

[762] **भाट्टतन्त्ररहस्ये पृ.७१ ।**

**सम्बर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्** ” इत्यत्र द्वितीयाभाव एव प्रमाणं फलञ्चेति वक्तुं न युक्तम् , तत्र छेत्तुमित्यत्र तुमुन् प्रत्ययोत्पत्तये ‘ **इष्यत** ’ इति क्रियायाः अध्याहारस्यावश्यकत्वेन , **इष्यत** इति तिङैव कर्मत्वस्योक्तत्वान्न द्वितीया । तथा चोक्तं नागेशेन –“ **परेत्वत्र तुमुनः साधुत्वायेष्यते इत्यध्याहारः आवश्यकः । अन्यथा क्रियार्थक्रियोपपदत्वाभावा-च्छकादिप्रयोगाभावाच्च स दुर्लभ स्यात् । अध्याहारे तु इच्छार्थेषु तुमुनिति सुलभः । विषवृक्षोऽपि सम्बर्द्ध्य छेत्तुमिष्यते इति यत् तदसाम्प्रतमन्याय्यम् । एवञ्चाध्याहृततिङाभिधानान्न द्वितीया** [763]” इति ।

“ **प्रसाद आस्ते पक्वं भुङ्क्ते इत्यादौ तु घञ्प्रत्ययेन क्त** ” प्रत्ययेन चाधिकरणत्वस्य कर्मत्वस्य चोक्तत्वेऽपि सप्तमीद्वितीये भवत एव । पूर्वत्र सदिधात्वर्थनिरूपिताधिकरणत्वस्योक्तत्वेऽपि ‘ **आस्** ’ धात्वर्थनिरूपितस्या-धिकरणत्वस्यानुक्तत्वात् । एवमेव ‘ **पक्वं भुङ्क्ते** ’ इत्यत्रापि पच् धात्वर्थनिरूपितकर्मत्वस्याभिहितत्वेऽपि भुजि निरूपितस्य तस्यानुक्तत्वात् । यथा “ **सुन्दरं बालकं पश्य** ” इत्यादौ विशेषणवाचकपदोत्तरविभक्त्या कर्मण उक्तत्वेऽपि विशेष्यवाचकपदात् द्वितीया भवति , तथैव अत्रापि बोद्ध्यम् ।

अतएव द्वयोः क्रिययोरेकमेव कारकं , तत्रान्यतरेण कारकस्योक्तत्वे विभक्तिर्न प्राप्नोतीतिपूर्वपक्षमतमुपस्थाप्य समाहितं भाष्ये – “ **न वा एषः किं कारणम् ? अन्यतरेणानभिधानात् । अन्यतरेणात्रानभिधानम् । सदिप्रत्ययेनाभिधानम् आसिप्रत्ययेनानभिधानम् । यतोऽनभिधानम् , तदाश्रया सप्तमी भविष्यति** [764]” इति ।

---

[763] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४५२ ।**

[764] **पतञ्जलिमहाभाष्ये २.३.१ , पृ.४८४ ।**

एवञ्च परिगणनस्य नास्ति काचिदावश्यकेति सिद्धान्तः । अतएवोक्तं नागेशेनापि – " **अतएव परिगणनप्रत्याख्यानेऽपि न दोषः इत्याहुः** "[765] इति ।

## ➢नैयायिकमतम्

नैयायिकास्तु प्रातिपदिकार्थस्य प्रथमार्थत्वं न स्वीकुर्वन्ति , रामो राजेत्यादौ प्रातिपदिकार्थरूपव्यक्तेः प्रकृतित एव लाभात् । तथा चोक्तं नैयायिकशिरोमणिना श्रीगिरिधरभट्टाचार्य्येण " **रामो राजेत्यादौ व्यक्तेः , प्रातिपदिकात् प्रकृतित एव लाभात् कथं प्रथमार्थत्वम्** [766]" इति ।

न चानेकव्यक्तिवृत्तिरामत्वादिजातेः प्रकृतितः लाभेऽपि , व्यक्तिरूपार्थे प्रथमायाः शक्तिस्वीकारे नास्ति काचित् विप्रतिपत्तिरिति वाच्यम् , जातिशक्तिवादमते व्यक्तिबोधस्यसत्त्वात् । स तु बोधः लक्षणया शक्त्या वेत्यन्यत् ।

ननु घटादिप्रातिपदिकानां घटत्वेन सकलघटवाचकत्वेऽपि घटोऽस्तीत्यादावास्तित्वान्विततद्धटव्यक्तौ प्रथमायाः शक्तिस्वीकारो युक्त एवेति चेत् , तदपि न समीचीनम् ' शाब्दबोधे घटव्यक्तेः घटत्वेनैव भानं भवति , तद् व्यक्तित्वेन शाब्दबोधे भानस्याप्रामाणिकत्वात् ।

एवमेव कात्यायनाभिमतस्य तिङ्निपाताभिहितकारकत्वरूप-प्रथमार्थस्यापि खण्डनं कृतम् । तथा च कात्यायनाभिमतं खण्डयता गिरिधरभट्टाचार्य्येणोक्तम् –" **तदसत् । घटो नास्तीत्यादौ घटात्यन्ताभावशाब्दे प्रथमया कर्त्तृत्वाभिधानासम्भवात्** [767]" इति ।

---

[765] **लघुशब्देन्दुशेखरे कारकप्रकरणे , पृ. ४५३ ।**

[766] **विभक्त्यर्थनिर्णये पृ. ३४ ।**

[767] **विभक्त्यर्थनिर्णये पृ.४३ ।**

एवं महता समारम्भेन पाणिनिकात्यायनाभिमतं प्रथमार्थं खण्डयता नैयायिकाभिमतं प्रथमार्थमुपस्थापयता गिरिधरेणोक्तम् – ‘‘ **घटो नील इत्यादौ विशेषणविभक्तेर्नीलपदोत्तरप्रथमाया अभेदोऽर्थः । स घटादौ विशेषणीभूयान्वेति । तस्मात् नैयायिकानां नयेऽभेदः प्रथमार्थः । अभेदे च भेदोऽत्यन्ताभावश्चेति द्वयमर्थः । न तु भेदत्वावच्छिन्न-प्रतियोगिताकाभावरूपोऽर्थः भेदत्वावच्छिन्न प्रतियोगिताकाभाव-स्याप्रसिद्धत्वात्** [768]” इति । एवञ्च भेदोऽत्यन्ताभावश्च प्रथमार्थ इति नैयायिकानां सम्मतिः ।

### ➢पुरुषोत्तमदेवमतम्

‘ **सुप्तिङन्तं पदम्** [769]’ इत्यत्र सुबिति स्वादयः सप्तविभक्तयो गृह्यन्ते । तत्र प्रथमं प्रथमावगता । तत्र सूत्रं तावत् “ **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** ” इति । तत्र प्रातिपदिकार्थः सत्तेति । अद्वैतवादिनामैतद्दर्शनं सत्ता प्रातिपदिकार्थ इति । तथाहि सत्ता नाम काचिदनादिनिधनरूपा नित्यतता व्यवस्थिता अनिर्मेया आकाशादिवत् सर्वशब्दैरेवाभिधीयते । तदुक्तं –

**“ सम्बन्धिभेदात् सत्तेव भिद्यमाना गवादिषु ।**
**जातिरित्युच्यते तस्यां सर्वे शब्दाः व्यवस्थिताः ॥**
**प्राप्तक्रमा विशेषेषु क्रिया सैवाभिधीयते ।**
**क्रमरूपस्य संहारे तत् सत्त्वमिति चोच्यते ॥**
**अतस्तां प्रातिपदिकार्थं धात्वर्थञ्च प्रचक्षते ।**

---

[768] **विभक्त्यर्थनिर्णये पृ. ४५ ।**

[769] **पाणिनीयाष्टाध्याय्यां १.४.१४ ।**

**सामान्यार्थात्तु सा नित्या तामाहुस्त्वलादयः॥** [770]" इति ।

यद्येवमभावशशविषाणादिभ्यः प्रथमा न प्राप्नोति । तेषामभाववाचकत्वेन सत्ताया अभावात् । **' नष्टो घट '** इत्यादेश्च प्रथमा न प्राप्नोति नष्टस्य सत्ताया अभावात् । बीजादङ्कुरो जायते इत्यादौ च प्रथमा न प्राप्नोति सतो जन्माभावात् । अत्रोच्यते - **" सत्ता हि द्विविधा वस्तुसत्ता अभिधेयसत्ता च "** । नेह वस्तुसत्ताभिप्रेता किं तर्ह्यभिधेयसत्ता । अभिधेयभूतस्य अर्थस्य सर्वत्र विद्यमानत्वात् नेदं दूषणम् । अभिधेयञ्च ज्ञेयमिति यावत् । सा चाभावविषाणादीनामपि विद्यते । तथा चोक्तं न्यासकृता – **" अभावोऽप्यभिधेयो भवत्येव , अन्यथा ह्यर्थाभावादिति वचनमनुच्चारणीयमेव स्यात् अनर्थकत्वात्** [771]" इति । न ह्यनर्थकं वचनं प्रयोगमर्हतीति । अर्थप्रत्यायनाय खलु शब्दः प्रयुज्यते । स चेदर्थो नास्ति किं प्रयोगेण[772] । अस्ति चाभावादिशब्दानां प्रयोगः । अतो निश्चीयते अभावोऽप्यभिधेयो भवत्येव[773] । भूतं भविष्यत् अत्यन्तासद्वा वस्तु अभिधेयसत्तां न व्यभिचरति । तथा चोक्तं भाष्यकृतापि न पदार्थः सत्तां व्यभिचरतीति । वस्तुसत्तापक्षे भाष्यकारवचनमनुपपन्नं स्यात् । पदार्थस्य वस्तुसत्ताव्यभिचरात् नष्टो घट इत्यादौ प्रयोगे । एवं सत्ता विचारिता । अन्ये तु आहुः । यत्रार्थान्तरनिरपेक्षा शब्दस्य वृत्तिः स प्रातिपदिकार्थ इति न्यासः । अत्रोच्यते –**" जातिशब्दानां गवादीनां जात्यपेक्षया द्रव्ये वृत्तिः । गुणशब्दानां शुक्लादीनां गुणापेक्षया द्रव्ये वृत्तिः । एवञ्च क्रियाशब्दानां पाचकादीनां क्रियापेक्षया द्रव्ये प्रवृत्तिः । अस्ति**

---

[770] **वाक्यपदीयतृतीयकाण्डस्य सं ३३-३५ , पृ.२९-३० , चौ.प्र ।**

[771] **न्यासकारेण जिनेन्द्रबुद्धिना सं १.२.४५ - वैशेषिकप्रसिद्ध्या चैतदुक्तम् । वैयाकरणप्रसिद्ध्या हि अभावस्येदमादिपरामर्शयोग्यत्वाद्द्रव्यत्वम् ।**

[772] **वाक्यपदीये शब्दप्रयोगेण ।**

[773] **निश्चीयते विपश्चिताभावोऽप्यभिधीयत इति ।**

**चार्थान्तरापेक्षया तेषां प्रवृत्तिरिति तद्वाचिभ्यः प्रथमया न भवितव्यम्** [774]" इति । उच्यते –

**" यस्मिन्नुच्चारिते शब्दे यदा योऽर्थः प्रतीयते ।**

**तमाहुरर्थं शब्दस्य नान्यदर्थस्य लक्षणम् ॥**[775] " इति ।

यो येनाभिधीयते स तस्यार्थ इति । जात्यादिविशिष्ट एवार्थो जात्यादिशब्दैरभिधीयते । जात्यापेक्षया तु तेषां जात्यादिविशिष्ट एव स्वार्थ इति जात्यादिविशिष्ट एवार्थे नार्थान्तरापेक्षः[776] । प्रथमप्रवृत्तौ तु यन्निमित्तमपेक्षते तद्विशिष्ट एव तस्यार्थो नार्थान्तरं भवितुमर्हति । यत् पुनः क्वचिदर्थे वर्त्तित्वा पुनरर्थान्तरे वर्त्तितुं निमित्तान्तरमुपादत्ते तदर्थान्तरम् । यद्येवं गौर्वाहीकः , सिंहो माणवक इत्यत्र गोशब्दो गवि वर्त्तित्वा सिंहशब्दस्य स्वार्थे वर्त्तित्वा पुनरर्थान्तरे वर्त्तते इति अस्त्यर्थान्तरापेक्षा वृत्तिरतः प्रथमया न भवितव्यं , प्रातिपदिकार्थभावात् । किन्तु स्थाणुर्वा पुरुषो वेति संशयातिरिक्तः प्रातिपदिकार्थः । गौरिव गवय इत्युपमानातिरिक्तः । **नीलमुत्पलं , कष्टं श्रितः , शङ्कुलया खण्डः , कुबेराय वलिः , वृकेभ्यो भयं , राज्ञः पुरुषः , अक्षेषु शौण्डः विशेष्यविशेषणभावातिरिक्तः प्रातिपदिकार्थ इत्यत्रापि प्रथमया न भवितव्यम्** । किञ्च वाक्यसामान्यार्था हि वृत्तिरिति सर्वत्र समासे विशेषणविशिष्ट एवार्थोऽभिधीयते , अतः समासात् न प्रथमा प्राप्नोति । किञ्च कृत्तद्धितयोः सम्बन्धाभिधानमिति सम्बन्धातिरिक्तः कृदन्तात्तद्धितान्ताच्च प्रथमया न भवितव्यम् । किञ्च देवदत्तः पचतीत्यत्र कर्त्रतिरिक्तः , पच्यते ओदनः इत्यत्र कर्मातिरिक्तः । एवमादिभ्य इत्यत्र

---

[774] **न्यासे २.३.४६ ।**

[775] **वाक्यपदीये द्वितीयेकाण्डे सं . ३२९ ।**

[776] **जातिशब्दादिभिरभिधीयते इति तेषां जात्यादिविशिष्ट एवार्थो नार्थान्तरापेक्षः, पृ. १०२ कारकचक्रे ।**

प्रथमया न भवितव्यं मात्रशब्देनातिरिक्तनिषेधात्[777] । अत्रोच्यते – यस्मिन्नर्थेऽन्वयव्यतिरेकाभ्यां यस्याभिधानशक्तिरवधारिता स तस्यार्थः । तत्र वृक्षो वृक्षं वृक्षेण इत्यादौ सर्वेषु विभक्त्यर्थेषु फलमूलशाखादिमानर्थोऽनुपात्तसंख्याकर्मादिविशेषः सर्वविभक्त्यर्थान्वयी प्रातिपदिकार्थोऽन्वयव्यतिरेकसिद्धः । तथा चोक्तं – यदनुवृत्तौ योऽनुवर्त्तते यस्मिन्निवृत्ते यो निवर्त्तते स तस्यार्थः इति । तदुक्तं –

**" यो योऽन्वेति च यं शब्दमर्थस्तस्य भवेदसौ ।**

**अन्वयव्यतिरेकाभ्यां शक्तिस्तस्यावसीयते ॥** [778]" इति ।

तदेवं योऽसौ सर्वविभक्त्यर्थान्वयी अन्वयव्यतिरेकसिद्धः सः प्रातिपदिकार्थः । तन्मात्रं गृहीत्वा प्रथमं प्रथमा कर्त्तव्या । तदनन्तरं पदं पदान्तरेण संसर्गमुपैति । पदान्तरसम्बन्धात् यत्तदन्यदाधिक्यमुपजायते नासौ पदार्थः । यतः पदावस्थायामप्रतीतोऽर्थः पदान्तरसंसर्गात् पदसमुच्चयादवगम्यमानो वाक्यार्थ एवावधार्यते । न च तत्रार्थे प्रथमा भवितुमुचिता , पूर्वमेवान्वयिनि प्रातिपदिकार्थे प्रथमाया उत्पन्नत्वादिति कुदेश्यतरसंभार एकप्रकारेणैव निरस्तः । तथा चोक्तं –

**" केवलेन पदेनार्थो यावानेवाभिधीयते ।**

**पदन्तु तावतोऽर्थस्य तदाहुरभिधायकम् ॥**

**सम्बन्धे सति यत्त्वन्यदाधिक्यमुपजाय ते ।**

**वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयम् ॥** [779]" इति ।

समासेषु कृत्तद्धितान्तेषु यद्यपि पदान्तरप्रयोगो नास्ति तथापि तत्र विशेषणविशिष्ट एवार्थः सर्वविभक्त्यर्थान्वयी । तावानेव प्रातिपदिकार्थो

---

[777] **अतिरिक्तमात्रनिषेधात् , पृ.१०३ कारकचक्रे ।**

[778] **कारकचक्रे पुरुषोत्तमदेवेन , पृ. १०३ ।**

[779] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०३ ।**

नातिरिक्तः । तेन तत्र प्रातिपदिकार्थ इत्येवं सिद्धा प्रथमा । **“ यो यावन्तमर्थं न व्यभिचरति स तस्यार्थ ”** इति । तथा चोक्तं भाष्यकृता – अन्वयी प्रातिपदिकार्थ इति । यो यावन्तमर्थं न व्यभिचरति तस्य तावानेवार्थोऽन्वयी , तेन तस्य तावानेवार्थः प्रातिपदिकार्थः नातिरिक्तः इति यावत् ।

अन्यदिदानीमभिधीयते । ननु यद्यन्वयी प्रातिपदिकार्थस्तदादौ सर्वेषु विभक्त्यर्थेषु वर्तते इत्यङ्गीकर्त्तव्यम् । तेन विना कथं नामान्वयी स्यात् । एवञ्चान्वयिनो वस्तुमात्रस्य प्रातिपदिकार्थस्य सर्वत्र प्रत्यासन्नत्वात् तन्मात्राश्रया प्रथमा अन्तरङ्गा । द्वितीयादयस्तु कारकविभक्तयः क्रियापदापेक्षत्वेन बहिरङ्गा । कटं करोति , ग्रामं गच्छति , कटेन कृतमित्यत्र यावदेव क्रियापदं न श्रूयते तावदेव कटशब्दात् प्रथमया भवितव्यमित्यन्तरङ्गत्वात् प्रथमया सकलो विषयो व्याप्तः इति क्व इदानीं द्वितीयादिभिर्भवितव्यमतो विभक्तिविधानं व्याकुलीकृतं वर्त्तते । अत्रोच्यते – लोकप्रयुक्तानां शब्दानामन्वाख्यानमिदम् । लोके च वाक्यमेव प्रयुज्यते तस्य सम्पूर्णार्थप्रतिपादकत्वेन निराकाङ्क्षतयार्थक्रियार्थिनां प्रवृत्तिनिवृत्तिहेतुत्वात् । वाक्याच्चोद्धृत्य पदमन्वाख्यायते । तत्र कर्मादिकारकेषु अनभिहितेषु द्वितीयादयः कर्त्तव्याः , अभिहितेषु कर्मादिषु प्रथमैव भवति इति एष विषयविभागः । अत एवोक्तं भाष्यकृता – **“ अभिहितः सोऽर्थः सम्पन्नः प्रातिपदिकार्थः** [780]” इति । अस्यायमर्थः – सोऽर्थः कर्मादिभिरभिहितो यदा भवति तदासावन्वयी प्रातिपदिकार्थः विद्यमानेष्वपि कारकेषु प्रथमावाच्यतया सम्पन्नो भवति । उक्तेषु कर्मादिषु प्रातिपदिकार्थः सम्पन्नः प्रथमावाच्यत्वेनेति शेषः ।

---

[780] **पातञ्जलमहाभाष्ये २.१.१ , पृ. ३६५ ।**

## ➢सम्बोधनप्रथमायाः अर्थः

सम्बोधनप्रथमायाः अर्थनिरूपणे कौण्डभट्टैस्तु किमपि न उल्लिखितम् , भाष्यकृतापि विषयेऽस्मिन् मौनमेवाकलितम् । किन्वत्र यथामति विभिन्नदार्शनिकदृष्ट्या सम्बोधनप्रथमार्थो विचार्यते ।

तत्र पाणिनिना ‘ **सम्बोधने च** [781]’ इति सूत्रेण सम्बोधने प्रथमा विधानात् सम्बोधनमेव सम्बोधनप्रथमार्थः ।

सम्बोधनस्तु क्रियासु विनियोगफलकोऽभिमुखीभावः । तथा चोक्तं भर्त्तृहरिणा –

“ **सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः ।**
**प्राप्ताभिमुखो ह्यर्थात्मा क्रियासु विनियुज्यते ॥**
**सम्बोधनं न वाक्यार्थः इति बुद्धेध्यः आगमः ।**[782] ”इति ।

अत्र सिद्धस्येत्यनेन सम्बोधनस्यानुवाद्यत्वम् , विनियुज्यते इत्यनेन तस्य प्रवर्तनाविषयक्रियासम्बन्धः सूच्यते । एवञ्च सम्बोधनविभक्तेरनुवाद्यतयानुवाद्यस्य च विधेय एवान्वयेन , विधेयता च क्रिया तिष्ठति सम्बोधनस्य क्रियायामेवान्वयः तेन च तस्य कारकविभक्तित्वमपि सिध्यति । तथा चोक्तं नागेशेन – “ **सम्बोधनप्रथमार्थस्य अपि अनुवाद्यत्वेनोद्देश्यता युष्मदर्थाभेदेन विधेयक्रियायामन्वयात् क्रियाजनकत्वरूपं कारकत्वम् ” । तस्य वाक्यार्थभावप्रतिपादयतां भर्त्तृहरिणान्त्वभिमुखीभवनानुकूलस्य सम्बोधन विभक्त्यन्तशब्द-प्रयोगरूपस्य व्यापारस्येतरानपेक्षेणैव प्रतीतेस्तन्न वाक्यार्थं इत्याश्यः । एवञ्च**

---

[781] **पाणिनीयाष्टाध्याय्यां २.३.४७ ।**

[782] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.सं.१६३,१६४ ।**

**" रामः मां पाहि "** इत्यत्र **" अभिमुखी भवद्रामोद्देश्यकप्रवर्तनाविषयो मत्कर्मकं रक्षणम्** [783]" इति बोधः ।

सम्बोधनस्य क्रियायां प्रकारतयैवान्वयो भवति । तथा चोक्तं भर्त्तृहरिणा –

**" सम्बोधनं पदं तत्क्रियायां विशेषणम् ।**
**व्रजानिदेवदत्तेति निघातोऽत्र तथा सति ॥** [784]" इति ।

सा च प्रकारता वैयधिकरण्येनैव । अतो हेतोस्तस्य क्रियासिद्धौ योगाभावात् कारकत्वं न सम्भवतीति प्रतिपादितं डा. रामशङ्करभट्टाचार्य्यैः स्वकीये **" पाणिनीयव्याकरन का अनुशीलन "** इत्याख्ये ग्रन्थे । तत्र व्रजानिदेवदत्तेत्यस्य देवदत्तामन्त्रणविशेषिता व्रजनक्रियेत्यर्थं प्रतिपाद्योक्तम् – **" इससे सिद्ध होता है कि सम्बोधनपद यद्यपि प्रकृतिगत विशेष्य है , पर क्रिया के साथ उसका सम्बन्ध विशेषण रूप से ही होता है । क्रिया के प्रति विशेषण होने के कारण हम सम्बोधन को कारक नहीं मानते** [785]" इति ।

किन्तु सम्बोधनस्य कारकत्वाभावप्रतिपादनपरं मतमेतन्न युक्तियुक्ततामावहति । यतो हि , धात्वर्थस्यैव क्रियात्वेन धात्वर्थमुख्यविशेष्यकशाब्दबोधस्यैव वैयाकरणसम्मतत्वेन सर्वेषामेव कारकाणां क्रियायां प्रकारतयैवान्वयः । एवञ्च विशेषणेन क्रियायामन्वयात् , सम्बोधनस्याकारकत्वस्वीकारे तु सर्वेषां कर्मादीनामकारकत्वापत्तिः । तस्मात् सम्बोधनस्यापि कारकत्वं नागेशादिभिः प्रतिपादनमेव समीचीनमिति मे मतिः ।

---

[783] **परमलघुमञ्जूषायां कारकविचारे पृ. ९२ ।**

[784] **भर्तृहरिवाक्यपदीये २.५ ।**

[785] **पाणिनीय व्याकरण का अनुशीलन् पृ.१६१ ।**

## ➤ सम्बोधनप्रथमार्थविचारे नागेशः

सम्बोधनमपि प्रथमार्थः । सम्बोधने च इति सूत्रस्वरसात् । तत्र सम्बोधनं ज्ञापनम् । अत एव ज्ञाप्यमान इत्यर्थकः सम्बोध्यमानो देवदत्तः इति व्यवहारः संगच्छते । सम्बोधनज्ञापनार्थमेव सम्बोधनविभक्त्यन्तपदघटित वाक्यप्रयोगः । तत्प्रयोजनं **( सम्बोधनज्ञापनप्रयोजनम् )** प्रवृत्तिनिवृत्त्यादि । सम्बोधनविभक्तिश्चानुवाद्यविषयिणी क्रियान्वयिनी च । तेन **' राजा भव युध्यस्व ' ' इन्द्रशत्रुर्वर्धस्व '** इत्यादौ न सम्बोधनविभक्तिः । राजत्वादेः असिद्धत्वेन अनुवाद्यत्वाभावात् । सिद्धस्यैवानुवाद्यत्वात् । अत एव राजन् युध्यस्व इत्यादौ इत्यस्य कुमारावस्थायां राज भव युध्यस्व इत्यस्य च राजावस्थायां न प्रयोगः । हे शब्दादिकं च सम्बोधनतात्पर्यग्राहकम् । अचेतने चेतनत्वारोपेण गौणप्रयोगः । यमुने गङ्गे सरस्वति इत्यादौ । अत्र च सम्बोधनं प्रकृत्यर्थं प्रतिविशेषणम् । तेन **" राम ! पाहि "** इत्यादौ रामसम्बन्धिसम्बोधनविषयस्त्राणमिति बोधः । सम्बोधनविभक्तेरनुवाद्य-विषयकतया अनुवाद्यस्य च विधेयसाकाङ्क्षतया विधेयस्य च क्रियारूपत्वेन तदन्वयस्यैवौचित्यात् । हे देवदत्त ! त्वं सुन्दरः इत्यादौ असीत्यध्याहारो बोध्यः । अत एव धिङ् मूर्ख इत्यादौ क्रियाध्याहारे प्रथमा । मूर्ख सम्बन्धिसम्बोधनविषया निन्द्याक्रियेति बोधः । क्रियायाः निन्द्यत्वं च सर्वासमतमूर्खादिकर्त्तृत्वमेव । क्रियाया अभावे **' धिङ्मूर्खम् '** इति द्वितीया । मूर्खसम्बन्धिनिन्देति बोधः ।

## ➤मीमांसकमतम्

मीमांसका अपि सम्बुद्धिः प्रथमायाः सम्बोधनमेवार्थं स्वीकुर्वन्ति , न तु कर्त्तृत्वादिकम् । तथा चोक्तं खण्डदेवेन – **" वस्तुतस्तु अस्मन्मतेऽपि ' चैत्र ! मैत्रः पचति ' इत्यादौ चैत्रस्य कर्त्तृत्वेन भावनान्वयस्य**

**निवारयितुमशक्यत्वात् सर्वत्र सम्बोधनमेव प्रथमाया अर्थः , न तु कर्त्तृत्वमपि** [786] " इति ।

न च कर्त्तृत्वस्य सम्बोधनप्रथमार्थत्वाभावे मध्यमपुरुषस्थले " **चैत्र ! पच** " इत्यादौ सम्बोध्यातिरिक्तस्यापि कर्त्तृत्वापत्तिरिति वाच्यम् , आख्यातेन सम्बोध्यायास्तद्व्यक्तेरेव कर्तृत्वेन लक्षणात् , दोषाभावात् ।

## ➢नैयायिकमतम्

नैयायिकास्तु समीहितं बोधनं सम्बोधनमिति व्युत्पत्त्यनुसारेण सम्बोधनप्रथमायाः इच्छाज्ञानयोः खण्डशः शक्तिं स्वीकुर्वन्ति । यथा चोक्तम् नैयायिकमतं प्रतिपादयता गिरिधरभट्टाचार्य्येणोक्तं – " **सम्बोधन बोधोद्देश्यकेच्छा , तत्र ज्ञानमिच्छा च खण्डशः प्रथमार्थः** [787]" इति । तत्र विभक्त्यर्थज्ञाने प्रकृत्यर्थस्य समवायेन , इच्छायाश्च विषयता सम्बन्धेनान्वयः , तत्रेच्छोपस्थितत्वात् प्रयोक्तुरेव ग्राह्या । ज्ञानस्य च प्रवर्तनाविषयमत्कर्मकरक्षणादिरूपवाक्यार्थे विषयतासम्बन्धेनान्वयः । तथा च – " **राम ! मां पाहि** " इत्यादौ विषयप्रयोक्तिरच्छारामसमवेत-ज्ञानविषयमत्कर्मक प्रवर्तना विषयरक्षणजनककृतिमांस्त्वमिति नैयायिकानां शाब्दबोधः । वैयाकरणानान्तु तत्पक्षे रामनिष्ठोद्देश्यताविषयः मदभिन्नैकत्वसंख्याविशिष्टाश्रयनिष्ठदुःखनिवृत्त्यनुकूलः त्वदभिन्नैकत्व-विशिष्टाश्रयनिष्ठो व्यापार इति बोधः ।

## ➢वैयाकरणसम्मतिः

प्राचीनवैयाकरणाः कैयटानुसारिणस्तु बोधनीयार्थविषयकज्ञानानुकूल-व्यापारानुकूलव्यापारः सम्बोधनपदार्थ इति स्वीकुर्वन्ति । नागेशास्तु –

---

[786] **भाट्टतन्त्ररहस्ये पृ. ७४ ।**

[787] **विभक्त्यर्थनिर्णये पृ.५४ ।**

**" सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः ।**
**प्राप्ताभिमुखो ह्यर्थात्मा क्रियासु विनियुज्यते [788]॥"**

इति हर्युक्तिं मनसि निधाय मुखपरावृत्त्यभिव्यङ्ग्योऽभिमुखीभावमात्रं सम्बोधनमिति स्वीकुर्वन्ति । तथा चोक्तं – " **सम्बोधनमभिमुखीकरणम्** [789]" इति । तथा च " **राम ! मां पाहि** " इत्यत्र अभिमुखीभवनाश्रयरामो-द्देश्यकप्रवर्तनाविषयो मत्कर्मकं त्वत्कर्त्तृकरक्षणमिति बोधः । " **व्रजानि देवदत्तः** " इत्यत्र " **जानीहि** " इत्यस्याध्याहारो बोद्ध्यः । एवञ्च व्रजानि देवदत्तेत्यनेनैव घटित वाक्यार्थबोधः ।

न च जानीहीति क्रियाध्याहारे ' **एकतिङ् वाक्यम्** ' इति रीत्या तस्यैकवाक्यत्वं न स्यात् , वाक्यभेदे " **चामन्त्रितस्य**[790] **च** " इत्यनेनेष्टो निघातो न स्यादिति वाच्यम् , **एकतिङ्वाक्यमित्यत्र** श्रूयमाणैकतिङन्तपदवत्त्वं वाक्यमिति तात्पर्येणादोषात् । जानीहि इत्यध्याहार एव विधेयक्रियायामेव सम्बोधनप्रकृत्यर्थान्वय इति नियमः संगच्छते । तथा च " **व्रजानि देवदत्त** " इत्यत्र अभिमुखीभवद्देवदत्तोद्देश्यक प्रवर्तनाविषयोमत्कर्त्तृकगमनकर्मकं ज्ञानमिव बोधः । अभिहितञ्च नागेशेन – " **व्रजानि देवदत्त " इत्यादौ जानीहि इत्यादि शेषो बोद्ध्यः । अत्र व्रजनस्य कर्मत्वाद्देवदत्तस्योद्देश्यत्वादुभयोः समानवाक्यस्थत्वम् । एकतिङ्वाक्यम् इत्यस्य च श्रूयमाणैकतिङित्यर्थ इति न दोषः**[791] " इति ।

---

[788] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.सं.१६३ ।**

[789] **लघुशब्देन्दुशेखरे कारकप्रकरणे का. ३२ पृ.४३१ ।**

[790] **पाणिनीयाष्टाध्याय्यां ८.१.१९ ।**

[791] **लघुशब्देन्दुशेखरे कारकप्रकरणे का. ३३ पृ.४३२ ।**

## ➢प्रथमाविभक्तेः कारकत्वम्

“ **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा** [792]” इति सूत्रेण विधीयमानायाः प्रथमायाः कारकत्वं सर्वैरेव स्वीक्रियते। यतो हि सूत्रस्यास्य प्रवृत्तिः क्रियायोग एव भवति। चैत्रः , मैत्रः , इत्यादौ यत्र काचित् क्रिया न दृश्यते तत्राप्यस्ति क्रियायाः आक्षेपो भवत्येव , सर्वं वाक्यं क्रियया परिसमाप्य इति सिद्धान्तात् । तिङभिहित कर्त्तृत्वेन सह प्रथमार्थकर्त्तृत्वस्याभेदेनान्वयो भवति , तद्वारा चास्यापि क्रियान्वयित्वं सम्भवति । अतएव तिङ्बोध्यकारकबोधकत्वरूपे तिङ्समानाधिकरणे प्रथमेति वार्त्तिकं संगच्छते।

“ **सहयुक्तेऽप्रधाने** ” [793] इति सूत्रेऽप्रधानग्रहणस्यानर्थकत्वं प्रतिपादयता पतञ्जलिनापि प्रथमायाः कारकविभक्तित्वं स्वीकृतम्। तथा चोक्तम् - “ **सहयुक्तेऽप्रधानवचनमनर्थकम् । किं कारणम् ? उपपदविभक्तेः कारकविभक्तेर्बलीयस्त्वात् । अन्यत्राप्युपपदविभक्तेः कारकविभक्तिर्बलीयसी इति प्रथमा भवति** [794] ” इति।

अत एव कारकविभक्तित्वेन प्रथमायाः वलीयस्त्वप्रतिपादयितृणां भाष्यकृतां मते प्रथमायाः कारकत्वं स्फुटमेव।

नागेशेनापि भणितं – “ **तस्य चाख्यातार्थकर्त्रादिना अभेदान्वयेन प्रथमार्थस्य कारकत्वम् । अत एव आख्यातार्थकारकक्रियान्वयात् , तदर्थस्य क्रियाजनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः** [795]” इति।

---

[792] **पाणिनीयाष्टाध्याय्यां २.३.४६ ।**

[793] **पाणिनीयाष्टाध्याय्यां २.३.१९ ।**

[794] **पतञ्जलिमहाभाष्ये २.३.१९ पृ.५०२ ।**

[795] **परमलघुमञ्जूषायां कारकविचारे , पृ.९१ ।**

प्रातिपदिकार्थेतिसुत्रस्य व्याख्यानं कुर्वता अपि नागेशेनोक्तं –" **इदमपि सूत्रं क्रियायोग एव प्रवर्तते , अन्ततोऽस्तिक्रियायाः सर्वत्र सत्वात् । आख्यातार्थकर्त्रादिना अभेदान्वयेन तद्वारः क्रियायोगो बोद्ध्यः । प्रथमान्तार्थस्यापि क्रियाजनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः**[796] " इति ।

तथाहि प्रथमाविभक्तेः कारकत्वं वैयाकरणनिकाये सर्वसम्मतमिति ।

## द्वितीयाविभक्त्यर्थः

कौण्डभट्टाभिमतं – " **कर्मणि द्वितीया** [797]" इत्यनुशासनात् कर्मत्वमेव द्वितीयार्थः । यद्यपि कर्मसंज्ञा " **कर्त्तुरीप्सिततमं कर्म** [798]" इति सूत्रेण विधीयते । सूत्रार्थस्तु – कर्त्तृवृत्तिव्यापार विशिष्टफलवत्त्वप्रकारिके-च्छोद्देश्यताश्रयं कर्मसंज्ञकं भवतीति , किन्तु द्वितीयाविधायके सूत्रे कर्मपदेन क्रियाजन्यफलाश्रय एव गृह्यते , उक्तेच्छोद्देश्यताश्रयत्वरूपकर्मत्वस्वीकारे " **तथायुक्तं चानीप्सितम्** [799]" इत्यनेन विधीयमाने कर्मणि द्वितीया न स्यात् । तस्मात् क्रियाजन्यफलाश्रयरूपकर्मणि द्वितीया विधानादाश्रय एव द्वितीयार्थः । उक्तञ्च -

**" आश्रयोऽवधिरुद्देश्यः सम्बन्धः शाक्तरेव वा ।**
**यथायथं विभक्त्यर्थाः सुपांकर्मेतिभाष्यतः ॥** [800]" इति ।

द्वितीया तृतीया सप्तमीनामाश्रयोऽर्थः ।

---

[796] **लघुशब्देन्दुशेखरे कारकप्रकरणे पृ. ४१५ , ४१६ ।**

[797] **पाणिनीयाष्टाध्याय्यां २.३.२ ।**

[798] **पाणिनीयाष्टाध्याय्यां १.४.४९ ।**

[799] **पाणिनीयाष्टाध्याय्यां १.४.४० ।**

[800] **वैयाकरणभूषणसारे सुबर्थनिर्णये का. २४ ।**

न चैवमपि क्रियाजन्यफलाश्रय एव द्वितीयार्थः सम्भवति , तत्रैव द्वितीयाविधानादिति वाच्यम् , “ **अनन्यलभ्यो हि शब्दार्थः** ” इति नियमानुसारेण , फलक्रिययोश्च “ **फलव्यापारयोर्धातुः** [801]” इत्यादिना धातुवाच्यत्वप्रतिपादनाद् आश्रयमात्रस्यैव द्वितीयायाः वाच्यत्वौचित्यात् । तथा चोक्तम् कौण्डभट्टैः – “ **तथा च क्रियायाः फलस्य च धातुनैव लाभादनन्यलभ्य आश्रयोऽर्थः** [802]” इति ।

तत्राखण्डोपाधिरूपमाश्रयत्वमेव शक्यतावच्छेदकमिति न शक्त्यानन्त्यापत्तिः । अखण्डोपाधिरूपस्याश्रयत्वस्य घटत्वादीनामिवैक्यात् । उक्तञ्च – “ **तत्त्वञ्चाखण्डशक्तिरूपमवच्छेदकम्** [803]” इति । दर्पणव्याख्याकृता अपि आश्रयत्वस्य इतरधर्मान् अनवच्छिन्नत्वमेव स्वीकृतम् । तथा चोक्तम् – “ **आश्रयोऽर्थ इति किञ्चिद्धर्मानवच्छिन्नाश्रयतावानित्यर्थः** [804]” इति ।

एवञ्च घटं जानामि इत्यादौ आवरणभङ्गानुकूलव्यापार एव धात्वर्थः । आवरणभङ्गरूपफलाश्रयत्वात् घटस्य कर्मत्वेन , तत्राप्याश्रय एव द्वितीयार्थः ।

ननु ‘ **घटं ज्ञास्यामि** ’ , ‘ **घटं करिष्यति** ’ , ‘ **घटमकरोद्** ’ इत्यादावतीतानागतघटादावाश्रयत्वस्यासम्भवेन तत्र कर्म द्वितीयार्थासङ्गतिः इति चेदुच्यते अतीतानागतघटविषयकज्ञानवान् अहमित्यादावतीतानागत-घटादौ ज्ञानाश्रयता , विषयतया यथा स्वीक्रियते नैयायिकैः तथा अत्रापि विषयतयाश्रत्वस्य स्वीकारेण न कश्चन दोषः । उक्तञ्च कौण्डभट्टैः –

---

801 **वैयाकरणभूषणसारे का. २ ।**

802 **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१३१ ।**

803 **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१३१ ।**

804 **दर्पणव्याख्यायाम् वैयाकरणभूषणसारे , पृ.१६९ ।**

**“ अतीतादेराश्रयता च विषयतया ज्ञानाश्रयतताया नैयायिकानामिव ”** [805] इति ।

यदि त्वतीतो घटज्ञानविषयः इति प्रतीतिर्बलात् घटस्य ज्ञानाश्रयतायाः स्वीकारेऽपि तादृशद्वितीयार्थाश्रयत्वविशिष्टस्वीकारे नास्ति काचन वाचोयुक्तिरित्युच्यते चेत् , तर्हि बौद्धघटादावाश्रयत्वस्य स्वीकारे बाधाभावेनादोषात् । बौद्धार्थस्तु वैयाकरणानां मुख्यभूतः सिद्धान्तः , नागेशैश्च बहुभिर्युक्तिभिः वैयाकरणसिद्धान्तलघुमञ्जूषायां वृहद्रूपेण प्रतिपादितः इति हेतोः प्रकृते अनुपयोगाच्च न विचार्यते अत्र । एवञ्चातीतानागतस्थले बाह्यघटस्याविद्यमानत्वेऽपि बौद्धघटमादाय सर्वमुपपद्यते । तस्मादाश्रयः द्वितीयार्थः इति कौण्डभट्टाभिमतिः ।

**➢भाष्यसम्मतिः**

कर्मादीनां सुबर्थत्वं पतञ्जलिनापि प्रतिपादितम् – **“ सुपां कर्मादयोऽप्यर्थाः , संख्या चैव तथा तिङाम्** [806]**”** इति । अयम्भावः – बहुषुबहुवचनमित्यादिभिः सह कर्मणि द्वितीयेत्यादीनाम् एकवाक्यतया प्रातिपदिकादेकत्वविशिष्टे कर्मणि द्वितीयाया एकवचनम् , द्वित्वविशिष्टे कर्मणि विवक्षिते द्वितीयायाः द्विवचनम् , एवञ्च बहुत्वविशिष्टे कर्मणि विवक्षिते द्वितीयायाः बहुवचनमित्यर्थो भवति । तेन कर्मादीनां संख्यायाश्च सुबर्थत्वं सिद्ध्यतीति भाष्याशयः ।

---

[805] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१७५ ।**

[806] **पतञ्जलिमहाभाष्ये १.४.२१ , पृ.२३९ ।**

## ➢पुरुषोत्तमदेवमतम्

अनभिहिते कर्मणि कारके द्वितीया विभक्तिर्भवति । अथ किं कर्म । '**कर्त्तुरीप्सिततमं कर्म**[807]' अस्यायमर्थः – कर्त्तुः क्रियया व्याप्तुमिष्टतमं यत् कारकं तत् कर्मसंज्ञं भवति । तच्च त्रिविधं निर्वर्त्त्यं विकार्यं प्राप्यञ्चेति । तत्र निर्वर्त्त्य यदसदेवोत्पाद्यते , यथा कटं करोति संयोगं जनयति । यदाह –

**" सती वाविद्यमाना वा प्रकृतिः परिणामिनी ।**
**यस्य नाश्रीयते तस्य निर्वर्त्त्यत्वं प्रचक्षते ॥[808] " इति ।**

ननु सती नाश्रीयते इति युक्तमुक्तं तस्या अनाश्रयणसम्भवात् । अविद्यमानायास्त्वविद्यमानत्वादेवाश्रयणं नास्ति तत् किमर्थं तस्या अनाश्रयणमुक्तम् । अस्यायमर्थः – अविद्यमाना प्रकृतिर्यस्य तस्य निर्वर्त्त्यत्वं यथा संयोगं जनयति , विभागं जनयति । संयोगविभागौ हि न कस्याश्चित् प्रकृतेर्विकाराविति अविद्यमानप्रकृतित्वान्निर्वर्त्त्यत्वं तयोः । सती वा प्रकृतिर्यस्य परिणामिनी नाश्रीयते तस्यापि निर्वर्त्त्यत्वम् । यथा कटं करोतीति । अत्र यद्यपि काशाः प्रकृतिभूताः सन्ति तथापि ते यदा न विवक्ष्यन्ते तदा कटस्य निर्वर्त्त्यत्वम् । यदा तु ते विवक्ष्यन्ते तदा कटस्य विकार्यत्वम् । काशान् कटं करोतीति । तदाह -

**" यदसज्जायते पूर्वं जन्मना यत् प्रकाशते ।**
**तन्निर्वर्त्त्यं विकार्यञ्च कर्म द्वेधा व्यवस्थितम् ॥[809] "**

तच्च किञ्चित् कारणोच्छेदेन । यथा काष्ठं भस्म करोति । किञ्चित् गुणान्तरोत्पत्त्या । यथा सुवर्णं कुण्डलं करोति । तदुक्तं –

---

[807] **पाणिनीयाष्टाध्याय्यां १.४.४९ ।**

[808] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०५ ।**

[809] **कारकचक्रे पुरुषोत्तमदेवेन, पृ.१०५ ।**

**" प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादिभस्मवत् ।**

**किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ [810]"** इति ।

यत्र तु क्रियाकृतविशेषः प्रत्यक्षानुमानाभ्यां नोपलभ्यते तत् प्राप्यम् । यथा आदित्यं पश्यति , वेदमधीते । तदुक्तं –

**" क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते ।**

**दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते ॥ [811]"** इति ।

यत्र पुनर्दर्शनात् प्रत्यक्ष्यतोऽनुमानाद्वा क्रियाकृता विशेषा अवगन्तुं शक्यन्ते यथा काष्ठं दहतीति प्रत्यक्षगम्यः विशेषः देवदत्तं रोषयतीति मुखवैवर्ण्यादिकार्यानुमेयः ,तत् विकार्यं न प्राप्यम् । प्राप्यन्तु यत्र क्रियाव्याप्तिमात्रं न क्रियाकृतविशेषः प्रतिभाति । एवं त्रिविधं कर्म विचारितम् ।

ननु कथं कर्म कारकम् । कारकं हि क्रियानिमित्तं भवति । इह च क्रियासाध्यं कर्म । तत् कथं तत्साध्यं कर्म तस्याः साधनं भवितुमर्हति । तदुक्तं –

**" निर्वर्त्त्यं कारकं नैव क्रिया तस्य हि साधिका ।**

**विकार्यमपि भावेन विरोधान्नैव कारकम् ॥**

**प्राप्यत्वात् पूर्विकावस्था न सा कर्म बुधैर्मता ।**

**प्राप्यावस्था क्रियासाध्या साध्यत्वात् साधनं न हि ॥[812]"** इति ।

अयम्भावः – यदसत् उत्पद्यते तन्निर्वर्त्त्यं कर्म । तस्य च क्रियाकृत एवात्मलाभः इति पूर्वं तस्यासत्त्वम् । असतश्च कथं कारकत्वम् । अथोच्यते –

---

[810] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०५ ।**

[811] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०५ ।**

[812] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०६ ।**

क्रियातो लब्धात्मसत्त्वं पश्चात् क्रियान्तरं प्रति कारकं भविष्यति । तथा चोक्तं –

**“ आत्मलाभे हि भावानां कारकापेक्षिता भवेत् ।**

**लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव हि ॥**[813] ” इति ।

विसदृशोऽयमुपन्यासः । यत्र हि कारणान्तरादुत्पद्य तेन कार्यान्तरं किमपि क्रियते तत्रेदमुच्यते । यत्र तु तस्या एवात्मानं लब्ध्वा तस्या एव कारकमिति तत्र एकविषयत्वादयुक्तम् । तथाहि क्रियाधीनं कर्म कर्माधीना च क्रिया । कर्माभावे क्रिया नास्तीति द्वयोरप्यभावः । अन्योन्याश्रयत्वञ्च कर्म क्रियामपेक्षते क्रियापि कर्मेति ।

विकार्यप्राप्ययोरपि विकार्यताप्राप्यतारूपयोः क्रियासाध्यत्वात् साधनत्वं न सम्भवति । तदेवं त्रिविधेऽपि कर्मणि कारकत्वमुपपन्नम् । अत्रोच्यते –कर्त्तुः क्रियया यदाप्तुमुत्पादयितुं विकारयितुं प्राप्तुं वा इष्टतमं तत् कर्मेति त्रिविधेऽपि कर्मणि स्वगतो व्यापारोऽस्तीति तदपेक्षया कर्मणः कारकत्वमविरुद्धम् । तथाहि यत्तावदुत्पद्यते तस्योत्पत्तिक्रियायां कर्त्तृभूतस्य कर्मभावः । तदुक्तं –

**“ स्वव्यापारे च कर्त्तृत्वं सर्वत्रैवास्ति कारके ।**

**व्यापारभेदापेक्षायां करणत्वादिसम्भवः ।।**[814] ” इति ।

एवम् कटं करोति इत्यस्यायमर्थः – कटमुत्पद्यमानमुत्पादयतीत्यर्थः । तथा चोक्तम् –

**“ करोति क्रियामाणेन न कश्चित् कर्मणा विना ।**

**भवत्यर्थस्य यः कर्त्ता करोतेः कर्म ज्ञायते ॥**

**निर्वर्त्त्यादिषु यत् पूर्वमनुभूय स्वतन्त्रताम् ।**

---

[813] **कारकचक्रे पुरुषोत्तमदेवेन , , पृ.१०६ ।**

[814] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०६ ।**

**कर्त्रन्तराणां व्यापारे कर्म सम्पद्यते पुनः ॥**[815]" इति।

कटो भवत्युत्पद्यते भवतेरुत्पत्तिवचनत्वात् । कटं करोति कटमुत्पद्यमानमुत्पादयतीत्यर्थः । तेन भवत्यर्थस्य कर्त्तुः कर्मता । यद्ययं कटोऽनुत्पत्तिधर्मा भवेत्तदा देवदत्तस्तं कर्त्तुं न शक्नुयात्। तथा चोक्तं –

**" नित्यञ्चाभवनं यस्य यस्य वा नित्यभूतता।**
**न तयोः क्रियमाणत्वं खपुष्पाकाशयोरिव ॥** " इति।

अवश्यञ्च कर्मणः स्वगतक्रियाकर्त्तृत्वमङ्गीकरणीयमन्यथा कर्मवत्सूत्रम् अनुपपन्नं स्यात्। तथाहि तेन कर्मणः कर्त्तृभूतस्य कर्मवद्भावो विधीयते। यदि हि तत्र कर्मणः स्वगता क्रिया न भवेत्तदा क्रियारहितः कथं कर्त्ता स्यात् । कर्त्तुरभावे तस्य कर्मवद्भावोऽनुपपन्नः स्यात् । तस्मात् कर्मवद्भावादेवावसीयते अस्ति कर्मणः स्वगतक्रिया इति। विकार्यप्राप्ययोरपि यो विकार्यते स विकृतो भवति । यः प्राप्यते स प्राप्तिं सहत इति । अतस्त्वनयोरपि स्वगतक्रियापेक्षं कारकत्वमबिरुद्धमिति सिद्धं कर्मणः कारकत्वमिति।

## कर्म

कर्मविषये शाब्दिका एवामामनन्ति यत् क्रियते कर्त्रा स्वक्रियया निष्पाद्यन्ते तत् कार्यं कर्म भवति । एतेनैतदेव बुध्यते यद् करोतेः निखिलक्रियावाचकत्वात् कर्त्तुः व्यापारैः यत् साध्यते तत् कर्म भवति । हेमचन्द्रेन कर्मविषये उक्तं- ' **कर्त्तुर्व्याप्यं कर्म** [816] ' इति। एवं

---

[815] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०६ ।**

[816] **व्याकरण-दर्शनेर - इतिहास , पृ.२७७।**

प्रयोगरत्नमालायामपि आह पुरुषोत्तम – **“ यत्तु क्रियया व्याप्यं तत् कर्म परिकीर्त्तितम्** [817] **”** इति।

कर्म आधारीकृत्य पाणिनिसूत्रत्रयं वर्तते- **‘ कर्त्तुरीप्सिततमं कर्म** [818]**’ ‘ तथायुक्तं चानीप्सितम्** [819]**’ ‘ अकथितञ्च** [820]**’** इति।

प्रथमसूत्रस्यार्थो हि **‘ कर्त्तुः ईप्सिततमं क्रियया व्याप्तुमिष्टतमं कारकं कर्मसंज्ञं भवति ’** इति । तत्र व्याप्तुमिष्टतमं नाम – **‘ ईप्सिततमत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृत-धात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्** [821]**’** इति। यथा – **‘ रामः वनं गच्छति ’** इति।

द्वितीयसूत्रस्यार्थो हि – **‘ क्रियया ईप्सिततमवत् अनीप्सितमपि कारकं कर्मसंज्ञं भवति ’** इति। यथा- **‘ ग्रामं गच्छन् तृणं स्पृशति ’**।

तृतीयसूत्रस्यार्थो हि – **“ अपादानादिर्विशेषैरविवक्षितमपि कारकं कर्मसंज्ञं स्यादिति । वस्तुतः यत्र अपादानादीनां प्राप्तिस्तु अस्त्येव , परन्तु तत्र यदि तेषामपादानादीनामविवक्षा स्यात्तर्हि कर्मत्वं सिद्धम् ।** [822]**”** यदि अपादानादीनां कारकाणां विवक्षा कस्यापि स्यात्तर्हि तत्र अपादानादीनामेव प्रयोगो भवति न तु कर्मणः। यथा- **‘ गां दुग्धं दोग्धिः ’** इति अत्र क्षरणानुकूलव्यापारः क्षारणपर्याये दुहेः अर्थः । क्षारणात्मकव्यापारप्रयोज्यक्षरणात्मकफलाश्रयत्वात् पयः कर्म। गौस्तु क्षरणे

---

[817] **व्याकरण- दर्शनेर -इतिहास , पृ.२७७।**

[818] **पाणिनीयाष्टाध्याय्यां १.४.४९।**

[819] **पाणिनीयाष्टाध्याय्यां १.४.५०।**

[820] **पाणिनीयाष्टाध्याय्यां १.४.५१।**

[821] **लघुशब्देन्दुशेखरे ( कारकप्रकरणे )।**

[822] **वैयाकरणसिद्धान्तकौमुद्यां पा.सू. १.४.५१ , पृ.६०४।**

अपादानम् । तदपादानत्वमुपेक्ष्य सम्बन्धित्वात्मना गोर्विवक्षायां कर्मत्वमनेन भवति । ततश्च शेषषष्ठीनिरासे द्वितीया भवति । तदिदमुक्तं – **" कर्मणः शेषत्वेन विवक्षायां ' न माषाणामश्नीयात् ' इतिवत् षष्ठी प्राप्ता , तां बाधितुमिदं सूत्रम् "** इति । गोः अपादानत्वविवक्षायाम् अवधित्वात् तु पञ्चम्येव – गोः पयः दोग्धिः इति । गोसकाशात् पयः क्षरतीत्यर्थे । यदि तु गौः पयः विशेषणं तदा षष्ठ्येव । गोसम्बन्धि यद् पयः तत् क्षारयतीत्यर्थः ।

एवं प्रकारेण यत्र अपादानादिकारकाणां स्वतः प्राप्तिः तत्र तेषां कारकाणां तत्तत्कारकत्वाविवक्षायां कर्मत्वं सिद्धम् । अत एव वक्तुरिच्छा एव सर्वप्रधाना । यादृशं भावं तत्र अभिप्रैति तदनुसारमेव कारकाणि प्रवर्तन्ते । अतः यत्र यत्र अपादानादिकारकाणामविवक्षा दृश्यते तत्र तत्र यदि तेषां विवक्षा स्यात्तर्हि तत्तत्कारकाणि अवश्यमेव भवन्ति ।

एवञ्च धातोः सकर्मकत्वाकर्मकत्वविचारेऽपि विवक्षाप्रसङ्ग आगच्छति । वैयाकरणसम्प्रदाये उक्तमासीत् – धातोः फलाव्यवच्छिन्नव्यापारबोधकत्वेनैव सकर्मकत्वम् , तद्बोधकत्वे चाकर्मकत्वम् । अत्र तु प्रमाणं भर्त्तृहरिः । तथाहि फलविवक्षाविषये उक्तं-

**" क्रियावच्छेदकं यत्र फलं कर्त्रा विवक्षितम् ।**
**तदेव कर्मधातुस्तु फलानुक्तावकर्मकः ॥**[823] " इति ।

धातोः सकर्मकत्वाकर्मकत्वविषये दीक्षितपादैरुक्तं—

**" फलव्यापारयोरेकनिष्ठतायामकर्मकः ।**
**धातुस्तयोर्धर्म्मिभेदे सकर्मक उदाहृतः ॥** [824]" इति ।

---

[823] **यद्यपि कारिकेयं वाक्यपदीये नोपलभ्यन्ते तथापि अस्याः कर्त्ता भर्त्तृहरिः इति व्याकरणदर्शनेरइतिहासग्रन्थे गुरुपदहालदारेण प्रतिपादितम् ... ।**

[824] **वैयाकरणभूषणसारकारिकायां १३ धात्वर्थनिर्णये , पृ. ८९ ।**

यस्याः क्रियायाः कर्म विद्यते सा सकर्मिका , यस्याः न विद्यते कर्म चाकर्मिकेति साधारणमतम् । एवमपि कथ्यते यत् – स्वार्थ-फल-व्यधिकरण-व्यापार-वाचित्वं सकर्मकत्वम् । **स्वार्थ-व्यापार-व्यधिकरण-फल-वाचकत्वं सकर्मकत्वम्**[825] **इति** । एतद् विपरीत्वम अकर्मकत्वम् । यथा ' **राम ओदनं पचति** ' इत्यादौ उदाहरणे अधिश्रयणतः स्थाल्यपकर्षणपर्यन्तं यत् कार्यजातं तद्धि पाकक्रियायाः व्यापारः । विक्लित्तिर्हि फलम् । अत्र विक्लित्तिरूपं फलं कर्तृभिन्ने ओदने विद्यते । अतः फलव्यापारयोः युगपत् कर्त्तरि विद्यमानाभावात् पचेः सकर्मकत्वम् । एवं ' असौ हसति ' इत्यत्र हसनक्रिया अकर्मिका फलव्यापारयोः युगपत् कर्त्तरि विद्यमानत्वात् ।

वस्तुतः ' **क्रियावच्छेदकं यत्र फलं कर्त्रा विवक्षितम्** [826]' इति पूर्वोक्तहरिकारिकानुसारं वक्त्रा यदा फलविवक्षा क्रियते तदैव क्रिया सकर्मिका भवति । यदा तु तन्न क्रियते तदैव क्रिया अकर्मिका भवति इत्याशयः । अतः एकैव क्रिया वक्तुरिच्छानुसारं सकर्मिकाकर्मिका भवितुमर्हति । यथा- **' रामो वनं गच्छति ' ' रामो वने गच्छति '** इति च । अत्र प्रथमोदाहरणे क्रिया सकर्मिका , तत्र तद्विषयकफलविवक्षावशात् । द्वितीये उदाहरणे तु गतिक्रिया अकर्मिका फलविवक्षाभावात् । अत्र एतदपि न आश्चर्यजनकं यत् क्वचित् कर्मत्वाविवक्षाहेतोः सकर्मकाः धातवः अकर्मकरूपेण व्यवह्रियन्ते । तद्यथा – **' दीक्षितो न ददाति '** इति । अत्र लोकेऽपि एवं कथ्यते – **" सकर्मकाश्च कर्माविवक्षायामकर्मका भवन्ति "** इति । अत्र हरिणा वाक्यपदीये उक्तं-

---

[825] **वैयाकरणभूषणसारे धात्वर्थनिर्णये पञ्चमकारिकाव्याख्यानावसरे , पृ.५१ ।**

[826] **हरिकारिकायाम् ।**

" **धातोरर्थान्तरे वृत्ते धात्वर्थेनोपसंग्रहात् ।**
**प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥** [827]" इति ।

एतद्विषये भरतमल्लिकोऽपि प्राह –

" **कर्माविवक्षया योज्या विना कर्म सकर्मकाः ।**
**हरिर्गच्छति हर्षेणेत्यादयोऽपि प्रयुक्तयः ॥** [828]" इति ।

## ➢नैयायिकमतखण्डनम्

तन्नैयायिकोक्तिरसमीचीना चैत्रः मैत्रं ग्रामं गमयति इत्यादौ मैत्रस्य कर्मत्वमनुपत्तेः । तत्रापि संयोगानुकूलव्यापारस्य मैत्रे सत्त्वेन , फलस्य द्वितीयाप्रकृतित्वेन विवक्षितार्थभिन्नसमवेतव्यापारजन्यत्वाभावात् । ननु णिजन्तस्थले ' **सनाद्यन्तधातवः**[829] ' इत्यनेन णिजन्तस्य धातुसंज्ञा-विधानात् , तत्र धात्वर्थः ' **गमनानुकूलव्यापारानुकूलव्यापारः** ' तथा च मैत्रभिन्नवृत्तिर्न प्रयोजकनिष्ठो द्वितीयो व्यापारस्तज्जन्यो धात्वर्थतावच्छेदक-प्रथमव्यापाररूपफलाश्रयत्वेन मैत्रस्य कर्मत्वमुपपद्यते , ग्रामस्यापि न कर्मत्वानुपपत्तिः संयोगस्यापि धात्वर्थावच्छेदकफलत्वेन तदाश्रयत्वादिति चेदुच्यते –

" **चैत्रः मैत्रेण ओदनं पाचयति** " इत्यत्रापि मैत्रस्य कर्मत्वापत्तेर्दुर्वारत्वात् । अत्रापि विक्लित्त्यनुकूलव्यापाररूप धात्वर्थतावच्छेदकफलशालित्वात् मैत्रस्य । कर्मत्वस्येष्टापत्तिस्तु न वक्तुं शक्या , गताद्यर्थकधातूनामण्यन्तानां यः कर्त्ता ण्यन्तावस्थायां तस्य

---

[827] **भर्तृहरिवाक्यपदीये ३/७/८८ ।**

[828] **भरतमल्लिकेण तद्ये ग्रन्थे ।**

[829] **पाणिनीयाष्टाध्याय्यां ३.१.२२ ।**

कर्मत्वविधायकस्य " **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणाम-णिकर्त्ता स णौ** [830]" इत्यनुशासनविरोधात् ।

यतो ह्यनुशासनेन तेन गताद्यर्थकधातूनां योग एव कर्मसंज्ञा विधानात् पाचियोगे कर्मत्वस्यानिष्ठत्वात् ।

ननु " **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ** [831]" इति सूत्रसामर्थ्यात् गत्यर्थकातिरिक्तधातुप्रकृतिकणिज्विषये प्रयोज्यस्य कर्मत्वेनाविवक्षणात् " **चैत्रः मैत्रेण पाचयत्योदनम्** " इत्यत्र मैत्रस्य न कर्मत्वापत्तिरित्युच्यते चेत्तर्हि नैयायिकानां मते " **तण्डुलं पच्यते स्वयमेव** " इत्यापत्तिः , कर्मणः कर्तृत्वविवक्षायां तत्र प्रथमाविभक्तिरिष्यते , किन्तु तण्डुलान्यकाष्ठवृत्त्यग्निसंयोगरूपव्यापारजन्य धात्वर्थतावच्छेदक-विक्लित्तिरूपफलाश्रयत्वात् तण्डुलस्य कर्मत्वापत्तिरितिभावः । तस्मात् परसमवेतव्यापारजन्यधात्वर्थतावच्छेदकफलशालित्वमिति नैयायिकोक्तं न समीचीनमिति । अत एव तार्किकमतं खण्डयता कौण्डभट्टेनापि भणितम् – " **गमयति कृष्णं गोकुलम् इतिवत् पाचयति कृष्ण गोपः इति द्वितीयापत्तेः । तण्डुलं पच्यते स्वयमेव इत्यापत्तेश्च विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थताश्रयत्वात्** [832]" इति ।

---

[830] **पाणिनीयाष्टाध्याय्यां २.४.५२ ।**

[831] **पाणिनीयाष्टाध्याय्यां २.४.५२ ।**

[832] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१८१ ,१८२ ।**

## ➢नागेशमतम्

कर्मत्वस्य स्वरूपं प्रतिपादयता नागेशेनोक्तम्- ‘ **कर्मत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश श्यत्वम्**[833]’ इति । एवञ्च चैत्रश्चैत्रंगच्छतीति न प्रयोगः , चैत्रस्य फलाश्रयत्वेनोद्देश्यत्वाभावात् । ‘ **गां दोग्धिपयः गोपः** ’ इत्यत्र ‘ **गो** ’ इत्यस्य पयसश्च कर्मत्वं सिद्ध्यति , यतो हि दुहधातोः विभागानुकूलव्यापारोऽर्थः । तत्र प्रधानीभूतो द्वितीयव्यापारः गोपनिष्ठः , तत्प्रयोज्यत्वञ्च गोवृत्तिप्रथमव्यापारे , परम्परया च विभागेऽपि वर्तते । एवञ्च प्रथमव्यापाररूप फलाश्रयत्वेन गोः , विभागाश्रयत्वेन च पयसः कर्मत्वं सिद्ध्यति ।

ननु नागेशाभिमते पूर्वोक्तकर्मस्वीकारे “ **प्रयागात् काशीं गच्छति** ” इत्यत्र प्रयागस्य कर्मत्वापत्तिर्दुर्वारा , कर्त्तृवृत्तिव्यापारेणोत्तरदेशसंयोगस्येव विभागस्यापि प्रयोज्यत्वादिति चेत् ? उच्यते – “ **फलाश्रयत्वेनिद्देश्यत्वञ्च फलावच्छेदक सम्बन्धेन । फलतावच्छेदकसम्बन्धश्च येन सम्बन्धेन फलत्वप्रकारिकेच्छा भवति स एव सम्बन्धः**” । स च भिन्नभिन्नस्थले भिन्नरूपः । यथा तण्डुलं पचतीत्यत्र फलतावच्छेदकसम्बन्धः समवायः , समवायसम्बन्धेन विक्लित्त्याश्रयस्तण्डुलो भवत्वितीच्छायास्तत्र स्वीकारात् । एवञ्च ‘ **ग्रामं त्यजति** ’ इत्यत्र प्रतियोगित्वविशिष्टसमवायः फलतावच्छेदकसम्बन्धः , तेन सम्बन्धेन “ **विभागाश्रयो ग्रामो भवतु** ” इति फलत्वप्रकारिकेच्छायास्तत्रविद्यमानत्वात् । एवञ्च रीत्या “ **प्रयागात् काशीं गच्छति** ” इत्यत्रानुयोगिकत्वविशिष्टः समवायः फलतावच्छेदकसम्बन्धः तेन सम्बन्धेन प्रयागस्य फलाश्रयत्वेनोद्देश्यत्वा-

---

[833] **परमलघुमञ्जूषायां कारकविचारे, पृ.९३ ,९४ ।**

भावात् न प्रयागस्य कर्मत्वापत्तिरिति । उक्तञ्च – " **प्रयागस्य फलतावच्छेदकसम्बन्धेन फलाश्रयत्वेनानुद्देश्यत्वाच्च** [834]" इति ।

एवञ्च ' **प्रयागं गच्छन् पथि मृतः** ' इत्यत्र प्रयागस्य फलाश्रयत्वाभावेऽपि फलाश्रयत्वेनोद्देश्यत्वात् कर्मत्वं सिद्ध्यत्येव ।

ननु " **मथुरां गच्छति न प्रयागमित्यत्र** " प्रयागस्य फलाश्रयत्वेनोद्देश्यत्वाभावात् कर्मत्वाप्राप्तावव्याप्तिः स्यादिति चेदुच्यते – " **कर्मलक्षणे ईप्सिततमपदस्य स्वार्थविशिष्टयोग्यताविशेषे लक्षणा । तथा च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफला-श्रयत्वेनोद्देश्यत्वयोग्यताविशेषशालित्वं कर्मत्वम्** [835]" इति ।

वस्तुतस्तु " **आरोपितानारोपितसाधारणसंयोगविक्लित्त्यादि फलाश्रयत्वेनोद्देश्यत्वस्य कर्मत्वस्वीकारेण न कश्चन दोषः । मथुरां गच्छति न प्रयागम् ' इत्यत्र मथुरायामनारोपितस्य प्रयागे चारोपितस्य संयोगस्य विद्यमानत्वेन तदाश्रयत्वेनोद्देश्यत्वात् प्रयागस्यापि कर्मत्वं सिद्ध्यति , तदर्थं लक्षणास्वीकारे गौरवमेवेति मे मतिः" ।**

अनीप्सितानां ' **ग्रामं गच्छन् तृणं स्पृशतीत्यादौ** ' तृणादीनां कर्मत्वन्तु ' **तथायुक्तं चानीप्सितम्**[836] ' इति लक्षणान्तरात् भिन्नमेव । तच्च प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थ फलाश्रयत्वमेव । तथा च स्पर्शरूप फलाश्रयत्वेन तृणस्य कर्मत्वं सिद्ध्यतीति भावः ।

---

[834] **परमलघुमञ्जूषायां कारकविचारे , पृ. ९५ ।**

[835] **परमलघुमञ्जूषायां कारकविचारे , पृ. ९५ ।**

[836] **पाणिनीयाष्टाध्याय्यां १/४/५० ।**

ईप्सितानीप्सितकर्मणोः ‘ **कर्त्तुरीप्सिततमं कर्म** [837]’ ‘ **तथायुक्तं चानीप्सितम्** [838]’ इति लक्षणभेदात् भिन्नस्वरूपं स्वीकृतं नागेशेन ।

### ➢कौण्डभट्टमतम्

कौण्डभट्टैस्तु ‘ **कर्मणि द्वितीयेति**[839] ’ सूत्रे कर्मत्वं क्रियाजन्यफलाश्रयत्वरूपमेव स्वीकृतम् । तच्चेप्सितानीप्सितसाधारणमेव । एवञ्च तेषां मते “ **हरिं भजतीत्यादावीप्सितकर्मणः , ग्रामं गच्छन् तृणं स्पृशतीत्यत्र** ” तृणेऽनीप्सितकर्मणः शाब्दबोधे भानं न स्यात् , शाब्दबोधे तु सर्वेषां कर्मणां कर्मत्वरूपेणैव प्रतीतिः , न तु तत्रेप्सितानीप्सितयोः भानम् । उक्तञ्च- “ **ईप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगः** [840]” इति ।

एवञ्चैतन्मते ‘ **चैत्रो ग्रामं गच्छति** ’ इत्यत्र चैत्रस्य कर्मत्वापत्तिस्तु , परत्वात् कर्त्तृसंज्ञया कर्मसंज्ञायाः बाधात् नास्तीति बोद्ध्यम् । वस्तुतस्तत्र फलाश्रयत्वेन द्वितीयापत्तिस्तु नाशंकनीया , ‘ **ग्रामं गमयति चैत्रो मैत्रमितिवत् पाचयति तण्डुलं चैत्रः मैत्रेण** ’ इत्यत्रापि मैत्रपदात् द्वितीयापत्तिवारणाय , द्वितीयोत्पत्तौ कर्मसंज्ञाया एव कारणत्वस्वीकारेणादोषात् । अन्यथा तु “ **गमयति चैत्रः मैत्रमित्यस्य** ” यथोत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापाररूपक्रियाजन्यं यत्प्रथमव्यापार-रूपं फलं तत्फलाश्रयत्वेन मैत्रस्य कर्मसंज्ञा द्वितीयोत्पत्तिश्च भवति , तथा “ **पाचयति चैत्रः मैत्रेण** ” इत्यत्र चैत्रनिष्ठविक्लित्त्यनुकूलव्यापारानुकूल-व्यापाररूपक्रियाजन्यं प्रथमव्यापाररूपफलाश्रयत्वेन मैत्रपदात्

---

837 **पाणिनीयाष्टाध्याय्यां १/४/४९ ।**

838 **पाणिनीयाष्टाध्याय्यां १/४/५० ।**

839 **पाणिनीयाष्टाध्याय्यां २/३/२ ।**

840 **वैयाकरणभूषणसारे सुबर्थनिर्णये १.१० ।**

द्वितीयोत्पत्तेर्वारयितुमशक्यत्वात् । कर्मसंज्ञायाः द्वितीयोत्पत्तौ निमित्तत्वे तु पाचयति मैत्रः मैत्रेण इत्यत्र तादृशफलाश्रयत्वे अपि अणौ कर्त्ता णौ कर्म चेत् , तर्हि गत्यादीनामेवेति **" गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ [841]"** इति सूत्रस्य नियमेन कर्मसंज्ञायाः बाधान्न द्वितीयापत्तिः ।

**' चैत्रो ग्रामं गच्छतीत्यत्र '** क्रियाजन्यसंयोगरूपफलाश्रयत्वेऽपि कर्तृसंज्ञया कर्मसंज्ञायाः बाधान्न चैत्रपदाद् आपत्तिरिति भट्टाशयः । उक्तञ्च – **" ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन [842]"** चैत्रश्चैत्रम् इति प्रयोगासम्भवात् । द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात् । अन्यथा **" गमयति कृष्णं गोकुलम् इत्यत्रेव पाचयति कृष्णेण "** इत्यत्रापि कृष्णपदाद् द्वितीयापत्तेः ।

एवञ्च **" चैत्रो ग्रामं गच्छतीत्यत्र "** चैत्रापदात् द्वितीयोत्पत्त्यभावेऽपि शाब्दबोधे फलाश्रयत्वेन चैत्रस्य विषयता स्यादिति चेदुच्यते – **" शाब्दबोधस्य स्व स्व व्युत्पत्त्यनुसारित्वात् । व्युत्पत्तिस्तु कार्यकारणभावज्ञानमात्रम् । एवञ्च यैः ईदृशः कार्यकारणभावः ' समवायसम्बन्धेन धात्वर्थफलनिष्ठविशेष्यतानिरूपित प्रकारतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रत्याश्रयोपस्थितिः कारणम् ' इति गृहीतः तेषान्तु ' चैत्रनिष्ठसंयोगानुकूल चैत्राभिन्नैककर्तृक वर्त्तमानकालिको व्यापारः "** इति शाब्दबोधः **' चैत्रो गच्छति '** इति वाक्यात् भवति ।

किन्तु यदि **" प्रकारता सम्बन्धेन धात्वर्थफलविशेष्यक शाब्दबुद्धित्वावच्छिन्नं प्रति धात्वर्थव्यापारानधिकरण विभक्तिजन्या-**

---

[841] **पाणिनीयाष्टाध्याय्यां २.४.५२ ।**

[842] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ. १७६ ।**

**श्रयोपस्थितिः कारणम्** ” इति कार्यकारणभावः स्वीक्रियते , तदा चैत्रस्य धात्वर्थव्यापाराश्रयत्वान्न तत्र फलविशेष्यकबोधः इति । तथा चोक्तम् – “ **शाब्दबोधः चैत्रश्चैत्रम् इत्यत्र स्यादिति चेन्न तथा व्युत्पन्नानामिष्टापत्तेः । उच्यतां वा ‘ प्रकारता सम्बन्धेन धात्वर्थफलविशेष्यक बोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयो-पस्थितिः हेतुः ’ इति कार्यकारणभावान्तरम् । प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः** [843]” इति ।

‘ **प्रयागात् काशीं गच्छति** ’ इत्यत्र प्रयागस्य कर्मत्वापत्तिस्तु नास्त्येव क्रियाजन्यफलाश्रयत्वेन प्रकृतधात्वर्थफलाश्रयत्वस्य विवक्षणात् । विभागस्तु न गम् धात्वर्थः , अतः तदाश्रयत्वेन प्रयागस्य कर्मत्वापत्तिर्नास्ति ।

एवञ्च कर्मत्वमीप्सितानीप्सितसाधारणमेकमेव कौण्डभट्टाभिमते , किन्तु तेषां मते “ **चैत्रो ग्रामं गच्छति** ” इत्यत्र फलविशेष्यकचैत्रप्रकारक-शाब्दबोधवारणाय कार्यकारणभावान्तरं स्वीकरणीयम् । नागेशमते तु तादृशकार्यकारणभावान्तरास्वीकारः किन्तु तेषां मते ईप्सितकर्मत्वं भिन्नमनीप्सितं च भिन्नमिति कर्मत्वद्वयं स्वीक्रियते तस्मादुभयोर्मतं लाघवगौरवदृष्ट्या समानमेवेति ।

## ➢तारानाथतर्कवाचस्पतिमतम्

अथ द्वितीयादीनामर्थाः प्रदर्श्यन्ते । तत्र कारकद्वितीयायाः कर्मार्थः कर्मणि द्वितीयेतिसूत्रात्[844] । तस्य च कर्मशक्तिमत्त्वेनाश्रयत्वेन वा वाच्यत्वमन्वयश्च धात्वर्थफले स्वनिष्ठशक्तिनिरूपकतया वा मतभेदेन । तेन

---

[843] **वैयाकरणभूषणसारे सुबर्थनिर्णये पृ . १७६-१७७ ।**

[844] **पाणिनीयाष्टाध्याय्यां २.३.२ ।**

जलधिमधिशेते इत्यादावपि तच्छक्तिमत्त्वेनैवाधारादीनां बोधः । अकर्मकधातूनां तु सकर्मकक्रियान्तर्भाविणैव तद्योगे कालादीनां कर्मत्वं यथोक्तं वार्त्तिके । कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः । सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते इति । एतच्च मासमास्ते इत्यादौ धातुरेव सम्बन्धपूर्वकासनादौ आसनादिकरणकसम्बन्धे वा लक्षणायानिरूढत्व-ज्ञापकम् । ततश्च सम्बन्धस्य कर्माकाङ्क्षितया कालादेस्तत्रान्वयात् कर्मत्वम् ।

अत्रायं विशेषः धातोराद्यार्थलक्षणायां प्रधानक्रियाया अकर्मकात् दुहादि पाठाभावाच्च गौणकर्मणि लकारासम्भवेन भाव एव लकारस्तेन मासमास्यते इत्येव प्रयोगः । द्वितीयार्थलक्षणायान्तु प्रधानक्रियायाः सकर्मकतया कालादेश्च तत्कर्मत्वेन मुख्यकर्मतया कर्मण्येव लकारस्तेन मास आस्यते इति प्रयोगः यथोक्तं हरिणा । अतस्तैः कर्मभिः युक्तो धातुद्रव्यैरकर्मकः । **‘ लस्य कर्मणि भावे च ’** निमित्तत्वाय कल्पते इति । अत्र लस्येत्युक्तेः कृद्योगे न तेभ्यः षष्ठीति मनोरमायां स्पष्टम् । तथा कालादि कर्मका अकर्मका भवन्तीति भाष्योक्तेश्च गतिबुद्धीत्यादि सूत्रे अकर्मकतया तेषां प्रयोज्यस्य कर्मत्वमेवमन्यदपि कार्य्यमित्याकरे स्पष्टम् । कालाध्वनोरत्यन्तसंयोगे इति विहितद्वितीयाया व्याप्तिरर्थः सा च प्रत्यासत्त्या कालादिनिरूपिता द्रव्यगुणक्रियादिनिष्ठा तेन क्रोशं कुटिला नदी मासमधीते इत्यादौ गुणक्रियादिषु व्याप्तिबोधः । कर्मप्रवचनीययुक्ते इति विहितायास्तु सम्बन्धसामान्यार्थः शेषषष्ठ्यपवादत्वेन तस्यास्तत्तुल्यार्थकतौचित्यात् एवञ्चान्वादीनां ज्ञाप्यत्वादिविशेषसम्बन्धकथनाय अणुर्लक्षणे इत्यादिसूत्र-जातमारब्धम् विशेषानभिधाने तु सामान्यसम्बन्धस्यापि तात्पर्य्यवशात् विशेषे पर्यवसानम् । कर्मप्रवचनीयानान्तु द्वितीयाद्यर्थसम्बन्धद्योतकता । हरिणा यथोक्तं –

**“ क्रियाया द्योतको नायं सम्बन्धस्य तु वाचकः ।**
**नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदक ॥ [845]”**

इति द्वितीयादिनैवोक्तत्वात् न सम्बन्धस्य वाचकत्वमित्यर्थः भेदकः द्योतकः । अत्र सम्बन्धस्येति सामान्यतो निर्देशात् क्रियासम्बन्धवद् द्रव्यादिसम्बन्धस्यापि तेषां द्योतकता अतएव कर्मप्रवचनीय इत्यन्वर्थसंज्ञा कर्म क्रियां तत्सम्बन्धं वा प्रोक्तवानिति भूते कर्त्तरि च अनीयप्रत्ययाश्रयणात् । अन्वादयो हि प्रायशः क्रिया सम्बन्धद्योतका अपि क्वचिद् द्रव्यादिसम्बन्धद्योतका भवन्ति । यथा वनमनु नदीत्यादि । तेषाञ्च द्योत्याः सम्बन्धविशेषाः कतिचित् प्राचीनैर्निर्देशिता यथा । वीप्सेत्थम्भावचिह्नेभिस्तेषु भागे परिप्रती । अनुस्तेषु सहार्थे च **‘ हीने अनूपौ ’** मताविहिते तत्र वीप्सा व्याप्तिर्यथा वृक्षं वृक्षमभि सिञ्चतीत्यादौ तत्रापि नित्यवीप्सयोरिति द्वित्वीभूतप्रकृत्या व्याप्यत्वं द्योत्यते तच्चाभिद्योत्ये द्वितीयार्थव्यापकत्वे अन्वेतीति न तद्वैयर्थ्यम् अत एव तस्य न संसर्गविधयान्वय इति विवेकः । वृक्षादेश्च सेकादौ कर्मत्वाविवक्षयैव व्यापकत्वे अन्वय इत्याकरे स्पष्टम् । तेन वृक्षवृत्तिव्याप्यतानिरूपकव्यापकतावान् सेक इति बोधः । इत्थम्भावः अनिर्द्धारितकिञ्चिद्धर्मस्य भावः प्राप्तिः वैशिष्ट्यमिति यावत् तदीयसम्बन्धः द्वितीयार्थः अभिना द्योत्यते यथा विभुमभिभक्त इत्यादौ विभुसम्बन्धिभाक्तिमानिति बोधः । चिह्नं लक्षणं ज्ञाप्यत्वमिति यावत् यथा **‘ कारिरीमनु वर्षती’** त्यादौ बोधस्तु कारिरीज्ञाप्यं वर्षणमिति । एवमन्येषामप्यर्थान्वयादिकम् ऊह्यम् ।

---

[845] **भर्तृहरिवाक्यपदीये २.२०४ ।**

केषाञ्चिद्वाचकधिगाद्यव्ययाना योगेऽपि द्वितीयानुशिष्यते यथा।

**" उभसर्वतसोः कार्य्या धिक्युपर्य्यादिषु त्रिषु।**

**द्वितीयाम्रेडितान्तेषु तथान्यत्रापि दृश्यते॥** [846]"

इति तत्र द्वितीयार्थः सम्बन्धः धिगाद्यर्थनिन्दादावन्वयी तेन नास्तिकं धिगत्यादौ नास्तिकसम्बन्धिनी निन्देति बोधः । आम्रेडितान्तेषु द्विरुक्तेषु इत्यर्थः। अत्र अन्यत्रापि इत्युक्तेः यावछब्दयोगेऽपि द्वितीयेति वृद्धास्तेनारभ्य तस्यां दशमीञ्च यावत् प्रपूजयेदिति नदीं यावदिदं वनमित्यादि च सिद्धम्। तत्र यावच्छब्दार्थो व्याप्तिः द्वितीयार्थः सम्बन्धः तत्प्रकृतेश्च तत्प्रागभावसमीपादौ लक्षणा तेन दशमीप्रागभावव्यापकं पूजनमिति नदीसमीपव्यापकं वनमिति च बोधः । एवन्तरादीनां योगे विहिताया अर्थान्वयादिकमूह्यं विस्तरभयाद्विरतम् अस्माभिः।

## कर्मभेदाः

द्वितीयार्थ कर्मणो , भेदविषये भर्त्तृहरिसम्मतमेवानुकुर्वन्ति सर्वे वैयाकरणाः । मुख्यतः कर्म द्विविधम् ईप्सितमनीप्सितञ्चेति । भर्त्तृहरिणेप्सितकर्मणो भेदत्रयं स्वीकृतमस्ति। तच्च – निर्वर्त्य , विकार्यं , प्राप्यञ्चेति। तथा चोक्तम् –

**" निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।**

**तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्॥** [847]" इति।

ईप्सितकर्मणः त्रिविधेषु भेदेषु निर्वर्त्यविकार्ययोरुल्लेखः भाष्यवार्त्तिकेऽपि दृश्यते । तथाहि – " **कर्मणि निर्वर्त्यमान**[848]

---

[846] **भर्तृहरिवाक्यपदीये १.४.४४।**

[847] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. ४५।**

**विक्रियमाणे** " । तत्र निर्वर्त्यकर्मणः लक्षणं कुर्वता कैयटेनोक्तम् – " **यस्योपादानकारणं नास्ति तन्निर्वर्त्य , यथा- संयोगं करोति । यस्यापि सदप्युपादानकारणं न विवक्ष्यते तन्निर्वर्त्यं यथा घटम् करोति इति । लक्षणमिदमसतः सज्जायते इति वैशेषिकसिद्धान्तानुसारेण , सतः सज्जायते इति सत्कार्यवाद सिद्धान्तानुसारेणापि कृतमस्ति । उभयपक्षेऽपि यत् कर्म जन्मना व्यक्तं भवति तन्निर्वर्त्यमित्यभिप्रायः**[849]" **इति** । अभिहितञ्चैतत् भर्त्तृहरिणापि –

" **सदसज्जायते सद्वा ,जन्मना यत्प्रकाशते ।**
**तन्निर्वर्त्यं विकार्य च , कर्म द्वेधा व्यवस्थितम् ॥**
**प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादि भस्मवत् ।**
**किञ्चिद्गुणान्तरोत्पत्त्या , सुवर्णादि विकारवत् ।**
**क्रियागतविशेषाणां सिद्धिर्यत्र न गम्यते ।**
**दर्शनानुमानाद्वा तत्प्राप्यमिति कथ्यते ॥** [850]" इति ।

### ➢विकार्यकर्म

विकार्यकर्म द्विविधं भवति – **प्रकृत्युच्छेदसम्भूतं कर्म गुणान्तरोत्पत्त्या कर्म च ।** यत्र प्रकृतेः ( कारणस्य ) सर्वात्मना नाशो कर्मणः उत्पत्तिर्भवति तत् कर्म । यथा – " **काष्ठं भस्म करोति** " इति । वाक्येऽस्मिन् काष्ठरूपस्य कारणस्य सर्वात्मना नाशो हि भस्मरूप कर्मोत्पद्यते । हेलाराजमतानुसारेण तु प्रकृतेरविवक्षायान्त्विदं निर्वत्यमेव कर्म , तद्विवक्षायान्तु विकार्यम् । उक्तञ्च –" **काष्ठानि भस्मकरोति । पूर्ववत्**

---

[848] **पतञ्जलिमहाभाष्यवार्त्तिके ३.२.१ पृ.१४४ ।**
[849] **पतञ्जलिमहाभाष्यप्रदीपे , ३.२.१ पृ.१४४ ।**
[850] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. ४९-५१ ।**

**प्रकृतिविकारयोः क्रियासम्बन्धो योज्यः , पूर्वेण तु लक्षणेन निर्वर्त्यमेतत् कर्म प्रकृतेरविवक्षायाम् । विवक्षायान्तु विकार्यम्** [851]" इति ।

कैयटेन तु ' **उपादानस्य कारणस्यैव कार्यत्वेन विवक्षायाम् , अर्थादुपादानकारणकार्ययोरभेदविवक्षायां विकार्यं कर्म , भेदविवक्षायान्तु निर्वर्त्य कर्म** [852]' इति स्वीकृतम् । तथा चोक्तं प्रदीपे – "[853] **यदा तु अपादानकारणमेव परिणामित्वेन विवक्ष्यते , मृदं घटं करोतीति , तदा विकार्यं कर्म , भेदविवक्षायां तु मृदा घटं करोतीति निर्वर्त्यमेव कर्म** " इति ।

द्वितीयन्तु यत्र कारणात् कार्ये गुणान्तरोत्पत्तिर्विवक्ष्यते तत्र गुणान्तरोत्पत्त्या कर्म भवति । यथा- ' **सुवर्णं कुण्डलं करोति** ' । सुवर्णं कुण्डलरूपे परिणमति इत्यर्थः । सुवर्णस्यावयवसंस्थानापेक्षया कुण्डलस्यावयवसंस्थानेषु वैलक्ष्यादिदं गुणान्तरोत्पत्त्या कर्म । उभयोर्भेदयोरयमेव विशेषः एकत्र विकारः कारणनाशरूपोऽपरत्र विकारः आकार परिवर्तनरूप एव , न तु तत्र कारणं नश्यतीति बोध्यम् ।

### ➢प्राप्यकर्म

यस्मिन् कर्मणि क्रियाकृतविशेषः प्रत्यक्षेणानुमानप्रमाणेन वा नोपलक्ष्यते , तत् प्राप्यं कर्म भवतीति प्रतिपादितं भर्तृहरिणा –

" **क्रियाकृतविशेषो सिद्धिर्यत्र न गम्यते ।**
**दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते ॥** [854]" इति ।

---

[851] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे हेलाराजटीकायां का. ५० ।**

[852] **कैयटेन प्रदीपटीकायां ३.२.१ पृ.१४४ ।**

[853] **पतञ्जलिमहाभाष्यप्रदीपे ३.२.१ पृ.१४४ ।**

[854] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. ५१ ।**

यथा ' **ग्रामं गच्छति** ' ' **आदित्य पश्यति** ' इत्यादि । अत्र गमनक्रियाकृतविशेषो ग्रामे , दर्शनक्रियाकृतविशेषः आदित्ये न दृश्यते । एवञ्च निर्वर्त्यविकार्ययोरिव प्रप्यकर्मणि न किमप्युत्पद्यते , न तु प्रयत्नेन निर्मीयते ।

क्रियाकृतविशेषः सर्वत्रोपलभ्यत एव अतः प्राप्यकर्मणः सत्तां न स्वीकुर्वन्त केचित् किन्तु कैयटस्तु सर्वेषां कर्मणां क्रियया प्राप्यत्वमेव स्वीकरोति । उक्तञ्च तेन – " **तत्र प्राप्यत्वं सर्वस्य कर्मणोऽस्ति प्राप्यमाणत्वात् । अवान्तरविवक्षायान्तु त्रैविध्यमुच्यते** [855]" इति ।

### ➢अनीप्सितकर्म

अनीप्सितकर्मत्वञ्च फलाश्रयत्वे सति फलाश्रयत्वोद्देश्यत्वेनाविवक्षितमेव । तच्च चतुर्विधम् – " **उदासीनं कर्म , द्वेष्यकर्म , संज्ञान्तरैरनाख्यातमन्यपूर्वकञ्चेति** [856]" । उक्तञ्च भर्त्तृहरिणा -

**" औदासिन्येन यत् प्राप्तं यच्च कर्त्तुरनीप्सितम् ।**
**संज्ञान्तरैरनाख्यातं यद् यच्चाप्यन्यपूर्वकम् ॥** [857]" इति ।

● **उदासीनकर्म** : यथा ग्रामं गच्छन् तृणम् स्पृशति तत्र तृणमित्युदासीनं कर्म । ग्रामं गच्छन् इत्युक्त्या तृणरूपकर्मणः औदासीन्यं प्रतीयते । एवञ्चात्र ग्राममितीप्सितं कर्म तृणमित्युदासीनं कर्म इति ।

● **द्वेष्यकर्म :** इदमेव ' कर्त्तुरनीप्सितरूपेण कथितं हरिणा । उदाहरणं यथा – ' **विषं भुङ्क्ते** ' इति । अत्र कर्त्तुः ' **विषः मद्व्यापारजन्यगलविलाधःसंयोगाश्रयो भवतु** ' इति इच्छायाः अभावात् , विषस्य कर्त्तुरनीप्सितत्वमनुद्दिष्टत्वं वा अस्त्येव । यत्र तु

---

[855] **पतञ्जलिमहाभाष्यप्रदीपे ३.२.१ , पृ.१४४ ।**

[856] **भाट्टतन्त्ररहस्ये पृ. ५५ ।**

[857] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. ४६ ।**

मरणेच्छया ताडनादिभयाद्वा विषं भुञ्जाने विषं भुङ्क्ते इति प्रयोगस्तत्र विषमितीप्सितमेव कर्म , तदा फलाश्रयत्वेनोद्देश्यत्वात् ।

- **संज्ञान्तरैरनाख्यातकर्म :** संज्ञान्तरैरनाख्यातमित्यस्यापादानादि-विशेषैरविवक्षितमित्यर्थः । अतो अस्योदाहरणं – **' गां दोग्धि पयः '** इत्यत्र गामेव । तत्र प्राप्तस्यापादनस्याविवक्षया कर्मत्वेनाविवक्षया च **' अकथितं च** [858]**'** इत्यनेन कर्मसंज्ञा विधीयते ।

- **अन्यपूर्वककर्म :** अन्यपूर्वकमित्यस्य व्याख्यानं कुर्वता प्रभाकृतोक्तं – **" शास्त्रान्तरप्राप्तसंज्ञान्तरबाधकशास्त्रप्रयोज्यकर्मसंज्ञक-मित्यर्थः । यथा –" क्रुरमभिक्रुध्यति** [859]**" इति ।** अत्र हि **' क्रुधद्रुहेर्ष्यासूयार्थां यं प्रति कोपः**[860] ' इत्यनेन प्राप्तां सम्प्रदानसंज्ञां बाधित्वा **' क्रुधद्रुहोपसृष्टयोः कर्म** [861]**'** इत्यनेन क्रुरस्य कर्मसंज्ञा विधीयते । अतः इदं कर्मान्यपूर्वकम् । एवमेव **' वैकुण्ठमधिशेते '** इत्यत्रापि वैकुण्ठमिति कर्मान्यपूर्वकम् **'**[862]**आधारोऽधिकरणम् '** इत्यनेन प्राप्तामधिकरणसंज्ञां बाधित्वा **'** [863]**अधिशीङ्स्थासां कर्म '** इत्यनेन कर्मसंज्ञायाः विधानात् ।

---

[858] **पाणिनीयाष्टाध्याय्यां १.४.५१ ।**

[859] **वैयाकरणभूषणसारस्य प्रभाटीकायां , पृ.१८१ ।**

[860] **पाणिनीयाष्टाध्याय्यां १.४.३७ ।**

[861] **पाणिनीयाष्टाध्याय्यां १.४.३८ ।**

[862] **पाणिनीयाष्टाध्याय्यां १.४.४५ ।**

[863] **पाणिनीयाष्टाध्याय्यां १.४.४६ ।**

# तृतीयाविभक्तेरर्थः

तृतीया विभक्तिरनुक्ते कर्त्तरि करणे च विधीयते ‘ **कर्त्तृकरणयोस्तृतीया** [864]’ इति सूत्रेण। एवञ्च तृतीया द्विविधा कर्त्तृतृतीया करणतृतीया च।

➢**कर्त्तृतृतीया** : तत्र कर्त्तृतृतीयायाः आश्रयोऽर्थः । तथा चोक्तम् – “ **द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः** [865]” इति । तथाहि कर्त्तरि विधीयमानायाः तृतीयायाः कर्त्तृत्वमेवार्थो युक्तः । कर्त्तृत्वञ्च प्रधानधात्वर्थव्यापाराश्रयत्वमेव। तत्र व्यापारस्य धातुलभ्यत्वादन्यलभ्यो हि शब्दार्थ इति रीत्या आश्रयत्वमेव कर्त्तृतृतीयार्थः फलति।

➢**करणतृतीया** : प्रकृत्यर्थस्याभेदसम्बन्धेनाश्रयस्य च निष्ठत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वयः । एवञ्च हरिः सेव्यते ’ इत्यादावाख्यातार्थोऽपि आश्रयः “ **आश्रये तु तिङः स्मृता** [866]” इत्युक्तेः। तत्र हरेरभेदेन , तिङर्थाश्रयस्य फले वृत्तित्व सम्बन्धेन , फलस्य चानुकूलत्व सम्बन्धेन व्यापारेऽन्वयः। तथा च “ **मदभिन्नाश्रयनिष्ठहर्यभिन्नाश्रय-वृत्तिसेवानुकूलो व्यापारः** ” इति प्राचां मते बोधः। कर्मणि प्रत्यये फलमुख्यविशेष्यकशाब्दबोधस्वीकर्त्तृणां नव्यानां मते तु मदभिन्नाश्रय-निष्ठव्यापारजन्या हर्यभिन्नाश्रयवृत्तिः सेवेतिशाब्दबोधः।

---

[864] **पाणिनीयाष्टाध्याय्यां २.३.१८।**

[865] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१६९।**

[866] **वैयाकरणभूषणसारे का. २।**

# करणतृतीयार्थः

करणतृतीयायाः आश्रयो व्यापारश्चार्थः । तथा चोक्तं कौण्डभट्टैः- “ **करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ** [867]” इति । आश्रयव्यापारयोः परस्परं वृत्तित्व सम्बन्धेनान्वयः । आश्रये तु प्रकृत्यर्थरभेदसम्बन्धेन विशेषणम् । व्यापारस्य तु जन्यत्वसम्बन्धेन धात्वर्थे फलेऽन्वयः , फलस्य चानुकूलत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वयः । तथा च – कुठारेण वृक्षं छिनत्तीत्यादौ कुठाराभिन्नाश्रयवृत्ति व्यापारजन्यवृक्षच्छेदनानुकूलो व्यापारः इति शाब्दबोधः ।

ननु “ **फलव्यापारयोर्धातुरिति** [868]” सिद्धान्ताद् व्यापारस्य धातुलभ्यत्वेन तत्र तृतीयायाः शक्तिकल्पनं निरर्थकमिति चेन्न , धातोः कर्तृवृत्तिव्यापारस्य लाभे अपि अनुभूयमानस्य करणव्यापारस्य शाब्दबोधं भानाय , तत्र तृतीयाशक्तेरावश्यकत्वात् । “ **साधकतमं करणम्** [869]” इति सूत्रेण साधकतमस्यैव करणसंज्ञा विधानात् , कथमाश्रयव्यापारौ तद्वाच्यौ इति स्वीक्रियते , इत्याकाङ्क्षायां करणपदार्थः निरूप्यते ।

## ➢तारानाथतर्कवाचस्पतिमतम्

कारकतृतीयायाः कर्त्ता करणञ्चार्थः “ **कर्त्तृकरणयोस्तृतीयेति** [870]” सूत्रात् तयोर्वाच्यतान्वयादिकमुक्तवत् । एते च व्यापारान्वयिनी । एतयोश्चान्यतरबोधनियमिका विवक्षैव एकस्योभयशक्तिमत्त्वे पर्य्यायेणोभय-बोधः यथोक्तं हरिणा –

---

[867] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ. १९७ ।**

[868] **वैयाकरणभूषणसारे का. २ ।**

[869] **पाणिनीयाष्टाध्याय्यां १.४.४२ ।**

[870] **पाणिनीयाष्टाध्याय्यां २.३.१९ ।**

**“ एकस्य बुद्ध्यवस्थाभिर्भेदेन परिकल्पने ।**

**कर्मत्वं करणत्वञ्च कर्त्तृत्वञ्चोपजायते ॥**[871] ” इति ।

बुद्ध्यवस्थाभिरित्यनेन विवक्षा द्योत्यते । **‘ गम्यमानापि क्रिया विभक्तिप्रयोजिकेत्युक्तेः’** श्रमेणालमित्यादौ तृतीया साध्यादि-पदाध्याहाराच्च श्रमसाध्यं नास्तीति बोधः । हेताविति विहितायान्तु हेतुरर्थः । हेतुत्वञ्चात्र क्रियाजनकव्यापारवद्भिन्नत्वे सति प्रयोजकत्वं यथोक्तं हरिणा –

**“ अनाश्रिते तु व्यापारे कारणं हेतुरिष्यते ।**

**द्रव्यादिविषयो हेतुः करणं नियतक्रियम् ॥** [872]” इति ।

**‘ यथा पुण्येन सुखं धर्मेण धनं प्राप्नोतीति वा ’** । व्यापारश्च साक्षात् क्रियाजनको ग्राह्यस्तेन हस्तेन दात्रेण लूनातीत्यादौ व्यवहितव्यापारवति हस्तादौ हेतुत्वमव्याहतमेव तस्य च द्रव्यात्वान्न तद्वाचकपदात् पञ्चमी विभाषा गुणहेतावस्त्रियामिति सूत्रेण गुणहेतावेव पञ्चमीविधानात् **‘ वह्निमान् धूमादित्यादीष्टप्रयोगसिद्ध्यर्थं ’** तत्र योगविभागाश्रयणे अपि अत्रानभिधानान्न तदादरणेन पञ्चमी । **धूमपदस्य धूमज्ञानादौ लक्षणायान्तु न त्रापि योगविभागाश्रयणमित्याकरे स्पष्टम्** ।

प्रयोजकत्वमित्युक्तेश्चाध्ययनेन वसतीति सिद्धमध्ययनरूप-प्रयोजनस्यापि वासेच्छाप्रयोजकेच्छाविषयतया प्रयोजकत्वस्वीकारात् **“ सहयुक्तेऽप्रधाने** [873]” इति विहितायाः सहार्थतत्तत्क्रियाकर्त्तृत्वादिकमर्थः सहार्थस्तु समभिव्याहृत-तत्तत्क्रियासमानकालीनत्वं तत्र च क्रियायां तृतीयार्थान्वयः सहार्थस्य च धातूपात्तक्रियायामन्वयस्तेन **‘ पुत्रेण सहागतः**

---

[871] **भर्तृहरिवाक्यपदीयतृतीयकाण्ड्स्य साधनसमुद्देशे का. १०४ ।**

[872] **भर्तृहरिवाक्यपदीयतृतीयकाण्ड्स्य साधनसमुद्देशे का. २४ ।**

[873] **पाणिनीयाष्टाध्याय्यां २.३.१९ ।**

**पितेत्यादौ** ’ पुत्रकर्त्तृकागमन-समानकालीनागमनकर्त्रभिन्नं पितेति बोधः सहार्थगम्यतायां तु सहपदध्याहारात् धातोर्वा तत्तत्क्रियाकालीनक्रियायां लक्षणान्वयबोधादिः । अत्राप्रधानपदमप्रधानक्रियान्वयिपरं तेन धातूपात्तप्रधानक्रियान्वयिनि न तृतीयाप्रसङ्गः ।

“ **येनाङ्गविकारः**[874] ” इति विहितायास्तु प्रयोज्यत्वमर्थः । अन्वयश्च तस्य समभिव्याहृतपदार्थैकदेशे तेन ‘ **अक्ष्णा काण** ’ इत्यादौ अक्षिप्रयुक्तकाणत्वावानिति बोधः ।

‘ **इत्थम्भूतलक्षणे** [875]’ इति विहितायास्तु ज्ञाप्यत्वम् अर्थः अन्वयस्तु पूर्ववत्तेन ‘ **जाटाभिस्तापस** ’ इत्यादौ जटाज्ञाप्यतापसत्ववानिति बोधः ।

‘ **प्रकृत्यादिभ्य उपसंख्यानमिति** ’ विहितायास्तु सम्बन्धसामान्यमर्थस्तात्पर्य्यवशात् विशेषावधृतिरन्वयश्च । प्रकृतिश्च यावदश्रयभावी धर्मविशेषः । आदिपदमाकृतिगणसूचनार्थं तेन ‘ **प्रकृत्या चारुरित्यादौ** ’ प्रकृत्यभिन्नचारुत्ववानिति बोधः । प्रायेण याज्ञिक इत्यादौ सम्भावनाविषययाज्ञिकत्ववानिति बोधः । प्रायार्थः सम्भावना । नाम्ना सुतीक्ष्ण इत्यादौ नामाभेदवान् सुतीक्ष्ण इति बोधः शब्दार्थयोरारोपिताभेदसत्त्वान्नायोग्यता । सुरथो नाम राजेत्यादौ तु अभेदसम्बन्धेन नाम्नः सुरथादावन्वयात् न तृतीया अभेदप्रकारकबोध-विवक्षायामेव तृतीयेति विवेकः । घटत्वेन जन्यत्वमित्यादौ घटत्वावच्छेद्यं जन्यत्वमिति बोधः । एवमन्येऽपि प्रयोगस्तत्तत्सम्बन्धरूप-तृतीयार्थताविवक्षायामेवोन्नेया इति ।

---

[874] **पाणिनीयाष्टाध्याय्यां २.३.२० ।**

[875] **पाणिनीयाष्टाध्याय्यां २.३.२१ ।**

## ➢पुरुषोत्तमदेवमतम्

" **कर्त्तृकरणयोस्तृतीया** [876]" इति सूत्रस्यास्यार्थः अनभिहिते कर्त्तरि करणे च कारके तृतीया विभक्तिर्भवति । अथ कः कर्त्ता ? " **स्वतन्त्रः कर्त्ता**[877] " **इति** । तत्र किमिदं स्वातन्त्रं , प्राधान्यम् । तथा च वृत्तिकारः अगुणभूत योऽर्थः क्रियासिद्धौ प्राधान्येन विवक्षितस्तत् कारकं कर्त्तृसंज्ञं भवति । तथा च भर्त्तृहरिः –

**" प्रवृत्तौ च निवृत्तौ च कारकाणां च ईश्वरः ।**

**अप्रयुक्तः प्रयुक्तो वा स कर्त्ता नाम कारकम् ॥**[878] " इति ।

ननु सामग्र्याधीना हि क्रियासिद्धिस्तदेकस्यापि अभावे न सिध्यति । तत्र तस्यामनेकसाधनसाध्यायां सर्वेषां कारकाणां क्रियासिद्धावन्वयव्यतिरेकयोस्तुल्यत्वात् कथमेकस्य प्राधान्यमपरस्य गुणभाव इति । उच्यते – करणादीनां क्रियासिद्धौ कर्त्तृनियुक्तानां प्रवृत्तिः । कर्त्ता तु स्वसामर्थ्येनैव क्रियासिद्धौ वर्त्तते । तेन तस्य प्राधान्यं तदधीनवृत्तित्वात् करणादीनां गुणभाव इति । यद्येवं देवदत्तोऽस्ति देवदत्तो विद्यत इत्यादौ देवदत्तस्य कर्त्तृसंज्ञा न स्यात् तत्प्रयोज्यानां करणादीनामभावात् । इहैव स्यात् देवदत्तः काष्ठेन स्थाल्यामोदनं पचतीति । ततश्चाव्यापकं लक्षणं स्यात् ।

' **साधकतमं करणमिति**[879]' करणकारकस्य सूत्रम् । वृत्तावुक्तं – क्रियासिद्धौ यत् प्रकृष्टोपकारकत्वेन विवक्षितं तत् साधकतमं करणम् । तदेतदपेशलशीलशालिनां मनसि प्रतिभासते । न तु सामग्र्याधीना हि क्रियासिद्धिः एकस्याप्यभावे न सिध्यति । तदेतस्यामनेकसाधनसाध्यायां

---

[876] **पाणिनीयाष्टाध्याय्यां १.४.४८ ।**

[877] **पाणिनीयाष्टाध्याय्यां १.४.५४ ।**

[878] **भर्तृहरिवाक्यपदीये ।**

[879] **पाणिनीयाष्टाध्याय्यां १.४.४२ ।**

कोऽतिशयो जातो येन करणं साधकतमं स्यात् । अत्रोच्यते – यदि नाम करणस्यातिशयो नास्ति तथापि विवक्षितत्वात् तद्भविष्यति । किं सतो विवक्षा अथासतः । तत्र यदि सतो विवक्षा स्यात् तदातिशयस्य सत्त्वं प्रदर्श्यताम् । असतो विवक्षायाम् अर्थासंस्पर्शित्वं शब्दस्य स्यात् , असतो विवक्षाया अभावात् । विवक्षातोऽतिशयसिद्धिरिति चेन्न । एवं हि वन्ध्यायाः सुतेन सह सम्बन्धः स्यात् । किन्तु विवक्षाशब्दो वक्तुमिच्छायां वर्त्तते । इच्छा न पुरुषस्य पदार्थानुरोधिनी , न पुरुषस्येच्छानुरोधी पदार्थः । पदार्थेच्छा च ज्ञातविषया तदवश्यं प्राक् ज्ञानविषयो वाच्यो यत्रेच्छया भवितव्यम् । तस्मादसतोऽतिशयस्य न विवक्षा । तदुक्तं –

**" उत्कृष्टं नैव करणम् अन्यैस्तुल्यत्वदर्शनात् ।**

**कथमिच्छामभावस्य को हि कुर्यादबालिशः ॥**[880] " इति ।

करणप्रयोजनलक्षणः कर्त्तृव्यापार इति करणव्यवहितः कर्त्ता क्रियासिद्धौ व्याप्रियते । करणं पुनरव्यवधानेन क्रियां निर्वर्त्तयतीति अव्यवधानेन क्रियानिर्वर्त्तकत्वात् अतिशयत्वं करणस्य । तदुक्तं –

**" क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।**

**विवक्ष्यते यदा यत्र करणत्वं तदा स्मृतम् ॥**[881] " इति ।

एवं सत एव प्रकर्षस्य विवक्षा , न असत इत्युक्तं भवति । अव्यवधानेन क्रियानिर्वर्त्तकत्वस्य विध्यमानत्वात् । ननु यदि करणव्यवहितः कर्त्ता क्रियायां व्याप्रियते तदा कथमस्य कर्त्तुः प्राधान्यम् । तदधीनप्रवृत्तित्वात् करणस्य नास्त्येव हि तत् करणं , यत् कर्त्रधिष्ठानं नापेक्षते । कर्त्ता हि तन्निरपेक्षः स्वसामर्थ्येनैव प्रवर्तत इति प्राधान्यम् । धातूक्तक्रियत्वाच्च कर्त्तुः प्राधान्यम् ,

---

[880] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०८ ।**

[881] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.१०९ ।**

न हि करणक्रिया धातुनाभिधीयते । यदा त्वभिधीयते तदा करणमिति कर्त्ता भवति । यथा साधु असिश्छिनत्ति । तदुक्तं मण्डनमिश्रेण –

**“ करणं नाम सर्वत्र कर्त्तृव्यापारगोचरः ।**

**तिरोदधाति कर्त्तरि प्राधान्यं तन्निबन्धनम् ॥** [882]” इति ।

## करणम्

➢**पाणिनिमतम् :** करणकारकस्य स्वरूपं प्रतिपादयता पाणिनिना सूत्रितम् – **“ साधकतमं करणम्** [883]” । व्याख्यातञ्च तत्र वृत्तौ – **“ क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्याद् ”** इति ।

तत्रायम्भावः – यद्यपि क्रियासिद्धौ सर्वेषां कारकाणां साधकत्वं , किन्तु यस्यातिशयेनोपकारकत्वं विवक्ष्यते तत्तदा करणम् । तत्रातिशयेनोपकारकत्वञ्च – यद्व्यापारादनन्तरं क्रियासिद्धिः । यथा- **“ रामेण वाणेन हतो वाली ”** इत्यत्र रामं विना वालिनं विनापि हननरूपक्रियाया सिद्धिर्न भविष्यति , अतः उभयोः कारणत्वं साधकत्वं वा तत्क्रियासिद्धौ , किन्तु वाणस्य वालिसंयोगानुकूलो यो व्यापारस्तदनन्तरमेव हननक्रिया सिद्ध्यति , अतः तस्य प्रकृष्टोपकारकत्वात् करणसंज्ञा , न तु रामस्य । एवञ्च यद्व्यापारानन्तरं क्रियासिद्धिः , तत् करणमिति सिद्ध्यति । अस्मिन्नेवार्थे कौण्डभट्टस्यापि सम्मतिर्दृश्यते । तथाहि भणितं – **“ तमबर्थः प्रकर्षः , स चाव्यवधानेन फलजनकव्यापारवत्ता ”**[884] इति ।

---

[882] **कारकचक्रे पुरुषोत्तमदेवेन मण्डनमिश्रमतमुद्धृतम् , पृ.१०९ ।**

[883] **पाणिनीयाष्टाध्याय्याम् १.४.४२ ।**

[884] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१९७ ।**

अत्रैका शङ्का जागर्तितराम् – यत् करणे यातिशयेनोपकारकत्वविवक्षा सा कारकान्तरापेक्षया करणान्तरापेक्षया वा । यदि कारकान्तरापेक्षया विवक्षा , तदैकाधिककरणकारकाणि स्युः , यदि तु कारणान्तरापेक्षया विवक्षा तदा युगपदेकस्यैवकरणत्वमिति शङ्कायां , कारकान्तरापेक्षयैवातिशयेनो-पकारकत्वविवक्षेति कथ्यते । अतिशयार्थ-वाचकस्य तमब्प्रत्ययस्य कारकसामान्यवाचिसाधकशब्दात् विधानात् । स्वीकृतश्चायं पन्था कैयटेनापि । तथा चोक्तं – " **कारकान्तरापेक्षश्च करणस्यातिशयौ न तु स्वकक्षायामित्यश्वेन दीपिकया पथा ब्रजतीति सर्वेषां क्रियानिष्पत्तौ सन्निपत्योपकारकत्वात् करणत्वं सिद्धम्** [885]" इति ।

यद् व्यापारदनन्तरं क्रियासिद्धिः , तत्पदार्थमात्रमेव करणं पाणिनिमते , न तु द्रव्यमात्रम् । तथा चोक्तं – " **करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य अद्रव्यवाचकेभ्य , एतेभ्यः शब्देभ्यः करणे तृतीयापञ्चम्यौ भवत** [886]" इति सूत्रार्थः । एवञ्च द्रव्यातिरिक्तानामपि करणत्वं स्वीकृतमेव पाणिनिना ।

➢**नागेशमतम् :** करणस्वरूपमित्थं प्रतिपादयन्ति स्वनिष्ठव्यापाराव्यवधानेन[887] फलनिष्पादकत्वं करणत्वमिदमेव साधकतमत्वम् । एवञ्च व्यापारानन्तरमेव फलनिष्पादकत्वं करणत्वमिति तदर्थः । करणत्वं च करणशक्तिमत्वम् । सा च शक्तिः यद् व्यापाराव्यवधानेन क्रियानिष्पत्तिः विवक्ष्यते तन्निष्ठा । अधिकरणादिव्यापारव्यावधानेन यदा क्रियानिष्पत्तिर्विवक्ष्यते तदा तेषामपि करणत्वमिष्टमेव । भर्त्तृहरिरपि –

---

[885] **पतञ्जलिमहाभाष्यप्रदीपे १.४.४२ ।**

[886] **पाणिनीयाष्टाध्याय्यां २.३.३३ ।**

[887] **परमलघुमञ्जूषायाम् कारकविचारे . पृ.९८ ।**

**" क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।**
**विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम् ॥**
**वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।**
**स्थाल्या पच्यत इत्येषा व्यवस्था दृश्यते यतः ॥** [888]" इति ।

विवक्ष्यते इत्यनेन विवक्षैव व्याकरणेऽङ्गं न वाह्यवस्तुसत्तेत्युक्तम् । अत एव दात्राद्यनादरेण बलस्य करणत्वविवक्षायां बलेन लुनाति इत्यादि भवति । तदाह वस्तुत इति । इदमेव वस्तुकरणमिति न नियमः । अधिकरणत्वेन निश्चितापि स्थाली तनुतरकपालत्वात् शीघ्रतरकपाल-साधनत्वेन हेतुना करणत्वेन विवक्ष्यते । कर्त्तृपराधीनस्यापि कारकान्तरापेक्षया प्रकर्षः भवति । कारकसामान्यवाचिनः साधकशब्दात् उत्पद्यमानेन तमपा तस्मादेव प्रकर्षस्य बोधनात् । अत एव युगवत् बहूनां करणत्वविवक्षया अश्वेन पथा दीपिकया ब्रजति इति प्रयोग उत्पद्यते । करणत्वं तृतीयार्थः प्रकृत्यर्थस्य तत्राभेदेनान्वयः । तस्य स्वनिष्ठव्यापारव्यवहितोत्पत्तिकत्वसम्बन्धेन धात्वर्थोऽन्वय इत्येके । करणबाणनिष्ठो बध इति बाणाभिन्नकरणको बध इति वा बोध इति तत्त्वम् । करणस्य व्यापारे एवान्वयः । न फलांशे । शब्दशक्तिस्वभावात् । अतएव उद्भिदा यजेत पशुकामः इत्यत्र उद्भिच्छब्दः कर्मनामधेयं व गुणविधिर्वा इत्याशङ्क्य गुणविधित्वपक्षे मत्वर्थलक्षणा स्यादतिभिया नामधेयत्वं सिद्धान्तितम् ।

➢**भर्त्तृहरिसम्मतिः** करणस्वरूपम् इत्थं प्रत्यपादि –

**" क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।**
**विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम् ॥**
**वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।**

[888] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.सं. ९०-९१ ।**

**स्थाल्या पच्यत इत्येषा व्यवस्था दृश्यते यतः ॥[889] " इति ।**

तत्र क्रियायाः इत्यस्य फलस्येत्यर्थः । क्रियते या सा क्रियेति व्युत्पत्त्या , साध्यत्वेन प्रतीयमानत्वाच्च धात्वर्थफलस्य क्रियात्वेन व्यवहारः । उक्तञ्च नागेशेनापि – " **क्रियाया इत्यस्य फलात्मिकायाः**[890] " इति ।

किञ्च यदि क्रियापदेन फलं न गृह्यते चेत्तदा " **रामेण बाणेन हतो वालीत्यत्र** " रामवृत्ति धनुराकर्षणादि व्यापारानन्तरं बानव्यापारस्य जायमानत्वात् , रामस्यापि करणत्वापत्तिः , अतः तत्र क्रियापदेन फलमेव गृह्यते । अनन्तरपदस्याव्यवहितोत्तरमर्थः । एवञ्च यद् व्यापाराव्यवहितोत्तरं फलनिष्पत्तिः विवक्ष्यते , तत्तदा करणमिति हर्याशयः ।

करणञ्चेदं विवक्षाधीनमेव , न तु गोत्वादिवत् वस्तुविशेषे व्यवस्थितम् । अत एव स्थाल्यां पचतीत्यधिकरणत्वेन निश्चिता अपि स्थाली , झटिति तप्तत्वेन स्वव्यापाराव्यवहितोत्तरपाकनिष्पादकतया विवक्ष्यते चेत्तदा तस्या अपि करणत्वमिष्टमेव , अतः तदा " **स्थाल्यां पच्यते** " इति प्रयोगः साधुरेव ।

ननु एवमधिकरणकारकादीनां करणत्वेन विवक्षया सर्वत्र तृतीयापत्तौ द्वितीयासप्तम्योर्निरवकाशापत्तिरिति चेदत्रोच्यते यत्र अन्येषामेव करणत्वविवक्षया न तु स्थाल्याः तत्र स्थालीशब्दात् सप्तमी भवत्येव यथा – देवदत्तः काष्ठेन स्थाल्यां पचति । एवमेव यत्र कारकान्तरविवक्षा तत्र करणत्वेन विवक्षाभावात् सर्वत्र तृतीयापत्तिरपि नापादनीया । उक्तञ्च कौण्डभट्टैरपि – " **विवक्ष्यते इत्यनेन सकृदनेकेषां तदभावात् , द्वितीयासप्तम्यादेरवकाशं सूचयति** [891]" इति ।

---

**[889] भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.सं. ९०-९१ ।**

**[890] परमलघुमञ्जूषायां कारकविचारे , पृ. ७९ ।**

**[891] वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१९८ ।**

एवंरूपेण सर्वैरेव वैयाकरणैः प्रतिपादितानां करणस्वरूपाणामालोडने भेदाभावदर्शनात् सर्वेषां मतैक्यमेव प्रतिभाति।

सारस्वतव्याकरणकृता श्रीमदनुभूतिस्वरूपाचार्येण अपि अस्मिन्नेवार्थे स्वसम्मतिः प्रकटिता अस्ति। तथा चोक्तम् – **" क्रियासिद्ध्युपकारके करणेऽर्थे तृतीया [892]" इति**। व्याख्यातञ्च माधवाचार्येण – **" क्रियायाः सिद्धेरुपकारकमा-सत्त्यानिष्पादकं यदनन्तरं क्रियासिद्धिः [893]"** इति। एवं यद्व्यापारादनन्तरं क्रियासिद्धिस्तत्करणमित्येव सर्वेषामभिप्रायः , करणस्वरूपलक्षणे शब्दतः भेदे अप्यर्थस्य ऐक्यात्।

एवञ्च कृतस्यैतत्करणत्वस्वरूपस्य पर्यालोचनेन सिद्ध्यति , यद् शाब्दबोधे कर्तृव्यापारातिरिक्तः करणव्यापारः प्रतीयते एव। तत्र कर्तृवृत्तिव्यापारस्तु धातुवाच्यः , किन्तु करणव्यापारस्य पदार्थत्वप्रतिपादनाय तत्र तृतीयायाः शक्तिरावश्यकी। तस्मादाश्रयव्यापारौ द्वावेव करणतृतीयावाच्याविति कौण्डभट्टसम्मतिः।

### ➢कौण्डभट्टमतम्

**" करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ। तथाहि – ' साधकतमं करणम् [894]'। तमबर्थः प्रकर्षः। स चाव्यवधानेन फलजनकव्यापारवत्ता [895]" इति।**

ननु करणतृतीयाया आश्रयव्यापारयोर्वाच्यत्वे मानाभावः , साधकतमस्यैव करणसंज्ञाविधानादित्याशङ्कायामाह तथेति। प्रकर्षश्च

---

[892] **सारस्वतव्याकरणे , १५३।**

[893] **माधवाचार्येण विवरणटीकायाम् ( सारस्वते ) , पृ.१५३।**

[894] **पाणिनीयाष्टाध्याय्यां १.४.४२।**

[895] **वैयाकरणभूषणसारे सुबर्थनिर्णये।**

कारकान्तरापेक्षया , कारकसामान्यवाचकसाधनशब्दात्तमपो विधानात् । तेन ' **देवदत्तोऽश्वेन दीपिकया पथा गच्छति** ' इति प्रयोगः सिद्ध्यति । करणान्तरापेक्षया प्रकृष्टस्य करणत्वे तु युगपदेकस्यैव करणत्वं स्याद् , एकस्यैव कस्यचित्प्रकृष्टत्वात् । अव्यवधानेन फलजनको यो व्यापारः तद्वत्ता इत्यर्थः ।

ननु सर्वेषां कारकाणां विवक्षया करणपरत्वमिति ' **करणम्** ' इत्येव सूत्रमस्तु कारकपदानुवृत्त्या कारकं करणसंज्ञं स्यादित्यर्थेनैव साधकत्वे लब्धे साधकग्रहणमेव प्रकर्षपरं भविष्यतीति तमब्ग्रहणं व्यर्थमिति चेन्न , तेनैव व्यर्थेन सता " **कारकाधिकारे शब्दसाथर्यलभ्यः प्रकर्षो नाश्रीयते** [896]" इति ज्ञापनात् । तेन गौणाधारस्यापि अधिकरणसंज्ञा सिद्ध्यति । एवञ्च यद्व्यापाराव्यवधानेन फलनिष्पत्तिस्तत्त्वं करणत्वं फलति । तथा च सर्वाण्यपि कारकाणि विवक्षया करणानि ।[897]

## ➢नैयायिकमतम्

नैयायिकास्तु आश्रयो न तृतीयावाच्यः आश्रयत्वस्याखण्डोपाध्यभावेन गौरवात् , किन्त्वाश्रयत्वमाधेयत्वं वा तृतीयार्थ इति प्रतिपादयन्ति । ' **चैत्रेण पच्यत** ' इत्यादौ यदि ' **पच्** ' धातोः व्यापारः एवार्थस्तदा प्रयत्न एव तृतीयार्थ इति नैयायिकसम्मतिः । तथा हि ' **चैत्रेण गम्यत** ' इत्यादौ तृतीयार्थे प्रयत्ने समवेतत्वेन चैत्रः विशेषितः , प्रयत्नश्च साध्यतया गमनादौ विशेषणम् । अत एव नैयायिकाभिमतम् प्रतिपादयता श्रीगिरिधरभट्टाचार्य्येणोक्तं – " **किन्त्वाश्रयत्वमाधेयत्वं वा लाघवात् तृतीयार्थः । यदि च चैत्रेण पच्यत इत्यादौ पचिना फूत्कारादिव्यापार**

---

[896] **वैयाकरणसिद्धान्तकौमुद्याः करणकारकाधिकारे साधकतमं करणं सूत्रे ।**

[897] **प्रभाटीकाव्याख्यायां वैयाकरणभूषणसारे ।**

**एव प्रत्याय्यते , तदाख्यातस्येव लाघवात्प्रयत्न एव तृतीयायाः शक्यः इति तार्किकाः । चैत्रेण गम्यते स्पन्द्यते इत्यादौ प्रयत्नः तृतीयार्थः स च समवेतत्वेन चैत्रविशेषितः साध्यतया गमनादौ विशेषणीभूय अन्वेति** [898]" इति ।

## ➢ तारानाथतर्कवाचस्पतिमतम्

करणत्वं नाम अव्यवहितक्रियाजनकविवक्षितव्यापारवत्त्वं साधकतमं करणमिति सूत्रात् तत्र च तमप्प्रत्ययेनाव्यवहितव्यापारवत्त्वरूप-प्रकर्षावबोधनात् । तथोक्तं हरिणा –

" **क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।**
**विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥** [899]" इति ।

अत्र विवक्ष्यते इत्युक्तेः कारकान्तराणामपि तथात्वमिति सूचितम्। वस्तुतस्तदनिर्द्देश्यं नहि वस्तु व्यवस्थितम् । स्थाल्या पच्यत इत्येष प्रयोगो दृश्यते यत इति वस्तु करणपदार्थः ।

## ➢मीमांसकसम्मतिः

मीमांसकास्तु करणं करणमित्यनुगतप्रतीत्या करणत्वमखण्डोपाधिरूपं , तदेव च तृतीयार्थः । तस्य च स्वनिरूपकधात्वर्थावच्छिन्नत्वसंसर्गेण भावनायामन्वयः प्रकृत्यर्थस्य च तत्राधेयता संसर्गेणान्वयः इति स्वीकुर्वन्ति । उक्तञ्च मीमांसातत्त्वज्ञेन श्रीमता खण्डदेवेन – " **अतःकरणत्वं करणम् करणमित्याद्यनुगतप्रतीत्या अखण्डोपाधिरूपमेव कारणत्वादिवत् , तदेव च तृतीयार्थः । तस्य च स्व निरूपकधात्वर्थावच्छिन्नसंसर्गेण**

---

[898] **विभक्त्यर्थनिर्णये तृतीयाविभक्त्यर्थविचारे , पृ.१९५ ।**

[899] **वाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे ।**

**भावानामन्वयः । ............. प्रकृत्यर्थान्वयस्त्वाधेयता तत्र बोध्यः [900]"** इति ।

## चतुर्थीविचारः

'**चतुर्थी सम्प्रदाने**[901]' इति सूत्रेण चतुर्थी विहिता । कर्मणा यमभिप्रैति स सम्प्रदानम् [902]इति सूत्रेण सम्प्रदानसंज्ञा विवृता । दानक्रियायाः कर्मकारकेण यमभिप्रैति शेषित्वेनाध्यवस्यति स सम्प्रदानमित्यर्थः । शेषित्वं भोक्तृत्वम् । सम्प्रदीयते यस्मै तत् सम्प्रदानमित्यर्थसंज्ञैषा । देयद्रव्योद्देश्यं सम्प्रदानमिति फलितम् । विप्राय गां ददाति इति उदाहरणम् । विप्रमुद्दिश्य गां ददातीत्यर्थः । अनभिहिते इत्यनुवर्तते । तेन दानीयो विप्रः इत्यत्र विप्रशब्दान्न चतुर्थी तत्र हि कृत्यल्युटो बहुलम् इति बहुलग्रहणात् सम्प्रदाने अनीयर् । दानोद्देश्य इत्यर्थः । तेन कृत्प्रत्ययेन सम्प्रदानस्य विप्रस्याभिहितत्वान्न चतुर्थी ।

ननु दानक्रियाकर्मोद्देश्यस्यैव सम्प्रदानत्वे पत्ये शेते इत्यत्र अकर्मकशयनक्रियोद्देश्यस्य पत्युः कथं सम्प्रदानत्वमिति चेन्न । क्रियाग्रहणमपि कर्तव्यम् इति वार्त्तिकेन क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् इति बोधनात् । दानातिरिक्तक्रियोद्देश्यमपि सम्प्रदानमिति तदर्थः । पत्ये शेते इत्यत्र पतिमुद्दिश्य शेत इत्यर्थः । नन्वेवमपि ओदनं पचति इत्यादावोदनादेः कर्मणोऽपि पाकक्रियोद्देश्यत्वात् सम्प्रदानत्वप्रसङ्गः ।

---

[900] **भाट्टतन्त्ररहस्ये तृतीयाविभक्त्यर्थविचारे , पृ.१११ ।**

[901] **पाणिनीयाष्टाध्याय्यां २.३.१३ ।**

[902] **पाणिनीयाष्टाध्याय्यां १.४.३२ ।**

# सम्प्रदानविचारः

दानक्रियायाः कर्मणा स्वत्वभागित्वरूपेण यमुद्दिशति तस्यैव सम्प्रदानसंज्ञा भवति । अतः क्रियाजन्यकर्मनिष्ठस्वत्वफलभागित्वं सम्प्रदानत्वमिति वैयाकरणैरुच्यते । यथा – ‘ **विप्राय गां ददाति** ’ इति । अयम्भावः दर्शयति गदाधरभट्टाचार्य्येण –“ **त्यागरूपक्रियाजन्यगोनिष्ठ-स्वत्वभागितया दातुमिच्छाविषयो ब्राह्मणः** ” [903] इति । ‘ **सम्यक् प्रतीयतेऽस्मै** ’ इति सम्प्रदानमिति व्युतपत्त्या सम्प्रदानशब्दस्य अन्वर्थत्वात् त्यागाङ्गमिति सम्प्रदानलक्षणलाभः [904]। अत्र ‘ **सम्** ’ इत्युपसर्गेण स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनरूपः अर्थः दा-धातोः तथा ‘ **प्र** ’ इत्यनेन पूजादिपुरःसरं दानं बोध्यते । तथाहि -

**“ पूजानुग्रहकाम्याभिः स्वद्रव्यस्य परार्पणम् ।**
**दानं तस्यार्पणस्थानं सम्प्रदानं परिकीर्त्तितम् ॥** [905]” इति ।

अत्र सम्प्रदानसंज्ञाविधायकं पाणिनिसूत्रं हि – “ **कर्मणा यमभिप्रैति स सम्प्रदानम्** ”[906] इति । ‘ **दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्** [907]’ इति दीक्षितकृतोऽर्थः । अतः दानक्रियायाः कर्मणा सह कर्त्ता यस्य सम्बन्धं वाञ्छति तस्य सम्प्रदानत्वमिति । तस्मादेव ‘ **अजां ग्रामं नयति** ’ ‘ **हस्तं निदधाति वृक्षे** ’ इत्यादौ न सम्प्रदानत्वम् । किञ्च सम्प्रदानस्यान्वर्थसंज्ञकत्वात् ‘ **रजकस्य वस्त्रं ददाति** ’ ‘ **घ्नतः पृष्ठं ददाति** ’ इत्यादौ न सम्प्रदानसंज्ञा ।

---

[903] **व्युत्पत्तिवादे ।**

[904] **भर्तृहरिवाक्यपदीये ३.७.१२९ ।**

[905] **मुग्धबोधव्याकरणे २९४ सूत्रीयप्रमोदजनन्याम् ।**

[906] **पाणिनीयाष्टाध्याय्यां १.४.३२ ।**

[907] **वैयाकरणसिद्धान्तकौमुद्याम् १.४.३२ ।**

वस्तुतः दानं नाम पूजानुग्रहकाम्यया स्वकीयद्रव्यपरित्यागः परस्वत्वापत्तिः । तच्चेह नास्तीत्यतो न सम्प्रदानत्वम् । अत्र तु परस्वत्वोत्पत्तेः ज्ञानं न विवक्ष्यते । यदि त्यागजन्यस्वत्वफलभागित्वं सम्प्रदानत्वं स्यात्तर्हि **" प्रदीयतां दाशरथाय मैथिली "** इति प्रयोगः कथं सङ्गच्छते । अत्रोच्यते रावणस्य मैथिल्यां स्वत्वाभावेऽपि स्वत्वविवक्षया प्रयोगस्य साधुत्वम् । वस्तुतः अत्रापि पूजापुरःसरमेव मैथिली दीयतामिति प्रयोक्तुः तात्पर्यम् । स्वत्वविवक्षापूर्वकं पूजासहकृतप्रत्यर्पणत्वात् सम्प्रदानत्वं सिद्धमेव ।

अत्रेदं लक्षणीयं यत् भाष्यकारेण तु सम्प्रदानस्य अन्वर्थसंज्ञकत्वं न स्वीकृतम् । अत्र प्रमाणं हि – तेन हि **' खण्डिकोपाध्याय शिष्याय चपेटिकां ददाति** [908]' इति प्रयोगः कृतः । परन्तु कथमत्र सम्प्रदानत्वं चपेटिकादाने स्वस्वत्वनिवृत्तिपरस्वत्वोत्पत्त्यभावात् । एतेन सूच्यते यत् सम्प्रदानं नान्वर्थसंज्ञकम् । अतः शेषत्वविवक्षया यथा – **" रजकस्य वस्त्रं ददाति "** इति भवति तथैव शेषत्वाविवक्षया **" रजकाय वस्त्रं ददाति "** इति सम्प्रदानमपि सिद्धम् । एतद्विषये तु नागेशेन सम्यगालोचितम् –

**" यत्तु वृत्तिकाराः सम्यक् प्रदीयते यस्मै तत् सम्प्रदानमित्यन्वर्थसंज्ञेयम् "** तथा च गोनिष्ठस्वस्वत्वत्वनिवृत्ति-समानाधिकरणपरस्वत्वोत्पत्त्यनुकूलव्यापाररूपक्रियोद्देश्यस्य ब्राह्मणादेरेव सम्प्रदानत्वम् । पुनर्ग्रहणाय रजकस्य वस्त्रदाने रजकस्य वस्त्रं ददाति इति सम्बन्धसामान्ये षष्ठ्येवेत्याहुः । तन्न । **' खण्डिकोपाध्याय शिष्याय चपेटिकां ददाति '** इति भाष्यविरोधात् । **' कर्मणा यमभिप्रैति स**[909] **सम्प्रदानमिति '** सूत्रव्याख्यावसरे भाष्यकृताऽन्वर्थसंज्ञाया अस्वीकाराच्च । अत एव **' तदाचक्ष्वासुरेन्द्राय स च युक्तङ्करोतु यत् '** इति

---

[908] **पतञ्जलिमहाभाष्ये १.१.१**

[909] **पाणिनीयाष्टाध्याय्याम् १.४.३२ ।**

सप्रशतीश्लोकः संगच्छते । तस्माद् **रजकाय वस्त्रं ददाति** इत्यादि भवत्येव । **" अत्राधीनीकरणेऽर्थे ददाति । चपेटां ददातीत्यत्र न्यसनेऽर्थे "** इति ।

यद्वा भवतु **' विप्राय गां ददातीत्यत्र '** दानक्रियायाः गोरूपेण कर्मणा सह विप्रस्य कश्चन सम्बन्धो वर्तते । तस्मात् विप्रः सम्बन्धित्वेन इच्छायाः विषयः । अतः तस्य सम्प्रदानत्वं सिद्धम् । परन्तु **' अजां ग्रामं नयति '** इत्यत्र अजया सह ग्रामस्य नास्ति कोऽपि सम्बन्धः । वस्तुतः अजाविक्रयार्थमेव ग्रामागमनम् । अतः ग्रामेण सह अजायाः सम्बन्धाभावात् न सम्प्रदानत्वम् । अत्र विशेषो यत् यदि **" अजासंयुक्तो ग्रामो भवतु "** इति विवक्षा कस्यापि स्यात् तर्हि तदा ग्रामेण सह अजायाः सम्बन्धत्वात् ग्रामस्य अवश्यमेव सम्प्रदानत्वं सिध्यति । अतः विवक्षाभेदे **' अजां ग्रामं नयति '** तथा **' अजां ग्रामाय नयति '** इति द्वयमपि सिद्धम् । तथाहि नागेशेन – **" यदा तु ग्रामोऽजासंयुक्तो भवत्वित्युद्देशेनाजानयतनं तदा भवत्येवाजां ग्रामाय नयति "** इति ।

अतः सर्वं समालोच्य एतदेव आयाति यत् वक्तुरिच्छा एव प्रधाना । वक्ता यादृशम् अभिप्रैति तादृशमेव व्यवहारः कर्तव्यः । तस्मात् कारकेषु सम्प्रदानस्यापि विवक्षाधीनत्वमेव सिद्धम् ।

### ➢तारानाथतर्कवाचस्पतिनोक्तं शब्दार्थरत्ने

सम्प्रदानत्वं नाम क्रियाजन्यफलभागिमत्त्वेनोद्देश्यत्वं कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रात् । तच्च त्रिविधम् । अनिराकरणात् कर्त्तुस्त्यागाङ्गकर्मणेप्सितम् । प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानतामिति हर्य्युक्तदानप्रयोजकव्यापारत्रयभेदात् । तत्र त्यागाङ्गेति लक्षणपरमिति बोध्यम् । तत्राद्यं देवतादि यथा **' शिवाय वस्त्रं ददाति '** , कर्त्तुरनिराकरणेन

प्रवृत्त्यप्रतिवन्धात् । द्वितीयं याचकादि यथा - **' विप्राय गां ददाति '** देहीत्याद्यभिलापादिना कर्त्तुः प्रेरणात् । तृतीयं गुर्व्वादि यथा- **' गुरवे गां ददाति '** प्रार्थनाव्यतिरेकेणानुमतिमात्रेण प्रेरणादिति ।

## सम्प्रदानभेदः

वैयाकरणनिकाये कौण्डभट्टैः सम्प्रदानस्य भेदत्रयमिति कृतमस्ति । अनिराकर्तृ , प्रेरयितृ , अनुमन्तृ इति भेदात् ।

➢ **अनिराकर्तृसम्प्रदानम् :** तावत् सूर्यायार्घ्यं ददातीति । अत्र सूर्योऽनिराकर्तृरूपमेव सम्प्रदानम् , यतो ह्यनिराकर्तृरूपं सम्प्रदानं तदेव भवति , यत् कर्त्तुः प्रवृत्तिनिवृत्त्यन्यतरजनकव्यापाराभाववद् भवति । प्रकृते सूर्योऽप्यर्घ्यदातारं न तु प्रेरयति , न तु निराकरोति , न तु तदनुमोदत एव , अतः सूर्यस्यानिराकर्तृरूपं सम्प्रदानत्वम् । तथाचोक्तं – " **सूर्यायार्घ्यं ददातीति** [910]" आद्यम् । नात्र सुर्यः प्रार्थयते , नानुमन्यते , न निराकरोति ।

➢ **प्रेरयितृसम्प्रदानम् :** प्रेरयितृ या प्रेरकञ्च सम्प्रदानं तद्भवति , यद्दानकर्त्तारं दान इष्टसाधनत्वादिबोधनद्वारा प्रेरयति । यथा विप्राय गां ददातीति । अत्र विप्रः दातारं दाने प्रेरयति ।

➢ **अनुमन्तृसम्प्रदानम् :** तावत् उपाध्यायाय गां ददाति । अत्रोपाध्यायः दानस्यानुमोदनं करोति अर्थात् स्वाभिलषिते दाने स्वयं प्रवृत्तस्य दानकर्त्तुः " **इदं तवेष्टसाधनम्** " इत्यादिरूपेणेष्ट साधनतां बोधयति । अतः उपाध्यायोऽनुमन्तृ सम्प्रदानम् । एवञ्च त्रिविधं सम्प्रदानं स्वीकृतं कौण्डभट्टैः भर्त्तृहर्युक्तकारिकाप्रामाण्यात् । कारिका च –

---

[910] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.२१९।**

**" अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सीतम् ।**
**प्रेरणानुमितिभ्यां च लभते सम्प्रदानताम् ॥[911] " इति ।**

## ➢पाणिनिमतम्

सम्प्रदानत्वं प्रतिपादयता पाणिनिना सूत्रितम् –" **कर्मणा यमभिप्रैति स सम्प्रदानम्** [912]" इति । तस्यायमर्थः दानक्रियाकर्मणा कर्त्ता यं सम्बन्धुमीप्सति तत् सम्प्रदानसंज्ञं भवति । दानक्रियाकर्मणैव सम्बन्धुमिष्टस्य सम्प्रदानसंज्ञा विधानात् " **अजां ग्रामं नयति** " इत्यत्र ग्रामस्य '' **हस्तं निदधाति वृक्षे** '' इत्यत्र वृक्षस्य च न सम्प्रदानसंज्ञा , ग्रामवृक्षयोरजाहस्ताभ्यां सम्बन्धुमिष्यमाणत्वान्न तु तयोर्दानक्रिया-कर्मणेप्सितत्वम् ।

## ➢वृत्तिकारमतम्

सम्प्रदानमिति महासंज्ञा करणात्तयान्वर्थसंज्ञा विज्ञायते । अन्वर्थश्च सम्यक् प्रदीयतेऽस्मै तत्सम्प्रदानम् । तत्र दानञ्चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परसत्वोत्पादनम् । एवञ्च यत्रापुनर्ग्रहणाय दीयते , तत्रैव दानक्रियाकर्मणा सम्बन्धुमिष्टस्य सम्प्रदानसंज्ञा , विप्राय गां ददाति इत्यादौ । ' **रजकस्य वस्त्रं ददाति** ' इत्यादौ तु सम्बन्धसामान्ये षष्ठ्येवेति वृत्तिकारसम्मतिः । अत एव पूर्वपक्षरूपेण वृत्तिकारमतमुपपादयता नागेशेनोक्तम् – " **यत्तु वृत्तिकाराः सम्यक् प्रदीयते यस्मै तत्सम्प्रदानमित्यन्वर्थसंज्ञेयम् । तथा च गोनिष्ठस्वस्वत्व-निवृत्तिसमानाधिकरणपरस्वत्वोत्पत्त्यनुकूलव्यापाररूपक्रियोद्देश्यस्य**

---

[911] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.१२९ ।**
[912] **पाणिनीयाष्टाध्याय्यां १.४.३२ ।**

**ब्राह्मणादेरेव सम्प्रदानत्वम् । पुनर्ग्रहणाय रजकस्य वस्त्रदाने रजकस्य वस्त्रं ददातीति सम्बन्धसामान्ये षष्ठ्येवेत्याहुः** [913]" इति ।

यद्यपि नागेशकौण्डभट्टाभ्यामयं वृत्तिकाराभिमतसिद्धान्तो न रोचते भाष्यविरोधात् , किन्तु भर्तृहरिणा तु वृत्तिकाराभिमते सिद्धान्त एव स्वसम्मतिः प्रदर्शिता । तथा चोक्तम् –

**" अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सीतम् ।**
**प्रेरणानुमितिभ्यां च लभते सम्प्रदानताम् ॥** [914]" इति ।

व्याख्यातञ्चैतत् तत्रैव हेलाराजेन - " **अन्वर्थत्वात् सम्प्रदानस्य त्यागाङ्गमितिलक्षणलाभः । त्यागो दीयमानस्य स्वत्वनिवृत्त्या परस्वत्वोत्पादनम् । कन्यां ददातीति ' जन्यजनकभावाव्यावृत्तावपि स्वस्वामिभावसम्बन्धस्य निवृत्तेः मुख्य एव ददत्यर्थः । खण्डिकोपाध्यायः तस्मै चपेटां ददात्येत्यादौ वस्तुतोऽसत्यपि चपेटादिस्वाम्ये तदुपकारितया दातुः स्वामित्वाभिसन्धिरस्त्येव । यद्यपि प्रतिकूलरूपत्वात् चपेटायाः तदानीमुपयोगो नास्ति , तथापि फलद्वारेणास्त्येव परोपयोगित्वम् । चपेटासहत्वे शास्त्राभ्यामयोगत्वात् फलावाप्तेः** [915]" इति ।

सारस्वतव्याकरणेऽपि सिद्धान्तोऽयं प्रतिपादितः । तथाहि **- " दानपात्रे सम्प्रदानकारके चतुर्थी** [916]" इति मूलोक्तं व्याचक्षाणैः माधवाचर्यैरुक्तम् –
**" किञ्चिदुद्दिश्यापुनर्ग्रहणाय स्वद्रव्यत्यागो दानं , तस्य तत्पात्रं यस्मै**

---

[913] **परमलघुमञ्जूषायां कारकविचारे , पृ.१०० ।**
[914] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.१२९ ।**
[915] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे हेलाराजटीकायां का.१२९ ।**
[916] **सारस्वते , पृ.१५३ ।**

**दीयते तत् ।** [917]” स्वप्रतिपादितेऽस्मिन्नेवार्थे प्रमाणं प्रदर्शयता माधवेन चाङ्गुदासस्यैकः श्लोकः उद्धृतः -

**“ सम्प्रदानं तदेवस्यात् , पूजानुग्रहककाम्यया ।**

**दीयमानेन संयोगात् , स्वामित्वं लभते यदि ॥ ” इति ।**

एवञ्चैतेषां मते यत्र पुनर्ग्रहणाय दानं भवति , तत्र रजकस्य वस्त्रं ददाति , घ्नतः पृष्ठं ददातीत्यादौ सम्प्रदानत्वाभावात् चतौर्थी न , अपि तु सम्बन्धसामान्ये षष्ठ्येव ।

## ➢नागेशमतम्

नागेशास्तु **बृद्धिरादैच् इतिसूत्रस्थ**[918] **खण्डिकोपाध्याय तस्मै चपेटां ददातीत्यादौ**[919] भाष्यप्रयोगविरोधात् , यत्रापुनर्ग्रहणाय स्वस्वत्वनिवृत्ति समानाधिकरणपरस्वत्वोत्पादनं तत्रैव सम्प्रदानमिति न स्वीकुर्वन्ति । तादृशसम्प्रदानत्वं **‘ खण्डिकोपाध्यायकर्त्तृक चपेटानिष्ठ-संयोगविशेषानुकूलो व्यापारः’** इत्यर्थके खण्डिकोपाध्याय तस्मै चपेटां ददातीति वाक्ये तादृशसम्प्रदानत्वाभावात् चतुर्थ्यसंगतैव स्यात् । अतः “ **क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं यत् कारकं तत्त्वं सम्प्रदानत्वमिति** [920]” परिष्कुर्वन्ति ।

लक्षणञ्चेदं ‘ **कर्मणा यमभिप्रैति स सम्प्रदानम्** [921] ’ इति सुत्रार्थफलितमेव । तथाहि – कर्मणः क्रियायां साकाङ्क्षितत्वात्

---

[917] **सारस्वते माधवविवरणटीकायां , पृ.३५३ ।**

[918] **पाणिनीयाष्टाध्याय्यां १.१.१ ।**

[919] **पतञ्जलिमहाभाष्ये १.१.१ ।**

[920] **परमलघुमञ्जूषायां कारकविचारे , पृ.९९ ।**

[921] **पाणिनीयाष्टाध्याय्यां १.४.३२ ।**

क्रियालाभः । अभिप्रैतीत्यस्य सम्बन्धुमिच्छतीत्यर्थः । एवञ्च कर्मसम्बन्धाय यं सम्बन्धुमिच्छति कर्त्ता स सम्प्रदानमिति सूत्रार्थः । तत्फलितमेवेदं लक्षणम् । तथा च ‘ **विप्राय गां ददातीत्यत्र** दानक्रियाकर्मीभूतसम्बन्धाय विप्रस्य दानक्रियोद्देश्यत्वात् सम्प्रदानसंज्ञा । एतादृशसम्प्रदानत्वस्वीकारादेव –

**‘ तदाचक्ष्वासुरेन्द्राय स च युक्तङ्करोतु यत्** [922]**’ ॥**

इत्यादि संगच्छते , अन्यथा तु अत्रापि स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनस्य विवक्षाभावादसुरेन्द्रायेति चतुर्थी न स्यात् । अतः बहुतरप्रयोग साधारणमिदं सम्प्रदानलक्षणम् ।

अस्य लक्षणस्य कर्मत्वघटितत्वेनाकर्मकधातूनां योगे सम्प्रदानसंज्ञा कथं स्यादिति चेदुच्यते । ‘ **अकर्मकक्रियोद्देश्यत्वं सम्प्रदनमिति लक्षणान्तरम्** [923]’ । यथा – पत्ये शेते इत्यादि । ‘ **इदमपि लक्षणक्रियया यमभिप्रैति सोऽपि सम्प्रदानम्** ’ इति वार्तिकार्थफलितार्थकथमेव ।

यदि तु ‘ **सन्दर्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्म** [924]’ इत्यादिरूपेण भाष्यकृता प्रत्याख्यानं तद्वार्तिकमित्युच्यते , तत्र स्वतन्त्रमेवेदं लक्षणम् । एवञ्च क्रियया यमभिप्रैति सोऽपि सम्प्रदानमिति वार्तिकं खण्डयता भाष्यकृता वृत्तिकारादिसम्मतान्वर्थसंज्ञाविषये स्वकीयासम्मतिरेव प्रदर्शिता , अन्यथा तु पत्ये शेते इत्यादौ दानक्रिया कर्मणेप्सीतत्वाभावात् ‘ **पत्ये** ’ इत्यत्र सम्प्रदानत्वाभावात् चतुर्थी दुरुपपादा स्याद् अतस्तत्र चतुर्थी विधानार्थमावश्यकस्य वार्तिकस्य

---

[922] **दुर्गासप्तशत्यां पञ्चमाध्याये श्लोक.१२९ ।**

[923] **परमलघुमञ्जूषायां कारकविचारे , पृ.१००।**

[924] **पतञ्जलिमहाभाष्ये १.४.३२ ।**

खण्डनपरभाष्यासंगतमेव स्यात् । तस्मात् भाष्यसम्मतं सम्प्रदानत्वं नागेशोक्तमेव ।

## ➢कौण्डभट्टमतम्

कौण्डभट्टास्तु यत्क्रियाकर्मसम्बन्धजन्य-फलभागित्वेनोद्देश्यं यत् तत् , तत्क्रियासम्प्रदानमिति स्वीकुर्वन्ति । तथा चोक्तं – " **तच्च कर्मणायमभिप्रैति स सम्प्रदानम्** [925]" इति सूत्रात् कर्मणा करणभूतेन यमभिप्रैतीप्सति , तत् कारकं सम्प्रदानमित्यर्थकादुद्देश्यम् । एवञ्चोद्देश्यत्वमेव सम्प्रदानत्वं तेषां मते । तथा च विप्राय गां ददातीत्यत्र दानक्रियाकर्मकारकेण गोद्रव्येण यः स्वत्वरूपो विप्रस्य सम्बन्धस्तज्जन्यं फलं सुखादि , तद्भागित्वरूपेणोद्देश्यत्वाद् विप्रस्य सम्प्रदानसंज्ञा ।

' **अजां ग्रामं नयति** ' इत्यत्र अजासम्बन्धजन्यफलवत्त्वेन ग्रामस्येप्सितत्वाभावात् न ग्रामस्य सम्प्रदानसंज्ञा , तादृशफलवत्त्वेनेप्सितत्वे तु ' **अजां ग्रामाय नयति** ' इति प्रयोग इष्यत एव ।

" **एवमेव खण्डिकोपाध्याय तस्मै चपेटां ददातीति भाष्यप्रयोगोऽपि संगच्छते** [926]" **इति** । तस्मात् कौण्डभट्टाभिमतेऽपि सम्प्रदानस्य स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनरूपविषयाभावात् रजकाय वस्त्रं ददातीत्यत्रापि चतुर्थी भवत्येव ।

एवञ्च वृत्तिकारमते सम्प्रदानमित्यन्वर्थसंज्ञा , अतो यत्र स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनस्य विवक्षा तत्रैव सम्प्रदानत्वमतः पुनर्ग्रहणाय दीयमाने ' **रजकस्य वस्त्रं ददाति** ' इति वाक्ये सम्बन्धसामान्ये षष्ठी ।

---

[925] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.२१३ ।**

[926] **पतञ्जलिमहाभाष्ये १.१.१ ।**

नागेशकौण्डभट्टादिमते तु खण्डिकोपाध्याय तस्मै चपेटां ददातीति भाष्यप्रयोगात् सम्प्रदानमिति नान्वर्थसंज्ञा अतः पुनर्ग्रहणाय दीयमानेऽपि रजकाय वस्त्रं ददातीत्यत्रापि चतुर्थी।

अनयोः पक्षयोः कतरः पक्षः श्रेयान् इति विचारणायां , नागेशादिसम्मतं मतमेव समीचीनमिति मे मतिः । यतोहि यथोत्तरं मुनीनां प्रामाण्यात् , भाष्यसम्मतिरेव सर्वैराद्रियते। अत एव **" धिन्विकृण्व्योरच ' इति सूत्रेण पाणिनिना अकारविधानं कृतम्। अन्यथा तु तदनर्थकमेव स्यात्** [927] " इति। तथाहि **' धिन्विकृण्व्योरच** ' इति सूत्रभाष्ये **- ' ' किमर्थमन्त्वं विधीयते , वलोप एव स्यादिति शंकायामुक्तम् ' लोपे सति गुणः प्रसज्येत् । अत्वे पुनः सति अकारलोपस्य स्थानिवद्धावाद् गुणो न भविष्यति** [928] " इति । पुनश्च वकारलोपेऽपि धात्वंशलोपनिमित्तक आर्धधातुके गुणबृद्धीर्न स्तः इत्यर्थकेन तु **" न धातुलोप आर्धधातुके** [929]" इति सूत्रेणैव गुणनिषेधे सिद्धे , पुनः अकारं विधाय तल्लोपविधानं व्यर्थमेवेत्याशंक्य तत्र समाहितम् **- " अपि च प्रत्याख्यायते खल्वपि स योगः । तस्मिन् प्रत्याख्याने गुणः स्यादेव । तस्मादत्वं वक्तव्यम्** [930]" इति।

एवञ्च पाणिनिमते **' न धातुलोप आर्धधातुके** [931]' इति सूत्रस्य सत्त्वेऽपि **' धिन्विकृण्व्योरच** ' इति सूत्रेणात्वं विधीयमानेन पाणिनिना भाष्यसम्मतः पक्षः एवादृतः। अन्यथा तु तन्मते वकारलोपेनैव धिनोतीत्यादौ गुणनिषेधे सिद्धेऽत्वविधानं व्यर्थमेव स्यात्। तस्मात् पाणिन्यादिसर्वैरेवाचार्यैः

---

[927] **पाणिनीयाष्टाध्याय्यां ३.१.८०।**

[928] **पतञ्जलिमहाभाष्ये ३.१.८०।**

[929] **पाणिनीयाष्टाध्याय्यां १.१.४।**

[930] **पतञ्जलिमहाभाष्ये ३.१.८०।**

[931] **पाणिनीयाष्टाध्याय्यां १.१.४।**

स्वीकृतत्वात् भाष्यसम्मतः पक्षः एवादरणीयः । एवञ्च स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनत्व विवक्षायामेव सम्प्रदानत्वस्वीकारे **' खण्डिकोपाध्याय तस्मै चपेटां ददातीति** [932]' भाष्यप्रयोगासंगतेः , नायं वृत्तिकाराभिमतः पक्षो रमणीयः । सम्प्रदानमिति महासंज्ञाकरणन्तु , सर्वनामस्थानादिसंज्ञावत् प्राचामनुरोधादेव , न त्वन्वर्थायेति बोध्यम् । तथा चोक्तम् – " **उक्तभाष्यप्रामाण्यादन्वर्थमेवासिद्धम् । महासंज्ञाकरणं प्राचामनुरोधादेव , सर्वनामस्थानसंज्ञावद्** [933]" इति ।

एवञ्च नागेशमते क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं , कौण्डभट्टाभिमते क्रियाकर्मसम्बन्धजन्यफलभागित्वेनोद्देश्यभूतं सम्प्रदानमिति सिद्धान्ततयोभयमते सम्प्रदाने विधीयमानायाः चतुर्थीविभक्तेरुद्देश्य एवार्थः । तथा चोक्तं – **" सम्प्रदानचतुर्थ्यर्थ उद्देश्यः । तथा च ब्राह्मणोद्देश्यकं गोकर्मकं दानमिति बोधः**[934] " इति । कौण्डभट्टेनापि भणितं – **" उद्देश्यचतुर्थ्यर्थ** [935]" इति ।

## ➢तारानाथतर्कवाचस्पतिमतम्

कारकचतुर्थ्याः सम्प्रदानार्थः ' **चतुर्थी सम्प्रदाने** [936]' इतिसूत्रात् वाच्यतादि-पूर्वात् । विप्राय गां ददातीत्यादौ विप्रसम्प्रदानकगोकर्मकदानमिति बोधः मूल्याग्रहणपूर्वकस्वत्वनाशपूर्वकस्वत्वोत्पत्त्यनुकूलव्यापारो ददाते-र्मुख्यार्थः तदुद्देश्यस्य मुख्यसम्प्रदानत्वं ' **शिष्याय चपेटं ददातीत्यादौ** ' तु संयोगानुकूलव्यापारानुकूल-व्यापारार्थकतया ददातेर्गौणत्वात् तदुद्देश्यस्य

---

[932] **पतञ्जलिमहाभाष्ये १.१.१ ।**

[933] **दर्पणव्याख्यायां वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ. २१७ ।**

[934] **परमलघुमञ्जूषायां कारकविचारे , पृ.१०० ।**

[935] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.२१३ ।**

[936] **पाणिनीयाष्टाध्याय्यां २.३.१३ ।**

गौणसम्प्रदानत्वम् अत एव वार्त्तिके ‘ **क्रियया यमभिप्रैतीति** ’ क्रियोद्देश्यस्यैव सम्प्रदानत्वमुक्तम्।

एवञ्च ‘ **रजकाय वस्त्रं यच्छतीत्यादौ** ’ आयत्तीकरणरूप-ददात्यर्थोद्देश्यत्व-विवक्षायां रजकादेः सम्प्रदानत्वम् शेषत्वविवक्षायां तु षष्ठीप्रयोग इति भाष्यसम्मतम् । एतेन ‘ **पितृभ्योऽन्नं ददातीत्यादौ** ’ पित्रादेरन्नादिमत्त्वेनोद्देश्यत्वाभावेऽपि दानक्रियोद्देश्यत्वात् सम्प्रदानत्वम्।

एवं ‘ **पत्ये शेते** ’ इत्यादावपि। बोधस्तु सर्वत्र तत्तत् सम्प्रदानिका क्रियेति तेन न तादर्थ्यचतुर्थ्या अस्यागतार्थत्वमिति बोध्यम्। ‘ **हरये रोचते भक्तिरित्यादौ** ’ विषयतया प्रीत्यनुकूलस्तत्समानाधिकरणव्यापारो रुच्यर्थः समवायेन तत्फलाश्रयः सम्प्रदानं ‘ **रुच्यर्थानां प्रीयमाण** [937]’ इतिसूत्रात्। बोधस्तु भक्तिकर्त्तृको हरिसम्प्रदानकस्तादृशव्यापार इति । अभिलष्यतेस्तु विषयतयाप्रीतिव्यधिकरण-व्यापारबोधकतया सकर्मकत्वेन न रुच्यर्थमतस्तत्र भक्तिमभिलष्यति हरिरितिप्रयोगः । बोधविषयगुणवत्त्वप्रतिपादकशब्दप्रयोगः श्लाघतेरर्थः बोधविषय इतरादर्शन-योग्यदेशस्थापनं ‘ **ह्नुतेः तिष्ठतेः** ’ स्वाभिप्रायबोधानुकूलस्थितिः । शपतेः स्वाभिप्रायः बोधनानुकूलशपथ-करणमर्थः । तत्र बोधयितुमिष्टः सम्प्रदानं ‘ **श्लाघह्नुस्थाशपां ज्ञीप्स्यमान** [938]’ इतिसूत्रात् **।**

अवस्थित्यनुकूलव्यापारो धारेरर्थः । स्थित्याश्रयसम्बन्धी सम्प्रदानं धारेरुत्तमर्ण इतिसूत्रात् । अवश्यदेयमृणमुत्तममद्देश्यत्वेन देयं तद् यस्येति व्युत्पत्त्या स्थितवस्त्ववश्यदानोद्देश्य उत्तमर्ण इति फलितार्थः।

---

[937] **पाणिनीयाष्टाध्याय्यां १.४.३३।**

[938] **पाणिनीयाष्टाध्याय्यां १.४.३४।**

इच्छामात्रं स्पृहयतेरर्थस्तद्विषयः सम्प्रदानं ‘ **स्पृहेरीप्सित** [939]’ इतिसूत्रात् । इच्छानुकूलमनःसंयोगादिव्यापारार्थकत्वे तु सकर्मकतया तद्योगे द्वितीयैव तेन पुष्पाणि स्पृहयतीति साधुः ।

वधाद्यनुकूलव्यापारजनकश्चित्तवृत्तिविशेषः क्रुधेरर्थः । दुःखजनक-क्रियारूपापकारजन्यश्चित्तवृत्तिविशेषः द्रुहेः । उत्कर्षविरोधिकर्मारोपानुकूलः स एव ईर्ष्यतेः । आचारादिगुणविशेषे दम्भकृतत्वाद्यारोपानुकूलः स एव असूयतेरर्थः । धात्वर्थतत्मूलीभूतकोपविषयः सम्प्रदानं “ **क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप** [940]” इतिसूत्रात् । तत्र द्रोहादीनां कोपमूलकत्वात् तद्विषयस्य सम्प्रदानत्वमिति बोध्यम् । प्रश्नविषयशुभाशुभपर्यालोचनं राधीक्ष्योर्यस्य विप्रश्न इतिसूत्रात् ।

प्रवर्त्तनाजन्योऽभ्युपपगमः प्रतिश्रुव आश्रुवश्चार्थः प्रवर्त्तना कर्त्ता सम्प्रदानं प्रत्यङ्भ्यां श्रुवः पूर्वस्य कर्त्तेति सूत्रात् । पूर्वस्य धात्वर्थघटकविशेषणव्यापारस्य । शंसनविषय हर्षानुकूलव्यापाररूपप्रोत्साहनं प्रतिगृणातेः अनुगृणातेश्चार्थः अत्रापि पूर्वव्यापारस्य शंसनस्य कर्त्ता ‘ **सम्प्रदानम् अनुप्रतिगृणश्चेतिसूत्रात्** ’ इति ।

सर्वत्र च यथायथं हेतुत्वकर्मत्वादिना तत्तत्संज्ञाप्राप्तौ सम्प्रदानसंज्ञा विहिता । यथोक्तं हरिणा -

“ **हेतुत्वे कर्मसंज्ञायां शेषत्वे चापि कारके ।**
**रुच्यर्थादिषु शास्त्रेण सम्प्रदानत्वमुच्यते ॥** [941]” इति ।

बोधस्तु तत्र तत्र तत्तत् सम्प्रदानकक्रियेत्येवं शाब्द आर्थस्तु यथायथं बोधादौ विषयतावृत्तित्वादिनान्वयाद् यथाप्राप्तमित्यन्यत्र विस्तरः ।

---

[939] **पाणिनीयाष्टाध्याय्यां १.४.३६।**

[940] **पाणिनीयाष्टाध्याय्यां १.४.३७ ।**

[941] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. १३० ।**

" **तुमर्थाच्च भाववचनादिति** [942]" विहितायास्तु तुमर्थद्योतकत्वं यथा- " **पाकाय गच्छतीत्यादौ बोधस्तु पक्तुं यातीतिवत्** " भाविपाकोद्देश्यकतत्समानकर्त्तृकयानमित्येवंविधः।

" **क्रियार्थोपपदस्य कर्मणि स्थानिन** [943]" इति विहितायाः कर्मार्थः एतत्समभिव्याहारे च धातोः चतुर्थीप्रकृत्यर्थकर्मकक्रियोद्देश्यक-तत्समानाधिकरणक्रियायां लक्षणा " **तेन काष्ठाय व्रजतीति काष्ठमाहर्त्तुं व्रजतीतिवद् बोधः**" इति । उपपदचतुर्थ्याः सम्बन्धसामान्यमर्थतात्पर्य-वशाद्विशेषावधारणम्।

तत्रापि ' **तादर्थ्ये चतुर्थ्यास्तादर्थ्यमर्थः** ' तच्चोपकार्य्योपकारक-भावसम्बन्धरूपं तत्रापि स अर्थो यस्येति व्युत्पत्त्या उपकार्य्यवाचकादेव चतुर्थी। यथा विप्राय दधातीत्यादौ विप्रोपकारकं दधातीति बोधः।

" **हितादियोगेऽपि** " चतुर्थी विहिता तत्र सम्बन्धोऽर्थः । विप्राय हितमित्यादौ विप्रसम्बन्धि हितमितिबोधः। अत्र शेषषष्ठी विभाषया भवतीति वृद्धाः। " **नमःस्वस्तिस्वाहास्वधालंवषड्योगेऽपि** [944]" चतुर्थी विहिता। स्वाहादिसाहचर्य्यात् स्वरादिपठित एव नमः शब्दो गृह्यते न निपातः। तथा च नमः शब्दार्थः अपकर्षबोधनानुकूलव्यापारः स्वत्वनिवृत्त्यनुकूलव्यापारश्च शब्दशक्तिस्वाभाव्यात् तत्पदप्रयोक्तुरेवापकर्ष-स्वत्वयोः प्रतीतिः तेन अन्योन्योच्चारितनमःपदान्नान्यस्य तत्प्रतीतिः । ऋत्विजा तु यजमानद्रव्ये स्वत्वारोपेणैव तथा प्रयुज्यते । तत्राद्यर्थकत्वे सम्बन्धित्वमपकर्षबोधान्वितं द्वितीयार्थकत्वे त्यागान्वितमुद्देश्यत्वं च चतुर्थ्यर्थस्तेन ' **ब्राह्मणेभ्यो नमः** ' इत्यादौ ब्राह्मणसम्बन्धिस्वापकर्ष-बोधानुकूलव्यापार इति । ' **अर्घ्यं हरये**

---

[942] **पाणिनीयाष्टाध्याय्यां २.३.१५।**

[943] **पाणिनीयाष्टाध्याय्यां २.३.१४।**

[944] **पाणिनीयाष्टाध्याय्यां २.३.१६।**

**नमः'** इत्याद्यौ हर्य्युद्देश्यकत्यागविषयोऽर्घ्यमिति च बोधः । एवं स्वाहादीनामर्थान्वयादिक-मूह्यम् नमःशब्दस्य निपातत्वे न तद्योगे चतुर्थी **" तेन देवान् नमस्करोतीत्यादिसिद्धिः ब्राह्मणेभ्यो नमस्कृत्येत्यादौ तु क्रियोद्देश्यत्वात् चतुर्थी न नमःशब्दयोगे "** इति ।

## ➢पुरुषोत्तमदेवमतम्

**" कर्मणा यमभिप्रैति स सम्प्रदानम्** [945]" इति तावल्लक्षणम् । तस्यायमर्थः कर्मणा करणभूतेन यमर्थमभिप्रैति तत् कारकं सम्प्रदानसंज्ञं भवति । तच्च त्रिविधं प्रेरकमनुमन्तृकमनिराकर्त्तृकञ्चेति । तत्र प्रेरकं यथा ब्राह्मणाय गां ददाति । ब्राह्मणो हि पूर्वं मह्यं गां देहीति धार्मिकं प्रेरयति , स च तेन प्रेरितो ददाति । अनुमन्तृकं यथा – उपाध्यायाय गां ददाति । उपाध्यायो हि पूर्वं गां न प्रेरितवान् , अथ तां दीयमानामनुमन्यन्ते भद्रं कृतमिति । अनिराकर्त्तृकं यथा आदित्याय पुष्पं ददाति । न च आदित्यः प्रार्थयते नाप्यनुमन्यते केवलं दीयमानं न निराकरोति । तदुक्तं –

**" त्यागाङ्गकर्मणा व्याप्तं प्रेरकञ्चानुमन्तृकम् ।**
**अनिराकर्त्तृकञ्चेति सम्प्रदानं त्रिधा मतम् ॥** [946]" इति ।

अन्वर्थसंज्ञाविज्ञानात् सम्यक् प्रकर्षेण यस्मै दीयते तत् सम्प्रदानम् । तदेतदसमञ्जसं , सम्यग्दानासम्भवात् । तथाहि ' दानं हि नाम पूजानुग्रहकाम्यया स्वस्वत्वपरित्यागपूर्वकं परस्वत्वापादानलक्षणम् । तत्र पूजानुग्रहकाम्ययेति तत् किं पूजनम् । तदुक्तं –

**" गुरुदेवद्विजातीनां भावशुद्ध्या कृतं तु यत् ।**
**ध्यानावनतिदानैश्च मानं पूजा विधीयते ॥**

---

[945] **पाणिनीयाष्टाध्याय्यां १.४.३२ ।**

[946] **कारकचक्रे प्रुषोत्तमदेवेन , पृ. १०९ ।**

**कुरूपोन्मत्तनिःस्वानामकुत्सापूर्वकं हि यत् ।**
**पूरणं दानमानाभ्यामनुग्रह उदाहृतः ॥**
**यत् किञ्चित् फलमुद्दिश्य दानयज्ञजपादिकम् ।**
**क्रियते कायिकं यच्च काम्यमाहुर्मनीषिणं ॥** [947]" इति ।

तत् किं स्वस्वत्वे विद्यमाने परस्वत्वापादानमापद्यते अथाविद्यमाने । विद्यमाने तावन्न सम्भवति स्वस्वत्वपरस्वत्वयोर्बिरोधात् । न अपि अविद्यमाने । तथाहि स्वस्वत्वं परित्यज्य परस्वत्वमापादयति , स च नोपपद्यते । न हि येन किल यत् परित्यज्यं तत्तदीयं भवितुमर्हतीति । अतः औदासिन्यात् कथं परस्वत्वं कर्त्तुमुत्सहते । तदुक्तं –

**" स्वस्वत्वे विद्यमाने हि परस्वत्वं न विद्यते ।**
**परित्यज्य प्रदानञ्चेदौदासीन्यान्न सिद्ध्यति ॥** [948]" इति ।

स्वस्वत्वपरित्यगोपक्रमेण परस्वत्वापादानपर्य्यवसानः समुदायो ददात्यर्थः स्वस्वत्वपरित्यागेन परस्वत्वमापादयतीति योऽर्थः स एव ददात्यर्थः । यदि पुनः स्वस्वत्वपरित्यागमात्रं परस्वत्वापादानमात्रं वा ददात्यर्थस्तदा स्यादुक्तदोषः । यदा तु समुदायो ददात्यर्थस्तदा न किञ्चिद्दुष्यति इति निरस्तञ्चोद्यम् ।

## ➢मीमांसकमतम्

मीमांसकास्तु वैयाकरणसम्मतं सम्प्रदानत्वं न स्वीकुर्वन्ति । तादृशसम्प्रदानत्वमजानतामपि पुंसाम् " **विप्राय गां ददातीति** " वाक्यात् विप्रसम्प्रदानकं गोकर्मकं दानमिति बोधोदयात् । तस्मात् सम्प्रदानत्वमखण्डोपाधिरूपम् , तदेव च चतुर्थीविभक्तेरर्थः । उक्तञ्च

[947] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.११० ।**
[948] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.११० ।**

मीमांसातत्त्वज्ञैः खण्डदेवैः – **“ निरूक्तसम्प्रदानत्वाज्ञानेऽपि च विप्राय गां ददाति ’ इति वाक्यात् विसम्प्रदानकं गोकर्मकदानमिति बोधोदयात् देयद्रव्यनिष्ठ निरूपकत्वरूपम् तत्समनियतमखण्डोपाधि-रूपमेव वा युक्तमाश्रयितुम् । तदेव च शाक्तश्चतुर्थ्यर्थः**[949] ” इति ।

## अपादानविचारः

वैयाकरणमूर्धन्यभूतेन सूत्रकृता पाणिनिना कारकाह्निके ‘ **कारके**[950] ’ इति अधिकारसूत्रमुपस्थाप्य तदनन्तरं ‘ **ध्रुवमपायेऽपादानम्**[951] ’ इत्यपादानसंज्ञकं सूत्रं सूत्रितम् । तत्र कथं पाणिनिना प्रथमतया अपादानं निर्दिष्टमिति जिज्ञासायां कानिचन वचनानि विदूषां पुरस्तात् प्रस्तूयन्ते , तद्यथा वाङ्गलानां चिकित्सितं व्याकरणं शब्दशास्त्रम् । अस्यापि नामान्तरं शब्दानुशासनमिति । व्याक्रियन्ते व्युत्पाद्यन्ते विविच्यन्ते पृथक् क्रियन्ते साधुशब्देभ्योऽसाधुशब्दाः अनेनेति व्याकरणम् । अतएव शब्दानुशासनमिति व्युत्पत्त्या साधुशब्देभ्योऽसाधु-शब्दानां पृथक्करणमिति व्याकरणम् । अत प्रथमतया अपायस्य बुद्धिः बुद्धौ प्रतिभाति । मन्ये एतदेवाभिप्रेत्य पाणिनिना आर्षचाक्षुषेण प्रथमतया अपादानकारकं प्रस्तुतम् ।

अप आ-पूर्वात् दाधातोः भावे ल्युट्प्रत्यये अपादानमित्येवं रूपम् । अपादीयते पृथक् क्रियते इति अपादानम् । अप-अय-घङ् इति व्युत्पत्तिः । अपायते इति अपाय इति विग्रहः । ध्रुवम् अपाये अपादानमिति पदच्छेदः ।

---

949 **भाट्टतन्त्ररहस्ये चतुर्थीविभक्त्यर्थनिरूपणे , पृ.११८ ।**

950 **पाणिनीयाष्टाध्याय्यां १/४/२३ ।**

951 **पाणिनीयाष्टाध्याय्यां १/४/२४ ।**

ध्रुवं स्थिरम् , ध्रु गतिस्थैर्ययोः इत्यस्मात्कुटादेः पचाद्यच् । ये तु ध्रुव स्थैर्ये इति पठन्ति तेषामिगुपधलक्षणः कप्रत्ययः । अपाये इत्यत्र विषये सप्तमी । अपायस्य साध्यत्वेन विषयभूत इत्यर्थः । अपायो नाम विभागो विश्लेषः इति । सूत्रस्यास्य वृत्तौ दीक्षित आह–' **अपायो विश्लेषस्तस्मिन् साध्ये ध्रुवं यदवधिभूतं कारकमपादानसंज्ञं स्याद्** [952]' **इति ।**

ननु अपायस्य द्विष्ठत्वनियमात् यथा तेन विभागेन योऽपे'ति सोऽपाययुक्तः। तथा- यतोऽपैति सोऽप्यपाययुक्तः , तस्मादुभयत्र पञ्चम्या भवितव्यम्[953] '। तस्मादेवं वक्तव्यं**- ' अपायो विश्लेषः तस्मिन् साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानं स्याद्** । तेन ' **वृक्षात् पर्णं पततीत्यादौ** ' वृक्षस्य ध्रुवत्वं पर्णस्यापायत्वादुक्तसूत्रेण वृक्षे अपादानत्वसिद्धिः ।

### ➤शब्दार्थरत्नकारमतैः

तत्रापादानत्वं नाम विभागजनकतत्क्रियानाश्रयत्वे सति तत्क्रियाजन्यविभागाश्रयत्वं " **ध्रुवमपायेऽपादानमिति**[954] " सूत्राद् अपाये विभागजनकक्रियायां यद् ध्रुवमुदासीनं तदनाश्रय इति यावत् तदपादानमिति तदर्थं हरिणा उक्तं-

> **" अपाये यदुदासीनं चलं वा यदि वाचलम् ।**
> **ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥**[955] "

इति स्वयं चलमचलं वा अतदावेशात् विभागजनकतत्क्रिया-नाश्रयत्वादेव ध्रुवमित्यर्थः । अत्र च तत्क्रियानाश्रयेत्युक्तेः उभयकर्मजविभागस्थले न कर्त्तुरपादानत्वम् । तदुक्तं -

---

[952] **बैयाकरणसिद्धान्तकौमुद्यां १/४/२५ ।**

[953] **काशिकायां पदमञ्जर्य्यां च ।**

[954] **पाणिनीयाष्टाध्याय्याम् १.४.२४ ।**

[955] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे श्लो. २०५ ।**

“ **मेषान्तरक्रियापेक्षमवधित्वं च पृथक् पृथक् ।**

**मेषयोः स्वक्रियापेक्षं कर्त्तृत्वंच पृथक् पृथक् ॥**[956]” इति ।

ननु ध्रुवस्य स्थिरमित्यर्थे सति ‘ **धावतः अश्वात् पतति** ’ इत्यादौ गतिषूक्तेष्वपादानसंज्ञिषु लक्षणासङ्गतिः जायते इति चेन्न , ‘ **ध्रुवमेकरुपमुच्यते**[957] ’ । ‘ **ध्रुवमस्य शीलमिति** ’ यथा तथा चापाये साध्ये यदेकरूपमित्युक्ते प्रकृतधातूपात्तगत्यनाविष्टत्वे सति यदुपयोगीति लभ्यते । तच्चार्थात् अवधिभूतमेव भवति । तस्मात् धावतः अश्वात् पततीत्यादौ गतियुक्तेष्वपि अपादानत्वसिद्धिः । प्रसङ्गेऽस्मिन् हेलाराजेन उदीरितं – “ **ध्रुवं कूटस्थं निष्क्रियमिति द्रव्यस्वभावो ध्रौव्यं सूत्रे न प्रत्येतव्यम् , अपि च असन्तुष्टश्चलनोऽत्र ध्रुवशब्दः । तथा ह्यपाये साध्ये यद् ध्रुवं तेनापायेनासंस्पृष्टमित्येषोऽर्थः । एवञ्च कृत्वा ‘ धावतः अश्वात् पतितः’ इत्यत्र पातस्याश्वकर्तृकत्वाभावात्तेनानावेशे ध्रुवताश्वस्यात्रास्त्येव** [958] ” **इति ।**

पतञ्जलिनापि सम्यगुक्तम्- “ **अध्रौव्यस्याविवक्षितत्वात् नात्राध्रौव्यं विवक्षितम् । किं तर्हि ध्रौव्यम् । इह तावत् अश्वात् त्रस्तात् पतित इति यत्तदश्वेऽश्वत्वमाशुगामित्वं तद्ध्रुवं तच्च विवक्षितमिति** [959] ” इति ।

कैयटेनापि व्याख्यातं यद्- “ **ध्रुवमेकरूपमुच्यते । तच्च ध्रौव्यमपायविषयम् आश्रीयते । न तु अनवच्छिन्नम् । ततोऽपाये यदनाविष्टं तदपाये ध्रुवमुच्यते । देवदत्तकर्तृके च पाते**

---

[956] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे श्लो. २०८ ।**

[957] **महाभाष्यप्रदीपे १/४/२४ ।**

[958] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. १३८ ।**

[959] **पतञ्जलिमहाभाष्ये १/४/२४ ।**

**त्रस्तस्याप्यश्वस्यापायानावेशाद् ध्रुवत्वम् । देवदत्तस्यैवापायावेशाद-ध्रुवत्वम् । अथवा अश्वस्य त्रस्तत्वादध्रौव्यं तत्प्रथममविवक्षितमित्यर्थः** [960]” इति ।

ननु अश्वेऽश्वत्वमाशुगामित्वम् इति एतादृशार्थकरणे ध्रुवत्वं गृह्यते । अर्थात् यत्र क्रिया न प्रवृत्तिनिमित्तं तत्र अश्वे आशुगामित्वं रथे रथत्वं ग्रहीतुं शक्यं परन्तु धावतः पतितः , त्वरमाणात् पतितः , इत्यादौ शब्दप्रवृत्तिनिमित्ते ध्रुवत्वस्य अविवक्षितत्वम् । पतञ्जलिना उक्तं –“ **सतोऽप्यविवक्षा भवति । यथा अलोमिका एडका । अनुदरा कन्येति । असतश्च विवक्षा भवति समुद्रः कुण्डिका , विन्ध्यो बर्धितकमिति** [961] ” इति । अतः भाष्यकारेणापि विवक्षितत्वमविवक्षितत्वञ्चोभौ स्वीकृतौ ।

कौण्डभट्टस्तु प्रकृतधात्वर्थप्रधानीभूतव्यापारानाश्रयत्वे सति तज्जन्य-विभागाश्रयत्वं ध्रुवत्वमिति स्वीकरोति ।

कातन्त्रव्याकरणे एवमुक्तं यद् –

“ **संयुक्तस्य हि विश्लिष्टक्रियारम्भो भवेत् यतः।**
**तदेवावधिभावेन ह्यपादानमिति स्मृतम् ॥** [962]” इति ।

अपादानविषये एतत्सर्वं पर्यालोच्य वक्तुं शक्यते महाभाष्यकारस्य पतञ्जलेः मतमेव वैयाकरणानामधिकसम्मतम् ।

ननु परस्परान्मेषावपसरतः , अथवा अपसरतो मेषादपसरति मेषः , इत्यादौ यत्र मेषद्वयनिष्ठविश्लेषजनकक्रियाद्वयजन्य एक एव विभागः , तत्र विश्लेषजनकक्रियाश्रयत्वादुभयोः मेषयोरपादानत्वं न स्यादिति चेदुच्यते – एकस्मिन्नेव विभागे तद्विभागजनकक्रिया व्यक्तिभेदाद्भिन्ना ।

---

[960] **पतञ्जलिमहाभाष्यप्रदीपे ।**

[961] **पतञ्जलिमहाभाष्ये ।**

[962] **व्याकरण-दर्शनेर – इतिहास इतिस्थाने ।**

एवञ्चैतन्मेषनिष्ठक्रियायाः मेषान्तरेऽभावेनोभयोः अपादानत्वं सिध्यति । एवञ्चैतन्मेषनिष्ठा या तद्व्यक्तिरूपा विश्लेषजनकक्रिया , मेषान्तरस्य तदनाश्रयत्वे अपादानत्वं स्वनिष्ठक्रियाव्यक्त्याश्रयत्वेन च कर्तृत्वं सिध्यति ।

कौण्डभट्टैरपि भणितम् - ‘‘ **यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वं , तथाप्यत्र विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वम् । तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियायामपादानत्वं वाच्यम्** [963]’’ इति ।

परस्परान्मेषावपसरतः इत्यत्रापादानत्वसिद्धये इयमेव युक्तिराश्रिता भट्टोजिदीक्षितेन तथा चोक्तं – “ **परस्परान्मेषावपसरतः** ” इत्यत्र तु सृधातुना गतिद्वयस्यापि अपादानादेकनिष्ठां गतिं प्रतीतिरस्यापादानत्वं न बिरुद्ध्यत [964]” इति ।

भर्तृहरिणापि उक्तं –

“ **अपाये यदुदासीनं चलं वा यदि वाचलम् ।**
**ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥**
**पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।**
**तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते ॥**
**मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।**
**मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक् ॥**[965]” इति ।

एवञ्च विविधेषु ग्रन्थेषु प्राच्यनव्यैः प्रतिपादितानां सिद्धान्तानां समालोचने विश्लेषजनकक्रियायामवधित्वेन विवक्षिते सति तदन्यस्य अवधित्वोपयोगि-

---

[963] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.१८७ ।**

[964] **वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे ध्रुवमपायेऽपादनमिति सूत्रे ।**

[965] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.२०५,२०६,२०८ ।**

व्यापारस्यानाश्रयत्वमेव ध्रुवत्वं ध्रुवमपायेऽपादानमिति सूत्रे सिद्धान्तभूतमिति गूढार्थः।

" **अपायस्तु अत्र विभागसंयोगानुकूलः अवधिसाकाङ्क्षो गतिविशेष** [966]" इति प्रतिपादितम् उद्द्योते। एवञ्च यदा गतावववधेरुल्लेखो भविष्यति तदेव अत्रापायः स्वीक्रियते नान्यथा। तथा चोक्तं कैयटेन – सति ह्यवधौ ' गतिरपायो भवति नान्यथा , गतिविशेषत्वादपायस्य इति। तस्मात् पर्णस्य पतनक्रियायां यदि वृक्षस्यावधित्वेन विवक्षा भवति तदेव तस्यापादानसंज्ञा ' **वृक्षात् पर्णं पततीत्यत्र** '। यदा तु वृक्षस्यावधित्वं न विवक्ष्यते , पर्णसम्बन्धविवक्षायां ' **वृक्षस्य पर्णं पततीत्यत्र** ' सम्बन्धसामान्येन षष्ठ्येव। प्रतिपादितञ्च हरिणा-

**" गतिर्विना त्ववधिना नापाय इति गम्यते।**
**वृक्षस्य पर्णं पततीत्येव भाष्ये निदर्शितम्॥**[967]" इति ।

## पञ्चमीविभक्त्यर्थः

' **अपादाने पञ्चमी** [968]' इति सूत्रेण अपादाने पञ्चमी विधानादपादानमेव पञ्चम्यर्थः यस्मिन्नर्थे प्रत्ययः प्रत्ययस्यापि तदेवार्थ इति नियमात् । अपादानञ्च – ' **ध्रुवमपायेऽपादानम्** [969]' इति सूत्रादवधिरूपमेव । विश्लेषजनकक्रियायामवधिभूतं कारकमपादानसंज्ञकं भवतीति तत्सूत्रार्थात् । तस्मादवधिरेवपञ्चम्यर्थ इति वैयाकरणानां

---

[966] **महाभाष्यस्य नागेशकृतोद्योतटीकायाम् -१/४/२४।**

[967] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे सं. १४३।**

[968] **पाणिनीयाष्टाध्याय्यां २.३.२८।**

[969] **पाणिनीयाष्टाध्याय्यां १.४.२४।**

सिद्धान्तः । तथा चोक्तं – ‘ **अवधिः पञ्चम्यर्थः** [970]’ । ‘ **पञ्चम्यर्थोऽवधिः** [971]’ इति नागेशेनापि प्रतिपादितत्वात् ।

एवञ्च अवधित्वमेव पञ्चम्यर्थ इत्यत्र प्राचीननव्ययोर्नास्ति कश्चन विवादः । किन्त्ववधित्व ( **ध्रुवत्व** ) स्वरूपे विवादो दृश्यते तत्तद्ग्रन्थेषु ।

### ➢कौण्डभट्टमतम्

प्राचीनवैयाकरणाः कौण्डभट्टास्तु प्रकृतधात्वर्थप्रधानीभूतव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वमिति स्वीकुर्वन्ति । तथाचोक्तं भर्तृहरिणापि –

**“ अपाये यदुदासीनं चलं वा यदि वाचलम् ।**
**ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥**
**पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।**
**तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते ॥**[972]” **इति ।**

तद्व्याख्यानं कुर्वता कौण्डभट्टेन भणितम् – “ **अपाये विश्लेषहेतुक्रियायाम् उदासीनम् अनाश्रयः अतदादेशात् – तत्क्रियानाश्रयत्वात् । एवञ्च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वम् फलितम्** [973]” इति ।

एवञ्चावधिभूतो ध्रुवो द्विविधो भवति , सक्रियः , निष्क्रियश्चेति प्रतिपादितम् , चलं वा यदि वाचलमित्युक्त्या । तत्र सक्रियोऽवधिः

---

**[970] वैयाकरनभूषनसारे सुबर्थनिर्णये , पृ.२०५ ।**

**[971] परमलघुमञ्जूषायां कारकविचारे , पृ.१०४ ।**

**[972]यद्यपीदं कारिकाद्वयमपि इदानीमुपलब्धे मुद्रितवाक्यपदीये न दृश्यते , किन्तु सर्वेष्वेव प्रायोऽपादानप्रतिपादकग्रन्थेषु प्रमाणत्वेनोपन्यस्तम् । अत एव वैयाकरनभूषणसारस्य सुबर्थनिर्णये कौण्डभट्टेनापि उपन्यस्तम् , पृ. १०५ , १०६ ।**

**[973] वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.२०६ ।**

“ **धावतोऽश्वात् पतति** ” इत्यत्राश्वे निष्क्रियश्च ग्रामादायाति , वृक्षात् पत्राणि पतन्तीत्यादौ ग्रामादीनां बोध्यः ।

ननु “ **कुड्यात् पततोऽश्वात् पतति चैत्रः** ” इत्यत्राश्वस्यावधित्वं न स्यात् , विश्लेषहेतुपतनक्रियाश्रयत्वादिति चेदुच्यते लक्षणे विश्लेषसामान्यं नापेक्ष्यतेऽपि तु तद्व्यक्तित्वेनैव । अर्थात् तद्विश्लेषहेतुक्रियानामाश्रयत्वे सति , तद्विश्लेषाश्रयत्वमिति लक्षणं ध्रुवस्य । एवञ्च यन्निरूपितमवधित्वं चिकीर्षितं तत्क्रियानाश्रयत्वमपेक्ष्यते । तथा च “ **पततोऽश्वात् पतति चैत्रः** ” अत्र चैत्रनिष्ठः विश्लेषजनकपतनक्रिया-निरूपितावधित्वमश्वे चिकीर्षितं , तत्क्रियानाश्रयत्वमश्वे विद्यत एव , तत्क्रियायाः चैत्रादिनिष्ठत्वात् । एवमश्वनिष्ठा या पतनक्रिया , तन्निरूपितावधित्वं कुड्ये , तस्मादश्वकुड्ययोभयोरपि ध्रुवत्वं निर्विवादमेव । एवञ्च कुड्यावधिक-पतनाश्रयोऽश्वस्तदधिकं चैत्रनिष्ठं पतनमिति बोधः ।

पञ्चम्यर्थेऽवधौ प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम् , प्रत्ययार्थस्तु पतनक्रियायां निरूपकत्वसम्बन्धेन विशेषणम् । अत्र प्रत्ययार्थोवधिरूपो धर्मी न तु धर्ममात्रम्- “ **ओदनकर्मकोद्धरणावधिभूतस्थालीत्यर्थक उद्धृतौदना स्थालीतिवाक्ये सामानाधिकरण्यसर्शनात् । तथा चोक्तं “ प्रत्ययार्थस्तु क्रियायां , स च धर्मी न तु धर्ममात्रम् । विभक्त्यर्थे विहितस्य बहुब्रीहेर्धर्मीपरतया निर्विवादत्वात् । उद्धृतौदना स्थालीत्यत्र हि ओदनकर्मकोद्धरणावधिभूतेत्यर्थः** [974]” इति ।

नन्वेवमपि “ **परस्परान्मेषावपसरतः** ” इत्यादौ यत्र मेषद्वयनिष्ठविश्लेषजनक-क्रियाद्वयजन्यः एक एव विभागः तत्र विश्लेषजनकक्रियाश्रयत्वादुभयोर्मेषयोरपादानत्वं न स्यादिति चेदुच्यते –

---

[974] **प्रौढमनोरमायां कारके पञ्चमीप्रकरणे , पृ. ९२१ ।**

एकस्मिन्नेव विभागे तद्विभागजनकक्रिया व्यक्तिभेदाद्भिन्ना । एवञ्चैतन्मेषनिष्ठक्रियायाः मेषान्तरेऽभावेनोभयोरपादानत्वं सम्भवति । एवञ्चैतन्मेषनिष्ठा या तद्व्यक्तिरूपा विश्लेषजनकक्रिया , मेषान्तरस्य तदनाश्रयत्वेऽपादानत्वं , स्वनिष्ठतत्क्रियाव्यक्त्याश्रयत्वेन च कर्त्तृत्वं सिद्ध्यति । उक्तञ्च भर्त्तृहरिणा –

**" मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।**

**मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक् ॥** [975]" इति ।

कौण्डभट्टैरपि भणितं – " **यथा निश्चलमेषादपसरद् द्वितीयमेषस्थले निश्चलमेषस्यापरसरन्मेषक्रियामादाय ध्रुवत्वम् , तथा अत्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वम् । तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियायामपादानत्वं वाच्यम्** [976]" इति ।

" **परस्परान्मेषावपसरतः** " इत्यत्रापादानत्वसिद्धये इदमेव युक्तिराश्रिता भट्टोजिदीक्षितेन अपि । तथा चोक्तम् – " **परस्परान् मेषावपसरतः** [977]" इत्यत्र ' **तु सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठां गतिं प्रतीतरस्यापादानत्वं न विरुध्येत** ' इति ।

वस्तुतस्तु अपसरणं विभागपूर्वकपृष्ठतो गमनम् । तस्य मेषद्वयनिष्ठत्वादाश्रयभेदेन भिन्नत्वेऽपि सृधातुना निवृत्तभेदस्यैवापसारणस्य प्रतीतिः । तथा चोक्तं कैयटेन – " **आख्यातवाच्या क्रिया सर्वैव निवृत्तभेदा प्रतीयते । ' भवद्भिरास्यत ' इत्यादौ वस्तुस्थित्या**

---

[975] **वाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. १४१ ।**

[976] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ.२०८ ।**

[977] **प्रौढमनोरमायाम् , पृ. ९१९ ।**

**कर्त्तृभेदात् भेदेऽपि तिङन्ताद् भेदस्यानवगमात्** ”[978] । एवञ्चाश्रयगतभेदारोपेण द्विवचनाद्युत्पत्तेरुभयोरपि तत्क्रियाश्रयत्वेन कर्त्तृत्वमेव स्यान्नापादानत्वम् । अत एवोक्तम् भाष्ये “ **न तिङन्तान्येकशेषारम्भंप्रयोजयन्ति , किं कारणम् ? एकाहि क्रिया**[979] ” इति । तस्मात् क्रियाभेदमादाय कर्त्तृत्वापादानत्वप्रतिपादनपरं भर्त्तृहरिकौण्डभट्टभट्टोजिदीक्षितानां मतसमीचीनमेव , भाष्यविरुद्धत्वात् । अतः “ **न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते**[980] ” इति ।

इति हर्युक्त्या शब्दालिङ्गितस्यैवार्थस्य सर्वज्ञानविषयतायाः वैयाकरणसम्मतत्वात् ’ तादृशशब्दभेदादेवात्र कर्त्तृत्वमपादानत्वञ्चोपपादनीयम् । एवञ्च मेषपदोपात्तयोरेव क्रियाश्रयत्वात्कर्त्तृत्वं परस्परपदोपात्तयोर्विभागा-श्रयत्वादपादानत्वं भविष्यति ।अत एव ‘ **देवदत्तयज्ञदत्तावन्योन्यमाश्लिष्यतः**’ इत्यत्र देवदत्तयज्ञदत्तयोः कर्मत्वं सिद्ध्यति , अन्यथा तु तत्रापि परत्वात् कर्त्तृत्वसंज्ञैव स्यात् । शब्दरूपोपाधिकृतभेदमादायैव , चैत्रः आत्मानं हन्तीत्यादावेकस्यैव कर्त्तृत्वकर्मत्वोपपत्तिः। एवञ्च ‘ **परस्परान्मेषावपसरतः** ’ इत्यत्रापि शब्दरूपोपाधिकृतभेदमादायैव कर्त्तृत्वापादानत्वोपपत्तिः युक्ता । प्रतिपादितञ्चैतत् नागेशेनापि – “ **किञ्च मेषपदवाच्ययोः पशुविशेषयोः क्रियाश्रयत्वविवक्षा , परस्परपदवाच्ययोस्तयोस्तु विभागाश्रयत्व-विवक्षा इति औपाधिकस्तयोर्भेदः । शब्दस्वरूपोपाधिकृतभेदोऽप्यर्थे गृह्यते । यथा आत्मानमात्मना वेत्तीत्यादौ शरीरावच्छिन्नं कर्त्तृ ,**

---

[978] **पतञ्जलिमहाभाष्यप्रदीपे १.२.६४ , पृ. ८२ ।**

[979] **पतञ्जलिमहाभाष्ये १.२.६४ ।**

[980] **भर्तृहरिवाक्यपदीये १.१२४ ।**

**अन्तःकरणावच्छिन्नं करणं , निरवच्छिन्नं निरीहं कर्म , एकस्यैव शब्दभेदाद्भेदः , शब्दालिङ्गतस्यैव सर्वत्र भानात्** [981]” इति ।

## ➢नागेशमतम्

नागेशास्तु कौण्डाभिमते विश्लेषहेतुक्रियानाश्रयत्वे सति , विश्लेषाश्रयत्वरूपे-ऽपादानत्वे भाष्यविरोधमुपवर्णयन्ति । तथाहि धावतः अश्वात् पतति इत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्कितं भाष्ये[982] । इत्थमाशङ्क्य च ‘ **न वाध्रौव्यस्याविवक्षितत्वादित्येव ।कथं पुनः सतो नामाविवक्षा स्यात् । सतोऽप्यविवक्षा भवतीति** [983]’ समाहितं तत्रैव भाष्ये । एवञ्चात्राश्वे विश्लेषहेतुपत्धात्वर्थ क्रियानाश्रयत्वेन अध्रुवत्वस्यासत्त्वात् “ **अध्रौव्यस्याविवक्षा स्यात् , सतोऽप्यविवक्षा भवति** ” इति भाष्यात् विरोधः स्पष्ट एव कौण्डभट्टमते । तस्मात् ‘ **गतिविशेषे सति यत् ध्रुवम् अवधित्वेन विवक्षितत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानमिति ध्रुवमपायेऽपादानमिति सूत्रस्यार्थं वर्णयन्ति** ’ । तथा चोक्तं “ **यस्मादपाये गतिविशेषे सति यद्ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वो-पयोगिव्यापारस्यानाश्रयं तदपादानमिति** [984] ” सूत्रार्थः । एवञ्चास्मिन् मते न भाष्यविरोधः । “ **त्रस्तात् पतितः , धावतः पतितः** ” इत्यादौ त्रासादीनामवधित्वोपयोगित्वमस्ति इति स्वीकृत्य प्रश्नः , उत्तरस्य तु न तेषामवधित्वोपयोगित्वमित्याशयात् । तथा चोक्तं उद्द्योते –

---

[981] **परमलघुमञ्जूषायां कारकविचारे , पृ.१०२ ।**

[982] **येत्वेत्यन्त गतियुक्तास्तत्र कथं । धावतः पतितस्त्वरमणात्पतितः इति – महाभाष्ये १.३.२४ , पृ.२४९ ।**

[983] **पतञ्जलिमहाभाष्ये १.४.२४ , पृ. २४८ ।**

[984] **लघुशब्देन्दुशेखरे कारकप्रकरणे , पृ.४९७ ।**

“[985] **त्रासादीनामवधित्वोपयोगिता मन्यमानस्य प्रश्नः** ” इति । उत्तराशयस्तु – न तदवधित्वोपयोगि अश्वात् पतितः वृक्षात् पतित इत्यादावभावात् ।

कौण्डभट्टाभिमतेऽपादानत्वे भाष्यविरोधमुपपाद्येदृशं व्याख्यानं कुर्वता नागेशेन परमलघुमञ्जूषायामित्थमपादानत्वस्य स्वरूपं प्रत्यपादि – “ **तत्तत्कर्तृसमवेत तत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्व-मपादानत्वं , तदेवावधित्वम्** [986]” इति ।

अत्रेदं विचारणीयम् – एतादृशापादानत्वस्वीकारे उक्तभाष्यविरोधोऽस्ति न वेति ? तत्र भाष्यविरोधे एव प्रतीयते । ‘ **धावतः पतितः चैत्रः** ’ इत्यादौ चैत्रसमवेतपत्धात्वर्थ क्रियाजन्यप्रकृतधात्ववाच्य-विभागस्य धावत्यश्वेऽपि विद्यमानत्वेन ध्रुवत्वाभावाद-पादानत्वाभावः इति शङ्कापरं भाष्यं , तत्समाधानपरञ्च भाष्यं विरुध्यते एव । तादृशावधित्वं गतिमत्यश्वे स्वयमेव स्वीकृतं नागेशेनैव । तथाहि- “ **पर्वतात्पततोऽश्वात् पतत्यश्ववाह इत्यादावश्वस्यापादानत्वाय तत्स्वीकारात्** [987]” इति । एवञ्च नागेशस्यैव लघुशब्देन्दुशेखरे भिन्नं , परमलघुमञ्जूषायाञ्च भिन्नमेव मतं दृश्यते ।

अन्योऽपि विरोधो दृश्यते द्वयोर्ग्रन्थयोः प्रतिपादिते सिद्धान्ते । तथाहि प्रकृतधात्वर्थविभागाश्रयत्वादपादानत्वशक्तेश्च सामानाधिकरण्यादपादान-समभिव्यहारे विभागोऽपि धात्वर्थः प्रतिपादितः लघुशब्देन्दुशेखरे । एवञ्च ‘ **वृक्षात् भूमिं पतति** ’ इत्यादौ वृक्षापादानकविभागपूर्वक

---

[985] **पतञ्जलिमहाभाष्योद्योते १.४.२४, पृ.२४८ ।**

[986] **परमलघुमञ्जूषायां कारकविचारे , पृ.१०२ ।**

[987] **परमलघुमञ्जूषायां कारकविचारे , पृ. १०३ ।**

भूमिनिष्ठसंयोगानुकूलो व्यापारः इति बोधो भवति । तथा चोक्तं - **" अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्व समानाधिकरणे-त्यपादानसमभिव्यहारे विभागोऽपि धात्वर्थ इति बोध्यम्** [988]" इति ।

यदि विभागस्यापि धात्वर्थत्वं स्वीक्रियते , तदा परमलघुमञ्जूषायां प्रतिपादितमपादानत्व " **वृक्षात् पर्णं पतति** " इत्यादौ वृक्षस्य न स्यात् , तस्य प्रकृतधातुवाच्यविभागाश्रयत्वात् । यथा वृक्षं त्यजति इत्यत्र प्रकृतधातुवाच्यविभागाश्रयत्वात् वृक्षस्यापादानसंज्ञा न भवति , तद्वत् ।

अपायत्वस्य विभागजसंयोगानुकूलोऽवधिसाकाङ्क्षो गतिविशेषः इति " **प्रतिपादितमुद्द्योते**[989]" । एवञ्च यदा गतावववधेरुल्लेखो भविष्यति तदैव तत्रापायो स्वीक्रियते , नान्यथा । तथाचोक्तं कैयटेन – " **सति ह्यवधौ गतिरपायो भवति , नान्यथा , गतिविशेषत्वादपायस्य** [990]'' इति । तस्मात् पर्णस्य पतनक्रियायां यदि वृक्षस्यावधित्वेन विवक्षा भवति , तदैव तस्यापादानसंज्ञा " **वृक्षात् पर्णं पतति** '' इत्यत्र । यदा तु वृक्षस्यावधित्वं न विवक्ष्यते , तत्र पर्णसम्बन्धविवक्षायां ' **वृक्षस्य पर्णं पतति** ' इत्यत्र सम्बन्धसामान्ये षष्ठ्येव । प्रतिपादितञ्चैतत् भर्त्तृहरिणा -

**" गतिर्विना त्ववधिना नापाय इति गम्यते ।**
**वृक्षस्य पर्णं पततीत्येव भाष्ये निदर्शितम् ॥** [991]" इति ।

भाष्येऽपि वृक्षस्य पर्णं पतति इत्यत्रापादानसंज्ञा प्राप्नोतीति शङ्कां कृत्वा समाहितम् – " **न वा एष दोषः किं कारणम् ?**

---

[988] **लघुशब्देन्दुशेखरे कारकप्रकरणे , पृ.४०७ ।**
[989] **पतञ्जलिमहाभाष्योद्द्योते १.४.२४ ।**
[990] **पतञ्जलिमहाभाष्यप्रदीपे १.४.२३ ।**
[991] **वाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. सं. १४३ ।**

**अपायस्याविवक्षितत्वात् । नात्रापायो विवक्षितः । किं तर्हि ? सम्बन्धः** [992]" इति ।

माधवाचार्य्येणापि उक्तं – " **वृक्षस्य पर्णं पततीत्यत्र तु सन्नप्यपायो न विवक्षित इति षष्ठी** [993]" इति ।

एवञ्चावधौ सत्यामेवापायो भविष्यति , न तु विश्लेषक्रियाकथन-मात्रेण । तत्र यद्यप्यपायेन सह ध्रुवत्वेनावश्यमेव भाष्यम् , तथापि ध्रुवपदार्थस्यावश्यमेव कृतोल्लेखोऽपादानसंज्ञायां प्रयोजकः । अत एव " **ध्रुवमपायेऽपादानम्** [994]" इति सूत्रे पाणिनिनोभयो निर्देशः कृतः । अन्यथा त्वपायनिर्देशेनैव ध्रुवस्य प्रतीतौ तन्निर्देशोऽसङ्गत एव स्यात् ।

अपादानं चेदं न केवलं वास्तविकमपि तु बुद्धिकृतकाल्पनिकमपि भवति । यथा वृक्षात् पर्णं पतति इत्यत्र वास्तविकमपादानं , तथैवाधर्मात् विरमति इत्यत्र बुद्धिकृतकाल्पनिकम् । बौद्धापादानं स्वीकृत्यैव " **जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्** [995]" इति वार्तिकं प्रत्याख्यातं भाष्ये । तथाहि अपादानसंज्ञाप्रातिपदिके सूत्रे भाष्ये जुगुप्सेति वार्तिकस्य प्रयोजनमभिधायोक्तम् " **तत्तर्हीदं बहुवक्तव्यम् ? न वक्तव्यम् । इह तावद् – अधर्माज्जुगुप्सते , अधर्मात् वीभत्सते इति । य एषः मनुष्यः प्रेक्षापूर्वकारी भवति , स पश्यति , दुःखोऽधर्मो न अनेन कृत्यमस्तीति । स बुद्ध्या सम्प्राप्य निवर्तते । तत्र ध्रुवमपायेऽपादानम् इत्येव सिद्धम् । इह धर्माद् विरमति , धर्मान्निवर्तते इति । धर्मात्**

---

[992] **पतञ्जलिमहाभाष्ये १.४.२३ ।**

[993] **माधवाचार्यविवरणटीकायाम् , पृ.१५४ ।**

[994] **पाणिनीयाष्टाध्याय्यां १.४.२४ ।**

[995] **पाणिनीयाष्टाध्याय्यां १.४.२४ ।**

**प्रमाद्यति , धर्मान्मुह्यतीति । इह य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति – नेदं किञ्चिद् धर्मो नाम , नैनं करिष्यामीति स बुद्ध्या सम्प्राप्य निवर्तते । तत्र ध्रुवमपायेऽपादानमिति सिद्धम्** [996]" इति ।

अस्यायम्भावः अधर्माद्विरमति , अधर्माज्जुगुप्सते इत्यादौ विरामादि क्रियां प्रति अधर्मस्यापि ध्रुवत्वेनापादानसंज्ञा । तत्तु बौद्धमेव , न तु वास्तविकम् । प्रेक्षापूर्वकारी मनुष्योऽधर्मः कष्टदायक इति कृत्वा अधर्मात् निवर्तते । अतः तत्रापि मनुष्यस्य बुद्धिकृतो विश्लेषो भवत्येव । अतः तस्यापि युज्यते अपादानत्वम् । तथा चोक्तं कैयटेन – " **स्वरितेनाधिकारः , इत्यधिकः कारोऽधिकार इत्यस्यार्थस्याश्रयणेन च बुद्धिव्यवस्थिता-पायाश्रयापादानसंज्ञा प्रवर्तते** [997]" इति ।

बुद्धिपरिकल्पितापायस्य सत्ता माधवचार्येणापि स्वीकृतास्ति । तथाचोक्तं तेन – " **चौराद्बिभेति , भीत्या निवर्तते , चौरात् त्रायते** [998]" चौरकृताद् वधादेस्त्राणेन निवर्तयति इति भयादिपूर्विकायां निवृत्तौ भयादीनां प्रवृत्तेः सर्वत्र अत्र बुद्धिपरिकल्पितो विश्लेषोऽस्तीति विश्लेषावधावेव पञ्चमीसिद्धेन न तदर्थं यत्नान्तरं कृतं सूत्रकृता । एवं " **पापात् पराजयते** " इत्यादावपि पराजेः न्यूनाभावे पूर्वनिवृत्तौ वृत्तिविश्लेषो बोद्ध्यः ।

एवमेव बुद्धिपरिकल्पितापायं स्वीकृत्य " **ल्यब्लोपे कर्मण्यधिकरणे च**[999] " इति वार्तिकस्यापि खण्डनं कृतं भाष्यकृता । तत्र ल्यब्लोप इति वार्तिकस्य प्रयोजनभुक्त्वा समाहितम् – " **न वक्तव्यम् । अपादाने**

---

996 **पतञ्जलिमहाभाष्ये १.४.२४ , पृ.२४८ ।**

997 **पतञ्जलिमहाभाष्यप्रदीपे १.४.२४ , पृ.२४८ ।**

998 **माधवाचार्यविवरणटीकायाम् , पृ.२५४ ।**

999 **कारकप्रकरणे अपादानसूत्रे ।**

**इत्येवसिद्धम् । इह तावत्प्रासादात्प्रेक्षते , शयनात्प्रेक्षते इति अपक्रामति तत्तस्यादर्शनम् । यद्यपक्रामति किं नात्यन्तायापक्रामति ? सन्तत्वात् । अथवा अन्यान्यप्रादुर्भावात् । अन्या चान्या च प्रादुर्भवति** [1000]" इति ।

अयम्भावः प्रेक्षणक्रियायामपि दर्शनक्रिया स्थानात् स्थानान्तरं गच्छति । अतोऽपायस्तत्र सुतरां सिद्ध्यति । तस्यापायस्य च प्रासादादीनामवधित्वविवक्षणात् ध्रुवमपायेऽपादानमिति सूत्रेणैवापादानसंज्ञा सिद्धा , तदर्थं वार्तिकं न कर्तव्यमिति भाष्याशयः । एवञ्च बौद्धापादानं स्वीकृत्य भाष्ये वर्तिकाणां प्रत्याख्यानदर्शनात् तदवश्यमेव स्वीकार्यम् ।

अत एव नागेशेनापि तस्य सत्ता प्रतिपादिता अस्ति । तथाचोक्तं – " **विभागस्य न वास्तवसम्बन्धपूर्वको वास्तव एव , किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि । ' माथुरा पाटलिपुत्रकेभ्य आढयतरा ' इत्यादौ बुद्धिपरिकल्पितापाया-श्रयेणैव भाष्ये पञ्चमी साधनात्** [1001]" इति । एवञ्च बौद्धमिदमपादानं सर्वैरेव स्वीकृतम् ।

कौण्डभट्टैरपि " **रूपं रसात् पृथक्** " इत्यत्रापादानत्वं बौद्धमेव स्वीकृतम् । अभिहितञ्च तैः – " **रूपं रसात् इत्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम् , पृथग्विनेति पञ्चमी वा** [1002]" इति । यद्यपि पृथग्विनेति पक्षान्तरोपन्यासेन बुद्धिपरिकल्पने गौरवमिति तेषामाशयो वर्णितः प्रभाकृता तत्रैव , किन्तु तन्न युक्तम् – बौद्धापादानस्य

---

[1000] **पतञ्जलिमहाभाष्ये २.३.२८ ।**

[1001] **परमलघुमञ्जूषायाम् कारकविचारे, पृ. १०२ ।**

[1002] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ. २११ , २१२ ।**

भाष्यसम्मतत्वात् तत्र गौरवमिति न आशयो कौण्डभट्टस्य अपि तु पक्षान्तरोपन्यासः उपायस्योपायान्तरादूषकत्वादिति बुद्ध्यैव इति मे मतिः ।

### ➢तारानाथतर्कवाचस्पतिमतम्

‘ **कारकपञ्चम्या** ’ अपादानमर्थः ‘ **अपादाने पञ्चमीति** [1003]’ सूत्रात् वाच्यता तु तच्छशक्तिमत्त्वेनान्वयश्चोक्तवत् । इयञ्च पञ्चमी विभागर्थकधातुयोगे एव साधुः विधागश्च वास्तवो बुद्धिकल्पितो वा बोध्यस्तेन घटादिविशिष्यते पट इत्यादौ घटावृत्तिधर्मरूपविशेष्यस्य कल्पितविभागतया तदर्थकधातुयोगेऽपि घटादे अवधित्वात् पञ्चमीति बोध्यम् । एवञ्च वृक्षात् स्पन्दते इत्यादिर्न प्रयोगः आसनाच्चलित इत्यादौ तु विभागपूर्वकस्पन्दनमेव चलेरर्थ इति न काचिद्धानिः । “ **स्वार्थाद्धीयते चैत्र** ” इत्यादौ कर्त्तुरपादानत्वमपादाने ‘ **चाहीयरुहोरिति** ’ सूत्रे ज्ञापकमाश्रित्य शेखरादौ व्यवस्थापितम् तेन स्वार्थेन हीयते चैत्र इतिवद्बोधः ।

‘ **जगुप्साविरामप्रमादार्थानामुपसंख्यानमिति**[1004] ’ वार्त्तिके अनिष्टसाधनताज्ञानाधीननिन्दा जुगुप्सा । कृत्यभावानुकूलो व्यापारो **विरामः** । इष्टानिष्टसाधनयोस्तद्विपरीतत्वज्ञानाधीननिवृत्तिप्रवृत्ती **प्रमादः** । सर्वत्र च ज्ञानकृत्यादौ विषयतया अन्वयः विषयताविशिष्टञ्चापादानं बोधस्तु पापाज्जुगुप्सते इत्यादौ पापापादानकजुगुप्सेति शाब्द आर्थस्तु पापविषयकजुगुप्सेति ।

---

[1003] **पाणिनीयाष्टाध्याय्यां २.३.२८ ।**

[1004] **पाणिनीयाष्टाध्याय्यां १.४.२४ ।**

‘ **भीत्रार्थानां भयहेतुरितिसूत्राच्च** [1005]’ चौराद्बिभेति त्रायते वेत्यादौ अनिष्टहेतुरपादानम् । तत्रानिष्टसाधनज्ञानं भयमनिष्टवारणञ्च त्राणं सूत्रे भयपदेन भयैकदेशस्य अपि उपलक्षणाद् अनिष्टहेतोः अपादानत्वम् ।

‘ **अध्ययनात् पराजयते** ’ इत्यादौ कृत्यसाध्यधीहेतुकतद्विषयकोत्साहाभावः पराजेरर्थः तत्र उत्साहकर्मभिन्नमपादानं ‘ **पराजेरसोढ** [1006]’ इतिसूत्रात् सोढुमशक्यः असोढ इति तदर्थः शत्रून् पराजयत इत्यादौ तु अभिभवार्थकत्वात् तद्योगे न अपादानसंज्ञा ।

‘ **यवेभ्यो गां वारयतीत्यादौ** ’ भक्षणादिजनकव्यापाराभावानुकूलव्यापारो वारयतेरर्थः तत्र अभावप्रतियोगिव्यापारजन्यभक्षणादि आश्रयोऽपादानं ‘ **वारणार्थानामीप्सित** ’ [1007] इतिसूत्रात् यवादिभक्षणस्येप्सितत्वेन यवादेरपि तथात्वमिति बोध्यम् ।

‘ **मातुर्लीयते अन्तर्द्धत्ते** ’ इत्यादौ स्वकर्मकदर्शनाभावप्रयोजकदेशविशेषस्थितिरन्तर्द्धानं तत्र च यत्कर्त्तृकदर्शनाभाव इच्छाविषयः तद् अपादानम् ‘ **अन्तर्द्धौ येनादर्शमिच्छतीति** [1008]’ सूत्रात् । अत्र इच्छतीत्युक्तेः दैवात्तत्कर्त्तृकदर्शने जनिष्यमाणेऽपि तस्य अपादानत्वम् ।

‘ **उपाध्यायादधीते इत्यादौ** ’ उच्चारणोत्तरकालीनग्रन्थस्वीकारः अध्ययनं तत्रोच्चारणकर्त्रृपादानम् ‘ **आख्यातोपयोगे** [1009]’ इतिसूत्रात् ।

‘ **मृदो घटो जायते** ’ इत्यादौ आद्यक्षणसम्बन्धजननं तत्कर्त्तुर्घटादेरुपादानकारणमपादानं ‘ **जनिकर्त्तुः प्रकृतिरिति** [1010]’ सूत्रात् । **पुत्रात् प्रमोदो जायते इत्यादौ तु हेतुपञ्चमी तेन पुत्रेण** इत्यपि प्रयोगः ।

---

[1005] **पाणिनीयाष्टाध्याय्यां १.४.२५ ।**

[1006] **पाणिनीयाष्टाध्याय्यां १.४.२६ ।**

[1007] **पाणिनीयाष्टाध्याय्यां १.४.२७ ।**

[1008] **पाणिनीयाष्टाध्याय्यां १.४.२८ ।**

[1009] **पाणिनीयाष्टाध्याय्यां १.४.२९ ।**

‘ **हिमवतो गङ्गा प्रभवतीत्यादौ** ’ आद्यप्रकाशो भवनं तदधिकरणमपादानं ‘ **भूवः प्रभव** [1011]’ इति सूत्रेण भवनाधिकरणस्यापादानत्वविधानात्।

‘ **ल्यब्लोपे कर्मण्यधिकरणे च** ’ इति विहितायास्तु कर्माधिकरणञ्चार्थः तत्समभिव्यहृतधातुना ल्यबन्तक्रियाक्षेपणात् अवाध्याहृततत्तत्क्रियायां तयोरन्वयस्तेन आनन्दादीक्षते प्रासादादीक्षते इत्यादौ आनन्दकर्मकप्राप्त्युत्तरकालीनतत्समानकर्त्तृकमीक्षणं प्रासादाधिकरणकं तथेक्षणञ्चेति बोधः । धातोरेव तादृशविशिष्टार्थे लक्षणा इत्यन्ये । उपपदपञ्चम्याः सम्बन्धोऽर्थः स च अन्यारादित्यादिसूत्रजातोपात्तशब्दार्थान्वययोग्यः तात्पर्य्यवशादावसेयः । हेतुपञ्चम्या हेतुरर्थोऽधिकमुक्तं प्रागेव।

### ➢मीमांसकमतम्

मीमांसाकारस्त्वपादानत्वमखण्डोपाधिरूपमेव स्वीकुर्वन्ति। तत्रैव च पञ्चम्याः शक्तिं वर्णयन्ति। किन्तु अवधित्वस्य पञ्चम्यर्थेऽपि न तेषां कश्चन विरोधः । अत एव भाट्टतन्त्ररहस्ये पञ्चम्यर्थनिरूपणप्रसङ्गे , विभागः परसमवेतत्वञ्च पञ्चम्याः शक्यमिति मतान्तरमुपन्यस्य मीमांसकसिद्धान्तं वर्णयन् खण्डदेव आह – “ **वस्तुतस्तु तु गुरुभूतशक्यतावच्छेदकभेदेन अनेकशक्तिकल्पनापेक्षया , प्रकृत्यर्थस्य पञ्चम्यर्थद्वयान्वये व्युत्पत्तिद्वयम् , पञ्चम्यर्थस्य च धात्वर्थद्वयान्वये व्युत्पत्तिद्वयमिति कल्पनापेक्षया चानुगतव्यवहारसाक्षिकतया अपादानत्वम् अखण्डोपाधिरूपमेकं धर्मं निरुक्तापादानत्वसमव्यापकं कल्पयित्वा ,**

---

[1010] **पाणिनीयाष्टाध्याय्यां १.४.३० ।**

[1011] **पाणिनीयाष्टाध्याय्यां १.४.३१ ।**

**तत्रैव पञ्चम्याः शक्तिं कल्पयित्वा तस्मिंश्च प्रकृत्यर्थान्वयायैकाम् , तस्य चाख्यातार्थान्वयायैकां व्युत्पत्तिं कल्पयितुमुचितम्** [1012] " इति ।

अग्रे चावधित्वस्य पञ्चम्यर्थे स्वविरोधाभावं प्रकटयतोक्तं खण्डदेवेन " **सर्वेष्वपि पूर्वोक्तेषु अवधित्वमेव पञ्चम्यर्थः । तस्य च क्वचिद् धात्वर्थजन्यविभागद्वारकोऽन्वयः क्वचिद् धात्वर्थद्वारक इत्यपि वा सुवचम्** [1013] " इति ।

## ➢पुरुषोत्तमदेवमतम्

' **ध्रुवमपायेऽपादनमिति**[1014]' तावल्लक्षणम् । अस्यायमर्थः अपाये साध्ये ध्रुवं यदवधिभूतं तत् कारकमपादानसंज्ञं भवति । ननु यदि ध्रुवमवधिभूतं यत्तदपादानम् एवं तर्हि धावतोऽश्वात् पतितोऽश्ववाहक इत्यत्रापादानसंज्ञा न स्यात् धावतोऽश्वस्य ध्रुवत्वाभावात् ।

अत्रोच्यते अपायविषये यदविचलत्वमपाये मुक्ते सति गच्छत्यगमनं पतत्यपतनं तदिह ध्रुवम् । तच्चाश्वस्य विद्यत एव । तथाहि देवदत्ते पतति सत्यश्वो न पतति । यदि चाश्वोऽपि पतति तदा अश्वदेवदत्तौ पतिताविति स्यात् । तस्माद्देवदत्ते पतत्यपतनमश्वस्य । पातेऽननुप्रवेशात् औदासीन्यमेवाश्वस्य ध्रुवत्वम् । तदुक्तं –

" **अपाये यदुदासीनं चलं यदि वाचलम् ।**
**ध्रुवमेवातदावेशात् तदपादानमिष्यते ॥**
**पतति ध्रुवमेवाश्वो यस्मान्नानुपतत्यसौ ।**
**तस्य पातविवक्षायां जायते कारकान्तरम् ॥**[1015] " इति ।

---

[1012] **भाट्टतन्त्ररहस्ये , पृ. १२९ ।**

[1013] **भाट्टतन्त्ररहस्ये , पृ. १३० ।**

[1014] **पाणिनीयाष्टाध्याय्यां १.४.२४ ।**

[1015] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.२०५,२०६ ।**

यद्येवमपसरतो मेषादपसरति मेष इत्यत्र द्वयोरपसरणेन सम्बन्धात् कथमेकस्य ध्रुवत्वम्। उच्यते तथाहि – आश्रयभेदेनापसरणक्रियाभेदात्। तत्र यद्येकस्यापसरणं तत्रेतरस्याननुप्रवेशात् ध्रुवत्वम्। यदि ह्यनुप्रवेशः स्यात् तदा मेषावपसरतः इति स्यात्। तदयमर्थः – अपाये विश्लेषे साध्ये तत्साधनीभूतासु क्रियासु यदुदासीनं यन्नानुप्रविशति चलद्वा अचलद्वा तद् ध्रुवमेवातदावेशात् क्रियायामननुप्रवेशात्तदुदासीनमित्यर्थः । ननु यदि क्रियायामुदासीनं ध्रुवं न तर्हि कारकम्। कारकं हि घटनात्मकम्। न च उदासीनः घटते , घटते चेत् कथमुदासीनः । तस्मात् कारकाधिकारे अपादानसंज्ञा विधीयमाना ध्रुवस्याकारकत्वान्न सिध्यति। यदुक्तं –

**" ध्रुवं न कारकं मन्ये नोपकारि गतौ यतः।**

**अपायाधारभूतोऽसौ सक्रियश्च न कथ्यते॥ "** [1016]इति ।

उच्यते तथाहि सर्वकारकाणां स्वगतक्रियाद्वारेणैव प्रधानक्रियायां निमित्तभावः। यथा पाके काष्ठादीनां ज्वलनक्रियाद्वारेण निमित्तभावस्तथेहापि ग्रामस्य ध्रुवस्यावस्थानक्रियाद्वारेण देवदत्तागमने न निमित्ताभावः । ग्रामो ह्यवतिष्ठते । अवतिष्ठमानो ग्रामो देवदत्तागमनं प्रति निमित्तभावमुपयातीति भवति कारकम्। तथा चोक्तं न्यासकृता – यदि ग्रामोऽप्यागच्छेत् तदापायो न निष्पद्येत इति । एवं ब्रुवता न्यासकारेण ग्रामस्यानागमनेनैव देवदत्तस्यागमने निमित्तभावो दर्शितः । तथाहि कस्यचित् कार्यस्य कियत्यपि सामग्री , स्वक्रियोदासीनसाधनसाध्यत्वात् अपायस्येयती सामग्री । ननु च अवस्थानं गतिर्निवृत्तिः , निवृत्तिश्चाभावस्तत्कथं क्रियते । उच्यते तथाहि धातोरर्थः क्रिया वैयाकरणानां क्रियालक्षणम्। तेनाभावोऽपि धातुनाभिधीयमानः क्रिया भवति। अन्यथा अवतिष्ठते नश्यतीत्यादेर्धातुसंज्ञैव न स्यात् अक्रियार्थत्वात्।

---

[1016] **कारकचक्रे पुरुषोत्तमदेवेन , पृ. १११ ।**

ननु तथाप्यवतिष्ठमानो न गच्छतीति गमनं प्रत्युदासीनमेव कथं कारकम् । अथ कारकम् अपाये यदुदासीनमित्यत्र उदासीनवचनाभिव्यक्तिर्नोपपद्यते इति । अत्रोच्यते तथाहि – उदासीनमिति कोऽर्थः । आगमनक्रियायां कर्त्ता न भवति , गच्छन्तं देवदत्तं नानुगच्छति ग्रामः , निमित्तन्तु भवत्यपायस्य । तथाहि अपायो विश्लेषः स च द्वाभ्यां साध्यते । तत्र यद्येकः क्रियायां प्रवर्तते अपरश्च न प्रवर्तते तदेदमौदासीन्यमपायसिद्धौ निमित्तम् । निमित्तनिमित्तभाव एव उदासीनशब्देन दर्शित इति ।

## अपादानभेदः

अपादानस्य द्वौ भेदौ , सक्रियं निष्क्रियञ्चेति पूर्वमेव प्रतिपादितम् । ‘‘ **चलं वा यदि वाचलम्** ’’ इति हर्युक्तेः । कारकोल्लासेऽपि भेदाविमौ सोदाहरणं वर्णितौ । तथाहि -

**“ अपादानमिदं द्वैधमचलं चलमित्यपि ।**
**पर्वतादवतीर्णोऽसौ धावतोऽश्वात् पतत्यसौ ॥** [1017]” इति ।

कौण्डभट्टैस्तु अपादानस्य त्रैविध्यं स्वीकृतम् – **निर्दिष्टं विषयम् , उपात्तविषयम् , अपेक्षितक्रियञ्चेति ।**

➢**निर्दिष्टविषयम् :** यत्र निरूपकोऽर्थः साक्षाद् धातुना निर्दिश्यते , तत् निर्दिष्टविषयमपादानम् । यथा – ‘ **अश्वात् पतति** ’ । तत्रापादानत्वस्य निरुपिका विभागजनकपतनक्रिया साक्षात् ‘ **पतति** ’ इत्यनेन निर्दिश्यते , अतः इदं निर्दिष्टं विषयम् ।

---

[1017] **कारकोल्लासे कारकविचारे श्लोक. ७६ ।**

➢**उपात्तविषयम् :** यत्र धातुना धात्वन्तरार्थगर्भितोऽर्थ उपस्थाप्यते तत्र उपात्तविषयमपादानम् । यथा – ‘ **वलाहकात् विद्योद्यते** ’ । अत्र निस्सरणाङ्गं विद्योतनं द्युतिधात्वर्थः ।

➢**अपेक्षितक्रियम् :** यत्र धातोरप्रयुक्तत्वेन कारकत्वप्रयोजिका गमनादि क्रियापेक्ष्यते तदपेक्षितक्रियमपादानम् । यथा – ‘ **कुतो भवान् , पाटलिपुत्रात् ।**’ अत्र उभयोर्वाक्ययोरागमनादिक्रिया अध्याहृत्यैवान्वेति , न तु धातोः प्रतीयते । एवञ्चैतत् सर्वं प्रतिपादयता कौण्डभट्टेनापि भणितं – “ **यत्र साक्षाद् धातुना गतिर्निर्दिश्यते , तन्निर्दिष्टविषयम्** ” । **यथा – ‘ अश्वात् पतति** [1018] ’ । यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह , तदुपात्तविषयम् । यथा ‘ **वलाहकात् विद्योद्यते** ’ । अत्र निःसरणाङ्गे विद्योतने द्युतिर्वर्तते । अपेक्षिता क्रिया यत्र तदन्त्यम् । यथा ‘ **कुतो भवान् , पाटलिपुत्रात् ’ ।** अत्रागमनमर्थमध्याहृत्यान्वयः कार्यः ।

➢ **भेदत्रये भर्त्तृहरिसम्मतिः**

“ **निर्दिष्टविषयकिञ्चिद् उपात्तविषयं तथा ।**
**अपेक्षितक्रियञ्चेति त्रिधापादानमुच्यते ॥** [1019]” इति ।

भेदत्रयेऽस्मिन् स्वाभिमतं मतं प्रकटयता दण्डनाथेनापि स्पष्टतरं सोदाहरणं व्याख्यातं भेदत्रयमिदम् । तथा चोक्तं – “ **यत्र धातुनापायलक्षणो विषयो निर्दिष्टस्तत् निर्दिष्टविषयम् , यथा पर्वतादवरोहति । यत्र तु धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह तदुपात्तविषयम् , यथा कुसूलात् पचति । अत्र अपादानाङ्गे पाके पचिर्वर्तते । यत्र क्रियावाचिपदं न श्रूयते , केवलं क्रिया प्रतीयते**

---

[1018] **वैयाकरणभूषणसारे सुबर्थनिर्णये , पृ. २१२ ।**

[1019] **वाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का.१३६ ।**

**तदपेक्षितक्रियम् । यथा – साकाश्यकेभ्यः पाटलिपुत्रकाः अन्निरूपतराः**[1020] ” इति ।

## सम्प्रदानापादानयोः कारकत्वाकारकत्वविचारः

सम्प्रदानापादानयोरकारकत्ववादिन उद्घोषयन्ति यत् सम्प्रदानापादानयोः कृधातुघटितत्वाभावात् कारकत्वं नास्ति । यथा कर्त्तृकर्मकरणाधिकरणानि कृधातुघटितानि , यथा नेमौ , इति हेतोस्तयोर्न कारकत्वम् । तथा चोक्तं – “ **अपि च यथा कर्त्तृकर्मकरणाधिकरणेषु कृधातुरनुस्युतोऽस्ति , न हि तथा सम्प्रदानापादानशब्दयोः । एतेनापि न तयोः कारकत्वं युक्तियुक्तम्** [1021]” इति ।

अपि च यथा कर्मकरणाधिकरणानां स्व- स्व- व्यापारे स्वातन्त्र्यविवक्षया कर्त्तृत्वं भवति , ओदनः पच्यते , असिः छिनत्ति , स्थाली पचति इत्यादौ , न तथा सम्प्रदानापादानयोः । वस्तुतः सर्वेषां कारकाणां येन केनापि रूपेण स्व-स्व-व्यापारे स्वातन्त्र्यविवक्षायां कर्त्तृत्वं भवति , किन्तु सम्प्रदानापादानयोर्न कदापि स्वातन्त्र्यविवक्षा लोके दृश्यते । अतः ‘ **रामाय ददाति** ’ इत्यत्र ‘ **रामो ददाति** ’ इति न प्रयोगः , न वा वृक्षः पतति इति प्रयोगः । सम्प्रदानापादानयोः स्वातन्त्र्येण विवक्षाभावः हेलाराजेनापि प्रतिपादितः । तथाचोक्तं – “ **सम्प्रदानापादानयोः स्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति , द्वितीयस्य दातुरपगन्तुश्चापेक्षणात्** [1022]” इति ।

---

[1020] **सरस्वतीकण्ठाभरणवृत्तौ १.१.६५ ।**

[1021] **व्याकरणदर्शनभूमिकायां , पृ.२०९ ।**

[1022] **वाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे हेलाराजटीकायां का. १८ ।**

अतः स्वस्वव्यापारे स्वातन्त्र्येण विवक्षाभावान्न तयोः कारकत्वमिति प्रतिपादितम् । तथाहि – **“ यत् कारकं भवति , तदवश्यमेव कर्त्ता भवेत् । यथा कर्मकरणाधिकरणानि अविवक्षया ओदनः स्वयमेव पच्यते , असिः छिनत्ति , स्थाली पचतीत्यादौ कर्त्तृत्वं भजन्ते , नैव सम्प्रदानापादाने क्वचिदपि अविवक्षया रामो ददाति , पर्वतः पतति इत्यादिरूपेण कर्त्तृत्वमासादयतः**[1023] **”** इति ।

एवञ्च सम्प्रदानापादानयोः कारकत्वं न सम्भवतीति महता समारम्भेण खण्डितं तयोः कारकत्वं रामाज्ञापाण्डेयमहोदयैः ।

अत्रोच्यतेऽस्माभिः – रामाज्ञापाण्डेयमहोदयैः सम्प्रदानापादानयोः कारकत्वाभावाय या युक्तयः प्रदर्शिताः ताः सर्वाः अविचारितरमणीया एव प्रतिभान्ति । यतो हि - न हि कृधातुघटित्वं , न वा कदाचित् स्वातन्त्र्येण विवक्षितत्वं वा कारकत्वं कैश्चिदपि स्वीकृतं व्याकरणनिकाये दर्शनान्तरेषु वा । अपि तु क्रियान्वयित्वं क्रियाजनकत्वं वेति पक्षद्वयमेवोपलभ्यते कारकत्वस्वरूपविषये , इति न अविदितं विदितवेदितव्यानाम् । तत्र “ **करोतीति कारकम्** [1024]” इति भाष्यानुरोधात् क्रियाजनकत्वमेव कारकत्वमिति नव्यवैयाकरणानां सम्मतिः ।

एवञ्च सम्प्रदानापादानयोः क्रियाजनकत्वं सर्वैरेव स्वीकृतम् । तथाचोक्तं नागेशेन – “ **सम्प्रदानादीनामपि स्वज्ञानद्वारा जनकत्वं बोधयति** [1025]” इति । एवञ्च कैयटेनापि सम्प्रदानापादानयोः कारकत्वं स्वीकृतं – “ **वस्तुतस्त्वपादानस्यावधीत्वभावेनावस्थानं व्यापारोऽस्ति , सम्प्रदानस्यापि अनुमननादिलक्षणः प्रतीयमानोऽपि**

---

**[1023] व्याकरणदर्शनभूमिकायां , पृ.२०८ ।**

**[1024] पातञ्जलमहाभाष्ये १.४.२३ , पृ.२४२ ।**

**[1025] महाभाष्योद्द्योते १.४.२३ , पृ.२४२ ।**

**व्यापारः कारकव्यपदेशनिबन्धनम् । यथा – प्रविश पिण्डीम्** [1026] ” इति ।

किञ्च सम्प्रदानापादानसंज्ञाविधायके सूत्रद्वयेऽपि कारके इत्यधिकारात् कारकमिति सम्बध्यते । अतः दानक्रिया कर्मणाभीप्सितं कारकसंज्ञं सम्प्रदानसंज्ञं च भवति , एवमेव विश्लेषहेतुक्रियायां ध्रुवत्वेन विवक्षितं यत् , तत् कारकसंज्ञमपादानसंज्ञं च भवति इति सम्प्रदानापादानसंज्ञाविधायकस्य सूत्रद्वयस्य सर्वसम्मतार्थत्वात् , यत् सम्प्रदानमपादानञ्च भवति , तत् कारकमवश्यमेव भवति ।

अत एवैकसंज्ञाधिकारात् एकस्मिन् कारकापादानसंज्ञयोः समावेशो न भवति इत्याशङ्क्य योगविभागेन समाहितं कैयटेन । तथाचोक्तं – “ **नैषः दोषः । ध्रुवमपाय इति योगविभागेन कारकसंज्ञा क्रियते , ततोऽपादानमिति अत्र कारकग्रहणमनुवर्तते ध्रुवमपाय इति च , तेन कारकं सम्प्रदानसंज्ञकमित्येवं समावेशः सिद्ध्यति** [1027]” इति । एवञ्चानेन कैयटव्याख्यानेन सम्प्रदानापादानत्वं कारकत्वव्याप्यमेव । अतः तयोः कारकत्वाभाववादिनां मतं भाष्यासम्मतत्वात् उपेक्ष्यमेवेति मे मतिः ।

## षष्ठ्यर्थनिरूपणम्

➢**तारानाथतर्कवाचस्पतिमतम् : षष्ठ्याः** सम्बन्धसामान्यमर्थः ‘ **शेषे षष्ठीति**[1028] ’ सूत्रात् शेषश्च क्रियाकारकभावात् अभेदसम्बन्धाच्चान्यो न अतस्तत्रापि षष्ठीप्रसङ्गः । सम्बन्धश्च क्रियामूलक एव भवति

---

[1026] **महाभाष्यप्रदीपे १.४.२३ , पृ. २४४ ।**

[1027] **महाभाष्यप्रदीपे १.४.२३ , पृ. २४० ।**

[1028] **पाणिनीयाष्टाध्याय्यां २.३.५० ।**

सिद्धस्वभावयोः द्रव्ययोः द्रव्यगुणयोर्वा सोपानवत् क्रियामन्तरेण सम्बन्धानुपपत्तेः । यथोक्तं हरिणा –

**" सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।**

**अश्रुतायां श्रुतायां वा क्रियायामभिधीयते ॥**[1029] " इति ।

तत्र ' **राज्ञः पुरुष** ' इत्यादौ अश्रुताया अपि दानप्रतिग्रहणादिक्रियायाः कर्त्तृत्वेन उपकार्य्योपकारकभावोऽवगम्यते ' **मातुः स्मर्य्यते** ' इत्यादौ पुनः श्रुतायाः स्मरणादिक्रियायाः कर्मत्वेन तथाभाव इति विशेषः ।

सामीप्यसम्बन्धेऽपि समीपदेशस्थितादि कर्त्तृत्वेनैव तथाभाव इति । तत्राप्ययं विशेषः सम्बन्धस्य द्विष्ठत्वेऽपि गुणीभूतसम्बन्धिन एव षष्ठी । उक्तञ्च हरिणा-

**" द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु वातिरिच्यते ।**

**तत्राभिधीयमानश्च प्रधानेऽप्युपचर्य्यते ॥** [1030]" इति ।

सर्वेषां धातूनां योगे शेषत्वेन विवक्षायां कर्मादौ षष्ठीप्राप्तावपि ज्ञोऽविदर्थस्य करणे इति अधीगर्थदयेशां कर्मणि इत्याद्यष्टसूत्र्यां शेषे इत्यनुवृत्त्या शेषत्वेन विवक्षिते कर्मकरणादौ ज्ञादिविशेषयोगे षष्ठीविधानं समासनिषेधार्थं तेन ' **सर्पिषो ज्ञानं मातुः स्मरणमित्येव** ' प्रयोगः । यथोक्तं वार्त्तिके –" **प्रतिपदविहिता षष्ठी न समस्यते** " इति । हरिणापि उक्तं –

**" कारकव्यपदिष्टे च श्रूयमाणक्रिये पुनः ।**

**प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ॥** [1031]" इति ।

अत्र कारकव्यपदिष्ट इत्युक्तिः सम्बन्धे क्रिया कारकभावमूलकत्वद्योतनार्थम् । प्रतिपदं सकलप्रत्ययप्रयोगे न तु

---

[1029] **वाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १५६ ।**

[1030] **वाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १५७ ।**

[1031] **वाक्यपदीये साधनसमुद्देशे ।**

कृद्विशेषयोग एव इत्यर्थः । हरिस्मृतिरित्यादौ च हरेः शेषत्वेनाविवक्षायां कर्मतया कृद्योगे कर्मार्थषष्ठ्या समासः स्वरे वैलक्षण्याच्च न नियमवैयर्थ्यमिति ।

कर्त्तृकर्मणोः कृतीति विहितायाः कर्त्ता कर्म चार्थः । एकत्रोभयप्राप्तौ षष्ठ्याः साधुत्वे नियमः अप्युक्तः । यथा षष्ठी सम्भाविता यत्र युगपत् कर्त्तृकर्मणोः । अस्त्रीविहितकृद्योगे कर्मणि स्यान्न कर्त्तरि । तव्यादीनां प्रयोगे च द्वयोरेव हि नेष्यते । कर्त्तुविभाषया कैश्चित् कर्मणोऽपि तथा ईष्यते इति । तथा गुणमुख्यकर्मणोरपि विशेषः उक्तः । प्रधाने नियता षष्ठी गुणे तु उभयथा भवेत् । प्रधाने प्रत्ययाश्चेत् स्युः षष्ठीं कुर्य्यात्तदा गुणे इति । अत्र विशेषस्तावत् न लोकेत्यादिना कृद्योगे षष्ठीनिषेधात् शेषषष्ठ्यापि न तत्र समासस्तेन ग्रामस्य गतवानिति विग्रहेऽपि ग्रामगतवानिति न प्रयोगः । उक्तञ्च भर्त्तृहरिणा –

> " **निष्ठायां कत्मविषया षष्ठी च प्रतिषिध्यते ।**
> **शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते ॥**[1032] " इति ।

अत्र निष्ठायाम् उपलक्षणम् इत्याकरे स्पष्टम् ।

### ➢पुरुषोत्तमदेवमतम्

षष्ठी शेषे[1033] इति तावल्लक्षणम् । कर्मादिभ्योऽन्यः यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसम्बन्धादिः सः शेषः। प्रातिपदिकार्थो येन व्यतिरिच्यते अतिरेकीक्रियते स प्रातिपदिकार्थव्यतिरिक्तः । कर्मादिकारकैः प्रातिपदिकार्थोऽतिरेकीक्रियते । कटं करोतीत्यादौ कर्मत्वादेः प्रातिपदिकार्थादन्यत्वात् । प्रातिपदिकार्थो ह्यन्वयी । फलमूलपलासस्कन्धरूपोऽनुपात्तसंख्याकर्मादिविशेषः सर्वविभक्त्यर्था-व्यभिचारी अन्वयी । न तु कर्मादयोऽन्वयिनस्तेषामन्यत्र विभक्त्यर्थे

---

[1032] **वाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १६० ।**

[1033] **पाणिनीयाष्टाध्याय्यां २.३.५० ।**

व्यभिचारात् । यथा कटेनेत्यत्र कर्मत्वं नास्ति कटमित्यत्र करणत्वं नास्तीति योज्यम् । तस्मात् यथा कर्मादिभिः प्रातिपदिकार्थोऽतिरेकीक्रियते तथा सम्बन्धेनापि प्रातिपदिकार्थोऽतिरिच्यते । तथाहि अस्येदं भावस्वरूपलक्षणः सम्बन्धः । न चासौ सर्वविभक्त्यर्थान्वयीति नासौ प्रातिपदिकार्थ इति । अतस्तेन प्रातिपदिकार्थोऽतिरिच्यते । यदि नाम सम्बन्धेन कर्मादिभिश्च प्रातिपदिकार्थोऽतिरिच्यते तथापि कर्मादीनां प्रकृतत्वात्तदपेक्षया अन्यः प्रातिपदिकार्थव्यतिरिक्तो गृह्यमाणः पारिशेष्यात् सम्बन्ध एव गृह्यते । अत एव आह कर्मादिभ्यो योऽन्य इत्यादि । एतेन शेषशब्देनेह सम्बन्धो गृह्यते । एतदुक्तं भवति सम्बन्धे षष्ठीति । स च सम्बन्धः क्रियाकारकजन्यः । तथा च राज्ञः पुरुषः इत्यत्र भरणक्रियाकृतो राजपुरुषयोः सम्बन्धः वृक्षस्य शाखेत्यत्र अवस्थानकृतोवृक्षशाखयोः सम्बन्धः । तदुक्तं –

" **विभर्त्ति पुरुषं राजा तेनासौ राज्ञ उच्यते ।**

**वृक्षस्तिष्ठति शाखासु स्वभावात्तस्य तत्र ताः ॥** [1034]" इति ।

शाखास्तत्र वृक्षे तिष्ठन्तीति तस्य वृक्षस्य ताः शाखा इत्यर्थः । तदेवं सर्वत्र सम्बन्धेऽश्रूयमाणापि क्रिया हेतुभूता सम्बन्धदर्शनापेक्षया अनुमेया । क्वचित् पुनः श्रूयमाणायां क्रियायां सम्बन्धो विवक्ष्यते । यथा माषानामश्नीयात् इति । यदेतदशनं तन्माषाणां नान्येषामित्ययमर्थो विवक्षितः । तदुक्तं –

" **सम्बन्धः कारकादन्यः क्रियाकारकपूर्वकः ।**

**श्रुतायामश्रुतायां वा क्रियायामभिधीयते ॥** [1035]" इति ।

तत्र यद्यप्यस्येदंभावलक्षण एक एव सम्बन्धस्तथापि सम्बन्धिभेदेन पुनर्भिद्यमानोऽनेको भवति । **स्वस्वामिसम्बन्धः**[1036]**, जन्यजनकसम्बन्धः ,**

---

[1034] **कारकचक्रे पुरुषोत्तमदेवेन , पृ. ११२ ।**

[1035] **वाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १५६ ।**

**अवयवावयविसम्बन्धः , स्थान्यादेशसम्बन्धः , आगमागमिसम्बन्धः , क्रियाकारकसम्बन्धः** इत्यादयो बहवः सम्बन्धाः परिगणयितुं न शक्यन्ते । यद्यपि भिन्नोभयाश्रितैकः सम्बन्ध इति कज्जटीयसम्बन्धलक्षणात् संयोगसमवायावेव सम्बन्धौ तथापि विशेषणविशेष्यादीनामुपचरितः स्वीकृत एव भाष्ये ।

अतो सोऽपि स्वीकर्तव्य एवास्माभिः । सर्वत्र सम्बन्धिभेद एव सम्बन्धस्य भेदको द्रष्टव्यः ।

## षष्ठ्या कारकत्वाभावः

षष्ठ्याः कारकत्वं न स्वीक्रियते वैयाकरणैः । अत एव कारकत्वाकारकत्वविचारप्रसङ्गे शाब्दिकमतमुपपादता भवानन्दमहोदयेन भणितं –“ **सम्बन्धस्य कारकत्वं नास्ति , क्रियायोगाभावात् इति शाब्दिकाः** [1037]” इति ।

सम्बन्धस्योदाहरणविषये उक्तं – ‘ **राजा पुरुषस्य , राज्ञः पुरुषः**’ चेति । अतस्तद्व्युत्पत्तिभङ्गभिया पुरुषपदात् प्रथमैव स्वीकरणीया , न तु षष्ठी । आचार्यनागेशेन परमलघुमञ्जूषायाः कारकविचारे **राजा पुरुषस्य** इति अस्य व्युत्पत्तिविषये उक्तं – “ **राजसम्बन्धिपुरुषः इति विवक्षायां राजशब्दादेव षष्ठी , प्रकृत्यर्थप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति व्युत्पत्तेरनुरोधात् । अन्यथा तद्विवक्षायां राजा पुरुषस्येति पुरुषशब्दात् षष्ठ्यां पुरुषार्थं प्रति षष्ठ्यर्थस्य विशेषणत्वापत्त्या व्युत्पत्तिभङ्गापत्तेः** [1038] ” इति ।

---

[1036] **कारकचक्रे पुरुषोत्तमदेवेन , पृ.११३ ।**

[1037] **भवानन्दकृतकारकचक्रे , पृ. ४-५।**

[1038] **परमलघुमञ्जूषायां कारकविवारे , पृ.१०६ ।**

एवञ्च सम्बन्धस्य षष्ठ्याः वाच्यत्वे नास्ति कश्चन विवादः किन्तु सम्बन्धसामान्येन वाच्यता सम्बन्धविशेषेण वेत्यत्र दृश्यते विवादः प्राचीननवीनयोः ।

तत्र प्राचीनास्तु स्वस्वामिभावादितत्तद्रूपेण वाच्यतास्वीकारे अनेकशक्तिकल्पनात् गौरवम् । अतः सम्बन्धत्वसामान्येनैव तत्तत्सम्बन्धे षष्ठ्याः शक्तिः स्वीकरणीया । एवञ्च शक्यतावच्छेदकस्य सम्बन्धत्वस्य कर्तृत्वकर्मत्वादिष्वपि विद्यमानत्वेन , तत्रापि सम्बन्धत्वेन रूपेण षष्ठ्यार्थता सम्भवत्येवेति कथयन्ति । अत एव सतां गमयति इत्यादौ सम्बन्धत्वविवक्षायां षष्ठी उपपादिता भट्टोजिदीक्षितेन । तथा चोक्तं – “ **कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव सतां गतम् , सर्पिषो जानीते , मातुः स्मरति** [1039] ” इति ।

नवीनास्तु सम्बन्धत्वसामान्यरूपेण षष्ठ्याः वाच्यत्वं न स्वीकुर्वन्ति । “ **एकशतं षष्ठ्यार्थाः यावन्तो वा** [1040]” इति । भाष्यविरोधात् । सम्बन्धत्वरूपेणैकस्य षष्ठ्यर्थत्वे भाष्यविरोधः स्पष्ट एव । अतः तत्तद्रूपेण सम्बन्धस्य वाच्यता । यथा – ‘ **राज्ञः पुरुषः** ’ इत्यत्र स्वस्वामिभावादिरूपसम्बन्धः षष्ठ्याः वाच्यः , न तु स्वत्वं , नापि स्वामित्वम् , उभयोर्द्विष्ठत्वाभावेन सम्बन्धाभावात् । आश्रयतासम्बन्धेन निरूपकत्वसम्बन्धेन चोभयोर्द्विष्ठत्वं सम्भवतीति नाशङ्कनीयम् , आश्रयतानिरूपकत्वसम्बन्धयोः वृत्त्यनियामकत्वात् । एवञ्च ‘ **राज्ञः पुरुष** ’ इति शाब्दबोधः ।

अत्रेत्थमाशङ्क्यते , यत् यदि सम्प्रदानादीनां कारकत्वं सम्भवति , तर्हि सम्बन्धस्यापि कारकत्वं स्यादिति कैश्चित् , तस्य समाधानं कुर्वता

---

[1039] **वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे , पृ. १८९ ।**

[1040] **पातञ्जलमहाभाष्ये १.१.४९ , पृ.२६३ ।**

जगदीशतर्कालंकारेणोक्तम् – **" षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थे प्रकारीभूय भासते , तण्डुलस्य पचतीत्याद्यप्रयोगात् , अतः सम्बन्धो न कारकम्** [1041]" इति ।

षष्ठ्याः कारकत्वाभावः नागेशेनापि प्रतिपादितः – **" ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वं , पुत्रेणान्यथासिद्ध्या तत्त्वाभावात्** [1042]" इति । तस्मात् षष्ठ्याः कारकत्वाभाव एव सर्वसम्मत इति ।

## सप्तम्यर्थनिरूपणम्

" **सप्तम्यधिकरणे च** [1043]" इत्यनुशासनात् अधिकरणे सप्तमी विधानेनाधिकरणत्वमेव सप्तम्यर्थ इति मीमांसकाः । तथा चोक्तं – " **अतोऽधिकरणत्वमेव सप्तम्यर्थः**" [1044] इति ।

कौण्डभट्टास्तु " **आधारोऽधिकरणम्** [1045]" इति सूत्रेण कर्तृकर्मद्वारा तन्निष्ठक्रियाधारस्याधिकरणसंज्ञाविधानात् , आधारत्वस्याश्रयत्वस्यैक्याच्च आश्रय एव सप्तम्यर्थ इति स्वीकुर्वन्ति । भणितञ्च तैः – " **सप्तम्या अप्याश्रयोऽर्थः** " । सप्तम्यधिकरणे च इत्यधिकरणे सप्तमी । तच्च

---

[1041] **शब्दशक्तिप्रकाशिकायां श्लोक. ६७ ।**

[1042] **लघुशब्देन्दुशेखरे कारकप्रकरणे , पृ. ४३४ ।**

[1043] **पाणिनीयाष्टाध्याय्यां २.३.३६ ।**

[1044] **भाट्टतन्त्ररहस्ये , पृ.१५८ ।**

[1045] **पाणिनीयाष्टाध्याय्यां १.४.४५ ।**

“ **आधारोऽधिकरणम्** [1046]” इति **सूत्रादाधारः , तत्त्वञ्चाश्रयत्वम्** ” [1047]इति ।

नागेशास्तु अधिकरणमेव सप्तम्यर्थ इति स्वीकुर्वन्ति । ‘ **सप्तम्यर्थोऽधिकरणमिति** [1048]’ । ‘ **गोषु दुह्यमानासु** ’ इत्यादौ यत्र ज्ञापकक्रियाश्रयवाचकात् शब्दात् “ **यस्य च भावेन भावलक्षणम्** [1049]” इति सूत्रेण सप्तमी विधीयते , तत्र क्रियान्तरज्ञापकत्वमेवार्थ सप्तम्याः । एवञ्च ‘ **गोषु दुह्यमानासु गतः** ’ इत्यादौ गोनिष्ठदोहनक्रियाज्ञापितगमनाश्रय इति बोधः । तथा चोक्तम् –“ **ज्ञापकक्रियाश्रयवाचकादुत्पत्त्याः सप्तम्यास्तु क्रियान्तरज्ञापकत्वमर्थः** [1050]” इति ।

अधिकरणसप्तम्याः अधिकरणत्वशक्तिमानर्थः । अधिकरणे सप्तमीति सूत्रात् । सा च शक्तिः कर्त्तृकर्मद्वारा क्रियाश्रयनिष्ठा । तदुक्तं हरिणा –

“ **कर्त्तृकर्मव्यवहितामसाक्षात् धारयत् क्रियाम् ।**
**उपकुर्वन् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥** [1051]” इति ।

लोके गुणद्रव्यक्रियाविषयमधिकरणम् । अत्र शास्त्रे कारकाधिकारात् क्रियाविषयमेव तत् । साक्षात् क्रियाविषयमेव तत् । साक्षात् क्रियाश्रययोः कर्त्तृकर्मणोः ते संज्ञे बाधिके । अतः तद्वद्विहितमपि । यद्यपि कालः साक्षात् कियाधारः , तथापि कारकाधिकारे तरतमयोगो नास्तीति परम्परया क्रियाधारस्यापि ग्रहणम् । किं च कालस्य साक्षात् क्रियाश्रयत्वविवक्षायां ‘ **कालः पचति भूतानि** ’ इतिवत् कर्त्तृत्वम् । व्यवहितमित्यनेनैव

---

[1046] **पाणिनीयाष्टाध्याय्यां १.४.४५ ।**
[1047] **वैयाकरणभूषणसारे सुबर्थनिर्णये पृ. २०२ ।**
[1048] **परमलघुमञ्जूषायां कारकविचारे , पृ. १०५ ।**
[1049] **पाणिनीयाष्टाध्याय्यां २.३.३७ ।**
[1050] **परमलघुमञ्जूषायां कारकविचारे , पृ. १०५ ।**
[1051] **वाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १४८ ।**

असाक्षादिति लाभात् असाक्षादिति पुनः कथनं लोकानुसारेणान्वयोऽपि परम्परया एव सूचनाय । **‘ कटे आस्ते स्थाल्यां पचति ’** इत्यादौ अधृते कर्त्तृकर्मणी क्रियां न सम्पादयतः इति अधिकरणं कियाधारमुपकुर्वत् तत्रस्थां क्रियामुपकरोतीत्यर्थः इति हेलाराजः । न च तण्डुलं पचति इत्यादौ धात्वर्थस्य विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मतया तादृशकर्मणः आश्रये तण्डुले तद्द्वारा धात्वर्थाश्रयत्वमस्तीति अधिकरणसंज्ञा स्यात् । ततः सप्तमी इति वाच्यम् ।

### ➢तारानाथतर्कवाचस्पतिमतम्

**सप्तम्याः** अधिकरणमर्थः **‘ सप्तम्यधिकरणे च** [1052]**’** इति सूत्रात् । वाच्यता तच्छक्तिमत्त्वेन तस्य च स्वाश्रितकर्त्तृकर्मन्यतरनिष्ठाधारता-निरूपकतया फलव्यापारान्यतरयोरन्वयः ।

**‘ यस्य च भावेन भावलक्षणमिति**[1053] **’** विहितसप्तम्याः समानदेशकालत्वादिना परिच्छेदकत्वरूपलक्षणमर्थः तत्र द्रव्यस्य स्वतः कालादिपरिच्छेदकत्वाभावेन तद्गतक्रियायाः परिच्छेदकत्वकथनाय यस्य च भावेनेत्युक्तं भावस्यापि स्वतस्तथात्वाभावेन तद्देशकालयोस्तथात्वेनैव च परिच्छेदकत्वं तेन गोषु दुह्यमानास्वागत इत्यादौ गवादि क्रियाकालेनागमन-कालपरिच्छेदात् गवादेः सप्तमी बोधस्तु दोहनकर्माभिन्नगवादिसम्बन्धिदोहन-क्रियाकालीनागमनकर्त्तेति । अत्र च यस्य इत्युक्त्या कर्त्तृकर्मणोरेव फलव्यापाररूपक्रियाश्रयतया तद्भावेन क्रियान्तरकालपरिच्छेदकत्वविवक्षायां तयोरेव सप्तमी न कारकान्तरेभ्य इत्याकरे स्पष्टम् ।

---

[1052] **पाणिनीयाष्टाध्याय्यां २.३.३६ ।**

[1053] **पाणिनीयाष्टाध्याय्यां २.३.३७ ।**

गुणे सति द्रव्यत्वमस्तीत्यादौ गुणसत्तायाः द्रव्यत्वसत्त्वाधिकरणदेश-परिच्छेदकत्वात् गुणवाचकात् सप्तमीति बोध्यं बोधस्तु सत्तावदभिन्नगुणसम्बन्धि सत्तासमानदेशिकं द्रव्यत्वकर्त्तृकम् अस्तित्वम् इति । प्रसिद्धञ्च निर्ज्ञातकालक्रियाया अनिर्ज्ञातदेशकालयोः परिच्छेदकत्वं तस्याश्च कदाचित् स्वसमानकालेन कदाचिच्च स्वपूर्वोत्तरकालाभ्यां तथात्वं तेन दुग्धासु दोक्ष्यमानासु वा गोषु आगत इत्यादिसिद्धिः । तथा व यस्य च भावेन इति प्रागुक्तेरेतत् सप्तम्याः क्रियायामेव साधुत्वाद् यत्र तद्वाचकं पदं नास्ति तत्र अध्याहृत्यैव क्रियापदमन्वयस्तेन गुणकर्मान्यत्वे सति सत्त्वाद् इत्यादि उपपत्तिः इति ।

‘ **निमित्तात् कर्मयोगे**[1054] ’ इति विहितसप्तम्याः निमित्तत्वमर्थः निमित्तत्वमुद्देश्यत्वं फलत्वमिति यावत् ‘ **चर्मणि द्वीपिनं हन्ति** ’ इत्यादौ चर्मोद्देश्यकं द्वीपिहननमिति बोधः । योगश्चेह संयोगसमवायाभ्याम् एव इत्याकरे स्पष्टम् ।

‘ **षष्ठी चानादरे** [1055]’ इति विहितषष्ठीसप्तम्योः कर्मार्थस्तत् समभिहारे च अनादरपूर्वकतत्तत्क्रियायां धातोर्लक्षणा तत्रानादरे च कर्मान्वयस्तेन रुदति रुदतो वा जगामेत्यादौ रोदनकर्त्तृकर्मकानादरपूर्वकं गमनमिति बोधः । साधुनिपुणादियोगे विहितयोस्तयोः सम्बन्धसामान्यमर्थः ।

‘ **यतश्च निर्द्धारणमिति** [1056]’ विहितयोः तयोः निर्धार्य्यधर्मतदवध्योः व्यावर्त्ताख्यः सम्बन्धः अर्थः सजातीयसमुदायाद्यत एकदेशस्य जात्यादिरूपव्यावर्त्त्यधर्मद्वारा निर्द्धारणं तद्धर्मप्रकारकज्ञानविषयीकरणं ततः षष्ठीसप्तम्यौ स्त इति सूत्रार्थः । तेन नराणां नृषु वा विप्रः श्रेष्ठ इत्यादौ नरपदं

[1054] **वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे ।**

[1055] **पाणिनीयाष्टाध्याय्यां २.३.३८ ।**

[1056] **पाणिनीयाष्टाध्याय्यां २.३.४१ ।**

विप्रादीतरनरबोधकं बोधस्तु विप्रादीतरनरावधिकव्यावर्त्त्यश्रेष्ठत्वगुणवदभिन्नो विप्र इति । निर्द्धारणापेक्षया अवधित्वविवक्षायां पञ्चम्यपि साधुः '**पञ्चमीविभक्ते**[1057]' इति सूत्राद् ।

## ➢पुरुषोत्तमदेवमतम्

"**सप्तम्यधिकरणे च**[1058]" इति तावल्लक्षणम् । किं पुनरधिकरणम् , तत्रोच्यते – "**आधारोऽधिकरणम्**[1059]" । आध्रियन्ते क्रियागुणाः अस्मिन्नित्याधारः । तत्र यदि क्रिया यत्र धार्यते तदधिकरणं तदा कर्त्तृकर्मणोरेवाधिकरणसंज्ञा स्यात् । तथाहि कर्त्तृस्था क्रिया भवति कर्मस्था वा । तत्र कर्त्तृसमवायिनी या तां कर्त्ता धारयति , या च कर्मसमवायिनी तां कर्म धारयति । न तयोरधिकरणसंज्ञा सम्भवति , अनवकाशत्वेन कर्त्तृकर्मसंज्ञाभ्यां बाधितत्वात् । तस्माद् यत्र क्रिया आधार्यते साक्षाद् स विषयो न सम्भवतीति कर्त्तृकर्माधारद्वारेण कर्त्तृकर्मव्यवहिता क्रिया धार्यते येन तदधिकरणम् । अत एव आह वृत्तिकारः – क्रियाश्रययोः कर्त्तृकर्मणोर्द्धारणात् क्रियां प्रति य आधारस्तदधिकरणसंज्ञकं भवतीति । एतेन एतदुक्तं भवति , यत्र कर्त्तृकर्मणी धार्येते तदधिकरणम् । यद्येवं कर्त्तृकर्मणोराधारोऽधिकरणमित्येव वक्तुं युक्तम् । तत् किमुच्यते क्रियाश्रययोर्धारणात् क्रियां प्रति य आधार इति ।

तत्रायमाशयः – आधार इत्युक्ते कस्यायमाधारः इत्यपेक्षा विद्यते । यत्र कर्त्तृकर्मणी अपेक्षेते तत्र कर्त्तृकर्मणोराधार इत्युक्तं भवति । तथाहि नेह सूत्रे कर्त्तृकर्मग्रहणमास्ते नाप्यनुवृत्तं नाप्यर्थायातम् । तत् कथं तदपेक्षया आधारो ग्रहीतुं शक्यते । तस्मादाधारः कारकं गृह्यते , कारकञ्च क्रियामपेक्षते इति

---

1057 **पाणिनीयाष्टाध्याय्यां २.३.४२ ।**

1058 **पाणिनीयाष्टाध्याय्यां २.३.३६ ।**

1059 **पाणिनीयाष्टाध्याय्यां १.४.४५ ।**

आधार इत्यविशेषोक्तावपि क्रियाया आधार इति विशेषो लभ्यते । लब्धे विशेषे यदव्यवधानेन क्रियाधारस्तत्राधिकरणसंज्ञया न भवितव्यं कर्तृकर्मसंज्ञाभ्यां बाधितत्वात् । उच्यते तथाहि – क्रियाया आधारो यत् कारकं तदधिकरणमिति साक्षाद्विषयाभावे गत्यन्तराभावे पारम्पर्यामाश्रीयते । कर्तृकर्मणो क्रियाश्रययोर्धारणात् क्रियां प्रति य आधार इति । एतदुक्तं भवति कर्तृकर्मणी आधार्येते , तत्र तदाश्रितापि क्रिया धार्यते । क्रियाकारकमेवाधिकरणसंज्ञाप्रवृत्तिनिमित्तमिति । तदयमर्थः – यत्र कर्तृकर्माश्रययोर्धारणं तत्रापि क्रियां प्रति आधारोऽधिकरणं कथं तत्राह – कर्तृकर्मणोः क्रियाश्रययोर्धारणात् पारम्पर्येण क्रियां प्रत्याधारः इति । तदुक्तं –

“ **कर्तृकर्मव्यवहितामसाक्षात् धारयत् क्रियाम् ।**
**उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं मतम् ॥** [1060]” इति ।

तत् पुनस्त्रिविधम् औपश्लेषिकं वैषयिकम् अभिव्यापकमिति । औपश्लेषिकं यथा – कटे आस्ते देवदत्तः । वैषयिकं यथा- खे तिष्ठन्ति शकुनयः । अभिव्यापकं यथा – तिलेषु तैलमस्ति । तदुक्तं –

“ **औपश्लेषिकवैषयिकाभिव्यापक एव च ।**
**आधारस्त्रिविधो ज्ञेयः कटाकाशतिलादिषु ॥** [1061]” इति ।

### ➢नैयायिकमतम्

नैयायिकास्तु आधारसप्तम्याः आधेयत्वमिति सामान्येनार्थं स्वीकुर्वन्ति । “ **आधारसप्तम्याः आधेयत्वमर्थः** [1062]” । किन्तु वीणायां शब्दः कर्णे शब्दः वृक्षाग्रे कपिसंयोगः इत्यादाववच्छेद्यताविशेषस्यैव

---

[1060] **वाक्यपदीयतृतीयकाण्डे साधनसमुद्देशे का. १४८ ।**

[1061] **वैयाकरणसिद्धान्तकौमुद्यां पृ. २९६ ।**

[1062] **व्युतपत्तिवादे , पृ. ३११ ।**

सप्तम्यर्थत्वं प्रतिपादयन्ति । उक्तेषु प्रयोगेषु कारकत्वनिर्वाहाय भवतीत्यादिक्रियाध्याहारः , अथवा सप्तमीविधायके सूत्रे चकारग्रहणात् कारकत्वासमानाधिकरणाधार वाचकादपि सप्तमी विभक्तिः सम्भवतीति स्वीकुर्वन्ति । तथा चोक्तं गदाधरेण – " **अवच्छेद्यताविशेषोऽप्याधार सप्तम्यर्थः । यथा – वीणायां शब्दः , कर्णे शब्दः वृक्षाग्रे कपिसंयोगः इत्यादौ । एषु कारकनिर्वाहाय भवतीत्यध्याहारः । अथवा सप्तम्यधिकरणे चेति चकारेणाकारकाधारवाचिनोऽपि सप्तमी** [1063] " इति ।

## ➢नैयायिकमतखण्डनम्

गदाधरोक्तिरियं न युक्तियुक्तमावहति । यतोहि – उक्तप्रयोगेषु वीणाधिकरणकशब्दकर्त्तृकासत्ता , कर्णाधिकरणकशब्दकर्त्तृकासत्ता , वृक्षाधिकरणक-कपिसंयोगकर्त्तृकासत्ता इति बोधस्य अवच्छेद्यत्वस्या-सप्तम्यर्थत्वेऽपि फलतः सिद्धान्तात् , तत्र सप्तम्याः शक्तिकल्पने युक्तिविरहात् ।

तत्र चकारेण सप्तमीविधानमपि न युक्तम् , क्रियाध्याहारेणैव सप्तमीसम्भवे चकारेण विधानस्यागतिकगतित्वात् ।

किञ्च तत्र चकारग्रहणस्य प्रातिपदिकार्थमात्रे सप्तमीविधानार्थत्वस्य भट्टोजिदीक्षितेन प्रतिपादितत्वात् । उक्तञ्च शब्दरत्ने ' **सप्तम्यधिकरणे च** [1064]' इति सूत्रेणाधिकरणे सप्तम्याः सिद्धत्वाच्चकारेण अन्तरङ्ग-प्रातिपदिकार्थं मात्रे सप्तमी विधीयते । ..... इयं च सप्तमी निरवकाशत्वात् पराया अपि प्रथमाया बाधिकेति भावः ।

---

[1063] **व्युतपत्तिवादे , पृ. ३१२ , ३१३ ।**

[1064] **शब्दरत्ने , पृ. ९५३ , ९५४ ।**

सप्तमीविभक्त्यर्थनिरूपणे सप्तम्या अधिकरणे विधीयमानत्वात् प्रसङ्गप्राप्तमधिकरणं निरूप्यते ।

## अधिकरणम्

" **आधारोऽधिकरणम्** [1065]" इति सूत्रेण आधारस्य अधिकरणसंज्ञा विधानादाधार एव अधिकरणम् । किन्तु अत्र आधारपदार्थस्य आधेये नित्यसाकाङ्क्षत्वात् , किन्निरूपित आधारः इत्याधेयविषयकाकाङ्क्षायां , क्रियैव आधेयरूपेणोपतिष्ठति । ' **कारके** [1066]' इत्यधिकारेऽधिकरणसंज्ञायाः विधानात् , क्रियाजनकत्वे एव तत्प्रवृत्तिः , अतः क्रियैव तत्र प्रथमोपस्थापिता भवति । किन्तु लक्ष्यानुरोधात् क्रियाधारस्य नाधिकरणसंज्ञा , कर्त्तृकर्माभ्यां तद्बाधात् । अर्थात् क्रियाधारस्य अधिकरणसंज्ञा सम्भवत्येव न हि , तत्र कर्त्तृसंज्ञा वा बाधिका भविष्यति । यथा – ' **मोक्षमिच्छति** ' इत्यत्र कर्मसंज्ञयाधिकरणस्य बाधात् न सप्तमी । अतः कर्त्तृकर्मद्वारा क्रियाधारस्याधिकरणसंज्ञा स्वीकरणीया । एवञ्च मोक्षे इच्छास्तीत्यादौ ' **श** ' प्रत्ययोत्पत्तिसिद्धावस्थापन्नेच्छारूपकर्त्तृद्वारा ' **अस्ति** ' क्रियायाः विषयतासम्बन्धेन आधारत्वादधिकरणसंज्ञायां ' **मोक्षे** ' इत्यत्र सप्तमी भवति । एवञ्च कर्त्तृकर्मद्वारा क्रियाधार एव अधिकरणमिति वैयाकरणसिद्धान्तः । तथाचोक्तं हरिणा –

---

[1065] **पाणिनीयाष्टाध्याय्यां १.४.४५ ।**

[1066] **पाणिनीयाष्टाध्याय्यां १.४.२३ ।**

**“ कर्त्तृकर्मव्यवहितमसाक्षाद् धारयत् क्रियाम् ।**

**उपकुर्वन् क्रियासिद्धौ , शास्त्रेऽधिकरणं स्मृतम् ॥** [1067]” इति ।

अत्रोपकुर्वत् ( क्रियासिद्धौ ) इत्यनेन कर्त्तृकर्मक्रियाश्रयत्वेन , कर्त्तृकर्मनिष्ठक्रियावत्त्वेन वा अधिकरणस्य मुख्यक्रियासिद्धौ सहायकत्वात् तस्यापि कारकत्वमिति प्रतिपादितम् ।

कौण्डभट्टैरपि प्रतिपादितम् – **“ कारके इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव यद्यपि तात्पर्यं तथा अप्यत्र कर्त्तृकर्मद्वारा तदाश्रयत्वमस्त्येव** [1068]” इति ।

नागेशेनाप्ययमेव पन्थाः आश्रितः । “ **कारके इत्यधिकारात्क्रियाजनके एतत्प्रवृत्त्योपस्थितत्वादाधारः क्रियाया एव । तत्रेप्सिततमस्वतन्त्रपदाभ्यां साक्षात् क्रियाधारयोः कर्त्तृकर्मसंज्ञाभ्यां बाधात् परम्परयातदाश्रयस्य ग्रहणम् , परम्परा च कर्त्तृकर्मद्वारिकैव** [1069] ” इति ।

तस्मात् साक्षात्क्रियाधारस्य कर्त्तृकर्मसंज्ञयाधिकरणसंज्ञाया बाधो भवतीति कृत्वा परम्परया क्रियाधारस्य अधिकरणसंज्ञा । सा च परम्परा क्वचित्संयोगघटिता , क्वचित्समवायघटिता क्वचित्तदन्यतरातिरिक्त-विशेषणता सम्बन्धघटिता । तत्राद्या **कटे शेते , द्वितीया पटे शौक्ल्यं** , द्रव्यादिषु जातिः इत्यत्र , तृतीया तु घटाभावे पटाभाव इत्यादौ बोध्या । अत एव अधिकरणत्वस्वरूपं प्रतिपादयता नागेशेनोक्तं – “ **कर्त्तृकर्मद्वारकफलव्यापाराधारत्वमधिकरणत्वम् । यथा**

---

[1067] **वाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. १४८ ।**

[1068] **वैयाकरणभूषणसारे सुबर्थनिर्णये पृ. २०२ ।**

[1069] **लघुशब्देन्दुशेखरे कारकप्रकरणे , पृ. ५१७ ।**

**स्थाल्यामोदनं गृहे पचतीत्यादौ कर्मद्वारकविक्लित्तिरूपफलाधारः , स्थाली कर्त्तृद्वारकव्यापाराधारो गृहम्** [1070]" इति ।

### ➢तारानाथतर्कवाचस्पतिमतम्

आधारत्वं नाम कर्त्तृकर्मव्यवहितक्रियाश्रयत्वं कर्त्तृकर्मव्यवहिताम-साक्षात् धारयत् क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति हरिणोक्तम् । अधृते कर्त्तृकर्मणी न क्रियां जनयत इत्यधिकरणं तदुपकारि । तत्र गृहे शेते इत्यादौ कर्त्तृद्वारा स्थाल्यामोदनं पचतीत्यादौ कर्मद्वारा गृहादि तदुपकारकं क्रियाश्रयश्चेति विशेषः । तच्च चतुर्विधं ' **सामीप्याश्लेषविषयैर्व्याप्त्याधारश्चतुर्विध** ' इति भेदकसम्बन्धचातु-र्विध्यात् । तत्र सामीप्यसम्बन्धेनाधिकरणमाद्यं यथा **-' वने नदी आस्ते '** इत्यादौ वनादि । एकदेशसम्बन्धेन द्वितीयं यथा – **' कटे आस्ते '** इत्यादौ कटादि । विषयतासम्बन्धेन तृतीयं यथा- **' मोक्षे इच्छास्ती** 'त्यादौ मोक्षादि । व्याप्तिसम्बन्धेन चतुर्थं यथा- **' तिलेषु तैलमस्ती** 'त्यादौ तिलादि ।

तस्मात् कर्त्तृकर्मद्वारा क्रियाया आधार एवाधिकरणमिति सर्वेषां सम्मतिः ।

## अधिकरणस्य क्रियासम्बन्धविचारः

एवमधिकरणस्वरूपे मतभेदाभावे अपि अधिकरणक्रिययोः सम्बन्धे दृश्यते मतभेदः प्राचीननवीनयोः ।

तत्र नव्यास्तु अधिकरणस्य साक्षात् कर्त्तरि कर्मणि च सम्बन्धं स्वीकुर्वन्ति , क्रियायान्तु कर्त्तृकर्मद्वारैव , न तु साक्षादन्वयः तस्य । अतएव

---

[1070] **परमलघुमञ्जूषायां कारकविचारे , पृ. १०४ ।**

‘ **अक्षशौण्ड** ’ इत्यत्र समासः सिद्ध्यति । साक्षात्क्रियायामन्वये तु ‘ **अक्षेषु शौण्डः** ’ इत्यत्र अक्षपदार्थस्य शौण्डेऽन्वयाभावात् , सामर्थ्याभावेन समासो न स्यादिति । साक्षात् कर्त्तरि कर्मणि चाधिकरणस्य अन्वयेत्यक्षत्वस्य शौण्डरूपे कर्त्तरि अन्वयसम्भवात् , सामर्थ्ये समासः सिद्ध्यति , शौण्डस्य चास्त्यादिक्रियायामन्वय इति सर्वं समीचीनं नव्यानां मते ।

### ➢प्राचीनमतम्

कैयटदीक्षितादिप्राचीनाचार्यास्त्वधिकरणस्य स्ववृत्तिवृत्तित्वरूप-परम्परासम्बन्धेन साक्षात्क्रियायामेवान्वय इति स्वीकुर्वन्ति । एवञ्च तेषां मते अक्षेषु शौण्डः इत्यत्र समासाय शौण्डपस्य लक्षणा स्वीकरणीया । तत्र च शौण्डपदार्थैकदेशे आसक्तिक्रियारूपे लक्ष्यार्थे अक्षपदार्थान्वयः । एवञ्च तत्र सामर्थ्यात् समासः सिद्ध्यति । लक्षणां विना तु अक्षत्वपदार्थस्य शौण्डेऽन्वयाभावात् समासो स्यात् । एवञ्चास्मिन् मते अक्षशौण्ड इत्यत्र लक्षणावश्यमेव स्वीकरणीया । एवं लक्षणा स्वीकाररूपगौरवस्य विद्यमानत्वेऽपि साक्षात्क्रियायामेवाधिकरणस्य सम्बन्ध इति स्वीकुर्वतां कैयटादीनान्तु अयमाशयः - अक्षशौण्डस्य धनमित्यादौ कर्त्तृकर्मद्वारापि क्रियायामधिकरणस्य उपपादनासम्भवात् , आसक्त्यादिक्रियान्तर्भाविण वृत्तिकल्पनाया आवश्यकत्वात् , तयैव सर्वत्र “ **अक्षशौण्ड इत्यादौ** ” वृत्ति निर्वाहे अधिकरणकारकस्य परम्परया कियायामन्वयापेक्षया साक्षादन्वयस्यौचित्यम् ।

### ➢नवीनमतम्

वस्तुतस्तु नवीनमतमेव समीचीनम् । अक्षशौण्डस्य धनमित्यादौ उद्देश्यवाचके शौण्डादिपदे लक्षणाश्रयणेऽपि अक्षशौण्ड इत्यत्र विधेयवाचके लक्षणायाः अनौचित्यात् । किञ्च अक्षशौण्ड इत्यत्र अक्षविषयक

शौण्डत्वस्यैव विवक्षितत्वात् , न तत्रलक्षणाश्रयणम् । एवञ्च तत्र लक्षणाभावे समाससिद्ध्यर्थमधिकरणस्य कर्त्तृकर्मद्वारा परम्परयैव क्रियायामन्वयः स्वीकरणीयः न तु साक्षात् । प्रतिपादितश्चायं सिद्धान्तः भर्त्तृहरिणापि – " **कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्** [1071]" इति ।

एवञ्चास्यां कारिकायामसाक्षात् क्रियां धारयदिति प्रतिपादयता भर्त्तृहरिणा अधिकरणस्य परम्परया क्रियायामन्वय इति प्रतिपादितः । तस्मात् अधिकरणस्य क्रियायां परम्परा अन्वय इति सिद्धान्तः ।

## अधिकरणभेदः

अधिकरणस्य भेदं कुर्वता भट्टोजिदीक्षितेन तस्य भेदत्रयमेव स्वीकृतम् । तथा चोक्तम् – " **औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा** [1072]" इति ।

➢**औपश्लेषिक**: तत्रौपश्लेषिकस्य " **मासेऽतिक्रान्ते यद्दीयते तस्य मास औपश्लेषिकमधिकरणम्** [1073]" इति कैयटोक्त्या , उप समीपे श्लेषः उपश्लेषः , तत्कृतः औपश्लेषिक इत्यर्थः । यथा – ' **इको यणचि** [1074]' इत्यत्रापि इति सप्तमी औपश्लेषिकाधारे एव ।

➢**वैषयिकम्** – अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायातिरिक्तसम्बन्धेन यदधिकरणम् तत् वैषयिकम् । अथवा औपश्लेषिकाभिव्यापकान्यदधिकरणं

---

[1071] **वाक्यपदीयतृतीयकाण्डस्य साधनसमुद्देशे का. १४८ ।**

[1072] **वैयाकरणसिद्धान्तकौमुद्यां , पृ.२९६ ।**

[1073] **महाभाष्यप्रदीपे ५.१.९६ ।**

[1074] **पाणिनीयाष्टाध्याय्यां ६.१.७७ ।**

वैषयिकमधिकरणम् । तथा चोक्तम् – “ **एतदुभयातिरिक्तं वैषयिकमधिकरणम्** ” इति । यथा – ‘ **मोक्षे इच्छास्ति** ’ इत्यत्र मोक्षविषयिणी इच्छा इति बोधः , तत्र वैषयिकाधिकरणस्य विद्यमानत्वात् ।

➤**अभिव्यापकम्** – यत्र सर्वावयावच्छेदेनाधेयस्य सम्बन्धस्तदभिव्यापकम् । यथा – ‘ **तिलेषु तैलम्** ’ । एवञ्चाधिकरणस्य त्रैविध्यमेव स्वीकृतं सर्वैः । तथाचोक्तं – “ **तच्च त्रिविधम् , औपश्लेषिकम् , वैषयिकम् , अभिव्यापकञ्चेति । कटे शेते , गुरौ वसति , मोक्षे इच्छास्ति , तिलेषु तैलम्** [1075]” इति ।

पतञ्जलिनापि अधिकरणस्य त्रैविध्यं प्रतिपादितमस्ति - “ **अधिकरणं नाम , त्रिप्रकारं व्यापकम् , औपश्लेषिकम् , वैषयिकम्** [1076]” इति । तेषां भेदत्रयाणां क्रमशः उदाहरणमपि कैयटेन तत्रैव – “ **व्यापकमिति यथा दध्नि सर्पिः , तिलेषु तैलम् । औपश्लेषिकमिति यथा – कटे तिष्ठति , मथुरायां वसतीति सर्वावयवव्याप्त्याभावात् कटादेर्व्यापकत्वाभावः , वैषयिकमिति , यथा – खे शुकनयः , गुरौ वसतीति** [1077] ” **इति** ।

नागेशास्तु [1078]यद्यपि अधिकरणस्य भेदत्रयमेव स्वीकुर्वन्ति , किन्तु कैयटेन प्रदत्तमौपश्लेषिकाधिकरणस्य ‘ **कटे तिष्ठतीति** ’ उदाहरणं खण्डयति । तेषां मते ‘ **यन्मासे अतिक्रान्ते दीयते तस्य मास औपश्लेषिकाधिकरणं मासिकं धान्यम्** ’ इति भाष्यात्

---

[1075] **वैयाकरणभूषणसारे सुबर्थनिर्णये पृ.२०३ , २०४ ।**

[1076] **पातञ्जलमहाभाष्ये ६.१.६२ , पृ. ७२३ ।**

[1077] **महाभाष्यप्रदीपे ।**

[1078] **परमलघुमञ्जूषायाम् – तत्र अधिकरणं त्रिधा । अभिव्यापकमौपश्लेषिकवैषयिकं वेति ।**

औपश्लेषिकाधिकरणस्थले समीपत्वस्य सप्तम्यर्थत्वप्रतीत्या ‘ **कटे आस्ते** ’ तिष्ठति वेत्यत्र तस्याभावान्नौपश्लेषिकाधिकरणस्य इदमुदाहरणम् । तथा चोक्तं तैः – “ **यत्तु कटे आस्ते इत्यौपश्लेषिकोदाहरणमुक्तं कैयटेन , तदयुक्तं , उक्तभाष्यबिरोधात्** [1079]” इति ।

वस्तुतस्तु नागेशोक्तं न युक्तियुक्तसहम् । ‘ **यन्मासेऽतिक्रान्ते** ’ इत्यादिरूपेण भाष्येऽनुल्लेखात् । इदानीमुपलब्धे महाभाष्ये नेयं पङ्क्ति उल्लिखिता अस्ति । अपि तु पङ्क्तिरियं “ **तत्र च दीयते कार्यं भववत्** [1080]” इति सूत्रस्य महाभाष्यप्रदीपे उपलभ्यते । अतः सा भाष्योक्तिरिति स्वीकृत्य तद्विरोधात् कैयटोक्तमसमीचीनमिति वदतां नागेशेनामुक्तिश्चिन्त्यैव ।

‘ **कटे आस्ते , तिष्ठति** ’ इति औपश्लेषिकाधिकरणस्योदाहरणं वदतां कैयटानान्तु [1081]यत्किञ्चिदवयवावच्छेदेनाधारस्याधेयेन व्याप्तिरूपश्लेषः तत्कृतमौपश्लेषिकम् इत्याशयः । अत एव गङ्गैकदेशे तरन्तीषु गोषु ‘ **गङ्गायां गावः**’ , कूपैकदेशस्थिते गर्गकुले ‘ **कूपे गर्गकुलम्** ’ इत्यादावपि औपश्लेषिकमेवाधिकरणमिति मे मतिः ।

अत्रेदं विचारणीयम् – “ **अधिकरणमाचार्यः किं न्याय्यं मन्यते ? “ यत्र कृत्स्नमाधारात्मा व्याप्तो भवतीति ” भाष्यादभिव्यापकमेव मुख्यमधिकरणम् , औपश्लेषिकवैषयिकयोस्तु गौणमेवाधारत्वम् ।**

---

[1079] **पतञ्जलिमहाभाष्ये १.३.११ ।**

[1080] **पतञ्जलिमहाभाष्ये ५.१.९६ ।**

[1081] **महाभाष्यप्रदीपे ६.१.७२ , पृ. ७२३ ।**

**तथा चोक्तं नागेशेनापि ' अभिव्यापकातिरिक्तं गौणमधिकरणं बोद्ध्यम्** [1082]" इति।

एवञ्चैतत् भेदातिरिक्तानां सामीपिकाद्यधिकरणानामेषु भेदत्रयेष्वेवान्तर्भावादधिकरणस्य त्रैविध्यमेव शास्त्रसम्मतम्।

सर्वासामेव प्रथमादिवभक्तीनां धर्मिवाचकत्वात् सर्वत्रैव प्रकृत्यर्थस्य प्रत्ययार्थेऽभेदसंसर्गेणान्वयः। एवञ्च " **अभेदसम्बन्धावच्छिन्नप्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिजन्योपस्थितिः कारणमिति कार्यकारणभावः** " इति।

तथाचोक्तं कौण्डभट्टेन " **अत्र सर्वप्रकृतिप्रत्ययार्थयोरभेदसंसर्गः, विभक्तीनां धर्मिवाचकत्वादिति** [1083]"। विभक्तीनां धर्मिवाचकत्वे एव सुपां कर्मादयोऽप्यार्था इति भाष्यं संगतं स्यात्, अन्यथा तत्र कर्मत्वादयो इति वदेत्। किञ्च तत्तद् विभक्तिविधायकानां " **कर्मणि द्वितीया**[1084], **कर्तृकरणयोस्तृतीया**[1085] " इत्यादिशास्त्राणां धर्मिवाचकत्व एव स्वारस्यं संगच्छते।

---

[1082] **वैयाकरणभूषणसारे सुबर्थनिर्णये, पृ.२११।**

[1083] **वैयाकरणभूषणसारे सुबर्थनिर्णये, का. २४।**

[1084] **पाणिनीयाष्टाध्याय्याम् २.३.२।**

[1085] **पाणिनीयाष्टाध्याय्याम् २.३.१८।**

# पञ्चमोऽध्यायः

# पञ्चमोऽध्यायः

## शक्तिस्वरूपविचारः

लोकेऽस्मिन् ' **गौरागच्छति** ' इत्यादिवाक्येभ्यो गवागमनरूपार्थप्रतीतिः , ' **गौः अश्व** ' इत्यादिशब्दश्रवणानन्तरञ्च गवाश्वादीनां प्रतीतश्च दृश्यते । किन्तु सर्वः शब्दः सर्वमर्थं न बोधयति , कश्चित् शब्दः कमपि विशेषार्थमेव बोधयति । यथा घट शब्दोच्चारणे घटरूपार्थस्यैव प्रतीतिर्भवति न तु पटरूपार्थस्य । तेन ज्ञायते शब्दार्थयोरस्ति कश्चन सम्बन्धः । अतः शब्दः स्वसम्बद्धमेवार्थमेव बोधयति । शब्दार्थयोः सम्बन्धः काव्यप्रकाशे[1086] अन्विताभिधानवादिनां मतमुपपादयता आचार्यमम्मटेन प्रमाणत्रयेण निर्धारितः ।

तस्यायमभिप्रायः बालकः पूर्वं प्रयोजकबृद्धेन उच्चरितं शब्दं शृणोति , तदनन्तरं प्रयोज्यबृद्धेन , क्रियमाणं घटानयनादिरूपं कार्यं दृष्ट्वा अनुमिनोति , ' **अयं प्रयोज्यबृद्धः , प्रयोजकवृद्धोच्चारितवाक्य-जन्यज्ञानवान् , तादृशचेष्टादिमत्त्वात्** ' । एवञ्च प्रयोजकबृद्धोच्चरितवाक्ये तादृशीं वाक्यार्थप्रतीतिमनुमानेन निश्चित्य , तदनन्तरं वाक्यवाक्यार्थयोः सम्बन्धमर्थापत्तिप्रमाणेन निश्चिनोति । तथाहि यदि अस्य वाक्यस्य अनेन वाक्यार्थेन सह सम्बन्धो न स्यात् , तदा तद्वाक्येन तादृशवाक्यार्थप्रतीतिर्न स्यादिति । पश्चाच्च अवापोद्वापाभ्यां शब्दार्थयोः सम्बन्धोऽपि निश्चीयते । तस्मात् प्रमाणत्रयेण शब्दार्थयोः सिद्धः सम्बन्धः ।

---

[1086] **शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।**
**श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥**
**अन्यथानुपत्त्या तु बोधेच्छक्तिं ।**
**अर्थापत्त्यावबोधेत् सम्बन्ध त्रिप्रमाणकम् ॥ - काव्यप्रकाशे चतुर्थोल्लासे ।**

स च सम्बन्ध क इति जिज्ञासायाम् , न तावत्संयोगः , तस्य द्रव्यमात्रवृत्तित्वात् , न्यायनये च शब्दस्याद्रव्यत्वात् ।

यस्य विद्यमानत्वे सति वस्तुद्वयोः विशेष्यविशेषणभावत्वं प्रतीयते तद्भवति सम्बन्धः । यथा- भूतलघटयोः संयोगवशाद् **" घटवद् भूतलम् "** इति विशिष्टबुद्धिर्जायते , अत एव संयोगो हि सम्बन्ध इत्यभिधा । व्युत्पत्तिवादे सम्बन्धविषये उक्तं—**" शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते "** इति [1087] । सम्बन्धः नाम - **" विशिष्टबुद्धौ विशेषणातिरिक्तत्वं सम्बन्धत्वम् "** इति । **' घटः '** इत्यस्मिन् विशिष्टज्ञाने **' घट '** इति विशेष्यः **' घटत्वम् '** इति विशेषणं उभयोः सम्बन्धस्तावद् **समवायः** । सम्बन्धाः अनेके भवन्ति, तेषां सर्वेषामपि द्विविधत्वेन भेदाः प्रदर्श्यन्ते— (१) **वृत्तिनियामकः** (२) **वृत्त्यनियामकः** ।

येन सम्बन्धेन आधाराधेयभावो भवति सः सम्बन्धः **वृत्तिनियामकः सम्बन्धः**। यथा-संयोग-समवाय-स्वरूप-कालिकादयः वृत्तिनियामकसम्बन्धाः । **' भूतले घटः' ' जले मत्स्यम् '** इत्यादिस्थलेषु संयोगसम्बन्धवशादाधाराधेयभावयोः बोधो ज्ञायते। **' घटे रूप '** इत्यादिस्थलेषु स्वरूपसम्बन्धः परिलक्ष्यते । **दैशिककालिकभेदेन** विभक्तः सः स्वरूपः । तयोः **दैशिकस्वरूपसम्बन्धः भावीयाभावीयरूपेण** विभज्यते । भावार्थैः विहितः तद्धितप्रत्ययैः निष्पन्नः पदैरभिहितः जातिभिन्नो धर्मो हि भावीयस्वरूपसम्बन्धे वर्तते । यथा - तद्घटे तद्घटत्वं ;

---

[1087] **व्युत्पत्तिवादे ।**

प्रमेये प्रमेयत्वं ; प्रतियोगिनि प्रतियोगित्वं ; सामानाधिकरण्यं समानाधिकरणे; अभावे अभावत्वं ; समवाये समवायत्वं ; भावे भावत्वं स्वरूपसम्बन्धेन वर्तते । " **घटाभाववत् गृहम्** " इति गृहादिषु **घटाभावोऽभावीयस्वरूपसम्बन्धः** इति । ' **इदानीं घटः**' ' **तदानीं घटः**' इत्यादिस्थलेषु एतत्कालादिभिः सह घटस्य यः आधाराधेयभावः प्रतीयते स **कालिकस्वरूपसम्बन्धः** ।

येन सम्बन्धेन आधाराधेयभावो न भवति परन्तु विशिष्टबुद्धेः ज्ञानं भवति सः सम्बन्धो **वृत्त्यनियामकसम्बन्धः** । यथा तादात्म्यं ; विषयता ; विषयिता ; प्रतियोगिता ; अव्याप्यत्वं ; जन्यत्वं ; जनकत्वं चेत्यादयः वृत्त्यनियामकसम्बन्धाः ।

हरिणा तदीये सम्बन्धसमुद्देशप्रकरणे सबन्धविषये वैशद्येनालोचितम् । दर्शनभेदेन समुद्देशभेदेन जातिद्रव्ये शब्दार्थयोः सम्बन्धत्वमवस्थाप्य शब्देन अर्थस्य अभिधाने हेतुर्भवति सम्बन्धः। नान्यथा सर्वमेव सर्वेणान्वेति इति । सम्बन्धं प्रतिपादयितुमाह—

**" ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपं च प्रतीयते ।**
**शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः॥[1088]" इति ।**

प्रयोक्तुः प्रयोगेण ध्वनिः प्रकाशितो भवति । शब्दैः उच्चरितैः त्रितयमवगम्यते आत्मीयं रूपं तथा शब्दस्य स्वरूपं, अर्थश्च हेयोपादेयोदासीनरूपेण फलसाधनः, अभिप्रायस्तु प्रयोक्तुरिति । न चैतदसति सम्बन्धे नियमेन घटत इति वास्तविकसम्बन्धावसायस्तथा नित्यो निश्चितो वा शब्दार्थयोः सम्बन्धः अभिधानियमनादनादेः अनादित्वाद्वा । अत एवाह शब्दार्थयोः सम्बन्धः

---

[1088] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं.१ , पृ. १२२ ।**

समवस्थितः यथार्थो निश्चितो वा । स्वभावत एव निरूढो न तु पुरुषेण निवेषितः इत्यर्थः ।

स्वरूपमन्तरङ्गमभिधेयमिति तेन मुख्यसम्बन्धोऽभिधाननियमः । अत एवान्यथापि पाठक्रमे सामर्थ्यात् स्वरूपे प्रथमं प्रतिपर्त्तिविभजनीया । वाच्यवाचकभेदेन सम्बन्धस्तावद्द्विविधः । तत्र वाच्यो नामार्थः, वाचको नाम शब्दः तयोः सम्बन्धः समवाय इति । मानसे शब्दः, अर्थः, स्फोटश्च विराजन्ते । मानसशब्देन वाह्यशब्दस्य सम्बन्धो भवति वाच्यवाचकभाव-सम्बन्धः । तत्रोच्यते समुद्देशे- **" ततोऽध्यस्तस्वरूपेऽर्थक्रियाकारिणीत्याभ्यामर्थस्वरूपाभ्यां शब्दस्य वाच्यवाचकभावः**[1089]**"** इति । प्रयोक्त्राभिप्रायेण तु सह कार्यकारणभावः ।

वाच्यवाचकभावलक्षणः सम्बन्धः प्रस्तुतः सर्वपार्षदं पुनरिदं शास्त्रमिति ये बाह्यार्थस्य शब्दवाच्यत्वं नेच्छन्ति तन्मतोपस्थापनार्थं वक्त्राभिप्रायरूढस्यैव शब्दार्थत्वे तत्र कार्यकारणभावसम्बन्धः । यथाहुः-

**" वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते ।**

**प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्॥ [1090]" इति ।**

योग्यताकार्यकारणभावभेदाच्च सम्बन्धपदार्थो द्विविधो व्यवतिष्ठते, योग्यताकार्यकारणभावयोः परमार्थः भवति अध्यासः,अध्यासस्तु पृथग्भागः । उपचारसमाविष्टं वस्तु शब्दार्थं यथा वक्ष्यति तथैव कार्यकारणभावोऽपि सम्बन्धस्वरूपस्य तु मुख्यमेव वाच्यत्वमित्याह -

**" प्रतिपत्तिभवत्यर्थे ज्ञाने वा संशयः क्वचित् ।**

**स्वरूपेषूपलब्धेषु व्यभिचारो न विद्यते॥" [1091]इति ।**

---

[1089] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे , पृ १२२ ।**

[1090] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे , पृ. १२३ ।**

अयं गौरिति संकेतः क्रियते, भेदेनैव घटशब्दस्यायमर्थ इति तु व्याख्यातृभूमिर्न व्यवहारदशा अत्रापि चायमिति शब्दाभेद एव । यदा गौरित्युच्यते तदा सास्नादिमानर्थो बोद्धव्यः। व्यवहारफलो हि संकेतः।

शब्दोऽपि वाचकोऽर्थमभिधीयमानतया प्रकाशयन्नात्मानमभिधयैव प्रकाशयतीत्युचितम् । न तु श्रोत्रेन्द्रियविषयभावोपगमनेन, अर्थसामानाधिकरण्यापन्नं च स्वरूपमर्थवत् परामृश्यमानं शब्दस्याभिधान-विषयोऽभिधेयम् । न तु वाचकतायामभिधीयमानतास्ति, परामर्शस्य परावागात्मनः कर्त्तृभूम्युपारूढस्य प्रकाशस्य वाचकत्वात् । तथाह— **" न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यता "** इति।

सम्बन्धः समवस्थितः स्वभावत एव निरूढः न तु सामयिक इत्युक्तम्। तस्य सद्भावे लिंगमाह—

**" अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते।**
**योगः शब्दार्थयोस्तत्त्वमित्यतो व्यपदिश्यते॥"[1092] इति।**

अस्यार्थस्यायं शब्दो वाचकोऽस्य शब्दस्यायमर्थो वाच्य इति षष्ठ्यन्यथानुपपत्त्यस्त्येव स्वाभाविकः शब्दार्थयोर्योग इति । असम्बन्धानां घटपदादीनामेवमन्योन्यपारतन्त्र्येण व्यवहारायोगात्। अत एव स्वाभाविकात् सम्बन्धात् शब्दार्थयोः तत्त्वं गौरयमर्थ इत्यभेदेन व्यवह्रियत इत्यर्थः। पदार्थानां स्वरूपमवधार्य तदनुगामिशब्दनिवेशेन लक्षणं क्रियते। तत्र स्वेन असाधारणेन धर्मेण स्वभावेनोपलक्षितस्य वाचकं प्रत्यायकम् ', अभिधानं षष्ठीव्यतिरिक्तं नास्ति, इदन्तया स्वरूपानवधारणात् । गुणा द्रव्याधीना अपि प्राधान्येन

---

[1091] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं.२ , पृ. १२३।**
[1092] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं.३ , पृ. १२७।**

शुक्लादिशब्देन कदाचिदुच्यन्ते, नैवं सम्बन्ध इति अत्यन्तग्रहणम् । तत्रोच्यते-

**“ नाभिधानं स्वधर्मेण सम्बन्धस्यापि वाचकम् ।**

**अत्यन्तपरतन्त्रत्वाद्रूपं नास्यापदिश्यते ॥[1093]” इति ।**

उपकार्योपकारकयोः उपकारप्रभावितः सम्बन्धोऽसम्बन्धानाम् उपकाराभावात् । धर्म इति नित्यपारतन्त्र्यमाह । धर्मित्वे स्वातन्त्र्यात् सम्बन्धान्तरप्राप्तेः अनवस्थापनात् । न च शक्तिरेव सम्बन्धः, शक्तीनामप्याधारपारतन्त्र्ये नियतकार्यजनने च सम्बन्ध एव नियामकः, गुणानामपि च द्रव्याश्रितत्वावस्थापकः सम्बन्ध एवेति परतन्त्राणामप्युपकारकत्वात् सर्वत्रानुमीयमानस्वरूपो नित्यपरतन्त्रः । तथा चोच्यते—

**“ उपकारात् स यत्रास्ति धर्मस्तत्रानुगम्यते ।**

**शक्तीनामपि सा शक्तिर्गुणानामप्यसौ गुणः॥”** [1094]इति ।

पारतन्त्रं सम्बन्धलक्षणमिति संयोगसमवाययोर्द्रव्यगुणादिषु तत्त्वात् सम्बन्धशब्दप्रवृत्तिः । तस्य सम्बन्धस्येव धर्मः पारतन्त्रलक्षणो ययोस्तौ तद्धर्माणौ । तथा च तस्य सम्बन्धस्येव शब्दस्तयोः, गौणः सम्बन्धशब्दः संयोगसमवाययोः, न तु मुख्यतस्तावेव सम्बन्धः। संयोगसमवायलक्षणः सम्बन्धः परैरिति कोऽतिशयः तत्प्रतिपादयितुमाह -

**“ तद्धर्मणोस्तु ताच्छब्द्यं संयोगसमवाययोः।**

**तयोरप्युपकारार्था नियतास्तदुपाधयः ॥ ” [1095] इति ।**

---

[1093] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं.४ , पृ.१२८ ।**

[1094] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं.५ , पृ.१२८ ।**

[1095] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं.६ , पृ. १२९ ।**

समवायादिनिमित्तानपेक्षया अत्रोच्चरितमात्रात् शब्दाद् अर्थप्रत्ययोत्पत्तेः अकृत्रिमाशक्तिरवसीयते। अर्थमात्रेण हि शब्दमात्रस्य अवियोगमप्रवृत्तसंकेता अपि प्रतिपद्यन्ते। तथा च योग्यता स्वाभाविकी सिद्धा, संकेतस्तु तामेव द्योतयति। तद्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षा ग्राहकता। न हि यत्नेनापि रूपे रसननिवेशः शक्यक्रियः। एवं गवार्थे घटशब्दनिवेशोऽसाधुः। तथा हि भाष्यम्—**" यो हि गामश्च इति ब्रूयान्न जातुचित् सम्प्रत्ययः स्यात् "** इति [1096]। हरिणा उक्तं -

**" इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥**[1097] **" इति।**

सम्बन्धशब्दो योग्यतालक्षणं सम्बन्धं योग्यतयैव प्रतिपादयति। एवं समवायशब्दोऽपि योग्यतयैवानादिसिद्धया स्वार्थप्रतिपादकः। तथा योग्यताशब्दोऽपि इति सर्वत्रास्य सम्बन्धस्य व्याप्तिः। अनादिसिद्धार्थविषयव्यापारस्य शब्दस्य वृद्धव्यवहारपरम्परापरपर्यायात् समयात् स्वाभाविक्येव योग्यता निश्चीयते, न तु समयमात्रादतथाभूतेऽपि तथाभावः समुचितः-

**" सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता।**

**समयाद्योग्यतासंविन्मातापुत्रादियोगवत्॥**[1098] **" इति।**

वैयाकरणनयेऽपि शब्दार्थयोर्भेदाभावेन [1099] संयोगस्यासम्भवात्। शब्दार्थयोरभेदः प्रतिपादितः हिन्दीमहाकविना तुलसीदासेनापि

---

[1096] **पतञ्जलिमहाभाष्ये।**

[1097] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं.२९, पृ. १४२।**

[1098]**भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य संबन्धसमुद्देशे सं. ३१, पृ.१४४।**

[1099] **अतएव ' अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रे अर्थी इति निर्देशो न कृतः पाणिनिना, अन्यथा शब्दार्थयोर्भेदे तु अर्थाच्चासन्निहिते इत्यनेन इनि ' प्रत्यये अर्थवत् इति निर्देशासङ्गतिः स्यात्।" २४।**

रामचरितमानसे । अभेदसम्बन्धोऽपि शब्दार्थयोर्न सम्भवति , अग्निशब्दोच्चारणे दाहाद्यापत्तिः । महाभाष्यकृता तु अभेदसम्बन्ध एव न स्वीकृतः अत्र एव राहोः शिरः इत्यत्र षष्ठीसिद्धये क्षणिकभेदः कल्पितः । सति अभेदसम्बन्धेऽपि षष्ठी इति सूत्रेण षष्ठी सिद्धा तत्र क्षणिकभेदकल्पना व्यर्थैव स्यात् । नापि समवायसम्बन्धः जातिप्रतियोगिकः शब्दानुयोगिकस्य , शब्दप्रतियोगिकगगनानुयोगिकस्यैव समवायस्य सम्भवेन जातिगगनातिरिक्तानां शब्दासम्बद्धत्वप्रसङ्गेन शब्दवेद्यत्वानुपपत्तेः ।

नापि तादात्म्यम् , अत्यन्तवैधर्म्यविशिष्टयोः शब्दार्थयोस्तदसम्भवात् । नापि भेदसहाभेदपर्यवसायि विलक्षणं तादात्म्यम् , तादृशतादात्म्यस्वीकारे प्रमाणाभावात् ।

नापि कालिकसम्बन्धः वर्तमानेन शब्देन अतीतानागतार्थयोर्बोधाभावप्रसङ्गात् । नापि दैशिकसम्बन्धः , विभिन्नदिक्षु स्थितयोरपि शब्दार्थयोः परस्परं बोध्यबोधकभावदर्शनात् ।

नापि स्वरूपसम्बन्धः – शब्दस्य स्वार्थमिव अर्थान्तरं प्रत्यपि स्वरूपविशेषात् । अतः शब्दार्थयोः सम्बन्धः क्लृप्तसम्बन्धव्यतिरिक्त इति सर्वैरेव मन्तव्यम् ।

स च सम्बन्ध तत्त्वविद्भिः वृत्तिरित्युच्यते । **वृत्तिस्तु शक्तिलक्षणाव्यञ्जनान्यत्मरुपा** [1100] **शक्तिलक्षणान्यतररूपा** [1101]

---

[1100] **मम्मटादिसाहित्यिकानां मतम् । ‘ अतएव वाच्यादयो तदर्थाः स्युः ’ इति कारिकायां वाच्यलक्ष्यव्यग्येति अर्थानां त्रैविध्यं प्रदर्शितं काव्यप्रकाशे द्वितीयोल्लासे ।**

[1101] **नैयायिकानां मतम् – वृत्तिश्च शक्तिर्लक्षणान्यतरसम्बन्धः । - न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे ।**

**शक्तिव्यञ्जनान्यतररूपा वेति विभिन्नदार्शनिकानां विभिन्नमतं वर्तते ।** [1102]

तत्र का नाम शक्तिरित्यत्र – [1103] नैयायिकैरभिधीयते ‘ **अस्माच्छब्दादयमर्थो बोध्यव्य इति अर्थविशेष्यिका** , ‘ **इदं पदम् इदमर्थं बोधयतु** ’ **इति शब्दविशेष्यिका वा ईश्वरेच्छा शक्तिः** । सा च [1104]आधुनिके नाम्नि अपि स्वीक्रियते एव , ‘ **एकादशेऽहनि पिता नाम कुर्यात्** ’ इति श्रुत्या तत्रापि ईश्वरेच्छायाः सत्त्वात् इति प्राचां मतम् ।

केषाञ्चिन्नैयायिकानां मते [1105] आधुनिकमात्रसंकेतिते नदीवृद्ध्यादिपदेषु न शक्तिः , अपि तु आधुनिकमात्रसंकेतितनद्यादिपदात् शक्तिभ्रमात् [1106]लक्षणया वा बोधः ।

---

**[1102] वैयाकरणानां मतम् – ‘ लक्षणा इति व्यवहारात् ’ वैयाकरणसिद्धान्तलघुमञ्जूषायाम् ।**
**सन्मात्रविषयिण्या भगवदिच्छायास्तीरादावपि सत्त्वात् शक्तिरेवेति भावः प्रभाटीकायाम् –वैयाकरणसिद्धान्तलघुमञ्जूषायाम् , पृ ९५ ।**

**[1103] शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । सा चास्माच्छब्दादयमर्थो बोध्यव्य इति ईश्वरेच्छारूपा - न्याय-सिद्धान्त-मुक्तावल्ल्यां शब्दखण्डे**

**[1104] आधुनिके नाम्नि शक्तिरस्त्येव - न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे ।**

**[1105] आधुनिके संकेतिते तु न शक्तिरिति सम्प्रदायः - न्याय-सिद्धान्त-मुक्तावल्ल्यां शब्दखण्डे ।**

**[1106] तथा सति शक्तिभ्रमं लक्षणग्रहं चान्तरेण आधुनिकसंकेतितनद्यादिपदच्छाब्दबोधो न स्यादिति भावः । - विलासिन्यां संस्कृतटीकायां न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे ।**

नव्यनैयायिकानां [1107] मते तु – इच्छासामान्यैव शक्तिर्न तु ईश्वरेच्छारूपा। तेन आधुनिकसंकेतितेऽपि अस्मदादीनाम् इच्छायाः सत्त्वात् तत्रापि शक्तिरस्त्येव।

एवं रीत्या नैयायिकैः प्रतिपादितं शक्तिस्वरूपं न समीचीनतामवहति , यतो हि प्राचां रीत्या ईश्वरेच्छारूपाशक्तिस्वीकारे आधुनिकनगरीग्रामनद्यादि-नामसु शक्तिर्न स्यात् , तत्र ईश्वरेच्छायाः अभावात्। तत्र शक्तिभ्रमात् लक्षणया वा बोधः इति कल्पनायां गौरवापत्तिः स्यात्।

नव्यरीत्या इच्छासामान्यरूपशक्तिस्वीकारे तु पटादिबोधेच्छयास्माभि-र्घटादिपदप्रयोगे घटादिपदानां पटादिरूपार्थनिरूपितशक्तिसत्त्वापत्तिः तथैव घटपदं पटरूपमर्थं बोधयतु इति इच्छायाः सत्त्वात्। एवञ्च इश्वरेच्छा रूपा , इच्छासामान्यरूपा वा शक्तिर्न सम्भवति।

किञ्च शक्तिग्राहकप्रमाणानि व्याकरणोपमानादीनि एव प्रतिपादयन्ति [1108]आचार्याः । तेषु शक्तिग्राहकेषु प्रधानभूतेन प्रयोजकप्रयोज्यबृद्ध-व्यवहारेण , नैयायिकाभिमतायाः शक्तेर्दुर्ग्रहत्वात्। तथाहि –

प्रयोजकप्रयोज्यवृद्धोच्चारितं पटमानयेत्यादिवाक्यमाकर्ण्य पटानयने प्रवृत्तं प्रयोज्यवृद्धमवलोकयन् बालकः पटानयनं , प्रवृत्तिजन्यं , चेष्टात्वात् मदीयस्तन्यपानादिचेष्टावत् , इत्यनुमानेन प्रयोज्यवृद्धस्य पटानयनजनिकां प्रवृत्तिमनुमाय , सा च प्रवृत्तिः , पटकर्मकानयनविशेष्यककार्यताज्ञानजन्या ,

---

[1107] **नव्यास्तु – ईश्वरेच्छा न शक्तिः , किन्तु इच्छैव , तेन आधुनिकसंकेतितेऽपि शक्तिरस्त्येवेत्याहुः- न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे।**

[1108] **शक्तिग्रह व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च । वाक्यस्यशेषात् , विवृत्तेर्वदन्ति , सान्निध्यतः सिद्धपदस्य वृद्धाः - न्याय-सिद्धान्त-मुक्तावल्यां शब्दखण्डे।**

प्रवृत्तित्वात् , मदीयप्रवृत्तिवदित्यनुमानेन प्रयोज्यवृद्धस्य घटकर्मकानयन-विशेष्यककार्यताज्ञानमनुमाय , तच्च कार्यताज्ञानम् , पटमानयेति वाक्यजन्य , तदन्वयव्यतिरेकानुविधायित्वात् , इत्यनुमानत्रयेण तत्र वाक्ये तादृशज्ञानजनकत्वमनुमिनोति । तदनन्तरमवापोद्वापाभ्यां पदेष्वपि पदार्थबोधजनकत्वं परिकल्प्य , यथा तत्तद्विषयासम्बद्धानामिन्द्रियाणां तत्तद्विषयकप्रत्यक्षजनकत्वं नोपपद्यते , तथैव अर्थैरसम्बद्धानां पदानामर्थबोधकत्वं कथं स्यादित्यनुपपत्तिं मनसि आदाय , अर्थबोधकत्वोपपादकत्वेन शब्दार्थयोः शक्तिरूपमेव सम्बन्धं निश्चिनोति ।

तथा च बोधजनकत्वान्यथानुपपत्त्या कल्प्यमानः शक्तिरूपः सम्बन्धः बोधरूपकार्योत्पत्तेः प्रागेवापेक्षते । परन्तु नैयायिकाभिमतस्य ईश्वरेच्छारूपसम्बन्धस्य तदानीमसिद्धत्वेन , अविद्यमानस्य च ज्ञातुमशक्यत्वेन , ज्ञातायाः एव शक्तेर्बोधजनकत्वेन , तदानीं नैयायिकाभिमतशक्तिज्ञानस्यासम्भवात् नार्थबोधजनकत्वमुपपादयितुमीष्टे , अत्माश्रयात् । तदुपपादकविधया इतरां च कल्पनां नार्हतीति , व्यवहारस्य शक्तिग्राहकत्वोच्छेदापत्तिः ।

किञ्च सम्बन्धो हि सम्बन्धिभ्यां भिन्नः सम्बन्धिद्वयनिष्ठः विशिष्टबुद्धिनियामकश्च भवति । अतः ईश्वरेच्छायास्तु सम्बन्धत्वमपि नोपपद्यते , इच्छायाः आत्मनि समवेतायाः शब्दार्थरूपसम्बन्धिद्वय-वृत्तित्वाभावात् । न च तन्निरूपितविषयतासम्बन्धेन वृत्त्यनियामकत्वात् । अत एव इच्छाविषयेऽपि घटे , इच्छावान् घटः इति प्रतीतिः न कस्यापि पुरुषस्य जायते ।

ननु ‘ **इच्छावान् घटः** ’ इति प्रतीत्यभावदर्शनात् विषयतासम्बन्धस्य आश्रयतानियामकत्वाभावेऽपि अकामैरपि वैयाकरणैः विषयतायाः

आश्रयतानियामकत्वमवश्यमेव स्वीकार्यम् । अन्यथा ‘ **आधारोऽधिकरणम्** ’ इति सूत्रे औपश्लेषिकाभिव्यापकवैषयिकभेदैः परिगणितेषु त्रिविधेषु [1109] आधारेषु वैषयिकाधारपरिगणनमनुचितं स्यात् । [1110]विषयतासम्बन्धावच्छिन्न आधेयतानिरूपिताधारताया एव वैषयिकाधारत्वात् । अत एव मोक्षे इच्छास्तीत्यत्र सप्तमी सिद्ध्यति । मोक्षे इच्छास्तीति वाक्यं विषयतासम्बन्धावच्छिन्न इच्छानिष्ठाधेयतानिरूपित मोक्षनिष्ठामाधारतामभिव्यनक्ति । एवञ्च तुल्यवित्तिवैद्यन्यायेन मोक्ष इच्छावान् इति प्रतीतिरपि वैयाकरणैरङ्गीकरणीयैव । एवं घटो ज्ञानवान् , घट इच्छावान् इत्यादिप्रतीतिरपि वैयाकरणसम्प्रदाये सम्भवति । तथा च पदेऽपि इच्छावान् प्रतीतिः ‘ **पदम् इच्छावान्** ’ कथं न भवेत् , भवेदिति चेत्तर्हि पदेऽपि इच्छायाः वृत्तित्वसम्भवे ईश्वरेच्छारूपा शक्तिरपि तत्र तिष्ठत्येवेति नैयायिकमतं समीचीनमेवेति चेन्न , एवमपि मुख्यविशेष्यतासम्बन्धस्य ‘ **घटपदं घटविषयकबोधं जनयतु** ’ इति पदमुख्यविशेष्यकेच्छायाः पदे आश्रयतानियामकत्वेऽपि अर्थे तादृशेच्छाश्रयताप्रतीतेरनुपपत्तिरेव , अर्थे तादृशेच्छाप्रतियोगिकसम्बन्धस्तु स्वविषयबोधविषयत्वनिष्ठविशेष्यता-निरूपितप्रकारतारूपपरम्परासम्बन्धः , तथा च तादृशपरम्परासम्बन्धस्य आश्रयतानियामकत्वं न स्वीक्रियते , अन्यथा ‘ रसो रूपवान् ’ इति प्रतीतेः प्रमात्वापत्तिः स्यात् ।

---

**[1109] औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा- सिद्धान्तकौमुद्यां कारकप्रकरणे ,पृ. १९६।**

**[1110] मोक्षे इच्छास्तीति – अत्र कर्तृभूतेच्छागतां सत्ताक्रियां प्रति मोक्षस्य विषयतासम्बन्धपुरस्कारेण इच्छाद्वाराधारत्वादधिकरणम् – बालमनोरमटीकायां कारकप्रकरणे ।**

एवं रीत्या ‘ **घटः घटपदबोद्धव्यः** ’ इत्यर्थविशेष्यकेच्छायाः अर्थे मुख्यविशेष्यतासम्बन्धेन विद्यमानत्वेऽपि तस्याः पदे वृत्तित्वभावेन तस्य सम्बन्धत्वमेव न सम्भवति ।

किञ्च विनिगमनाविरहेण , पदमुख्यविशेष्यकेश्वरेच्छायाः अर्थमुख्यविशेष्यकेश्वरेच्छायाः , बोधमुख्यविशेष्यकेश्वरेच्छायाः एतदर्थनिष्ठविषयता एतत्पदजन्यबोधनिरूपिता भवत्वित्यर्थनिष्ठविषयता-विशेष्यकेश्वरेच्छायाः वा , तादृगीश्वकृतेः , तादृगीश्वज्ञप्तेर्वा शक्तित्वापत्तिः । सर्वासां तासां शक्तित्वस्वीकारे तु महद्गौरवं स्यात् ।

किञ्च ‘ **प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि** ’ इति सूत्रे भगवताक्षपादेन परिगणितेषु प्रमाणचतुष्टयेषु अन्तर्भूतस्य शब्दप्रमाणस्यापि प्रमाणान्तरवत् प्रमेयसम्बन्धः आस्थेयः , असम्बद्धप्रमेयविषयक-प्रमाकरणत्वस्याव्यवस्थापत्तिग्रस्तत्वात् । प्रत्यक्षादि-प्रमाणान्तराणामिव शब्दप्रमाणस्यापि प्रमेयविषयकबोधजनकत्व , तद्घटितान्य एव प्रमेयसम्बन्धः कल्पनीयः । तस्माद् ईश्वरेच्छायाः कार्यसामान्यं प्रति कारणतायाः क्लृप्ततया पदैरर्थबोधरूपकार्यं प्रति कारणता अस्तु , परन्तु शब्दशक्तिविधया कारणत्वं नैव सम्भवति ।

तस्मात् नैयायिकाभिमतं शक्तिस्वरूपं समीचीनतां नावहति । ईश्वरेच्छारूपशक्तिस्वीकारे युक्तिविरोधस्य प्रतिपादितत्वात् ।

अत एवोक्तं धर्मराजाध्वरीन्द्रेण – ‘ **सा च शक्तिः पदार्थान्तरम्** ’[1111] इति । व्याख्यातं च आनन्दझामहाभागेन– ‘ **पादार्थान्तरं स्वतन्त्रपदभूता** ’ [1112] इति । न तु न्यायादिमत इव इच्छादिरूपा ।

---

[1111] **वेदान्तपरिभाषायाम् – आगमपरिच्छेदे पृ. १६१ ।**

शक्तेः पदार्थान्तरत्वे गौरवात् , तस्याः संकेतरूपता , इच्छारूपतैव वा युक्तेति शङ्का मनसि निधाय प्रत्यपादि धर्मराजाध्वरीन्द्रेण –

**“ सिद्धान्ते कार्यानुकूलशक्तिमात्रस्यैव पदार्थान्तत्वात् ” ।**[1113]

व्याख्यातञ्च आनन्दझामहाभागेन तत्रैव –

“ **कर्ममीमांसकमत इव वेदान्तमतेऽपि कार्यमात्रं प्रत्यनुकूलशक्तिमत्वेनैव लाघवात् कारणत्वमिति शक्तेर्जनकतावच्छेदकत्वम् । तथा च मृदादौ घटादिजनकतावच्छेदकशक्तेरिव पदेऽपि बोधजनकतावच्छेदकशक्तेरवश्यमेव स्वीकर्तव्यतया सङ्केतादिरूपशक्त्यन्यतरस्य कल्पनानर्थक्यात् गौरवपराहतत्वात्** [1114] ” इति ।

वेदान्तिना [1115] शक्तेः मुख्यवृत्तित्वमेव प्रतिपादितम् – तत्र मुख्यत्वञ्च वृत्तौ शक्त्या प्रतियोगिकत्वम् । तेन शक्यसम्बन्धरूपलक्षणायाः शक्तित्वं न स्यात् ।

शक्तिस्वरूपविषये मीमांसकैस्तु इत्थं प्रतिपादयत् अनुभाव्यानुभावकत्वं प्रत्याय्यप्रत्यायकभावापरपर्यायं शब्दार्थयोः सम्बन्धः । एतदुक्तं भवति पदानि , पदसमुदायात्मकानि वाक्यानि , श्रूयमाणानि अर्थविशेषं प्रत्याययन्ति । तत्र शब्दः अर्थस्य प्रत्यायकः , अर्थश्च शब्दस्य प्रत्याय्यः । अनुभाव्यानुभावकत्वव्यवहारस्तु पदार्थस्मृतावतिव्याप्तिवारणाय ।

---

1112 **भगवतीव्याख्यायां वेदान्तपरिभाषायाम् आगमपरिच्छेदे पृ. १६१ ।**

1113 **वेदान्तपरिभाषायाम् – आगमपरिच्छेदे , पृ. १६१ ।**

1114 **भगवतीव्याख्यायाम् आगमपरिच्छेदे पृ. १६१ ।**

1115 **तत्र शक्तिर्नाम पदानामर्थेषु मुख्या वृत्तिः – वेदान्तपरिभाषायाम् आगमपरिच्छेदे ।**

अत्रैक प्रश्नः जागर्ति – अर्थमनुभावयन् शब्दः केन सम्बन्धेन अर्थमनुभावयति ? सोऽयं शब्दः स्वोपपाद्यानुभावकत्वं पुरस्कृत्यैव अनुभावेन समर्थ इत्युच्यते चेत्तर्हि आत्माश्रयो दोषः स्यादिति चेत् ? अत्रोच्यते –

सर्वत्रैव कारणेषु कार्यजननानुकूला काचन शक्तिः स्वीक्रियते मीमांसकैः । सा च शक्तिः कारणरूपैव तां व्यवस्थापयत्पदार्थान्तरं वेति पक्षद्वयमस्ति । स्थिते चैवं व्यवस्थिततत्तदर्थबोधानुकूलां शक्तिमपेक्ष्य पदानि स्वमर्थमनुभावयन्ति , इति न क्श्चन आत्माश्रयदोषावकाशः । अर्थावबोधे जाते तु तेनैव शक्तिरूपः सम्बन्धः उन्नीयते ।

ननु एवं सम्बन्धज्ञानात् अर्थबोधः , अर्थबोधाच्च च सम्बन्धज्ञानम् , इति अन्योन्याश्रयत्वापत्तिरिति चेत् – परिह्रियते स दोषः ।

प्रमाणानां प्रमेयैः सह स्वीकृतो यः सम्बन्धः तस्य सम्बन्धस्यार्थप्रत्यायने गतिद्वयी दृश्यते – एकः सम्बन्धः स्वयमविज्ञात एव स्वरूपतः स्थितोऽपि अर्थावबोधे निमित्तो भवति । यथा प्रत्यक्षे चक्षुरूपसन्निकर्षः । इन्द्रियसन्निकर्षवृत्तान्तमजानतापि विस्फारितनेत्रेण पुरुषेण रूपोपलब्धिः दृश्यते ।

द्वितीयस्तु सम्बन्धः पूर्वगृहीतः , स्मृतिपथमागच्छन्नर्थावबोधे कारणं भवति । यथा अनुमानादौ अगृहीतव्याप्तिसम्बन्धेन , विस्मृतसम्बन्धेन वा पुरुषेण धूमेन वह्न्यनुमितिर्न दृश्यते , ज्ञात एव व्याप्तिसम्बन्धः अनुमितिं प्रति कारणमिति [1116]राद्धान्तः । एतेन शक्तिश्चेदनुभवजननानुकूला

---

[1116] **तथा हि येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता , पश्चात् स एव पुरुषः क्वचित् पर्वतादावविच्छिन्नमूलां धूमरेखां पश्यति , तदनन्तरं धूमो वह्निव्याप्यः , इत्येवं रूपं व्याप्तिस्मरणं तस्य भवति , पश्चाच्च , वह्निव्याप्यधूमवानयमिति ज्ञानं स**

शब्दार्थसम्बन्धस्तर्हि तामजानतोऽप्यव्युत्पन्नस्य शाब्दबोधः स्यात् , अजानतापि स्पृष्टो वह्निर्दहत्येवेति शङ्का निरस्ता । यत्र वस्तुप्रयोजिका शक्तिः सा ज्ञाननिरपेक्षैव तद्वस्तु प्रयुङ्क्ते । ज्ञानप्रयोजिका शक्तिः स्वयं ज्ञाता सत्येव स्वकार्याय प्रभवतीति विशेषः । **" अत एव शक्तिज्ञानसहकृतं पदज्ञानं पदार्थस्मृतिद्वारा शाब्दबोधं जनयतीति सार्वत्रिकः [1117] सिद्धान्तः"** ।

एवं स्थितेऽपि पूर्वप्रदर्शितः अन्योन्याश्रयस्तदवस्थ एवेति चेदत्रोच्यते - यदि सम्बन्धज्ञानानन्तरं शब्दार्थमवबुद्ध्य तदनन्तरं बोधान्यथानुपपत्त्या सम्बन्धकल्पना स्यात् , तदा तु स्यान्नाम अन्योन्याश्रय, किन्तु वस्तुस्थितौ तु वृद्धव्यवहाद्युपायैः शब्दार्थयोः सम्बन्धः [1118] निश्चीयते । निश्चिते सम्बन्धे ज्ञातसम्बन्धाः पुरुषाः शब्दश्रवणे अर्थं जानन्ति । अतः शब्दार्थसम्बन्धज्ञानस्य अर्थावबोधानधीनत्वात् , नान्योन्याश्रयापत्तिः ।

ननु यो वृद्धव्यवहारः प्रचलितः , येन बालो व्युत्पद्यते , सोऽपि व्यवहारः शब्दार्थसम्बन्धज्ञानसापेक्ष एव । स च सम्बन्धः ततः पूर्वेण , संव्यवहारेण , सोऽपि ततः पूर्वेणोच्यते , चेत्तर्हि , अनवस्थादोषः स्यादिति चेत् , अस्तु यथा बीजाङ्कुरादौ पूर्वं बीजस्योत्पत्तिः , अङ्कुरस्य वेति संशये उपस्थिताया अनवस्थायाः यथा अनादित्वात् समाधानं भवति , तद्वत् वृद्धव्यवहारपरम्पराया अपि अनादित्वात् नानवस्थादोषावहा ।

---

**एव परामर्श इत्युच्यते , तदनन्तरं पर्वतो वह्निमानित्यनुमितिर्जायते - न्यायसिद्धान्तमुक्तावल्याम् अनुमानखण्डे ।**

**[1117] पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः – न्यायसिद्धान्तमुक्तावल्ल्यां शब्दखण्डे ।**

**[1118] शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।**

एवञ्च अनुभाव्यानुभावकत्व , प्रत्याय्यप्त्यायकभावापरपर्यायः शब्दार्थयोः सम्बन्धः एव शक्तिरिति मीमांसकानां राद्धान्तः।

स च सम्बन्धः नित्यः अत एवोक्तं जैमिनिना - ' **औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं वादरायणस्यानपेक्षत्वात्** [1119]' इति।

शब्दस्यार्थेन सम्बन्धः , संज्ञासंज्ञिलक्षणो ज्ञाप्यज्ञापकभावरूपः। अर्थो ह्याकृतिरूपो नित्य इति वक्ष्यते। शब्दोऽपि नित्य एव इति इहैव स्थास्यति। तयोर्नित्ययोः शब्दार्थयोः सम्बन्धोऽपि स्वभावसिद्धो नित्य इत्युक्तं भवति।

भाषाशास्त्रदृष्ट्या तु अन्वयव्यतिरेकाभ्यां शब्दार्थयोः सम्बन्धो नित्यो न भवति। तथाहि ग्रीकभाषायां देव रूपेऽर्थे ' **ओस्** ' शब्दः प्रयुज्यते , आङ्गलभाषायाञ्च ' **गाड** ' शब्दः। ऋक्संहितायामपि ' **असुर** ' शब्दस्य कुत्रचिद् देवार्थे कुत्रचिच्च दानवार्थे प्रयोगो दृश्यते। ताण्ड्यमहाब्राह्मणे पुनरन्यत्र च दानवार्थे देवशब्दस्य प्रयोगो दृश्यते। पारसीकानां धर्मग्रन्थे आवेस्ताख्ये ' द एव ' शब्दस्य देवसमकक्षस्य सकृद्देवार्थत्वमन्यत्र च दानवार्थत्वं लभ्यते। वेदे श्वेतार्थे प्रयुक्तस्य ' शिति ' शब्दस्य लोके कृष्णार्थे प्रयोगो दृश्यते। अतः शब्दार्थयोः सम्बन्धो नित्यो न भवतीति भाषाशास्त्र वदां स्वरसः।

अतः सांकेतिक एव शब्दार्थसम्बन्धः, सोऽपि संकेतितोऽर्थः समये समये परिवर्तते।

साहित्यिकानां मतेऽपि संकेत एव शक्तिः। स च संकेत ईश्वरकृतः , आधुनिको वा। अत एवोक्तं मम्मटेन – ' **संकेतितश्चतुर्भेदो**

[1119] **आचार्येण जैमिनिना।**

**जात्यादिजातिरेव वा**[1120] ' तत्र संकेतितेत्यत्र ' **कर्मणि क्त प्रत्ययः तथा च संकेतविषयः , शक्य इत्यर्थः । स च संकेत रूप एव ।** ' [1121] इति ।

सा च शक्तिः भेदाभेदरूपमिति सांख्ययोगस्याभिप्रायः । तत्र भेदः पारमार्थिकः , अभेदस्तु काल्पनिक एव ।

सौगतानां मते तु शब्दानामर्थैः सह यत्तादाम्यम् , सा एव शक्तिः । एवञ्च यस्य शब्दस्य येनार्थेन सह तादाम्यम् , स शब्दः तदर्थविषयकबोधं जनयति ।

परन्तु मतमिदं न समीचीनतामर्हति – यतो हि शब्दार्थयोस्तादाम्यमेव शक्तिरित्युच्यते , तर्हि तत्र तादाम्यं नाम तद्भिन्नत्वे सति तदभेदप्रकारकारोपविशेष्यत्वरुपं वाच्यम् । अन्यथा अग्निशब्दोच्चारणे मुखदाहापत्तिः , गुडशब्दोच्चारणे मधुरिमापत्तिश्च स्यात् ।

एवञ्च तादाम्यघटकभेदस्याभेदस्य वा सम्बन्धत्वं न सम्भवति । भेदस्य सम्बन्धता तु न क्वचिदपि दृष्टा । अभेदस्यापि सम्बन्धत्वं न सम्भवति , तस्य प्रतियोग्यनुयोगिभिन्नत्वाभावेन सम्बन्धिद्वयभिन्नत्वा-भावात् ' । [1122]

ननु स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वरूपस्य अभेदस्य प्रतियोग्यनुयोगिवित्तितद्व्यक्तित्वा-साधारणधर्मरूपतया सम्बन्धिद्वयभिन्नत्वेन सम्बन्धत्वं सम्भवत्येवेति चेत् , तथाहि अभेदस्य सम्बन्धत्वस्वीकारे , अभेदसम्बन्धेन नीलविशिष्टो घटः

---

[1120] **मम्मटैः काव्यप्रकाशे द्वितीये उल्लासे ।**

[1121] **काव्यप्रकाशे द्वितीयोल्लासे ।**

[1122] **सम्बन्धो हि सम्बन्धिभ्यां भिन्नः उभयाश्रितः – वैयाकरणसिद्धान्तलघुमञ्जूषायां शक्तिनिरूपणे ।**

इत्यर्थेऽपि नीलो घटः इतिवत् नीलस्य घटः इति प्रयोगः स्यात् , अभेदस्य सम्बन्धत्वे , तत्र सम्बन्धसामान्यविवक्षायां **' शेषे षष्ठी** [1123]**'** इति सूत्रेण षष्ठ्याः दुर्वारत्वात् ।

किञ्च कृत्तद्धितसमासेभ्योः सम्बन्धाभिधानं भावप्रत्ययेनेति सर्वसम्मतया व्युत्पत्त्या यथा राजपौरुषमित्यादौ राजपुरुषयोः स्वस्वामिभावादिसम्बन्धप्रतीतिर्भवति , तद्वत् नीलघटत्वमित्यत्र नीलघटयोरभेदप्रतीतिः स्यात् , न चैतद् प्रतीतिर्जायते , एतावताभेदस्य सम्बन्धत्वं न स्वीक्रियते वैयाकरणैः । अत एव राहोः शिरः[1124] इत्यत्र दिवसात्मककालावच्छिन्नस्य शिरसो राहुपदबोध्यता , घटिकात्मककालावच्छिन्नस्य तु तस्य शिरः पदबोध्यतेति औपाधिकावयवावयविभावपरिकल्प्यावयवावयविभावसम्बन्धे षष्ठी उपपादिता भगवता पतञ्जलिना । अभेदस्य सम्बन्धत्वे षष्ठ्याः सूपपाद्यत्वे तत्रौपाधिकावयवावयविभावकल्पना व्यर्थैव स्यात् । तस्मादभेदस्य सम्बन्धत्वमाचार्यमतविरुद्धम् ।

नीलो घट इत्यत्र प्रकारतावच्छेदकः सम्बन्धस्तु वाक्यनिष्ठशक्तिभास्यः इतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभाव एव ।

अयम्भावः वैयाकरणैः वाक्ये , पदार्थयोः पदार्थानां वा परस्परं यः सम्बन्धः तन्निरूपिता शक्तिः स्वीक्रियते[1125] । अत एव तेषां मते वाक्यस्फोट इति प्रसिद्धिः । एवञ्च विशेष्यविशेषणभावरूपसम्बन्धो वाक्यसामान्य-

---

[1123] **पाणिनीयाष्टाध्याय्यां २.३.५० ।**

[1124] **यद्यप्यभेदो न संसर्गः , राहोः शिरः इत्यादावौपाधिकभेदेन षष्ठ्युपपादनस्य भाष्ये कृतत्वात् – शब्दरत्ने कारकप्रकरणे प्रतिपदिकार्थसूत्रस्योपरि ।**

[1125] **इतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभावरूपसंसर्गस्य तेन शब्देनाभिधानान्न दोष इति बोध्यम् – शब्दरत्ने प्रातिपदिकार्थसूत्रे ।**

वाच्यः । स एव विशेषणविशेष्यभावरूपः [1126] सम्बन्धः तात्पर्यार्थपदेन उक्त काव्यप्रकाशे [1127] । तथाहि प्रथमान्तेतरप्रकारताप्रयोजक-पदजघटितवाक्यजन्यबोधे वाक्यसामान्यशब्दस्य विशेष्यविशेषणभावरूप-सम्बन्धस्य स्वस्वामिभावादिसम्बन्धावच्छिन्नत्वेन संसर्गता , प्रथमान्तप्रकारताप्रयोजकपदघटितवाक्यजन्यबोधे तु इतरसम्बन्धा-नवच्छिन्नत्वेन तस्य संसर्गतेति व्यवस्था।

अभेदसंसर्गः प्रथमावाच्य इति तु न वक्तव्यम् , धान्येन धनवान् , नीलं घटं पश्येत्यादावप्यभेदस्य तृतीयाद्वितीयादिभिः प्रतीतिर्दर्शनात्।

ननु विशेष्यविशेषणभावरूपसंसर्गस्य वाक्यार्थसामान्यतया नीलो घट इत्यत्र तादृशसंसर्गस्य विद्यमानत्वेन षष्ठी कथं न स्यादिति चेन्न , घटपटत्वादिपदार्थपदार्थतावच्छेदकयोः समवायसंसर्गस्य एवोक्तविशेष्य-विशेषणभावरूपसंसर्गस्य शेषत्वाभावेन षष्ठ्याप्राप्तेः । शेषे षष्ठी इति सूत्रेण शेषे सम्बन्धे एव षष्ठीविधानात्।

भूषणसारकृन्मते **" बोधजनकतैव शक्तिः[1128]" इति** । सा तु बोधकारणतानादिभूता । यथा- घटादिविषयकचाक्षुषादिज्ञाननिरूपिता इन्द्रियनिष्ठा योग्यता ( करणता ) अनादिस्तथार्थविषयकज्ञाननिरूपिता शब्दनिष्ठापि योग्यता ( कारणता ) अनादिरेवेति कौण्डभट्टानामभिप्रायः ।[1129]

---

[1126]**तत्र वाक्यस्फोटो मुख्यो लोके तस्यैवार्थबोधकत्वात्तेनैवार्थसमाप्तेश्च – वैयाकरणसिद्धान्तलघुमञ्जूषायाम्।**

[1127] **तात्पर्यार्थोऽपि केषुचित् – काव्यप्रकाशे द्वितीयोल्लासे २५।**

[1128] **तथा शब्दानामपि अर्थैः सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः । वैयाकरणभूषणसारे शक्तिनिर्णये , पृ. २६७।**

[1129] **इन्द्रियाणां स्वविषयेष्वनादियोग्यता यथा।**

शब्दनिष्ठा बोधकारणता यद्यनादित्वविशिष्टा , तदा एतत्कालिकपित्र्यादिसंकेतविषये देवदत्तादिपदेऽनादिबोधकारणत्वाभावात् , तेन देवदत्तादिविषयको बोधो न स्यात् , यदि देवदत्तादिपदेऽप्यनादित्वविशिष्टा बोधकारणता स्वीक्रियते , तदा पित्रादीनां संकेतज्ञानेऽपि शाब्दबोधोत्पत्तिः स्यात् । न चाऽनादित्वं शक्तिशरीरे न विशिष्टं , किन्तु प्रसिद्धमात्रबोधकम् , तथा देवदत्तादिपदे संकेतज्ञानाभावे तादृशशक्तेरप्रसिद्धत्वात् शक्तिसत्त्वेऽपि न शाब्दबोधापत्तिरिति वाच्यम् , लाक्षणिकशब्देऽपि लक्ष्यार्थनिरूपितशक्तित्वापत्तेः । तत्र गंगादिपदे प्रसिद्धबोधकारणत्वसत्त्वात् ।

संकेतस्य यदि हेतुत्वं स्वीक्रियते , तर्हि केन रूपेण संकेतः स्वरूपेण हेतुः , सामान्यतः ज्ञातरूपेण , विशेषरूपेण ज्ञातो वा । [1130]नाद्यः संकेतस्य स्वरूपतो हेतुत्वे अज्ञातसंकेतादपि विडौजादिशब्दात् इन्द्रादिरूपार्थबोध-प्रसङ्गः ।

संकेतः सामान्यतो ज्ञातः सन् हेतुरिति चेत्तदा , प्रमेयत्वेन ज्ञातेऽपि संकेते शाब्दबोधापत्तिः । विशेष्यरूपेण ( संकेतत्वेन ) ज्ञातः सन् हेतुश्चेत्तदा , संकेतत्वेन तज्ज्ञानरहितानामपि व्यवहारिकपदार्थमात्रज्ञानवतां पामराणां बोधजनकत्वमात्रग्रहे शाब्दबोधोदयात् व्यभिचारः स्यात् । एवञ्च त्रयाणामपि पक्षाणामसम्भवात् , संकेतस्य शक्तित्वं न सम्भवति , अतो बोधजनकतैव हेतुः । अर्थबोधजनकतावच्छेदकत्वेन हेतुत्वस्वीकारापेक्षया बोधजनकताया एव हेतुत्वे लाघवम् ।

---

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता यथा ॥- वैयाकरणभूषणसारे शक्तिनिर्णये पृ. २६८ ।**

[1130] **संकेतो न स्वरूपेण हेतुः , अगृहीतसंकेतादर्थबोधप्रसङ्गात् – वैयाकरणभूषणसारे शक्तिनिर्णये , पृ. २६८ ।**

ननु ‘ **इदं पदमिदमर्थं बोधयतु** [1131]’ इति पदविशेष्यकार्थविषयकबोध-जनकत्वप्रकारकज्ञानस्य पदार्थोपस्थितिं प्रति कारणत्वात् , यथा बोधजनकता शक्तिः स्वीक्रियते , तद्वद् ‘ **अस्माच्छब्दादयमर्थो बोध्यव्य** [1132]’ इति अर्थविशेष्यकशब्दजन्यबोध-विषयत्वप्रकारकज्ञानस्यापि पदार्थोपस्थितिं प्रति कारणत्वात् , पदजन्यबोधविषयताया अपि शक्तित्वं कुतो न स्वीक्रियते , इति चेत् , अत्रोच्यते उभयरूपशक्तिस्वीकारे अपि अस्माकमिष्टापत्तिरेव । न चोभयविधशक्तिस्वीकारे व्यभिचारः स्यात् तथाहि यत्र पदविशेष्यकबोध-जनकतारूपशक्तिज्ञानाद् बोधः तत्र अर्थविशेष्यकबोधविषयतारूपशक्ते-रभावः , यत्र चार्थविशेष्यकबोधविषयतारूपशक्तिज्ञानाद् बोधस्तत्र पदविशेष्यकशक्तिज्ञानाभाव एवञ्च कार्यजनकत्वे सति कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगिकत्वरूपं कारणत्वं कुत्रापि शक्तौ न स्यात् , बोधरूपकार्यसत्वेऽपि उभयोरभावस्य सत्त्वादिति वाच्यम् , अव्यहितोत्तरत्वनिवेशेनादोषात् ।

तथाहि पदविशेष्यकशक्तिज्ञानाव्यवहितोत्तरजायमानबोधं प्रति अर्थविशेष्यकशक्तिज्ञानं कारणम् , अर्थविशेष्यकशक्तिज्ञाव्यवहितोत्तर-जायमानबोधं प्रति अर्थविशेष्यकशक्तिज्ञानं कारणमिति विवेकः । तस्मादर्थबोधजनकता शक्तिः , संकेतस्तु तद्ग्राहकः , अतः संकेतज्ञानाभावे शाब्दबोधोपपत्तिः न स्यात् । [1133]

---

**[1131] वैयाकरणभूषणसारे शक्तिनिरूपणे – पृ. २६९ ।**

**[1132] परमलघुमञ्जूषायां शक्तिनिरूपणे , पृ. २३ ।**

**[1133] इदञ्चार्थधीजनकत्वं पित्रादिसंकेतज्ञानादेव गृह्यते , अतस्तज्ज्ञानात् पूर्वं न बोधः - वैयाकरणभूषणसारे शक्तिनिर्णये , पृ.२७१ ।**

ननु बोधजनकत्वस्य शक्तित्वाङ्गीकारे अपभ्रंशेभ्यः गगर्यादिशब्देभ्योऽपि बोधदर्शनेन बोधजनकतारूपा शक्तिस्तत्रापि स्यात् , एवञ्च तेषामपि शक्तत्वात् साधुतापत्तिः , शक्तस्यैव साधुत्व-प्रतिपादनात् ।[1134] तस्मात् बोधजनकता न शक्तिरिति चेदत्रोच्यते -

गगर्यादिशब्दाः साक्षाद्वाचकाः न भवन्ति , अपि तु [1135]साधुशब्दमनुमाय बोधकाः भवन्ति । अतो यथा लिपीनां न वाचकत्वम् , अपि तु केवलशब्दस्मरणे एवोपयोगो भवति , तद्वदपभ्रंशानामपि साधुशब्दस्मारकत्वमेव , न तु तेषां वाचकत्वमिति । अत एवोक्तं शास्त्रदीपिकायाम् –

**“ यद्यपि अमीषामवाचकत्वं , यद्यपि च मुख्याभावे गौणलाक्षणिकयोरप्यसम्भवस्तथापि वाचकताशक्तिजन्यतया मूलशब्दो-पस्थापकत्वेन प्रत्यायकत्वं भविष्यति ”** [1136] इति ।

अत्रोपस्थापकत्वेनेत्यस्य स्मारणेन इत्यर्थः । भर्तृहरिणापि अभाणि-

**“ ते साधुष्वनुमानेन , प्रत्ययोत्पत्तिहेतवः ।**
**तादाम्यमुपगम्येव शब्दार्थस्य प्रकाशकः ॥**
**न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।**
**ते यतः स्मृतिशास्त्रेण तस्मात् साक्षादवाचकाः ॥**

---

[1134] प्रयोगोत्पत्त्यशास्यत्वाच्छब्देषु न व्यवस्था स्यात् इति सूत्रे अनादिवाचकत्वं साधुत्वं तद्विपर्ययश्च साधुत्वमिति ।

[1135] असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।
वाचकत्वविशेषेऽपि नियमः पुण्यपापयोः ॥ - भूषणसारे शक्तिनिर्णये का.सं. ३८ , पृ. २८२ ।

[1136] शास्त्रदीपिकायाम् ।

**अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते ।**

**अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥**

**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।**

**तेन साधु व्यवहितः कश्चिदर्थोऽभिधीयते ॥ "** [1137] **इति ।**

एवञ्च पक्षेऽस्मिन् अपभ्रंशानां साक्षादवाचकत्वम् , यद्यपि शक्तिकल्पेषु मुख्यो वृद्धव्यवहारस्तेन च अपभ्रंशानामपि वाचकत्वं सिध्यति , तथापि देशभेदेन भिन्नेष्वपभ्रंशेषु शक्तिकल्पने गौरवम् , संस्कृतस्य च सर्वत्रैकानुपूर्वीकत्वेन बोधकतायां लाघवात् तत्रैव शक्तिकल्पनमुचितम् ।

कौण्डभट्टास्तु अपभ्रंशानामपि वाचकत्वमविशेषेण स्वीकुर्वन्ति[1138] । किन्तु साधुशब्दप्रयोगे तेनार्थबोधे च पुण्यः , अपभ्रशानां प्रयोगे च अधर्म इति भेदः । यदि अपभ्रशानाम् अशक्तत्वं स्यात् , तर्हि ततो बोध एव न स्यात्, दृश्यते तु बोधः , अतस्तत्रशक्तिरवश्यमेव स्वीकर्तव्या । साधुशब्दस्मरणात् तत्र बोध इति तु न वक्तव्यम् , साधुशब्दज्ञानवतां पामराणामपि ततो बोधदर्शनात् ।

भाष्यकृतापि शब्दापशब्दाभ्याम् अर्थप्रतीतिः समानरुपेणैव स्वीकृता [1139]।

**नागेशैरपि अपभ्रंशेषु शक्तिः प्रतिपादिता [1140]।**

---

[1137] **भर्तृहरिवाक्यपदीयब्रह्मकाण्डे १५० – १५३ , पृ. १५७-१५८ ।**

[1138] **वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः – का. ३० वैयाकरणभूषणसारे शक्तिनिर्णये ।**

[1139] **समानायामर्थावगतौ शब्देन चापशब्देन च । तत्रधर्मनियमः , क्रियते शब्देनैवार्थोऽभिधेयो , नापशब्देन – महाभाष्ये पश्पशाह्निके ।**

[1140] **सा च शक्तिः साधुष्विववापभ्रंशेष्वपि शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात् । वैयाकरणसिद्धान्तलघुमञ्जूषायां शक्तिनिरूपणे ।**

तत्र शक्तिभ्रमात् बोध इति तु न वक्तव्यम् , अपभ्रंशानां बोधकत्वस्याबाधेन शक्तिग्रहस्य भ्रमत्वप्रतिपादनासम्भवात् । औत्तरकालिकबाधज्ञानविषयत्वस्यैव भ्रमात् ।

न्यायभाष्यकारोऽपि " **आप्तोपदेशः शब्दः** " इति सूत्रे " **अर्थसाक्षात्कारवानाप्तः सः यथादृष्टार्थं बुबोधयिषया यं प्रयुङ्क्ते स प्रमाणशब्दः** [1141] " इति ऋष्यार्यम्लेच्छानां समानमाप्तलक्षणम् इत्युक्तवान् । तत्र म्लेच्छशब्दस्य अपशब्दवक्ता इत्यर्थः ।

एवञ्चापशब्दवक्तुरपि तुल्यार्थसाक्षात्कार उक्तः , अतः तेषां मतेऽपि अपभ्रंशेषु शक्तिरस्त्येव ।

ननु अपभ्रंशेषु शक्तिस्वीकारे आलंकारिकैरुक्तम् , च्युतसंस्कृतेर्दोषत्वं न स्यात् , तत्र शाब्दबोधाजनकत्वस्वरूपबीजाभावात् इति चेदत्रोच्यते –

च्युतसंस्कृतेः दूषकताबीजं शाब्दबोधाजनकत्वं नास्ति , अपि तु विप्रसभायां चाण्डालदर्शनेन यथा उद्वेगो भवति , तद्वद् साधुशब्देषु अपशब्दं दृष्ट्वा सहृदयोद्वेगः जायते , स उद्वेग एव तत्र दूषकतायाः कारणमिति प्रतिपादितं नागेशेन [1142]मञ्जूषायाम् ।

न चैवमपभ्रंशेषु शक्तिस्वीकारे तेषामपि साधुतापत्तिरुत्याशङ्क्य परिष्कृतं साधुत्वमपि तत्रैव वैयाकरणसिद्धान्तलघुमञ्जूषायाम् –

" **साधुत्वं च व्याकरणव्यङ्ग्योऽर्थविशिष्टशब्दनिष्ठपुण्य-जनकतावच्छेदको जातिविशेषः** " [1143] इति ।

---

[1141] **सूत्रे -१.१.७**

[1142] **काव्ये च्युतिसंस्कृतदोषस्य दूषकताबीजं तु साधुपदसमुदायमध्येऽसाधुपददर्शनेन विप्रसभायां चाण्डालदर्शनेन सहृदयोद्वेग एवेति बोध्यम् – वैयाकरणसिद्धान्तलघुमञ्जूषायां शक्तिनिरूपणे ।**

[1143] **वैयाकरणसिद्धान्तलघुमञ्जूषायाम् ।**

भाष्यकृता अपि भणितम् “ **एकः** [1144]**पूर्वपरयोरिति सूत्रे – एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति** ” इति। [1145]

तस्मादपभ्रंशेषु शक्तिस्वीकारे नास्ति काचन विप्रतिपत्तिः अतः बोधजनकतायास्तत्र विद्यमानत्वेऽपि क्षत्यभावात् बोधजनकतैव शक्तिरिति कौण्डभट्टस्याभिप्रायः।

नागेशास्तु बोधजनकत्वघटितेश्वरेच्छायाः बोधजनकतायाः वा शक्तित्वं न स्वीकुर्वन्ति । भणितञ्च तैः परमलघुमञ्जूषायाम् – “ **इच्छायाः सम्बन्धिनोराश्रययतानियामकत्वाभावेन सम्बन्धत्वासम्भवात्** [1146]” इति।

अयम्भावः इच्छायाः शक्तित्वं न सम्भवति , यतो हि शब्दर्थयोः सम्बन्ध एव शक्तिः। इच्छाया सम्बन्धत्वमेव न सम्भवति। सम्बन्धस्य [1147]उभयवृत्तित्वमावश्यकं भवति। यथा- घटवद्भूतलमित्यत्र संयोगः सम्बन्धः स च भूतलघटभिन्नः , स्वरूपसम्बन्धेनोभयवृत्तिः घटनिरूपितसंयोगाश्रयं भूतलमिति विशिष्टबुद्धिनियामकश्च। तद्वद् घटशब्दो घटरूपार्थो वा इच्छावान् इति प्रतीतिर्न भवति।

विषयताया आश्रयतानियामकत्वाभावेनेच्छाया उभयवृत्तित्वाभावेऽपि विद्यते , विषयताया आश्रयतानियामकत्वे तु ‘ **घट इच्छावान्** ’ इति अनुभवविरुद्धा प्रतीतिः स्यात् । अतः उभयवृत्तित्वाभावात्

---

1144 **पाणिनिसूत्रे अष्टाध्याय्यां ६.१.८४।**

1145 **पातञ्जलमहाभाष्ये पस्पशाह्निके।**

1146 **नागेशेन परमलघुमञ्जूषायां शक्तिनिरूपणे , पृ.२६।**

1147 **सम्बन्धो हि सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकत्वम् – परमलघुमञ्जूषायां शक्तिविचारे पृ. २६ ।**

विशिष्टबुद्धिनियामकत्वाभावाच्चेच्छायाः सम्बन्धत्वाभावे सिद्धे तस्याः शक्तित्वाभावोऽपि सुतरां सिद्ध्यति।

किञ्च शक्तिग्राहकशिरोमणिना प्रयोजकप्रयोज्यवृद्धव्यवहारेण बोधजनकत्वस्य , बोधजनकत्वघटितेश्वरेच्छायाः वा शक्तित्वं दुर्लभम् । तथाहि प्रयोजकप्रयोज्यवृद्धव्यवहारमवलोकयता बालकेन प्रयोजकवृद्ध-वाक्यानन्तरं प्रयोज्यवृद्धव्यवहारस्य प्रवृत्त्य तज्ज्ञानम् , ' अयं प्रयोज्यवृद्धः , प्रयोजकवृद्धवाक्यजन्यज्ञानवान् तादृशप्रवृत्तिमत्त्वात् अनुमिनोति । ज्ञानस्य च कारणत्वेन शब्दमेव गृहीत्वा असम्बद्धस्य कारणत्वानुपपत्त्या शब्दार्थयोः शक्तिरूपसम्बन्धमवधारयति।

एवञ्च बोधजनकत्वानुपपत्तिज्ञानेन कल्प्यमानायाः शक्तेः बोधजनकत्वरूपत्वे स्वेनैव स्वस्यैवोपपादनात् आत्माश्रयः दोषः।

अयम्भावः शाब्दबोधात् प्राक् तत्कारणीभूतायाः[1148] शक्तेः ज्ञानमावश्यकम् । बोधजनकत्वस्य तद्घटितस्य वा शक्तित्वे तु बोधोत्पत्तेः प्राक् ' **बोधजनकत्वाभाववदिदं पदम्** ' इति निश्चयसत्त्वेन बोधजनकत्वघटितेच्छात्मकस्य बोधजनकत्वस्य वा शक्तिपदार्थस्य ज्ञानमसम्भवि तद्वत्ताज्ञानं प्रति तदभाववतानिश्चयस्य प्रतिबन्धकत्वात्।

किञ्च अर्थविषयकशाब्दबोधं प्रति शब्दः कारणम् । तथा च विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे शक्तिसम्बन्धेनैव शब्दस्य बोधजनकता स्यात् " **विषयतासम्बन्धेन शाब्दबोधं प्रति शक्तिसम्बन्धेन शब्दः कारणम्** " इति कार्यकारणभावः । तथा च शब्दनिष्ठबोधजनकतायाः बोधजनकत्वरूपशक्तेरवच्छेदकत्वं दुरुपपादं स्वस्यैवस्वावच्छेदकत्व आत्मा आश्रयात्।

---

[1148] **शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी। न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे का.सं.८१।**

केषाञ्चिदपि प्रमाणानामसम्बद्धत्वे प्रमेयविषयकबोधजनकत्वं न स्यात् , अतः सर्वेषामेव प्रमाणानां प्रमेयेण सह सम्बन्धः कल्प्यते सर्वैरेव। सर्वेषामेव प्रमाणानां बोधजनकत्वातिरिक्तसम्बन्धेनैव प्रमेयसम्बन्धानां कारणत्वं दृश्यते , अतः शब्दस्याप्यर्थेन सह जनकत्वातिरिक्त एव सम्बन्धः परिकल्पनीयः । बोधजनकत्वस्यैव सम्बन्धत्वे तु " **धूमात् बह्निज्ञानं जायताम्** " इतीच्छाविषयत्वस्य बोधजनकत्वस्य वा हेतुसाध्ययोः सम्बन्धत्वे व्याप्त्युच्छेदापत्तिः स्यात् ।

" **दण्डात् घटो जायताम्** " इतीच्छाविषयत्वमेव दण्डादौ कारणतेत्यन्येषां लोके प्रसिद्धानां कारणत्वं न स्यात् । तस्मात् बोधजनकत्वरूपा बोधजनकत्वघटितेच्छारूपा वा शक्तिः न सम्भवति , अतः शब्दार्थयोः " **सम्बन्धान्तरमेव**[1149]" शक्तिः वाच्यवाचकभावपरपर्याया । तद्ग्राहकञ्चेतरेतराध्यासमूलकं तादात्म्यम् ' , तच्च संकेतः । यद्यपि " **अस्माच्छब्दादयमर्थो बोद्धव्यः**[1150] " इतीच्छात्मकः संकेतः प्रसिद्धः तथापि शाब्दोपपत्तये कल्प्यमानस्य संकेतस्य विनिगमनाविरहेण तादात्म्यरूपत्वेऽपि नास्ति काचन विप्रतिपत्तिः । उक्तञ्च भाष्यकृतापि पातञ्जलमहाभाष्ये- " **संकेतस्तु पदपदार्थयोरितरेतराध्यासरूप-स्मृत्यात्मकः , योऽयं शब्दः सोऽर्थो , योऽर्थः स शब्द** " इति । [1151]

स च संकेतः शक्तिग्राहकः , न तु शक्तिः भेदाभेदरूपस्य संकेतस्य सम्बन्धत्वासम्भवात् । भेदसम्बन्धस्त्वप्रसिद्ध एव । अभेदस्यापि सम्बन्धत्वं पूर्वमेव खण्डितं प्रबन्धेऽस्मिन् । शक्त्युपकारकत्वात् संकेतोऽपि शक्तिरिति व्यवहारो भवति , न तु सः शक्तिः ।

---

[1149] **वैयाकरणसिद्धान्तलघुमञ्जूषायाम् , पृ. २३ ।।**

[1150] **परमलघुमञ्जूषायां शक्तिनिरूपणे , पृ. २३ ।**

[1151] **पातञ्जलमहाभाष्ये ।**

स च संकेतः स्मृत्यात्मकः इत्यस्यायम्भावः ज्ञातः सन् संकेतः शक्तिनियामकोऽज्ञातस्य तु शक्तिनियामकत्वं न स्यात् ।

अपरञ्च पाणिन्यादीनां संकेत एव शक्तिनियामकः , न तु अस्माकम् , तेन आधुनिकस्थले घटगोविन्दादौ लक्षणैवेति **नागेशाभिप्रायः** [1152] ।

अत एवोक्तं तस्य भावः [1153] इति सूत्रभाष्ये डित्थादिषु प्रकृत्यर्थव्यतिरिक्तप्रत्ययार्थाभावाद् भावप्रत्ययान्तवृत्तिर्न प्राप्नोति , डित्थत्वम् ' इत्याशंक्य प्राक्कालिकडित्थेन कृतां क्रियां गुणान् वा यः कश्चिद् करोति स उच्यते डित्थत्वं ते एतदेवं डित्थाः कुर्वन्ति ।

एवञ्च प्राथमकल्पिकडित्थगतगुणक्रियासदृशगुणक्रिया एव भावप्रत्ययार्थः , तदभिप्रायेणैव डित्थत्वादिशब्दप्रयोगो भवतीति फलितम् । तत्र डित्थपदस्य तादृशगुणक्रियाविशिष्टे लक्षणां विना न सिद्ध्यति , वृत्त्युपस्थापितप्रकारीभूतधर्मस्यैव भावप्रत्ययार्थत्वाद् इति हेतोः तत्र लक्षणा अवश्यमेव स्वीकार्या । अन्यथा तु घटशब्दोत्तर **' त्व '** प्रत्ययस्याकाशेऽपि अर्थः स्यात् , आश्रयता तस्यापि प्रकारिभूतार्थत्वात् ।

तस्मान्नागेशमते आधुनिकस्थले लक्षणया अप्रसिद्धशक्त्या वा बोधः न तु शक्त्या । अर्थविषयकबोधजनकघटादिपदानां सामर्थ्यमेव शक्तिः , सैव शब्दनिष्ठबोधजनकतावच्छेदिकेति कौस्तुभाद्युक्तिस्तु न समीचीना , शक्तेरपि कार्यजनकत्वनियामकः शक्तेर्भिन्नः एव सम्बन्धो लोकप्रसिद्धः । यथा दीपस्य प्रकाशकत्वशक्तिः दीपवस्तुनोः प्रकाशकत्वशक्त्यतिरिक्तसंयोगादि-सम्बन्धसत्त्वे एव वस्तुप्रकाशिका भवति , नान्यथा , तथैव घटादिपदनिष्ठा

---

**[1152] किञ्च पाणिन्यादिस्मार्तसंकेतस्यैव वाचकतानियामकत्वं नत्वाधुनिकस्येत्याद्यपि दर्शितम् । एवञ्चाधुनिकस्थले द्वादशेऽह्नि क्रियमाणनामस्थले च लक्षणा । तत्र घटगोविन्दादिगुणाद्यारोपेण तत्मूलकप्रवृत्तिर्निमित्तारोपेण च बोधः – वैयाकरणसिद्धान्तलघुमञ्जूषायां शक्तिनिरूपणे ।**

**[1153] पाणिनीयाष्टाध्याय्यां ५.१.११९ ।**

शक्तिरपि सम्बन्धसत्त्वे एव शाब्दबोधरूपकार्यजनने प्रभवति , अतः शब्दनिष्ठबोधजनकत्वादिसामर्थ्यरूप-शक्त्यतिरिक्तः कश्चन सम्बन्धोऽपि परिकल्पनीयः ।

उक्तञ्च भर्तृहरिणापि-

**" उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते ।**

**शक्तीनामप्यसौ शक्तिगुणानामप्यसौ गुणः ॥**[1154] **इति ।**

व्याख्यातञ्च हेलाराजेन – " **उपकार इति – उपकार्योपकारयोरुपकारस्वभावसम्बन्धो यत्रास्ति , तत्र धर्मशक्तिरूप कार्यं दृष्ट्वा अनुमीयते । असौ सम्बन्धः शक्तिनामपि कार्यजनने उपकारको गुणानामपि द्रव्याश्रितत्वनियामकः सम्बन्ध इति । तस्मात् सामर्थ्यातिरिक्ता वाच्यवाचकभावापरपर्याया शक्तिरिति** [1155]" इति ।

ननु वाच्यवाचकभावस्यापि शक्तित्वं न स्यात् , तस्यापि उभयनिष्ठत्वाभावेन सम्बन्धत्वसम्भवात् । तथाहि वाच्यवाचकभावैत्यत्र भावशब्दस्य उभयत्राप्यन्वयः '' **द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बन्ध्यते** " इति न्यायात् , एवञ्च वाच्यभावः वाचकभावश्च । तत्र वाच्यभावः वाच्यत्वरूपः , स च बोधविषयत्वरूपः वाचकभावस्तु , वाचकत्वरूपः सोऽपि बोधजनकत्वरूपः , तथा च बोधविषयत्वस्यार्थमात्र-वृत्तित्वात् बोधजनकत्वस्य च शास्त्रमात्रवृत्तिता इति कस्यापि उभयवृत्तित्वं न स्यादिति चेन्न । वाच्यवाचकभावः अखण्डोपाधिरूपपदार्थान्तरम् , न तु वाच्यम् , न च वाच्यत्वं , वाचकत्वरूपेत्यदोषात् । स च वाच्यवाचकभावः

---

[1154] **भर्तृहरिवाक्यपदीये ३.३.६ ।**

[1155] **हेलाराजकृतव्याख्याने कारकप्रकरणे ।**

शब्दार्थोभयनिष्ठ एव , अतः तस्य शक्तित्वे बाधकाभावः । अत एव स्वस्वामिभाव इत्यत्रापि समूहस्यैव सम्बन्धत्वं स्वीकृतं नागेशेन [1156] ।

तस्मात् नागेशाभिमते वाच्यवाचकभावस्यैव शक्तित्वं सम्भवति , न तु बोधजनकतायाः , जनकत्वघटितेश्वरेच्छायाः वा ।

वस्तुतस्तु कौण्डभट्टाभिमतबोधजनकतैव शक्तिः , बोधजनकतारूप-शक्तिस्वीकारे आत्माश्रयदोषस्य परिहारोऽपि सम्भवति –

तथाहि बोधं प्रति शब्दस्य कारणत्वेन न विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावोऽपि तु आत्मनिष्ठप्रत्यासत्त्या । तथा च समवायेन अर्थविषयकबोधं प्रति स्वविषयकज्ञानसमवायित्वसम्बन्धेन शब्दः कारणमिति कार्यकारणभावः । एवञ्च शब्दनिष्ठबोधजनकताया अवच्छेदकसम्बन्धः स्वविषयकज्ञानसमवायित्वरूपो न तु बोधजनकतारूप-शक्तिरूप इति नात्माश्रयदोषावकाशः ।

विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावस्वीकारेऽपि विषयतासम्बन्धेन शाब्दबोधं प्रति स्वजन्योपस्थितिविषयत्वसम्बन्धेन शब्दः कारणमिति रीत्या शब्दनिष्ठबोधजनकतावच्छेदकः सम्बन्धः स्वजन्योपस्थितिविषयत्वरूपः अतो नोक्तदोषावकाशः ।

विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावे शक्तेरपि बोधजनकतावच्छेदक-सम्बन्धत्वे नात्माश्रयः , यतोहि शक्तिरूपा बोधजनकता तु स्वरूपयोग्यता रूपा , शब्दनिष्ठा अवच्छेद्या या बोधजनकता सा तु फलोपधायकतारूपा । एवञ्च अवच्छेद्या जनकता फलोपधायकता रूपा , अवच्छेदिका च बोधजनकता स्वरुपयोग्यतारूपेत्युभयोर्भेदात् स्वस्य स्वावच्छेदकत्वाभावेन नात्माश्रयदोषः ।

---

**[1156] स्वत्व स्वामित्वसमूहः सम्बन्धः इत्यर्थः – वृहच्छब्देन्दुशेखरे कारकप्रकरणे ।**

यत्तूक्तम्  बोधजननात् प्राक् **" बोधजनकत्वाभाववदिदं पदम् "** निश्चयसत्त्वेन तद्वत्ताज्ञानं प्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वात् बोधजनकतारूपस्य शक्तिपदार्थस्य ज्ञानमेव न सम्भवतीति , तदपि न समीचीनम्  यतो हि  **" बोधजनकत्वाभाववदिदं पदम् "** इति ज्ञाने बोधजनकता फलोपधायकतारूपा  , स्वरूपयोग्यतारूपबोधजनकता तु बोधजननात् प्रागपि शब्दे विद्यत एव , तदभाववदिदं पदमिति ज्ञानं तु नास्ति । अन्यथा तु  **" घटोत्पत्तेः प्राक् फलोपधायकतारूपायाः कारणतायाः दण्डादावप्यविद्यमानत्वेन दण्डो घटनिरूपितकारणत्वाभाववान् "** इति निश्चयसत्त्वेन तदवत्ताज्ञानं प्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वात् , दण्डादौ घटनिरूपितकारणत्वज्ञानं न सम्भवति । एवञ्च घटोत्पत्तेः प्राक् दण्डानयने केषाञ्चिदपि प्रवृत्तिर्न स्यात् तस्य घटनिरूपितकारणत्वाभावात् । परन्तु प्रवृत्तिस्तु दृश्यत एव । अतो कार्योत्पत्तेः प्रागपि कारणे स्वरूपयोग्यतारूपकारणतावश्यमेव स्वीकार्या । तथा हि बोधजननात् प्रागपि स्वरूपयोग्यतारूपा बोधजनकता शब्दे तिष्ठत्येव । अतः तज्ज्ञानमसम्भवि इत्युक्तिरविचारितरमणीया । तस्मात् बोधजनकतायाः नास्ति काचन विप्रतिपत्तिः ।

यत्तु वाच्यवाचकभावस्यैव शक्तित्वं स्वीकुर्वता नागेशेन स्वपक्षे हरिसम्मतिं प्रदर्शयता -

**" इन्द्रियाणां स्वविषयेषु अनादियोग्यता यथा ।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥[1157] " इति ।**

कारिकेयं व्याख्याता लघुमञ्जूषायाम्- **" यथा चक्षुरादीनां रूपादिविषयकज्ञानजनने अनादिः पुरुषप्रयत्नानपेक्षा योग्यता**

---

[1157] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य सम्बन्धसमुद्देशे का. २९ ।**

**तज्जनकतावच्छेदकतावच्छेदकधर्मवत्त्वरूपा , तथा शब्दानामर्थे अनादिसम्बन्ध एव योग्यता तज्जनकतावच्छेदको धर्मः**[1158] " इति ।

व्याख्यानेनानेनापि बोधजनकतायाः शक्तित्वं निराकर्त्तुं न सक्यते । यतो हि शक्तिरूपेण स्वीकृता बोधजनकता स्वरूपयोग्यतारूपेति पूर्वं प्रातिपदिकमस्मिन्नेव निबन्धे आत्माश्रयवारणप्रसङ्गे । तथा च स्वरूपयोग्यतारूपा जनकता कारणता वा जनकतावच्छेदकरूपैव भवति । यथा घटोत्पत्तिप्राक्क्षणावच्छेदेन घटादिकरणे अनवस्थिते दण्डादौ घटनिरूपिता कारणता स्वरूपयोग्यतैव , सा च कारणतावच्छेदक-दण्डत्वरूपा ।

न चैवं दण्दत्वरूपायाः स्वरूपयोग्यतारूपकारणतायाः अवच्छेदको धर्मः दण्डत्वं कथं स्यात् , एकस्यैव एकस्यावच्छेदकत्वासम्भवादिति वाच्यं दण्डस्यैव घटजनकतात्वेनावच्छेद्यत्वं , स्वरूपतः अवच्छेदकत्वमिति स्वीकारे दोषाभावात् , समानरूपेण एकस्यैव एकस्यावच्छेदकत्वासम्भवेऽपि विभिन्नरूपेण एकस्यापि एकस्यैवावच्छेदकत्वसम्भवात् ।

एवञ्च शब्देऽपि या स्वरूपयोग्यतारूपा बोधजनकता सा जनकतावच्छेदकधर्मरूपा । अतः बोधजनकतावच्छेदको धर्मः बोधजनकतैव , सैव योग्यतापदवाच्या सती शब्दार्थयोः सम्बन्ध-

**" सम्बन्धशब्दे सम्बन्धो योग्यतां प्रतियोग्यता ।**
**समयोग्यता संविदमातापित्रादियोगवत् ॥ [1159]" इति ।**

---

[1158] **वैयाकरणसिद्धान्तलघुमञ्जूषायां शक्तिनिरूपणे ।**

[1159] **भर्तृहरिवाक्यपदीये ३.३.३१ ।**

## ➢तारानाथतर्कवाचस्पतिमतम्

लक्षणा तु शक्यसम्बन्धरूपा सा च स्वप्रतियोगिशक्तत्वेन। शब्दनिष्ठा तस्याञ्च शक्यार्थान्वयबोधे तात्पर्याभावादिकं कारणमितिसिद्धान्तविदः। तथा हि प्रथमं शक्यार्थोपस्थितौ तद्विधायकविशिष्टान्वयबोधे तात्पर्यविरहाद्यनुसन्धाने समभिहिते श्रुतशब्दस्यैव तद्बोध्यार्थसम्बन्धिनि लक्षणा कल्प्यते। यथा – ‘ **गङ्गायां घोष** ’ इत्यादौ गङ्गापदात् गङ्गाप्रवाहरूपे उपस्थिते शक्यार्थे घोष्याद्यधिकरणतान्वये वाधाद्यनुसन्धानात् तत्पदस्यैव गङ्गाप्रवाहसम्बन्धिनि तीरादौ लक्षणा कल्प्यते, “ **काकेभ्यो दधि रक्षतामित्यादौ** ” च शक्यार्थान्वये तात्पर्यविरहाद्यनुसन्धानादेव काकाकाकसाधारणरूपे शक्यसम्बन्धिनि क्वचिदर्थे लक्षणेति विवेकः।

यद्यपि शक्तेरपि शक्याभेदसम्बन्धरूपतया तत्रातिप्रसङ्गः तथापि तत्सम्बन्धभिन्नसम्बन्धस्यैव लक्षणात्त्वस्वीकारान्न दोषः। तादृशसम्बन्धनाञ्च बहुलतया सादृश्यरूपत्वे लक्षणाया गौणीत्वेन व्यवहारः। शक्तिलक्षणयोर्द्वयोरपि वृत्त्योर्ज्ञापकं व्याकरणमेव। शक्तिग्रहं व्याकरणोपमानाद् इत्यादिवक्ष्यमाणशक्ति-ग्राहकवचनात्। लक्षणाया व्याकरणाद्यधीनज्ञानत्वे अनुपपत्तिज्ञानाधीनत्वाभावे च निरूढत्वं तद्भिन्नत्वे आधुनिकत्वमिति।

एवं शक्तिलक्षणान्यतरवृत्तिरूपसम्बन्धज्ञानाधीनायामर्थोपस्थितौ सत्यां योग्यतादिवशेन विशिष्टार्थबोधः समुदेति तत्र च आकाङ्क्षायोग्यतासत्तयो हेतवः। तत्र आकाङ्क्षा नाम शब्दनिष्ठा पूर्वपूर्वपदविशिष्टोत्तरोत्तरपदत्वरूपा यत्पदश्रवणे यत्पदश्रवणं विना न बोधः तत्पदस्य तत्पदेनाकाङ्क्षेति फलितम्। यथा घटमिति कारकपदश्रवणे क्रियापदश्रवणेन विना बोधाभावः।

अतः क्रियापदश्रवणेच्छारूपा आकाङ्क्षा एवं क्रियापदश्रवणेऽपि कारकपदस्येति तयोः परस्परमाकाङ्क्षा एतज्ज्ञापकतयैव व्याकरणोपयोगः । तथाहि कारके इत्यधिकृत्य द्वितीयादयो विहिताः कर्त्तृत्वादिव्यपदेशकारकत्वेन क्रियामधिकृत्यैव कर्मणि द्वितीयेत्यादीनां विधानात् । उक्तञ्च वाक्यपदीये –

**" गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते ।**

**साध्यत्वेन निमित्तानि क्रियापदमपेक्षते ॥ "** [1160]इति ।

योग्यता च यत्पदार्थे यत्पदार्थस्य बाधाभावस्तत्पदार्थे तत्पदार्थस्य योग्यता । यथा – पर्वते बह्निरित्यादिवाक्ये पर्वतपदार्थे बह्नेर्बाधाभावः ह्रदे च बाधः इति तत्र तत्र योग्यता योग्यते ।

आसत्तिश्च यत्पदार्थे यत्पदार्थस्य योग्यता तत्पदार्थोपस्थित्यव्यवधानेन तत्पदार्थोपस्थितिरूपा । यथा – घटमानयेत्यादौ घटकर्मताया अन्वययोग्यस्य आनयनपदार्थस्य तदव्यवधानेनोपस्थितिस्तथानुपस्थितिश्च । अग्निमान् देवदत्तो गिरिर्यातीत्यादौ अग्निसम्बन्धस्य गिरावेवान्वय योग्यतया यानकर्तृत्वस्य देवदत्तादौ तथात्वेन च तदुपस्थापकपदयोरव्यवधानाभावेन पदार्थयोरपि नाव्यवधानोपस्थितिः ।

तात्पर्य्यमपि तद्बोधे हेतुः तद्बोधेच्छयोच्चरितत्वरूपं पदनिष्ठम् । सैन्धवमानयेत्यादौ भोजनप्रकरणादिज्ञाने लवणबोधेच्छयोच्चरितत्वेन सैन्धवपदज्ञानात् लवणपदार्थोपस्थितिरिति केचित् । प्रकरणादिज्ञानमेव तद्बोधे हेतुरिति तु नव्याः । तथा च नानार्थानां शब्दानां प्राकरणिकाप्राकरणिकयोरुपस्थापकत्वाविशेषेऽपि प्रकरणादिज्ञानमेव अप्राकरणिकार्थोपस्थितौ प्रतिबन्धकं तथा च वाक्यपदीये-

---

[1160] **भर्तृहरिवाक्यपदीये २.२० ।**

**" अनेकार्थाभिधाने च संयोगाद्यैर्नियन्त्रिते ।**

**शब्दार्थानामवच्छेदात् विशेषस्मृतिहेतव ॥ "[1161] इति ।**

अनेकार्थाभिधाने अनेकार्थोपस्थापने संयोगाद्यैः प्रकरणैर्नियन्त्रिते प्रतिरुद्धे सति शब्दार्थानाम् अप्राकरणिकार्थानाम् अवच्छेदात् उपस्थापनप्रतिरोधात् विशेषस्य प्राकरणिकार्थस्य स्मृतावुपस्थितौ हेतवो नानार्था इति ।

सर्वेषां शब्दानां प्रथमतो व्यवहारादेव प्रायशः शक्तिग्रहः । तथाहि केनचित् वृद्धेन व्युत्पन्नं पुरुषं प्रति गामानयेत्युपदिष्टे तत् शृण्वन् व्युत्पन्नो गवानयने प्रवर्त्तते । तच्चेष्टा दर्शनेन तत्प्रवृत्तिमनुमाय व्युत्पित्सुर्बालोः व्युत्पन्नपुरुषीयप्रवृत्यन्यथानुपपत्त्या तद्धेतुभूतकर्तव्यतादिस्थितेः श्रुतस्यैव समुदितवाक्यस्य तद्बीजनकत्वम् । ततश्च वाक्यस्य तद्बीजनकत्वेन तत्सम्बन्धित्वमवसीयते इति तत्सम्बन्धिवेशेषस्य पुर्वोक्ताभेदरूपस्य शक्तितया व्यवहारस्यैवं शक्तिग्राहकत्वमित्येवमवसीयते शास्त्रकारैः । पश्चाच्च पदानामन्वयव्यतिरेकाभ्यां प्रत्येकपदशक्तिग्रहः । तथाहि पुनश्च गां वधान घटमानयेत्यादिपदश्रवणे नियोज्यस्य पूर्वापेक्षया विशेषकार्य्यप्रवृत्तिदर्शनेन गवादिपदश्रवणसत्त्वे तत्कार्य्यकरणं तदभावे च तत्कार्य्यकरणमित्यन्वय-व्यतिरेकाभ्यां तत्तत् पदानां विशेषार्थवाचकत्वावधारणमिति द्रष्टव्यम् । ते चोपाया अभियुक्तोपदिष्टा वेदितव्याः । यथा शक्तिग्रहं व्याकरणोपमानात् कोषाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य चैवं विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा इति । व्याकरणं हि कर्मणि द्वितीयेत्यादिना द्वितीयादीनामर्थविशेषे प्रयोगनियमाय प्रवृत्तं द्वितीयादीनामर्थमप्यवगमयति तथा हि कर्मण्येव द्वितीया शक्ता न करणादौ कर्मणि द्वितीयैव शक्ता न तृतीयेत्येवं द्विविधनियमपरतया पृत्तं शास्त्रं नियमतदतिक्रमयोः पुण्यापुण्यफले

---

[1161] **भर्तृहरिवाक्यपदीये ।**

दर्शयत् तत्तच्छब्दानां तत्तदर्थेष्वेव साधुतोक्त्या शक्तिमवगमयति । तदुक्तं भाष्यकारैः-

**“ सुपां कर्मादयोऽप्यार्थाः संख्या चैव तथा तिङाम् ।**

**प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु च ॥** [1162]” इति ।

उपमानमपि शक्तिग्राहकम् । यथा गोसदृशो गवय इति अतिदेशवाक्यं श्रुतवतो ग्रामस्थपुरुषस्य वनगमनादनन्तरं गोसदृशपिण्डदर्शनेनातिदिष्टतद्वाक्यं स्मरतश्च ।

अयं पिण्डो गवयपदवाच्य इति भवति मतिरित्युपमानरूपातिदेशवाक्यस्य गवयपदशक्तिग्राहकत्वम् । तत्र च व्याकरणादीनामप्रवृत्तेः प्रकृतिप्रत्यायाधीनोपस्थितिविषये एव व्याकरणस्य रूढिविषये च कोषस्योपयोगात्तदभावदेतस्यैव तथात्वौचित्यादिति द्रष्टव्यम् । वक्ष्यमाणलक्षणकोषोऽपि अनपेक्ष्यैव प्रकृतिप्रत्ययादिविभागं केषाञ्चित् पदजातानां रूढिज्ञानाय प्रवर्त्तमानो मण्डपघटादिशब्दानां शक्तिमवगमयति । आप्तवाक्यमपि तथेति व्याकरणादिशक्तिधीहेत्वज्ञानेऽपि यथार्थज्ञानवतामुपदेशेन तत्तच्छब्दानां तत्तदर्थेषु शक्तिग्रहः । व्यवहारतस्तु दर्शितः। वाक्यस्य व्याख्यानरूपा टीकादिपदातिधेया विवृतिरपि तत्तच्छब्दानां तत्तदर्थेषु शक्तिं ग्राहयति यथा पचतिपदस्य पाकं करोतीति व्याख्या पाककर्त्तृर्य्येवमन्यत्रापि केचित्तु वाक्यस्य शेषादिति पठित्वा वाक्यशेषोऽपि तद्ग्रहे हेतुः यथा ‘ **स्वर्गकामो यजेत** ’ इत्यादौ श्रुतस्वर्गपदस्य अर्थविशेषमजानतामधिकारिणां तत्तच्छक्तिबोधनाय प्रवृत्तेन । यन्न दुःखेन संभिन्नं , न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं

[1162] **पतञ्जलिमहाभाष्ये भाष्यकारैः ।**

स्वःपदास्पदमितिवाक्यशेषब्राह्मणेन दुःखासंभिन्नत्वादिमतिः सुखविशेषे एव स्वर्गपदस्य वेदे शक्तिग्रह इत्याहुः। प्रसिद्धसमानाधिकरण्यमपि तद्ग्रहे हेतुः।

पिकादिशब्दार्थमविदुषामुपदेशाय प्रवृत्तेन सहकारतरौ मधुरं रौति पिक इति वाक्येन प्रत्येकशक्त्या ज्ञातशक्तिकपदोपस्थापितार्थे मधुरशब्दकारके पिकशब्दस्य शक्तिग्रहः। एवं कोषादावपि सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुद इत्यादौ प्रसिद्धपदोपस्थापितार्थे सत्कार पूर्वकालङ्कृतकन्यादातरि कूकुदपदस्य शक्तिग्रहः। अत्र च प्रसिद्धपदसान्निध्यं नाम अर्थविशेषे निश्चितशक्तिकपदसामानाधिकरण्यं सामानाधिकरण्यञ्च स्वबोध्यार्थेऽभेदेनान्वयबोधजनकत्वम्। उपपादयिष्यते चाख्यातप्रथमान्तार्थयोः अप्यभेदेनान्वयः। अतो मधुरं रौति कन्यां ददातीत्यादाव्याख्यान्तस्य प्रथमान्तसामानाधिकरण्यं सुलभमेव। अतएव च भाष्ये लटः शतृशानचावप्रथमासमानाधिकरणे इति सूत्रे अप्रथमासमानाधिकरणे इति निर्देशादन्यत्र लटः प्रथमान्तसामानाधिकरण्य-मुपपादितम् उपपादितञ्च आदेशे सामानाधिकरण्यं दृष्टवा अनुमानाद् अवगन्तव्यं प्रकृतेः सामानाधिकरण्यमित्यादिना लटः स्थानिलकार सामान्यस्य प्रथमान्तसामानाधिकरण्यम्। एतेन ददानः कूकुदः स्मृत इत्यादिपाठकल्पनमपि परेषामनादेयमेवेति।

व्यवहारादेव प्रथमं शक्तिग्रहे व्याकरणादीनां कथमुपयोगः स्यादिति तावदभिधीयते। तत्र च वार्त्तिककारः शास्त्रस्य नियमविधिपरतया सार्थक्यमाह। यथा सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियम इति। यथा लौकिकेषु प्रयोगेषु लोकादेव प्रथमं व्युत्पत्तिः अव्युत्पन्नं प्रति व्याकरणादीनामप्रवृत्तेः तथा शास्त्रीयेष्वपि। ततश्च लोकादेव शब्दे अर्थे तयोः सम्बन्धे च सिद्धे अर्थबोधनाय च शब्दप्रयोगे प्रसक्ते गवादय एव साधवस्तत्तदर्थेषु प्रयोक्तव्या न गव्यादय इति नियमार्थं शास्त्रं नियमफलन्तु

धर्मः एकः शब्दः सुप्रयुक्तः इत्यादि श्रुतेः । नियमश्चात्र इतरनिवृत्तिफलकः पञ्चपञ्चनखभक्षणादिवत् परिसंख्यारूपः व्याकरणशास्त्रे सर्वत्रैव नियमशब्देन परिसंख्याग्रहणात् ततश्च नियमातिक्रमे परं पुण्यविशेषो नोत्पद्यते समुत्पद्यते चार्थावबोधो नखविदलनेन तुषविमोक्षणवत् प्रसिद्धनियमपरत्वे तु नियमे इतरसहचारस्य पापाजनकत्वात् साधुशब्दसहकृतासाधुशब्दप्रयोगेऽपि पापानापत्तेः । श्रुतिस्तु नापभाषितवै इत्यादिना अपभ्रंशसामान्यप्रयोगं निषेधति नापभाषितव्यमिति तदर्थः । ततश्चावश्यं परिसंख्यारूप एव नियमोऽत्र ग्राह्यः । एवञ्च लोकात् सर्वप्रयोगाणां दुर्विज्ञेयतया आर्षविज्ञानं विना अप्रयुक्तानां दुरवधारणेन च व्याकरणाद्यारम्भः ।

अतएव भाष्ये सिद्धे इत्यादि वार्त्तिकव्याख्याने महान् हि प्रयोगविषय इति प्रतिज्ञाय सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधाभिन्ना एकशतमध्वर्य्युशाखा सहस्रवर्त्मा सामवेद एकविंशतिबह्वृचं नवधाथर्वणो वेद इत्यादिना प्रयोगविषयाणां बाहुल्यं प्रदर्श्य आर्षज्ञानमेव तत्प्रयोगज्ञाने हेतुरिति प्रतिपादितम् । ततश्च एतावन्तं प्रयोगविषयं परिच्छेत्तुमसमर्थैरस्माभिः ऋषिप्रणीतलक्षणानुसारेणानुगतानां प्रयोगः अस्तीत्यनुमातुं शक्यते । उक्तञ्च यथालक्षणमप्रयुक्ते निश्चिताप्रयोगे न हि वचिरन्तिपरः प्रयुज्यत इत्यादिना अप्रयोगावधारणे इत्यर्थः ।

# षष्ठोऽध्यायः

# षष्ठोऽध्यायः

## स्फोटस्वरूपविचारः

“ **अथ गौरित्यत्र कः शब्दः**[1163] ” इति शब्दाभिधेयविषयिणी जिज्ञासोपस्थापिता महाभाष्ये । अस्य आशयं प्रकटयता कैयटेनोक्तं - “ **अयं गौरयं शुक्ल इति शब्दार्थयोरभेदेन लोके व्यवहारदर्शनाच्छब्द-स्वरूपनिर्धारणाय पृच्छेति अथेति । गौरिति विज्ञाने प्रतिभासमानेषु वस्तुषु कः शब्दः**[1164] ” इति तात्पर्यार्थः ।

एवञ्च सञ्जातायामस्यां जिज्ञासायां श्रौतदार्शनिकमूर्धन्या भट्टमतावलम्बिनः मीमांसकाः सामान्यभिन्नश्रोत्रेन्द्रियग्राह्यभावस्य शब्दतां वर्णयन्तः कण्ठताल्वाद्यभिघातजन्याभिव्यक्तिमतो वर्णानेव श्रोत्रग्राह्यतया शब्दं[1165] स्वीकुर्वन्ति । एषां शब्दानां नित्यत्वं विभुत्वमेकत्वञ्च वदन्ति । पूर्वमनुभूतस्य शब्दस्य दिनान्तरानुभूते सति ‘ **सोऽयं शब्दः** ’ इति प्रत्यभिज्ञया तावत्कालं स्थिरत्वे सति ‘ **तावत्कालं स्थिरञ्चैनं कः पश्चान्नाशयिष्यति** ’ इति न्यायेन शब्दस्य नित्यत्वं सर्वत्रैवोपलभ्यमानत्वाच्च विभुत्वं शब्दस्य बहुत्वे गौरवात् , एकत्वमेव लाघवात् । ‘ **ननु सोऽयं गकार** ’ इति प्रतीतिर्गत्वजातिप्रतियोगिक-भेदाभावद्योतिका , न तु गकारस्यैकत्वनित्यत्वसाधिका इति चेदत्रोच्यते यदि

---

**1163 पतञ्जलिमहाभाष्यपस्पशाह्निके , पृ. १२ ।**

**1164 पतञ्जलिमहाभाष्यप्रदीपे ।**

**1165 अथ गौरित्यत्र कः शब्दः , गकारौकारविसर्जनीया इति भगवानुपवर्षः । शवरभाष्ये १.१.१ ।**

**कः शब्दोऽभिमतः , वर्णाः , तेषामेव श्रोत्रग्राह्यत्वात् –प्रकरणपञ्चासिकायाम् , पृ. ८७ , चौ.सं.प्र ।**

उक्तप्रतीतिर्जातिनिबन्धना स्वीक्रियते , तर्हि द्वयोर्घटयोः सोऽयं घटः इत्यभेदप्रतीतिः स्यात् , तत्र जातेरैक्यात् , परन्तु नैषा प्रतीतिर्जायते , अतः **' सोऽयं गकारः '** इति प्रतीतिर्व्यक्त्येकत्वादेव स्वीकार्या ।

वस्तुतस्तु **' गत्वं '** न जातिः देशकालभेदेन प्रतीयमानेऽपि गकारे **' सोऽयं गकारः '** इत्येकत्वावगाहिबुद्ध्युदयात् तस्यैकत्वे सिद्धे , आकाशत्ववत् , जातित्वं गत्वस्यापि न स्यात् । व्यक्त्यभेदस्य जातिबाधकत्वात् –

**" व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।**
**रूपहानिसम्बन्धो जातिबाधकसंग्रहः ॥** [1166]" इति ।

गकारस्य बहुत्वं स्वीकृत्यतत्र जातिकल्पनानुभवविरुद्धा , देवदत्तेन पुनः पुनः गकारोच्चारिते **' दशकृत्वो गकार उच्चारितो देवदत्तेन इयमेव प्रतीतिर्जायते '** , न तु दश गकाराः उच्चारिता इति , अतो गकारस्येकत्वमनुभवसिद्धम् ।

ननु वर्णानां नित्यत्वे तत्समुदायस्यार्थबोधजनकत्वमसम्भवि । तथाहि समुदायः किं सत्तयार्थबोधकः , गृहीतो वा ।

नाद्यः – सत्तया बोधकत्वे सर्वदैवार्थबोधापत्तिप्रसङ्गात् , न द्वितीयः – कण्ठताल्वाद्यभिघातव्यञ्जितानामेव वर्णानां ग्रहणसम्भवे क्रमव्यञ्जितानां क्रमेणैव ग्रहणमिति तेषां समुदाय एवाप्रसिद्धः । उक्तञ्च–

---

[1166] **किरणावल्याम् ।**

**" न चास्य विषयो वर्णास्तेषु नैकत्वधीर्भवेत् ।**
**न च तत्समुदायोऽपि क्रमिकत्वादसम्भवात् ॥** [1167]**" इति ।**

भणितञ्च नागेशेनापि – **" नापिसंहताः , उच्चरितप्रध्वंसित्वेन यैगपद्यासम्भवात् , उत्पत्तेरभिव्यक्तेर्वा क्षणस्थायित्वात्** [1168] " इति चेदत्रोच्यते -

वर्णानां स्वरूपतः साहित्यसम्भवं किन्तु संस्कारद्वारा तस्य साहित्यं सपाद्यार्थबोधकत्वं स्वीक्रियतेऽस्माभिः । तथाहि यथा – यागादौ आग्नेयाद्यवान्तरकर्माणि क्रमजातान्यप्यवान्तरापूर्वजननद्वारा यागस्योप-कुर्वन्ति , तथैव वर्णा अपि क्रमेणानुभूयमानाः संस्कारं कल्पयित्वार्थबोधं जनयन्ति | उक्तमपि - **" पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायकः**[1169] " इति ।

ननु आग्नेयादिकर्मजनितावान्तरापूर्वयागजमपूर्वं जनयेन्नाम , किन्तु संस्काराणान्तु स्मृतिजनकत्वमेवानुभवसिद्धम् , न तु अर्थबोधजनकत्वमतः उक्तरीत्या समुदायस्य बोधकत्वोपपादनमसङ्गतमेवेति चेन्न – स्मृतिजनकत्ववदर्थबोधजनकत्वस्यापि संस्काराणां स्वीकृतत्वात् भणितिश्चेयं प्रसिद्धा –

**" यद्यपि स्मृति हेतुत्वं ,संस्कारस्य व्यवस्थितम् ।**
**अर्थान्तरेषु सामर्थ्यं न तस्य प्रतिषिध्यते ॥**[1170] " इति ।

---

[1167] **स्फोटसिद्धान्तन्यायविचारे श्लोक.सं. ४ ।**

[1168] **वैयाकरणसिद्धान्तलघुमञ्जूषायां शक्त्याश्रयनिरूपणे ।**

[1169] **शबरभाष्ये १.१.१ ।**

[1170] **श्लोकवार्तिके पृ. ४३६ , चौ.प्र ।**

किञ्च संस्काराणां स्मृतिमात्रजनकत्वेऽपि तत्संस्कारजनितायां स्मृतौ सर्वे वर्णाः युगपत्प्रतीयन्ते , तेषामेव वाचकत्वस्वीकारे नास्ति काचित् विप्रतिपत्तिः । अत एवोक्तम् –

**" यद्वा प्रत्यक्षतः पूर्वं क्रमज्ञातेषु यत्परम् ।**

**समस्तवर्णविज्ञानं तदर्थज्ञानकारणम्** [1171]**॥** " इति ।

स्थलेऽस्मिन् संस्कारद्वयं स्वीचकार प्रभाकरः – एकः स्न्मृति हेतुः द्वितीयश्चार्थबोधजनकः । भणितञ्च तेन –

" **वर्णेष्वेव प्रत्यक्षेष्वर्थप्रतीत्युपपत्तये कश्चिद्विशेष आश्रयितुं युक्तः , सर्वपूर्वपूर्वोपलम्भसापेक्षत्वादन्त्यवर्णस्य । उपलम्भस्य च क्षणिकतया स्वतो विशेष्टुमशक्यत्वात् पूर्वपूर्ववर्णोपलम्भजन्यः संस्कार एव आश्रीयते । स च स्मृतिहेतोः संस्काराद् भिन्न एव । स्मृतिहेतुर्हि संस्कारो यदुपलम्भप्रभावितस्तत्रैवोपलम्भान्तरं जनयितुमलम् , नार्थान्तरम् , इत्यर्थविषयाप्रतीतिस्ततोऽनुपपन्नेति तददतिरेकिणः संस्कारस्याश्रयणम्** [1172]" इति ।

तस्मात् नित्य विभवो वर्णा एव शब्दः । ते एव वाचकाः[1173] । वर्णसमुदायरूपाणि पदानि वाक्यान्यपि नित्यानि अत एव सूचितम् ऋषिणा जैमिनिना - " **औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः**[1174] " इति ।

तत्र औत्पत्तिको नाम नित्यः । एवञ्च पदादीनामपि नित्यत्वं सिद्ध्यति , तेषामनित्यत्वे तत्सम्बन्धस्य नित्यत्वासम्भवात् , इति मीमांसकानामभिप्रायः ।

---

[1171] **श्लोकवार्तिके पृ. ४३८ , चौ.प्र ।**

[1172] **प्रकरणपञ्चासिकायां पृ. ८९ , चौ.प्र ।**

[1173]**तस्माद्व्यञ्जकध्वनीनां क्रमेण व्यङ्गेषु वर्णेषु समारोपितेन तद्वन्तः स्मर्यमाणा वर्णा , वाचकाः न्यायः शब्दोऽस्ति – शास्त्रदीपिकायाम् १.१.५ ।**

[1174] **मीमांसासूत्रम् १.१.५ ।**

मीमांसकानामिव नैयायिका अपि पदभावापन्नानां समुदितानां वर्णानामेव वाचकत्वमुदघोषयन्ति । उक्तञ्च न्यायसूत्रभाष्ये – **" वाक्यस्थेषु खलु वर्णेषूच्चरत्सु , प्रतिवर्णं तावच्छ्रवणं भवति । श्रुतं वर्णमेकमनेकं वा पदभावेन प्रतिसंधत्ते । प्रतिसन्धाय पदं व्यवस्यति** [1175]" इति ।

न्यायलीलावत्यामप्युक्तम् – **" किं तर्हि प्रातिपदिकम् , क्रमवद्वर्णसंहतिरिति ब्रूमः**[1176] " इति ।

अन्यत्रापि प्रतिपादितं नैयायिकैः – **" किं पुनरिदं पदं नाम ? किञ्च वाक्यमिति ? वर्णसमूहः पदम् , पदसमूहो वाक्यम्** [1177]" इति ।

परन्तु नैयायिकाः वर्णानामनित्यत्वमेव स्वीकुर्वन्ति । वर्णोऽनित्यः इन्द्रियजन्यज्ञानविषयत्वात् , रूपादिवत् इति । तेषां मते गकारादिव्यक्तयोऽपि अनेकाः न ति एकैव । यतो हि रामकृष्णश्यामादिभिः भिन्नभिन्नस्थले सकृदेव गकारादय उच्चार्यन्ते । एवञ्च गकारस्यैकत्वे भिन्नभिन्नस्थले सकृदेव तस्योच्चारणं न स्यात् ।

ननु वर्णानामनित्यत्वे वर्णसमुदायात्मकस्य पदस्य ज्ञानमसम्भवि , क्रमोत्पन्नानां विनाशशालिनां तेषां समुदायस्यासम्भवादिति चेदत्रोच्यते - **" क्रमोत्पन्नानामपि तेषां संस्कारद्वारा कार्यकरत्वं सम्भवति । यथा क्रमोत्पन्ना अपि ग्रासा समुदिताः तृप्तिमुत्पादयन्ति तद्वत्** [1178]" इति ।

ननु **" संस्कारमात्रजन्यं ज्ञानं स्मृति "** इत्याद्युक्ता संस्कारस्य स्मृतिजनकत्वमेव प्रसिद्धं , तस्यार्थप्रत्यायकत्वं कथमिति चेच्छृणु –

---

**[1175] न्यायलीलावत्यां पृ.६७१ , चौ.प्र ।**

**[1176] न्यायमञ्जर्यां पृ. ३३६ , चौ.प्र ।**

**[1177] न्यायसूत्रभाष्ये ३.२.६२ ।**

**[1178] न्यायमञ्जर्यां पृ.३४४ , चौ.प्र ।**

स्मृतिजनकस्य संस्कारस्य स्मृतिद्वारैवार्थप्रत्यायकत्वे नास्ति काचित् विप्रतिपत्तिः , एकस्मृत्यारूढाः सर्वे वर्णाः अर्थं बोधयन्तीति न कोऽपि दोषः ।

स्मृत्यप्रामाण्यवादिनां वैशेषिकानां तु कथमर्थप्रतीतिरिति जिज्ञासायामुच्यते – अचिरनिर्वृत्तानुभवजन्या , तदनन्तभाविनी स्मृतिरपि अनुभव इव प्रतीयते ।

वस्तुतस्तु स्मृतेः प्रामाण्यं दूरपह्नवम् , स्मृत्यैव जगतां कृताकृतप्रत्यवेक्षणादिसिद्धिः । कवीनां काव्योतपत्तौ स्मृतिरपि हेतुः । स्मृत्यैव शब्दानुमानयोः प्रवृत्तिर्भवति । अनुमानस्थले पक्षे हेतुं दृष्ट्वा व्याप्तेः स्मरणमेव भवति , तदनन्तरमनुमिनोति । शाब्दबोधस्थले च शब्दश्रवणानन्तरं तन्निष्ठशक्तेः स्मरणं भवति , तदनन्तरमेव यदर्थनिरूपिता शक्तिः शब्दे स्मर्यते तस्यैवार्थस्य बोधः , नान्यस्य । अनेकार्थस्थलेऽपि पूर्वानुभवस्यैव फलानि तदित्युच्यते चेत् , तर्हि सर्वजगदादिकारणस्य ब्रह्मसंकल्पस्यैव तत्फलमित्युच्यताम् , कावश्यकतानुभवस्यापि । अतः स्मृतेः प्रामाण्यमवश्यमेव स्वीकरणीयम् । तस्मात् नैयायिकानां नये समुदितानां वर्णानामेव वाचकत्वं सिद्ध्यति ।

शाब्दरूपविषये औपनिषदानामपि समुदितानां पदवाक्यजुषां वर्णानामेव वाचकत्वे तात्पर्यम् । तच्च – **“ प्रत्येकवर्णानुभवभावित-भावनानिचयलब्धजन्मस्मृतिदर्पणारूढवर्णमालात्मना ”** इति । उक्तञ्च –

**“ वर्णाः स्वज्ञानसंस्कारैः सम्भूय स्मृतिकारिभिः ।**
**क्रमेणैकस्मृतौ बुद्धा बोधयन्त्यर्थमञ्जसा ॥ ”[1179] इति ।**

[1179] **सर्वनिर्णये श्लोकसंख्या ५६ ।**

अन्यत्रापि भणितम्– “ **सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः बुद्धिमारोहन्ति , एवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोक्ष्यन्ति । तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतीतिर्न विरूध्यते । वृद्धव्यवहारे च इमे वर्णाः क्रमाद्यनुगृहीताः गृहीतार्थविशेषसम्बन्धाश्च सन्तः स्वव्यवहारे-ऽप्येकैकवर्णग्रहणानन्तरं समस्तप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानास्तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्ति** [1180] ” इति ।

श्रीभाष्येऽपि प्रतिपादितम्– “ **शब्दस्यैकरूपवत्त्वमपि न साधीयः , गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात्** [1181] ” इति ।

वर्णानामेव वाचकत्वं स्फोटस्याप्रामाणिकत्वञ्चापि प्रतिपादितम् – “ **उक्तशक्तिज्ञानजन्यं ज्ञानमागमः । तत्साधनत्वात् वर्णात्मकः शब्दोऽप्यागमः इति गीयते । ननु न तावद्वर्णाः प्रत्येकं गवाद्यर्थबोधकाः , तथादृष्टेः अनिष्टेश्च । नापि तत्समुदायः , क्रमभाविनां क्षणिकानां समुदायस्तदुपलभ्ययोरभावात् । का तर्हि पदस्य गवाद्यर्थबोधकस्य वाक्यादेश्च गतिः ? स्फोट इति चेत् , न तन्मानाभावात् । गवादिपदादिष्वेकः शब्द इति प्रत्ययोऽत्र मानम् , वर्णेषु तदसम्भवादिति चेन्न वर्णादिषु क्रमोपलब्धेष्वप्यन्त्यवर्णो-पलब्ध्यनन्तरमेकस्मृत्यारूढेष्वेकार्थबोधके-ष्वेकः शब्द इति प्रत्ययोपपत्तेः। अवश्यं चैकस्मृतिसमारोहेण वर्णसमुदायोऽभ्युपेयः , अन्यथा स्फोटाभिव्यक्तेरप्यभावप्रसङ्गात् , तस्यैकैकवर्णानाम-**

---

[1180] **ब्रह्मसूत्रे शांकरभाष्ये १.३.२८ ।**

[1181] **श्रीभाष्ये १.१.१ ।**

**भिव्यङ्ग्यत्वात् । तस्मात् वर्णा एव बोधकाः न शब्द इत्यास्थेयम्** [1182] " इति ।

वर्णानां नित्यत्वानित्यत्वे मीमांसकानां नैयायिकानामिवौपनिषदानां मतैक्यं नास्ति । तत्र केचन अनित्यत्वमेव स्वीकुर्वन्ति – उक्तञ्च " **वर्णानित्यत्वं तु , न श्रुत्यादिविरुद्धम् , प्रत्युतानुकूलमेव** " इति ।

अन्ये तु वर्णानां नित्यत्वमेवोपवर्णयन्ति – " **न च तथेह वर्णानां नित्यानां विभूनां चास्ति वास्तवः क्रमः** [1183]" इति ।

सांख्यास्तु वर्णानां वाचकत्वं तेषामनित्यत्वञ्च स्वीकुर्वन्ति । वैयाकरणाभिमतं स्फोटं भट्टाभिमतं वर्णनित्यत्वं खण्डयतः आह – " **प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः । न शब्दनित्यत्वं कार्यताप्रतीतेः** [1184]" इति ।

प्रतिपादितञ्च वर्णानां वाचकत्वं तत्त्वमुक्तकलापेऽपि –

" **न ह्यक्षेः कोऽपि वर्णाभ्यधिकमिह विदुर्वाचकं सावधानाः**
**शब्दार्थप्रतीतमस्त्विति च जनवाचो नैकमन्यद्व्यनक्ति ।**
**सामग्र्यैक्यादिनीत्या भवति मतिरियं तादृशे वर्णसंघे ,**
**सभेदं वा पदानामिति न तदधिकः कोऽपि शब्दः परोक्षः ।**[1185] "

यादृग्भिः स्फोटधीस्ते तदपि भवतु तैरर्थधीरेव वर्णैः –

" **वर्णेषूक्तो विकल्पः समगतिरुभयोयौगपद्यक्रमादिः ।**
**वाक्यस्फोटेऽपि तुल्यं तदिदमिहपदैरक्षरैर्वावगम्ये ॥**
**स्फोटे तद्बुद्धिबोध्ये सति न च घटते तत्तदध्यासक्लृप्तिः ।**

---

[1182] पदार्थतत्त्वनिर्णये हस्तलिखितपत्रे ५० ।

[1183] भामत्यां पृ.१६० , निर्णयसागर प्रेस , बाम्बे ।

[1184] सांख्यसूत्रे ५-५३-५८ ।

[1185] कलापव्याकरणे सरः ४ श्लोक.सं. ८७-८८-८९ ।

**शब्दो ब्रह्मेति यत्तन्मुनिभिरभिदधे स ह्यचिद्धेद इष्टः ॥**
**सूक्ष्माकारस्तु सोऽर्थः न गमयति यतः सत्तया नैषः हेतुः ।**
**स्फोटस्त्वं वर्णजुष्टस्त्विति यदभिहितं भरते सापि शक्ति-**
**र्वर्णानां स्यात्तयार्थः स्फुटः इति घटते स्फोटशब्दोऽपि तस्याम् ॥**

**➢नागेशमतम्**

शब्दगताः वर्णाः प्रत्येकं , मिलिताः वा , अर्थस्य वाचकाः , इति शङ्कायाम् एतद्द्वयमपि नैव सम्भवति । वर्णानां मध्ये प्रत्येकं वाचकत्वे घटशब्दे **‘ घ ’** वर्णेनैव कम्बुग्रीवादिमदर्थस्य बोधे सति शेषाणां वर्णानां वैयर्थ्यम् आपद्येत । उच्चरितप्रध्वंसितानां वर्णानां मेलनमपि नैव सम्भवति । येन क्रमेण वर्णाः उच्चारिताः तेनैव क्रमेण तेषां स्मरणं भवेदेव इति नैव वक्तुं शक्यते । दृश्यते च अनुभूतानां स्मरणस्य क्रमविपर्ययोऽपि । तेन सरः रसः नदी दीन , इत्येतेषु शब्देषु क्रमविपर्यये सर्वथा भिन्नार्थबोधः सम्भवति । लघुमञ्जूषायामुच्यते – **‘ येन क्रमेण चित्ते संस्कारस्तेनैव व्यञ्जकरूपरूपिता तस्येति स्वीकारान्न सरो रस इत्यनयोर्विशेषः ’**[1186] इति । अत एव कल्प्यते यद् उच्चारितैः वर्णैः स्फोटात्मकः नित्यः शब्द अभिव्यञ्जत इति । तदुक्तं –

**“ न प्रत्येकं न मिलिता न चैकस्मृतिगोचराः ।**
**अर्थस्य वाचकाः वर्णाः किन्तु स्फोटः स च त्रिधा ॥ ”**[1187] इति ।

तत्र वर्णस्फोटः , पदस्फोटः , वाक्यस्फोटश्च इति त्रैविध्येऽपि पदस्फोटः वाक्यस्फोटश्च मुख्यौ , लोके पदवाक्ययोरेव अर्थबोधकत्वदर्शनात् ।

वर्णव्यतिरिक्तं स्फोटाख्यं तत्त्वं शक्त्याश्रयत्वेन अर्थबोधजनकत्वेन च स्वीकुर्वन्ति । वर्णानां वाचकत्वञ्च खण्डितं तैः । खण्डनावसरे

---

[1186] **लघुमञ्जूषायाम् ।**

[1187] **स्फोटतत्त्वनिरूपणे शेषकृष्णेण ।**

विकल्पद्वयमुपस्थापितं नागेशेन- " **न च वर्णाः प्रत्येकं तथा द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः , नापि संहताः उच्चरित-प्रध्वंसित्वेन यौगपद्यसम्भवात् , उत्पत्तेरभिव्यक्तेर्वा क्षणस्थायित्वात्**[1188]" इति ।

**' किं वर्णानां प्रत्येकं वाचकम् , अहोस्वित् समुदायो वाचकः ?** यदि आद्यपक्षः स्वीक्रियते , तदा धनादिशब्दघटक ' **ध** ' वर्णेनैव बुभुत्सितार्थविषयकबोधसम्भवेन द्वितीयादिवर्णोच्चारणस्य वैयर्थ्यं-

" **वर्णेनोच्चरितेन गवाद्यर्थाभिधानः ।**
**उच्चारणं द्वितीयादिवर्णानां स्यान्निरर्थकम् ॥**[1189] " इति ।

प्रत्येकं वर्णस्यार्थवत्त्वेन प्रातिपदिकान्तलोपापत्तिश्च स्यात् । यदि चैतद्दोषभिया वर्णसमूहस्य वाचकत्वमास्थातुमिष्यते , तदा तदप्यसम्भाव्यं , वर्णानां क्रमिकत्वात् क्षणिकत्वाच्च तत्समूहस्यासम्भवात् -

" **तदुच्चारणसामर्थ्यं नैकस्मात् ततोऽर्थधीः ।**
**समुदायोऽपि वर्णेषु क्रमज्ञातेष्वसम्भवी ॥**[1190] " इति ।

इत्थं च विवक्षितार्थस्य प्रतिपादकतया शक्त्याश्रयतया च पद-वाक्य-रूपरूपितः कश्चन शाश्वतः शब्दः वर्णपदवाक्यातिरिक्तोऽकामेनापि स्वीकर्तव्यः , स एव शब्दः **' स्फुटत्यनुभवपथमारोहति अर्थो यस्मात् '** इति व्युत्पत्त्या स्फोटशब्देन व्यपदिश्यते ।

ननु वर्णानां प्रत्येकं वाचकत्वे न द्वितीयादिवर्णोच्चारणवैयर्थ्यं , प्रथमवर्णश्रवणे स्पष्टं प्रतीयमानोऽपि पदार्थो द्वितीयादिवर्णश्रवणानन्तरं स्पष्टं स्पष्टतरं च प्रतीयते । यथा रत्नपरीक्षकाणां प्रथमदर्शने रत्नरूपमस्पष्टं

---

[1188] **लघुमञ्जूषायाम् ।**
[1189] **स्फोटसिद्धिन्यायविचारे सं १३ ।**
[1190] **स्फोटसिद्धिन्यायविचारे सं १४ ।**

प्रतीयमानमपि चरमे दर्शने निरवद्यं रूपं चकास्ति तद्वदिहापि प्रथमवर्णश्रुतावव्यक्तगम्येऽर्थे स्फुटप्रतीत्यै वर्णान्तराणि प्रयुज्यन्त इति न तेषां वैयर्थ्यमपि चेन्न , एवं सति कूपयूपसूपादावर्थविभागो न स्यात् । अयम्भावः- कूप इत्यत्र ककारेण प्रतीयमानोऽर्थः ऊकारेण पकारेण च स्पष्टतरं प्रतीयते , इति ऊकारपकारयोः अन्धुवाचकत्वं सिद्धप्रायमेव । एवञ्च यूप इत्यत्रापि ऊकारपकारयोस्तावद् अन्धुरूपार्थप्रतीतिः स्यात् । एवं सूप इत्यत्रापि ।

ननु पूर्वपूर्ववर्णस्थितावेव द्वितीयवर्णोत्पत्तेः वर्णानां समुदायस्य वाचकत्वं सम्भवत्येवेति चेन्न , पूर्ववर्णनाशोत्तरमेव यत्नान्तरेण वर्णान्तरोत्पत्तिस्वीकारेण तदसम्भवात् । तदुक्तं भाष्ये- **" यावद् गकारे वाग् वर्तते न तावदोकारे इति येनैव यत्नेनैको वर्ण उच्चार्यते तेनैव विच्छिन्ने तस्मिन् वर्णे उपसंहृत्य तं यत्नमन्यं यत्नमुपादाय द्वितीयं प्रवर्तते** [1191] **"** इति **।**

न च पूर्ववर्णज्ञानान्तरमुत्तरवर्णश्रवणकाले पूर्ववर्णानुभवजन्यसंस्काराव्यवहितोत्तरत्वसम्बन्धेन पूर्ववर्णत्वं तदुत्तरवर्णे गृह्यते, एवञ्च तादृशोपस्थितिविशिष्टतत्तद्वर्णवत्त्वं तदुत्तरवर्णप्रत्यक्षकाले गृह्यत इति वर्णसमुदायज्ञानं सम्भवत्येव । अभिहितञ्च-

**" क्रमवत्त्वेऽपि सम्भूय जनयन्ति फलं तथा ।**
**प्राचीनवर्णानुभवसंस्कारसहितोऽन्तिमः ॥**[1192] **"**

इति वाच्यम् , पूर्ववर्णोत्तरवर्णयोर्नष्टविद्यमानयोरव्यवहितोत्तरत्वसम्बन्धस्यानुभवविरुद्धत्वात् ।

---

[1191] **पतञ्जलिमहाभाष्ये १/४/१०९ ।**

[1192] **स्फोटसिद्धिन्यायविचारे श्लोक-३१ ।**

ननु यथा विचिः समुत्पन्ना सती वीच्यन्तरमुत्पादयति , तथैव शब्दाच्छब्दान्तरादुत्पत्तिरिति स्यात् । अत्र विशेषः – यदि वीचयः वीच्यन्तरमुत्पाद्य नश्यन्ति , वर्णांस्तु चरमवर्णोत्पत्तिपर्यन्तं सजातीयं वर्णमुत्पादयन्त एव तिष्ठन्तीति वर्णसमुदायः सुलभः इति चेन्न – एवं वर्णसमुदायरूपपदस्य वाक्यस्य वोत्पत्तिसम्भवेऽपि तदविद्यमानत्वेन शक्त्याश्रयत्वं न स्यात् , अविद्यमानस्याश्रयतासम्भवात् । अन्यथा **' नष्टो घटः जलवान् '** इत्यनुभवविरुद्धप्रतीतिः स्यात् ।

तस्मात् वर्णानां वाचकत्वमसम्भव्येव । व्यस्तानां समस्तानां वा वाचकत्वासम्भवात् ।

**' किञ्च शब्दादर्थं बोधयामि , एकं पदम् एकं वाक्यम् '** इति सर्वानुभवसिद्धा प्रतीतिः वर्णानां वाचकत्वेऽसंगता स्यात् वर्णानां वाचकत्वे **' शब्दैः '** इति बहुवचनप्रयोगस्यैवौचित्यात् । अतः शब्दादिति एकवचनप्रयोगः स्फोटस्वीकृतिमन्तरोपपादयितुमशक्य एव ।

ननु अन्वयव्यतिरेकाभ्यां वर्णानां पदानां वाक्यानां वा वाचकत्वं निर्णेतुं शक्यते । शक्तिग्राहके व्यवहारेऽपि बालेनान्वयव्यतिरेकाभ्यामेव पदानां तत्तदर्थवाचकत्वं निर्धार्यते । यथा **' घटमानय '** इति वाक्यानन्तरं घटानयनं दृष्ट्वा , तदनन्तरं **' पटमानय '** इति वाक्यानन्तरं पटानयनं पश्यता बालेन पटशब्दः पटरूपार्थस्य वाचकस्तेनैव सह तस्यान्वयव्यतिरेकदर्शनात् , पटशब्दोच्चारणे पटरूपार्थस्य प्रतीतिर्दृश्यते तदनुच्चारणे तु न तस्य प्रतीतिरिति रीत्या पटशब्दस्य वाचकत्वं निश्चीयते । एवञ्च वर्णश्रवणे सत्यर्थप्रतीतिर्भवति , वर्णाश्रवणे तु नार्थप्रतीतिरित्यन्वयव्यतिरेकाभ्यां वर्णानामेव वाचकत्वं स्वीकार्यमिति चेदुच्यते -

सत्यमेवैतद् यत् सत्सु वर्णेष्वर्थप्रतीतिः नान्यथा , तथापि नैव एतेन तेषामर्थबोधकत्वं सिद्ध्यति , स्फोटाभिव्यञ्जकत्वेनैव अन्वयव्यतिरेकयो-

रुपपत्तिसम्भवात् । तस्मात् वर्णाभिव्यक्तः स्फोटः वाचकः , न तु वर्णाः । कण्ठताल्वाद्यभिघातव्यक्ताः हि वर्णाः स्फोटं व्यञ्जयन्ति । यद्यपि व्यञ्जकवर्णाः भिन्नाः , तथापि तेन स्फोटे भेदो न सम्भवति , तथापि तत्र भेदप्रतीतिर्भवति । यथा मणिकृपणादिव्यञ्जकभेदादेकस्मिन्नपि मुखे भेदप्रतीतिर्भवति -

**" यथा मणिकृपाणादौ मुखमेकमनेकधा ।**

**तथैव ध्वनिषु स्फोट एक एव विभिद्यते ॥ [1193]" इति ।**

तस्मात् स्फोटस्य अर्थवाचकत्वं , वर्णव्यङ्ग्यत्वञ्च । अत एव **स्फोटशब्दस्य द्विधा व्युत्पत्तिः**[1194] सम्प्रदायसिद्धा – **' स्फुटत्यर्थोऽस्मादिति स्फोटः' ' स्फुट्यते वर्णैरिति स्फोटः '** इति । तत्र प्रथमव्युत्पत्तौ वाचकः , द्वितीयव्युत्पत्तौ च व्यङ्ग्य इति सिद्धान्तः । तेन भिन्नभिन्नवर्णैः अभिव्यक्तः स्फोटः उपाधिभेदभिन्नः घट-पटादिरूपं भिन्नभिन्नमर्थं बोधयति ।

स्फोटश्चायं सर्वैरेव वैयाकरणैः प्रतिपादितः । महाभाष्यकारेण पतञ्जलिनापि प्रतिपादितम् ' **अथवा उभयतः स्फोटमात्रं निर्दिश्यते** [1195]' । एवं तर्हि स्फोटः शब्दः । ध्वनिः शब्दगुणः । कथं , भेर्याघातवत् । तद्यथा भेर्याघातो भेरीमाहत्य कश्चित् विंशतिपदानि गच्छति । कश्चित् त्रिंशत् । कश्चिच्चत्वारिंशत् , स्फोटश्च तावानेव भवति । ध्वनिकृता वृद्धिः -

---

[1193] **स्फोटतत्त्वनिर्णये ।**

[1194] **स्फोटतत्त्वनिर्णये ।**

[1195] **पतञ्जलिमहाभाष्ये १.१.२.३,४ ।**

**" ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।**
**अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः ॥"**[1196] इति ।

एवञ्चान्यत्रापि महाभाष्ये पस्पशाह्निके वैशद्येनालोचितमस्ति । तद्यथा- **' अथवा उभयतः स्फोटमात्रं निर्दिश्यते रश्रुतेर्लश्रुतिर्भवति इति '** । अत्र स्फोटपदेनाष्टविधेषु स्फोटेषु जातिस्फोट एव विवक्षितः इति कैयटः[1197] ।

पस्पशाह्निके महाभाष्ये **' अथ गौरित्यत्र कः शब्दः**[1198] **'** इत्याशङ्क्य समाहितम् **' येनोच्चारितेन सास्नालाङ्गुलककुद-खुरविषाणिनां सम्प्रत्ययो भवति सः शब्दः** [1199]**'** इति । अत्र स्फोटाभिप्रायेणैव येनेति एकवचनं प्रयुक्तं पतञ्जलिना । उक्तञ्च तत्रैव तत्त्वालोके – **' तथा च स्फोटाभिप्रायेणैव येनेत्यत्रैकवचनप्रयोग इति भावः** [1200]**' इति ।**

तत्रैव प्रदीपे कैयटेनापि भणितम् – **" वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात् । आनर्थक्ये तु प्रत्येक-मुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् , अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावात् , एकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्त्यविशेषणप्रसङ्गात्तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचकः** [1201] **"** इति ।

---

[1196] **पतञ्जलिमहाभाष्ये १.१.७० ।**

[1197] **स्फोटमात्रमिति –जातिस्फोट इत्यर्थः ' प्रदीपे ' ऐऔच् सूत्रस्य ।**

[1198] **महाभाष्यपस्पशाह्निके पृ.१० , दण्डिस्वामी दामोदर् आश्रम ।**

[1199] **महाभाष्यपस्पशाह्निके पृ. १४ , दण्डिस्वामी दामोदर् आश्रम ।**

[1200] **तत्त्वालोके ।**

[1201] **प्रदीपे पस्पशाह्निकमहाभाष्ये पृ. १२-१३ , रा.सं.संस्थानम्-१ खण्डे ।**

‘ **अवङ् स्फोटायनस्य** [1202]’ इति सूत्रे स्फोटायनाचार्यं स्मरता पाणिनिना ततोऽपि वहोः कालात् प्रागेव स्फोटोऽयं शाब्दिकसिद्धान्तकोटौ गणित इति मन्ये।

पदमञ्जरीकारेण हरदत्तेन सूत्रमिदं व्याख्यातम्- “ **स्फोटोऽयनं पारायणं यस्य स स्फोटायनः – स्फोटप्रतिपादको वैयाकरणः** [1203]” **इति।**

पुराणकालेऽपि कृतसञ्चारोऽयं स्फोट आत्मनः पुराणतामभिव्यनक्ति। तथा चोक्तं भागवते –

“ **दिशां त्वमवकाशोऽसि दिशः खं स्फोटः आश्रयः।**
**नादो वर्णस्त्वमोङ्कारः आकृतीनां पृथक्कृतिः॥**[1204] ” **इति।**

एवञ्च वैयाकरणैः स्वीकृतोऽयं स्फोटः पुराणेषु तन्त्रेषु च वर्णितः। अथ तस्यास्तित्वे नास्ति शङ्कावकाशः।

नागेशास्तु स्फोटस्य स्फोटायानऋषिसम्मतत्वं प्रतिपादयन्ति। अत एव स्वकीयस्फोटवादस्य समाप्तावुक्तं तेन-

“ **वैयाकरणनागेशः स्फोटायनऋषेर्मतम्।**
**परिष्कृत्योक्तवांस्तेन प्रीयतां परमेश्वरः॥** [1205]” इति।

वैयाकरणनयेऽयं स्फोटः निरवयवः नित्यो विभुश्च , एवञ्च सर्ववागर्थप्रपञ्चोपादानभूतप्रणवस्वरूपः। उक्तञ्च महाभाष्ये –

---

[1202] **पाणिनीयसूत्रे अष्टाध्याय्यां. ६.१.१२३।**

[1203] **पदमञ्जर्यां.सू.६.१.१२३. अ.।**

[1204] **भागवतः दशमस्कन्धस्य ८५ अध्यायस्य ९ श्लोके।**

[1205] **स्फोटवादे पृ. १०२ ।**

**" ओंकार एव सर्वा वाक् । सैषा स्पर्शोष्माभिर्व्यज्यमाना बह्वी नानारूपा भवति [1206]"** इति । बह्वी पदवाक्यरूपा नानारूपा घटपदादिरूपा चेत्यर्थः ।

भर्त्तृहरिणापि शब्दब्रह्मण एव विवर्तभूतमिदं सर्वमिति प्रत्यपादि **' वाक्यपदीये '** –

**" अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[1207] "** इति ।

**श्रीमद्भागवतेऽपि प्रतिपादितम् –**

**" ततोऽभूत् त्रिवृन्दोंकारो यो व्यक्तप्रभवः स्वराट् ।**
**यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥**
**शृणोति यः इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक् ।**
**येन वाग्व्यज्यो यस्य व्यक्तिराकाश आत्मनः ॥**
**स्वधाम्नो ब्रह्मणः साक्षाद् वाचकः परमात्मनः ।**
**सः सर्वबीजमन्त्रोपनिषद्बीजं सनातनम् ॥ [1208]" इति ।**

को नाम स्फोटः ? इति जिज्ञासायां भणितं नागेशेन परमलघुमञ्जूषायां- **" ननु कोऽयं स्फोटः ? उच्यते । चतुर्विधा हि वागस्ति – परा , पश्यन्ती , मध्यमा , वैखरी च । तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या विन्दुरूपिणी परा वागुच्यते । नाभिपर्यन्तमागता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते । एतद् द्वयं वाग् ब्रह्मयोगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषयम् इत्युच्यते । ततो**

---

**1206 पतञ्जलिमहाभाष्ये ।**

**1207 भर्तृहरिवाक्यपदीये श्लो.सं १ ।**

**1208 भागवते १२ । ६-३९-४१ ।**

**हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता तत्तदर्थवाचकशब्द-स्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा जपादौ बुद्धिर्निर्ग्राह्या मध्यमा वागुच्यते । तत आस्यपर्यन्तमागच्छता तेन वायुनोर्ध्वमाक्रमता च मूर्धानमाहत्य परावृत्त्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते [1209] "** इति ।

तथाह्युच्यते -

**" परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥**
**वैखर्या हि कृतो नादः परश्रवणगोचरः ।**
**मध्यमा कृतो नादः स्फोटव्यञ्जक उच्यते ॥ [1210]" इति ।**

युगपदेव मध्यमावैखरीभ्यां नाद उच्यते । तत्र मध्यमानादोऽर्थवाचकः स्फोटात्मकशब्दव्यञ्जकः । वैखरीनादे ध्वनिः सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिनादवन्निरर्थकः । मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्ग्य शब्दब्रह्मरूपस्फोटव्यञ्जकश्च तादृशमध्यमानादव्यङ्ग्य शब्दः स्फोटात्मको ब्रह्मरूपो नित्यश्च ।

अयम्भावः मूलाधारोत्थापवनेन परं प्रणोद्य नाभिपर्यन्तमागच्छता जातक्षोभायाः मध्यमायाः वाचः समुद्गतेन सूक्ष्मतरेण नादेन हृदयेऽभिव्यज्यमानं नित्यं निरवयवं शब्दब्रह्मैव स्फोटः । तत्र ब्रह्मेति नाम बृहद् बृहणं च यद् तदेव । तत्र बृहत्वं नाम , कालतः स्वरूपतश्चाविच्छिन्नत्वम् । बृहणत्वं जगदाकारेण विवर्तमानत्वम् । तथा सर्वस्य जगतः उपादानभूतं व्यापकं नित्यमद्वयं च यत्तत्त्वं तदेव ब्रह्मा । भत्तृहरिणापि उक्तम्-

---

[1209] **परमलघुमञ्जूषायां स्फोटविचारे पृ .९१ ( चौ.सु.प्रकाशनम् ) ।**

[1210] **परमलघुमञ्जूषायां स्फोटविचारे पृ .९४-९५ ( चौ.सु.प्रकाशनम् ) ।**

**" अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ [1211]"** इति ।

तच्च स्वप्रकाशसंविद्रूपतया स्वोपादेयभूतस्य निखिलस्यार्थजातस्य शब्दनाद् विज्ञापनात् , सर्वप्रथमं शब्दात्मना निवर्तनाद् वा शब्दब्रह्मेति उच्यते , तदेव च **" वक्तिबोधयत्यर्थ या सा वाक् "** इति व्युत्पत्त्या वाक् इति शब्देनापि व्यवह्रियते । सा च वाक् सर्वव्यापकतया कृत्स्ने शरीरे समवतिष्ठमानाप्युपाधिविशेषवशात् परा-पश्यन्ती-मध्यमा-वैखरीभेदाच्चतुर्धा भवति । उक्तञ्च ऋग्वेदेऽपि – **" चत्वारि वाक् परिमिता पदानि , तानि विदुर्ब्राह्मणाः ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति , तुरीयं वाचो मनुष्याः वदन्ति** [1212]" इति ।

ऋग्वेदभाष्ये माधवाचार्येण चत्वारि पदानि इत्यस्य परा-पश्यन्ती-मध्यमा-वैखरीरूपाणीति व्याख्या कृता-

**" अकारः सर्ववर्णाग्रः प्रकाशः परमेश्वरः ।**

**आद्यमन्तेन संयोगादहमित्येव जायते ॥**

**इकारादिहकारान्ता वर्णा समभवंस्ततः।**

**सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ॥**

**ज्ञप्तेर्बभूवुर्पश्यन्ती मध्यमा वाक् ततः परम् ।**

**वक्त्रे विशुद्धचक्राख्ये वैखरी सा मता ततः ॥**[1213] " इति ।

एवञ्च परा-पश्यन्ती-मध्यमा-वैखरी इति चतुर्धा वाक् प्रसिद्धा । तत्र मध्यमायां वाचि यो नादांशः स एव स्फोटव्यञ्जक इति ।

---

[1211] **वाक्यपदीये ब्रह्मकाण्डे श्लोक-१ ।**

[1212] **ऋग्वेदे १/१६४/४५ ।**

[1213] **ऋग्वेदभाष्ये माधवाचार्येण १/१६४/४५ ।**

ननु मध्यमानादेन स्फोटाभिव्याक्तिर्न समीचीना यतो हि मध्यमानादेन हृदयदेशेऽभिव्यज्यमानस्य स्फोटस्यार्थबोधकत्वे श्रोतुरर्थबोधो न स्यात् , मध्यमानादस्य श्रोतरि उत्पन्नत्वाभावेन तत्र स्फोटाभिव्यक्तेरसम्भवात् , अन्यस्य पुरुषस्य स्फोटाभिव्यक्तेः अन्यार्थबोधकत्वेऽतिप्रसङ्गात् । न च श्रोतरि मध्यमानादाभावेऽपि श्रोत्रद्वारेण श्रोतुर्हृदयदेशं गत्वा वैखरीनाद एव स्फोटमभिव्यनक्ति , तेन च श्रोतुरर्थबोधो सम्भवत्येवेति वाच्यम् , तथा सति **‘ माध्यमानादेन हृद्देशे व्यज्यमानं शब्दब्रह्म स्फोटः** [1214]**’** इति स्फोटपरिभाषोच्छेदापत्तेः । उक्तपरिभाषा वक्तुरर्थबोधकस्फोटस्य , न तु स्फोटसामान्यस्य , स्फोटसामान्यस्य तु **‘ नादेन हृदये देशे व्यज्यमानं शब्दब्रह्म स्फोटः ’** एवंरूपा परिभाषेति कथनमपि न समीचीनम् , एवंरूपेण वैखरीनादस्य स्फोटाभिव्यञ्जकत्वस्वीकारेऽपि तेन श्रोत्रदेश एव स्फोटाभिव्यक्तेः सम्भवेन हृदयपर्यन्तं तन्नादगतेः स्वीकारस्यानौचित्यात् । श्रोत्रदेश शब्दब्रह्मणोऽभावात् , तत्र स्फोटाभिव्यक्तिरसम्भवेति तु न वाच्यम् , स्फोटस्य व्यापकत्वात् तत्र तत्सत्ताया अवश्यमेवाभ्युपगन्तव्यत्वात् । इष्टापत्तौ तु श्रोत्रस्थायाः वाचोऽपि वक्तव्यत्वापत्त्या वाक् चतुर्धेति व्यवस्थाभङ्गप्रसङ्गः । वैखर्यां तस्या अन्तर्भावस्तु वक्तुं न शक्यते ।

शब्दब्रह्मणो व्यापकतया श्रोत्रदेशे तत्तत्सत्तायाः सम्भवेऽपि न तद्गतेन नादेनाभिव्यक्तिः , अभिव्यक्तावपि न तस्य स्फोटस्योपगतिः , हृदयस्थस्य नादाभिव्यक्तशब्दब्रह्मणो वक्तुर्बोधानुरोधेन स्फोटरूपताया अवश्यमेव स्वीकर्तव्यतया , वैखरीनादस्य श्रोतुर्हृदयदेशे गमनमात्रस्वीकारेऽपि निर्वाहसम्भवात्, श्रोत्रस्थशब्दब्रह्मणोऽपि स्फोटरूपतास्वीकारे गौरवप्रसङ्गात् ।

---

[1214] **स्फोटपरिभाषायाम् ।**

अत एव भणितं नागेशेन – " **अत्रेदं बोध्यम् । केनचित् घटमानयेति वैखरीनादः प्रयुक्तः । स केनचिच्छ्रोत्रेन्द्रियेण गृहीतः । स नाद इन्द्रियद्वारा बुद्धिहृद्गतः सन्नर्थबोधकं शब्दं स्वनिष्ठकत्वादिना व्यञ्जयति । तस्मादर्थबोधः**[1215] " इति ।

वस्तुतस्तु –' **शब्दजन्यार्थबोधं प्रति तत्तच्छब्दरूपरूषिता स्फोटशक्तिः कारणम्** ' इति कार्यकारणभावः । तत्र कारणतावच्छेदककोटौ हृदवच्छेद्यत्वस्य श्रोत्रावच्छेद्यत्वस्य वा स्फोटस्य न प्रवेशः , अपि तु शुद्धस्फोटस्यैवेति उक्तगौरवसम्भावनाया असम्भवात् वैखरीनादस्य हृद्देशे गमनस्वीकारः निरर्थक एव , वैखरीनादादभिव्यक्तात् श्रोत्रस्थशब्दब्रह्मण एवार्थबोधस्य सम्भवात् । तत्स्वीकारे च प्रथमं श्रोत्रे ततो हृदि , इति द्विधाशब्दव्यक्तिस्वीकारेण सकृदुच्चारितस्य सकृदेव श्रुतिः , इति सार्वजनीनामनुभवविरोध इत्यस्माकं सम्मतिः सुधिभिर्भावनीया ।

स्फोटविभागविषये निगदितं नागेशेन – " **वस्तुगत्या स्फोटस्यैकत्वेऽपि व्यञ्जकोपाधिभेदात् स्फोटेऽपि भेदः सम्भवति – स च यद्यप्येकोऽखण्डश्च तथापि पदे वाक्ये जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागवशात् लोहितः पीतः स्फटिक भानवद् वर्णादिव्यङ्ग्यः वर्णरूपो पदरुपो वाक्य रूपश्च । यथा च मुखे मणिकृपाणदर्पणव्यञ्जकोपाधिवशाद्दैर्घ्य-वर्तुलत्वादिभानं तद्वत्** [1216]" इति ।

---

**[1215] परमलघुमञ्जूषायां स्फोटविचारे पृ .१०३ ।**

**[1216] परमलघुमञ्जूषायां स्फोटविचारे पृ .९७ ।**

तदुक्तम् –

**“ पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।**

**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥[1217] ” इति ।**

स्फोटव्यञ्जकास्तु – वर्णः वर्णजातिः , पद पदजातिः , वाक्यं वाक्यजातिः, अखण्डपदाखण्डवाक्येति अष्टौ , एवञ्च व्यञ्जकभेदादपि अष्टधा भवति ।

तत्र परा-पश्यन्ती-मध्यमा-वैखरीवाक्चतुष्टयमध्ये मध्यमानादव्यङ्गः । स्फोटात्मकः शब्दः अर्थबोधकः ब्रह्मरूपो नित्यश्च , **स्फुटति अर्थः अस्मात्** इति व्युत्पत्त्या यौगिकार्थसम्भवेऽपि स्फोटशब्दः पङ्कजादिवत् योगरूढः । वाक्चतुर्विधविषये उक्तं-

**“ परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।**

**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥[1218] ”** इति ।

पदस्फोटवाक्यस्फोटयोरपि वाक्यस्फोटः मुख्यः । लोके अन्ततः वाक्यस्यैव अर्थबोधकत्वात् । तथा चोक्तम् – ‘ **वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतिर्मम** [1219]’ इति ।

अत्र इयं शङ्का तावत् – यदि अयं स्फोटः ब्रह्मरूपो नित्यः एकश्च तर्हि अर्थबोधभेदो नैव दृश्यते । तत्समाधानं तावदित्थम् । यथा- मणिदर्पणकृपाणादौ प्रतिविम्बितं मुखं दीर्घवर्तुलत्वादिरूपेण भिन्नमिव लक्ष्यते, तथैव तैस्तैर्ध्वनिभिः अभिव्यङ्ग्यः स्फोटः उपाधिभेदाद् भिद्यत एव । तथा चोक्तं शेषकृष्णैः-

---

[1217] **परमलघुमञ्जूषायां स्फोटविचारे पृ .९१ ।**

[1218] **परमलघुमञ्जूषायां स्फोटविचारे पृ .९४-९५ ( चौ.सु.प्रकाशनम् ) ।**

[1219] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ.१ ।**

**" यथा मणिकृपाणादौ मुखमेकमनेकधा ।**

**तथैव ध्वनिषु स्फोट एक एव विभिद्यते ॥ "**[1220] इति ।

शब्दात्मकस्य वेदस्य नित्यत्वं स्वीकुर्वाणाः मीमांसकाः शब्दः नित्यः विभुश्च इति स्वीकुर्वन्ति । तन्मते तत्तच्छब्दव्यञ्जकाः ध्वनयः वायवो वा अनित्याः । तैरभिव्यक्तः शब्दस्तु नित्य एव , तेन तस्य देशतः कालतश्च व्यतिरेकाभावेऽपि यदा तत्तद्ध्वनिभिः तत्तद्वायुभिर्वा अभिव्यक्तिर्भवति तदैव अर्थबोधो भवति , न सर्वदा । अतः शब्दस्य नित्यत्वे विभुत्वे च सर्वदा शाब्दबोधापत्तिः निरस्ता । शब्दानां नित्यत्वमिति विषये सोऽयं गकारः इति प्रत्यभिज्ञा तैः प्रमाणीक्रियते । यदि गकारस्य भेदः स्यात् तर्हि सोऽयं गकारः इति तदभेदावगाहिनी प्रत्यभिज्ञा नैव सम्भवति । तेन अनित्यैः ध्वनिभिः वायुभिर्वा अभिव्यक्तानां नित्यानां वर्णानां मेलनसम्भवात् तेषाम् अर्थबोधकत्वे न कोऽपि दोषः । तदिदं मतम् आपातरमणीयमपि नैव प्रमाणपदवीमधिरोहति । अस्योत्तररूपेण उक्तं हरिणा -

**" स्फोटरुपाविभागेन ध्वनेर्ग्रहणमिष्यते ।**

**कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकाशकः ॥** [1221]" इति ।

नित्यानामपि वर्णानां तत्तद्व्यञ्जकवायुभिः ध्वनिभिर्वा व्यवधाने सति वर्णसमुदायात्मकः शब्दः नैव प्रत्यक्षः स्यात् , अतः नित्यानामपि वर्णानां मेलनासम्भवात् शब्दनित्यत्वपक्षेऽपि अर्थबोधो नैव सम्भवति । तत्प्रतिपादितं शेषकृष्णैः-

**" नित्यानामपि वर्णानां तत्तद् व्यञ्जकवायुभिः ।**

**ध्वनिभिर्वा तिरोधाने न वर्णसमुदायधीः ॥ "**[1222] इति ।

---

[1220] **स्फोटतत्त्वनिरूपणे ।**

[1221] **वाक्यपदीये १.८२ ।**

[1222] **स्फोटतत्त्वनिरूपणे ।**

तथा च घटशब्दे घकारः अकारः टकारः अकारश्च इत्येते चत्वारो वर्णाः क्रमिकाः कम्बुग्रीवादिमदर्थस्य वाचका इति मीमांसकैरपि स्वीकरणीयम् । क्रमविपर्यये तदर्थस्य बोधो नैव भवितुं शक्यते । मीमांसकमते शब्दस्य नित्यत्वात् विभुत्वाच्च क्रमो नैव सम्भवति । उपलब्धिनिमित्तकोऽपि सः ( क्रमः ) तस्या उपलब्धेरेकत्वात् नैव सुलभः । तदुक्तं -

**" नित्यानाञ्च विभुनाञ्च क्रमो नास्त्येव वास्तवः ।**

**उपलब्धिनिमित्तश्चेत् सा चेदेका कुतः क्रमः ॥ "**[1223] इति ।

किञ्च सोऽयं **' गकारः '** इति प्रत्यभिज्ञाबलाद् वर्णाः नित्याः इति स्वीक्रियते तर्हि उत्पन्नो गकार , नष्टो गकार इति प्रतीतिबलात् तेषाम् अनित्यतापि सम्भवत्येव । तच्चोक्तं –

**" वर्णानां प्रत्यभिज्ञानबलात् स्यान्नित्यता यदि ।**

**अनित्यतैव किं न स्यादुत्पादादिधियां बलात् ॥** [1224]**"** इति ।

अतः स्फोटस्वीकारं विना मीमांसकमतेनापि अर्थबोधनिर्बाहासम्भवात् स आवश्यकः ।

नैयायिकाः पूर्व-पूर्ववर्णानुभवजनितसंस्काररहितचरमवर्णानुभवाद् एव शाब्दबोधमानन्ति । तेन वर्णानाम् उच्चरिते प्रध्वंसितत्वेऽपि तदनुभवजन्यसंस्काराणां विद्यमानत्वेन तत्सहितचरमवर्णानुभवात् शाब्दबोधोपपत्तौ तावद्वर्णाभिव्यङ्ग्यः वैयाकरणाभिमतः स्फोटो नावश्यकः इति परिलक्ष्यन्ते । किन्तु येन क्रमेण अनुभवो भवति तेनैव क्रमेण तज्जनिताः संस्काराः उत्पद्यन्ते , इत्यत्र मानाभावेन सर-रस , नदी-दीन इत्यत्र संस्काराणां विपर्यासे सति सरशब्दात् रसविषयकशाब्दबोधः, नदीशब्दात्

---

[1223] **स्फोटतत्त्वनिरूपणे ।**

[1224] **स्फोटतत्त्वनिरूपणे ।**

दीनविषयकशाब्दबोध आपद्येत , नैयायिकमतेऽपि स्फोटस्वीकारः परमावश्यकः इति।

## ➢कौण्डभट्टमतम्

निरालोकेऽन्धकाराच्छन्ने निशीथे चक्षुरादिः विषयग्रहणाय न प्रभवति तत्रापि श्रोत्रेन्द्रियं बाधं विनैव स्वं विषयं ग्राहयति बहुविधे च व्यवहारे प्रवर्तयितुं लोकान् क्षमेत्। व्यवहारास्तु प्रवृत्तिनिवृत्तिरूपास्ते तु शब्दाधीना एव। स च शब्दः किं स्वरूप इति जिज्ञासा स्वयमेव जागर्त्ति। अत एव अथ गौरित्यत्र कः शब्दः इति शब्दाभिधेयविषयिणी जिज्ञासोपस्थापिता महाभाष्ये।

**" वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः।**

**साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः॥ [1225]"**

इति कौण्डभट्टैः स्फोटनिर्णये उक्तम्। यद्यपि वर्णस्फोटः , पदस्फोटः , वाक्यस्फोटः , अखण्डपदवाक्यस्फोटौ , वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं दुरर्थकञ्च , तथापि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वबोधनाय तदुपादानम्।

नागेशोऽपि स्फोटोऽष्टधेति वर्णितवान् मञ्जूषायाम् , परन्तु प्रकारस्तु भिन्न एव। तथा हि – " **स्फोटो द्विविधः , आन्तरो वाह्यश्च। तत्रान्तरो बुद्ध्यनुपातिरूपः। वाह्यश्च जातिस्फोटो व्यक्तिस्फोटश्च। तत्र व्यक्तिस्फोटो वर्णपदवाक्यानां त्रैविध्येन पदवाक्ययोश्च सखण्डाखण्डभेदात् द्वैविध्येन पञ्चविधः। जातिस्फोटश्च**

---

[1225] **कौण्डभट्टैः स्फोटनिर्णये श्लोक. सं. ६१ पृ. ३५३ ( चौ . सं .प्रतिष्ठानम् )।**

**वर्णसखण्डपदसखण्डवाक्यगतानां जातीनां त्रैविध्येन त्रिविधः । इत्थं वाह्यस्फोटोऽष्टधा कल्प्यते**[1226] " इति ।

वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवने अनुसन्धार्थम् उत्तरप्रदेशशासनप्राप्तिनियुक्तिकेन रामाज्ञापाण्डेयमहाभागेन स्वकीयव्याकरण-दर्शनभूमिकायां स्फोटस्याष्टविधत्वं खण्डनपुरःसरं मतभेदेन स्फोटबोध्ययोर्व्यक्तिजात्योर्भेदात् स्फोटस्य मुख्यतया द्वैविध्यमवान्तर-भेदविवक्षया च षोडशविधत्वं प्रत्यपादि । तथा हि उक्तं तेन – " **अस्यां स्थितौ वाक्यार्थज्ञानमस्माकं कृते वाक्यस्फोटस्य विलय एव स्यात् । नापि पचतीत्यादौ पदस्फोटव्यवहारः । तथा चायं विभागो नायं युक्तियुक्तः । अतएव नगेशभट्टो न ह्यष्टौ स्फोटान् मञ्जूषायां प्रदर्शितम् , किन्तु केवलमान्तरबाह्यभेदेन द्वावेव भेदौ प्रादर्शात् । तथा च व्यवहारदृष्ट्या बाह्यस्फोटप्रदर्शने प्राप्ते वक्ष्यमाणरीतिरेवास्माभि-रवलम्बनीया । तथा हि व्यक्तिः पदार्थः इति व्याडिमते व्यक्तिस्फोटव्यक्तिबोधकः स्फोटः जातिपदार्थवादिनो वाजप्यायनस्य मते जातिस्फोटः जातिबोधकः स्फोट इत्येवं रूपेण द्वौ स्फोटावभ्युपगन्तव्यौ । यदि चावान्तरस्फोटप्रतिपादन आग्रहस्तर्हि कल्पितानि पदानि कल्पितपदेषु कल्पितप्रकृतिप्रत्ययवादाय वक्ष्यमाणपद्धत्या स्फोटः स्वीकार्यः । एवं सति – १. प्रकृतिस्फोटः २. प्रत्ययस्फोटः ३. प्रकृतिजातिस्फोटः ४. प्रत्ययाजातिस्फोटः ५. पदस्फोटः ६. पदजातिस्फोटः ७. वाक्यस्फोटः ८. वाक्यजातिस्फोटः ९.अखण्डपदस्फोटः १०. अखण्डपदजातिस्फोटः ११. अखण्डवाक्यस्फोटः**

---

[1226] लघुमञ्जूषायाम् ।

**१२. अखण्डवाक्यजातिस्फोटः इति द्वादशस्फोटाः भविष्यन्ति**[1227] ” इति । तत्तदवयवविवक्षाविवक्षाभेदेन प्रकृतिप्रत्ययादिकल्पनाकल्पनाभ्यां सर्वेषां कृते एते द्वादशस्फोटा युक्तियुक्ता भवेयुः । एतदेव विचार्य मञ्जूषायां नागेशेभट्टो द्वावेव स्फोटौ प्रत्यपादयत् ।

यच्च भट्टनागेशो लघुमञ्जूषायाम् - “ **तत्र प्रकृतिप्रत्ययनिपातानामेकवर्णानामर्थवत्त्वदर्शनात्** ’ **इत्यादिना प्रत्याहाराह्निके भाष्ये उक्तः प्रकृतिप्रत्यययोर्वाचकत्वमित्येवंरूपो वर्णस्फोटः शास्त्रीयप्रक्रियोपयोग्येव न वास्तव इत्याद्यवोचत् , तद्वक्ष्यमाणभाष्यानिरोधाद्धेयमेव । वस्तुतस्तु वर्णस्फोटोऽप्यधिकस्तत्र निवेशयितुं शक्यते , प्रत्याहारह्निके ‘ ऐऔच् , इति सूत्रोपरि “ अथवोभयतः स्फोटमात्रं निर्दिश्यते ” इति भाष्योक्त्या शुद्धेषु ऋकारादिवर्णेषु स्फोटसत्ताया अभ्युपगमात् । तथा च जातिव्यक्तिभेदेन द्वौ वर्णस्फोटावधिकौ तत्र सन्निवेश्याविति चतुर्दशस्फोटाः सम्पन्नाः । प्रकृतिप्रत्ययविषयेऽप्यखण्डसखण्डभेदेन द्वयोरपरयोरपि सम्मेलनेन षोडशस्फोटाः सम्पद्यन्ते**[1228] ” इति ।

कौण्डभट्टमतपाण्डवमतयोरयमेव मौलिकी भेदो दरीदृश्यते – यत् कौण्डभट्टादयः स्फोटव्यञ्जकभेदेन स्फोटभेदं स्वीकुर्वन्ति , श्रीपाण्डेयस्तु स्फोटबोध्यार्थभेदेन स्फोटभेदं वर्णयति । अतस्तदुक्तेषु षोडशस्फोटभेदेषु प्रकृतिस्फोटादिशब्दस्य प्रकृतिव्यङ्ग्यव्यक्तिस्फोटः इत्याद्यर्थः , प्रकृतिजातिस्फोटः इत्यादि शब्दस्य प्रकृतिव्यङ्ग्यजातिस्फोटः इत्याद्यर्थः बोद्धव्यः ।

---

[1227] **व्याकरणदर्शनभूमिकायाम् – पृ. ४८-५० तः ।**

[1228] **लघुमञ्जूषायाम् ।**

अत्र पाण्डेयप्रतिपादितेऽस्मिन् स्फोटप्रभेदे स्फुरति कश्चन विस्फोटः । तथाहि श्रीपाण्डेयेन वाक्यार्थानां पदार्थज्ञानां च कृते वाक्यस्फोटपद-स्फोटयोर्विलयं संभाव्य कौण्डभट्टादिप्रतिपादितं स्फोटस्याष्टविधत्वं खण्डितं , तस्यायमेवाभिप्रायः भवितुमर्हति , यत् यदि प्रकृतिप्रत्ययजन्यबोधाभावे सति पदस्फोटेन बोधेऽखण्डपदस्फोटः , एवं पदजन्यबोधाभावे सति वाक्यस्फोटेन बोधेऽखण्डवाक्यस्फोटो भवेत्तदा व्याकरणज्ञानशून्यानां पदवाक्यस्फोटयोः सम्भवेऽपि वैयाकरणानां प्रकृतिप्रत्ययजन्यबोधपूर्वकमेव पदस्फोटेन , पदज्ञानजन्यबोधपूर्वकमेव वाक्यस्फोटेन च बोधोत्पत्तेः , तेषां कृते स्फोटाविभौ नैव सम्भवेताम् । तथा च स्फोटस्य कथितोऽष्टधा विभागः सर्वान् प्रति नोपपद्येत् इति । अत्रास्माभिरुच्यते –

कौण्डभट्टादिसम्मतस्य स्फोटविभागस्योक्तरीत्या अयुक्तत्वप्रतिपादनम-समीचीनम् , यतो हि – नायं विभागः सर्वान् प्रति सम्भावाभिप्रायेण वर्णितः किन्तु व्यञ्जकभेदेन स्फोटभेदिका यावत्यो दृष्टयः संभवन्ति , तासां संकलनेन वर्णितः । अन्यथा सर्वान् प्रति सम्भवाभिप्रायेण विभागस्य विवक्षितत्वे तु जातिव्यक्तिरूपार्थभेदेन श्रीपाण्डेयवर्णितो विभागोऽपि न संगच्छते , व्यक्तिपदार्थवादिनः जातेः , जातिपदार्थवादिनो व्यक्तेः स्फोटावाच्यतया तद्भेदप्रयुक्तस्य स्फोटभेदस्याप्यसम्भवात् ।

किञ्च पाण्डेयैः प्रकृतिप्रत्यययोरपि सखण्डभेदमादाय व्यक्तिस्फोटजातिस्फोटयोः , षोडशविधत्वं यदुक्तं , तद्पि न समीचीनम् । तथा सति सखण्डप्रकृतिस्फोटः सखण्डप्रकृतिजातिस्फोटः , अखण्डप्रकृतिस्फोटः , अखण्डप्रकृतिजातिस्फोट इत्येवं प्रकृतिव्यङ्ग्य-स्फोटस्य एवं सखण्डप्रत्ययस्फोटः सखण्डप्रत्ययजातिस्फोटः, अखण्ड-प्रत्ययस्फोटः अखण्डप्रत्ययजातिस्फोटः इत्येवं प्रत्ययव्यङ्ग्यस्फोटस्य चा चातुर्विध्येन प्रकृतिप्रत्ययव्यङ्ग्यस्फोटयोरष्टविधतया इतरैः

अखण्डपदस्फोटः, सखण्डपदस्फोटः , अखण्डपदजातिस्फोटः , सखण्डपदजातिस्फोटः, अखण्डवाक्यस्फोटः, , वाक्यस्फोटः , सखण्डवाक्यजातिस्फोटः , वर्णस्फोटः वर्णजातिस्फोटः इति दशभिः स्फोटैः सह संकलनेन स्फोटस्य अष्टादशविधत्वमेव सम्भवति , न षोडशविधत्वम् ।

पाण्डेयमते तु स्फोटवाच्यभेदेन , स्फोटव्यञ्जकभेदेन च द्विधा स्फोटभेदकल्पने गौरवम् , कौण्डभट्टादिमते तु केवलं व्यञ्जकभेदेनैव स्फोटभेदकल्पनेऽतिलाघवम् । वाच्यव्यञ्जकोभयभेदेन स्फोटभेदकल्पने तु वर्णवाचकत्वादिमते अष्टभिर्वणादिभिर्व्यङ्ग्यानामष्टानां व्यक्तिस्फोटनामाष्टानां जातिस्फोटानां च संकलनया यथा स्फोटस्य षोडशविधत्वं प्रतिपाद्यते , तथैव येऽर्थगतजातेर्वाच्यत्वमिव वर्णादिगतजातीनामेव वाचकत्व मन्यन्ते , तेषां मतेऽष्टाभिर्वर्णादिगतजातिभिर्व्यक्तिस्फोटस्य जातिस्फोटस्य च व्यङ्ग्यत्वेन वर्णादिगताष्टजातिव्यङ्ग्यानामष्टानां व्यक्तिस्फोटानां जातिस्फोटानाञ्च संकलनेन जातिव्यङ्ग्यस्फोटोऽपि षोडशविधः स्यात् । इत्थं च वर्णाव्यङ्ग्यानां व्यक्तिजातिस्फोटानां वर्णादिगतजातिव्यङ्ग्यानां व्यक्तिजातिस्फोटानाञ्च संकलनया द्वात्रिंशद्विधत्वं स्फोटस्य स्यान्न तु षोडशविधत्वमेव । अतो वाच्यभेदेन स्फोटभेदमस्वीकृत्य व्यञ्जकभेदेनैव स्फोटभेदः कल्पनीयः । तेन च कौण्डभट्टादिसम्मतम् अष्टविधत्वमेव विचारयुक्तं प्रतिभाति ।

“ **अथवोभयतः स्फोटमात्रं निर्दिश्यते** ” इति ‘ **ऐऔच्** ’ सूत्रस्थात् भाष्याद् विशुद्धस्य प्रकृतिप्रत्ययव्यतिरिक्तस्य ऋकारादिवर्णस्यापि स्फोटव्यङ्ग्यतास्वीकारे तु कौण्डभट्टादिकृतः स्फोटविभागोऽपि न्यून एव ।

स्फोटस्याष्टविधत्वमेव प्रतिपादितं नागेशभट्टेनापि [1229]स्फोटवादः । इत्थमष्टौ स्फोटाः – **सखण्डवर्णस्फोटः , सखण्डपदस्फोटः , सखण्डवाक्यस्फोटः , अखण्डपदस्फोटः , अखण्डवाक्यस्फोटः , वर्णजातिस्फोटः , पदजातिस्फोटः , वाक्यजातिस्फोटः ।**

तत्र वर्णस्फोटः इत्यत्र वर्णपदं प्रकृतिप्रत्ययपरम् , न तु प्रत्येकवर्णपरम् , तथा सति प्रत्येकवर्णानां वा वाचकत्वस्य निरस्तत्वेन पुनः तद्स्वीकारेऽप्रसिद्धान्तापात- प्रसङ्गः । तस्मात् वर्णस्फोटः इत्यस्य प्रकृतिप्रत्ययौ [1230] वाचकावित्यर्थः । शास्त्रप्रक्रियानिर्वाहाय तयोरर्थः कल्प्यते । पस्यश्चायं ‘ **दाधाघ्वदाप्** ’ इति [1231]सूत्रभाष्ये प्रतिपादितः । तथा हि आदेशास्तर्हीमे भविष्यन्ति । अनागमकानां सागमका आदेशाः । तथाह्युच्यते-

**“ सर्वे सर्वपदादेशाः दाक्षिपुत्रस्य पाणिनेः ।**

**एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥**[1232] ”

अत्र कैयटः – “ **सर्व इति आगमा अपीत्यर्थः । सर्वपदादेशा इति , पदशब्देन न सुबन्तं गृह्यते , अपि कार्यप्रतिपद्यमानं प्रकृतिप्रत्ययादि** [1233] ” इति ।

एवं सति रामेण रामेषु इत्यादौ प्रकृतिप्रत्ययविभागस्य दुरधिगमतया तयोर्वाचकत्वं दुर्वाच्यमिति विशिष्टस्यैव पदस्य वाचकत्वमिति पदस्फोटः । पदस्फोटः इत्यत्र ‘ **पद** ’ पदेन सुबन्तं तिङन्तञ्च गृह्यते । यत्र तु हरेऽव

---

**[1229] स्फोटवादे पृ.सं २४ ।**

**[1230] तत्र शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः प्रकृतिप्रत्ययास्तत्तदर्थवाचकाः इति तदर्थः- वैयाकरणसिद्धान्तलघुमञ्जूषायाम् ।**

**[1231] पतञ्जलिमहाभाष्ये १/१/२० ।**

**[1232] पतञ्जलिमहाभाष्यप्रदीपे १/१/२० ।**

**[1233] पतञ्जलिमहाभाष्यप्रदीपे १/१/२० ।**

विष्णोऽव इत्यादौ विभक्तपदज्ञानस्याव्यक्ततया तत्र पदस्फोटः पक्षोऽपि न समीचीनतामावहतीति विशिष्टस्यैव वाक्यस्य वाचकत्वमिति वाक्यस्फोटपक्षोऽपि सिद्धः । इदमपि पक्षद्वयं प्रतिपादितं पस्पशाह्निके महाभाष्ये पतञ्जलिना- " तथा हि ' **अथ गौरित्यत्र कः शब्दः** ' **इत्युपक्षिप्य व्यक्तिक्रियादीनां शब्दत्वं निराकृत्य ' येनोच्चारितेन सास्नालाङ्गुलककुदखुर-विषाणिनां सम्प्रत्ययो भवति स शब्द** [1234] " इति ।

तत्र [1235]कैयटः –वैयाकरणाः पदस्य वाक्यस्य वा वाचकत्वमिच्छन्तीति व्याचख्यौ । तत्र येनिच्चारितेनेत्येकवचनेन गौरित्यस्यैकपदत्वं सूचितम् । अत्रैव वर्णातिरिक्तस्य पदस्य वाक्यस्य वेति वदता कैयटेनाखण्डपदस्फोटवाक्यस्फोटौ प्रतिपादितौ । तथा च ' **पदप्रकृतिसंहिता** [1236]' इति प्रातिशाख्यमप्यत्रैव प्रमाणम् , तत्र हि पदानां प्रकृति इति षष्ठी तत्पुरुषेऽखण्डवाक्यस्फोटपक्षः । पदानि प्रकृतिर्यस्या इति बहुब्रीहौ सखण्डवाक्यस्फोटः सिद्ध्यतीति विभावनीयम् ।

हरेरपि भणितिरियम्-

**" पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ।**
**पदानां संहितायोनिः संहिता वा पदाश्रया ॥ [1237]" इति ।**

एवञ्च वर्णस्फोटः , पदस्फोटः, वाक्यस्फोटः , अखण्डपदस्फोटः , अखण्डवाक्यस्फोटश्च सिद्धयति ।

---

[1234] **पस्पशाह्निकमहाभाष्ये पृ. १०-१४ , दण्डीस्वामी दामोदर आश्रम ।**

[1235] **प्रदीपे पस्पशाह्निकमहाभाष्ये पृ. १२ , राष्ट्रीय-संस्कृत-संस्थानम् -१ ।**

[1236] **ऋग्वेदप्रातिशाख्ये ।**

[1237] **भर्तृहरिवाक्यपदीये २/५९ ।**

अनन्तानां वर्णानां पदानां वाक्यानां वा वाचकत्वकल्पनापेक्षया तन्निष्ठाया जातेरेव लाघवाद् वाचकत्वं कल्पनीयमिति जातिस्फोटपक्षः । यथा घटादिशब्दानामर्थगता जातिरेव वाच्या लाघवात् , अव्यभिचाराच्च , तथैव घटशब्दानामानन्त्याद् व्यभिचाराच्च , शब्दगता जातिरेव वाचिका, लाघवादव्यभिचाराच्च । उक्तञ्च-

**" शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ।**

**औपाधिको व भेदोऽस्तु वर्णानां तारमन्दवत् ॥**[1238] " इति ।

अयम्भावः – जातिरूपरूषितः एव स्फोटो वाचको न तु जात्याश्रयरूपरूषितः , अनन्तस्फोटानां वाचकत्वापत्तौ गौरवापत्तेः । जातिस्फोटस्य वाचकत्वे तु जातेरैक्यात्तत्तादात्म्यापन्नस्फोटस्यापि ऐक्यमिति भावः । यद्यपि घटत्वपटत्वादिजातिभेदेन स्फोटस्यापि भेदस्तथापि व्यक्तिकृतभेदो नास्तीति बोध्यम् ।

ननु जातिस्फोटपक्षे जातेः प्रत्येकवर्णेषु विद्यमानत्वात् , सर्वेभ्यो वर्णेभ्योऽर्थबोधापत्तिरिति वाच्यम् – अनेकव्यक्त्यभिव्यङ्ग्यायाः जातेरेव वाचकत्वस्वीकारेण प्रत्येकवर्णेषु जातेर्विद्यमानत्वेऽपि न तेभ्योऽर्थप्रतीतिः , प्रत्येकवर्णनिष्ठाया जातेरनेकवर्णाभिव्यङ्ग्यत्वाभावात् ।

अत एवानेकाभिर्व्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता इत्युक्तं कौण्डभट्टेन [1239] ।

अत्रेदमाशङ्क्यते – ननु स्फोटवादिनां मते स्फोटस्य वर्णरहितत्वात् गकारौकारविसर्जनीयरूपो गौरिति पदमेव नास्ति कुतस्तन्निष्ठा जातिः , कुतश्च तस्या वाचकत्वम् ।

---

[1238] **कौण्डभट्टैः वैयाकरणभूषणसारस्फोटनिर्णये श्लोक. सं. ७१ पृ. ३९२ ( चौ . सं .प्रतिष्ठानम् ) ।**

[1239] **वैयाकरणभूषणसारस्य स्फोटनिर्णये पृ. ५२५ ।**

यदि तु – यथा मुखे मणिकृपाणादर्शधर्मा भासन्ते , तद्वद् स्फोटस्य वर्णव्यङ्ग्यत्वाद् वर्णप्रतिभासः तत्रोपपद्यत इति , तदपि न समीचीनम् , व्यञ्जका हि वर्णा आशुविनाशिनः , न द्वितीयादिवर्णोत्पत्तिकाले पूर्वं स्वयमतिष्ठन्त इति गकारौकारविसर्जनीयानां सम्भूयावस्थानमेव नेति तद्व्यङ्ग्ये स्फोटेऽपि युगपत् तत्प्रभासस्यासम्भवात् । अत एवोक्तम् -

**“ अनारब्धे तु गोशब्दत्वं कथं भवेत् ।[1240]”**

किञ्च स्फोटस्यैक्यात् गौरिति पदस्फोटोऽपि एक एव , एवञ्च कथं तत्र जातिः सिद्ध्यति व्यक्तेरेकत्वस्य **जातिबाधकत्वात्** [1241] । सम्भवेऽपि यथा वर्णवाचकत्ववादिनां मते पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णो वाचकस्तथैव वैयाकरणानां स्फोटवादिनां मतेऽपि पूर्वपूर्ववर्णजनितसंस्कार-सहितोऽन्त्यो वर्णः स्फोटव्यञ्जकः इति तन्मतेऽपि न कश्चन दोषः ।

**“ यत्रोभयोः समो दोषः परिहारो वा तयोः समः ।**
**नैकस्तत्र पर्यनुयोक्तव्यस्तदर्थस्य विचारणे ॥** [1242]”

अथवा वर्णानाम् आशुविनाशित्वेन ज्ञाने यौगपद्यासम्भवेऽपि स्मृतौ यौगपद्यं सम्भवत्येवेति यौगपद्यापन्नानां स्मृतानामेव वर्णानां स्फोटाभिव्यञ्जकत्वेऽपि न क्षतिः । अत एविक्तं हेलाराजेनापि – **‘ अनुभवपूर्वकत्वं हि स्मरणस्य नियतम् , न तु क्रमेणोपलब्धं स्मर्यते , शतादिप्रत्ययाभावप्रसङ्गात्** [1243] **’** इति ।

यत्तूक्तमेकव्यक्तिवृत्तित्वात् गिशब्दत्वं न जातिरिति , किन्तु प्रतिपुरुषकण्ठताल्वादिव्यञ्जकभेदात् भिन्नवर्णनिबन्धना गौरिति

---

[1240] **श्लोकवार्त्तिके पृ.५२६ ( चौ.सं.सी.प्रकाशनम् ) ।**

[1241] **व्यक्तेरभेदतुल्यत्वं शङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकः संग्रहः - किरणवल्याम् ।**

[1242] **सांख्यसूत्रे निरुद्धवृत्तौ १-६ ।**

[1243] **वाक्यपदीयव्याख्यायां कालसमुद्देशे ।**

पदस्फोटेऽनेकत्वप्रतीतिर्दुर्वारा , एवञ्च पदस्फोटस्यानेकत्वप्रतीतौ तत्र जातित्वस्यास्वीकारे बाधकाभाव एव स्वीकरणीयः । सा जातिमहासत्तारूपा ब्रह्मणो न भिद्यते , इति सर्वत्र ब्रह्मण एव वाचकत्वं , वाच्यत्वं वा । तस्या एव च महासत्तायाः गोत्वाश्वत्वादिविशेष्यसत्ता विवर्त इति तस्या अपि वाचकत्वं वाच्यत्वमविद्या कृतं स्वीक्रियते , इति जातिस्फोटवादस्य निष्कर्षः । अत एव भणितं भर्तृहरिणा –

**" सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु ।**

**सा नित्या सा महानात्मा तामाहस्त्वतलादयः ॥** [1244]" इति ।

कैयटेनापि कथितम् – " **तत्तदाकारं तत्तद्व्यङ्ग्यजातिरूप वासत्यामुपाधिमाश्रित्य तत्तदवच्छिन्नं ब्रह्मैव द्रव्यम्** [1245] " इति ।

एवञ्च सर्वे स्फोटाः तत्तद् युक्तिभिः प्रतिपादिताः सन्ति । एषु च स्फोटेषु अखण्डवाक्यस्फोट एव मुख्य इति नव्यानां मतम् । उक्तञ्च नागेशेन - " **तत्र वाक्यस्फोटो मुख्यो लोके तस्यैवार्थबोधकत्वात् तेनैवार्थसमाप्तेश्च** [1246]" इति । अत्र वाक्यस्फोट पदेन अखण्डवाक्यस्फोट एव गृह्यते ।

वाक्यजातिस्फोट एव मुख्य इति प्राचां मतम् । उक्तञ्च – " **यद्यपीहाष्टौ पक्षा उक्तास्तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रन्थकृताम् । तत्रापि जातिस्फोट इत्यवधेयम्** [1247]" ।

---

[1244] **वाक्यपदीये जातिसमुद्देशे का.सं.३३ ।**

[1245] **प्रदीपे पस्पशाह्निकमहाभाष्ये ।**

[1246] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ.सं. १ ।**

[1247] **शब्दकौस्तुभे पृ.सं. ११ ।**

“ **वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः** [1248]” इति हि युक्तिरपि अत्र प्रमाणम् ।

स्फोटेषु प्रधान भूतोऽयं वाक्यस्फोटो नैयायिकैर्मीमांसकैश्च न स्वीक्रियते ।

तत्र नैयायिकास्तावत् – ‘ **घटमानय** ’ इत्यादावाकाङ्क्षादिसहकारेण पदैरेव पदार्थस्येव तत्संसर्गस्यापि प्रतीतौ तत्रातिरिक्तवाक्यशक्तिकल्पनमयुक्तम् । [1249]नैयायिकानां नये पदार्थयोः संसर्गः आकाङ्क्षादिना प्रतीयते । अतः शक्तिकल्पनाया अयुक्तत्वात् , वाक्यस्फोटस्वीकारः अविचारपूर्वक एव ।

किञ्च नैयायिकानां नयेऽस्माद् पदादयमर्थो बोध्यव्यः इतीश्वरेच्छारूपा शक्तिः पदेषु क्लृप्ता । अतः किमप्यधिकं न कल्पनीयम् । वाक्यस्फोटवादिनां वैयाकरणान्तु ‘ **अस्माद्वाक्यादयं संसर्गो बोध्यव्यः** ’ इतीश्वरेच्छारूपा शक्तिः वाक्येषु कल्पनीयेति तेषां मते अधिककल्पनात् गौरवम् ।

अत्रोच्यते वैयाकरणैः – हरेऽव विष्णोऽव इत्यादौ पृथक् पदज्ञानाभावेन पदशक्तेर्ज्ञातुमशक्यतया वाक्यशक्तिज्ञानेनैव तत्र बोध्यस्य वक्तव्यत्वात् , वाक्यस्फोटोऽवश्यमेव अङ्गीकार्यः । अतः पदैरेव , पदार्थबोधे संसर्गः आकाङ्क्षा भास्यः , इत्युक्तिर्न सार्वत्रिकीति बोध्यम् ।

शक्तिग्रहविषये तु यथा नैयायिकानां पदे ईश्वरेच्छाविषयत्वमिति विश्वासः , तथा वैयाकरणानामस्मात् वाक्यादयमर्थो बोध्यव्यः इति वाक्येऽपि ईश्वरेच्छाविषयत्वं क्लृप्तमेवेति विश्वासः । न हि ईश्वरः स्वयमेवागत्य कथयति – पदे एव मदीयेच्छाविषयत्वं न तु वाक्ये इति ।

---

[1248] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ.१ ।**

[1249] **एकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते - व्युपपत्तिवादे पृ.सं. १ ।**

वाक्यविषयकेश्वरेच्छाया शक्तित्वमेव नास्ति , इति वक्तुं न शक्यते विनिगमनाविरहात् । पदविषयकेश्वरेच्छायाः शक्तित्वं , न तु वाक्यविषयकेश्वरेच्छाया इत्यत्र न किमपि प्रमाणम् , अत प्रमाणाभावात् उभयोरपि शक्तित्वे बाधकाभाव एव स्वीकरणियः सुधिभिः ।

वाक्ये शक्तिस्वीकारे ‘ **संसर्गौ वाक्यार्थः** [1250]’ इति किंवदन्ती संगच्छते । अन्यथा तस्मिन् वाक्यार्थत्वव्यवहारो न युज्यते । यतो हि वाक्यजन्यज्ञानविषयो हि वाक्यार्थः । वाक्यशक्तेरभावे वाक्यजन्यो बोध एव नास्तीति कथं तद्विषयत्वं संसर्गस्य स्यात् ।

वाक्ये शक्तिस्वीकारादेव – “ **कृत्तद्धितसमासाश्च** [1251]” इति सूत्रस्थसमासग्रहणस्य नियमार्थप्रतिपादनपरं भाष्यमपि संगच्छते । तत्र भाष्ये राज्ञः पुरुषः इत्यादौ समासेऽर्थवत् सूत्रेणैव प्रातिपदिकसंज्ञा सिद्धा , कृत्तद्धितेति सूत्रे समासग्रहणं नियमार्थमिति प्रतिपादितमस्ति । यदि वाक्ये शक्तिर्नाङ्गीक्रियते तदा “ **राज्ञः पुरुषः** ” इत्यादेरर्थवत्त्वभावात् पूर्वसूत्रेण प्रातिपदिकसंज्ञाया अप्राप्तत्वात् , समासग्रहणस्य नियमार्थत्वोक्तिरसंगता स्यात् । ‘ **सिद्धे सति आरभ्यमाणो विधिर्नियमाय कल्प्यते** ’ इति न्यायात् । अत्र यदि पूर्वसूत्रेण प्रातिपदिकसंज्ञा सिद्धा न स्यात् , तर्हि समासग्रहणस्य नियमार्थत्वं न स्यात् । अतः वाक्ये शक्तिस्वीकारः भाष्यसम्मत इति निष्कर्षः ।

तत्रैव नागेश्वरीटीकायामप्युक्तम् – “ **उभयनयेऽपि मतद्वयेऽपि वाक्यार्थोऽपदार्थ एव , पदवृत्त्यविषय एव** [1252]” इति ।

---

[1250] **घाटमानय इत्यादौ संसर्गरूपोऽर्थः समुदायशक्यः , स्फोटवादे पृ. सं १४ ।**

[1251] **पाणिनीयाष्टाध्याय्याम् १/२/४६ ।**

[1252] **नागेश्वरीटीकायां काव्यप्रकाशे पृ.९४ ।**

मीमांसकास्तु वाक्यस्य वाक्यार्थे शक्तिं न स्वीकुर्वन्ति , अपि तु तेषां मते तत्र लक्षणैव ।

अयमभिप्रायस्तेषाम् – वाक्यस्य वाक्यार्थे पृथक् शक्तिः वक्तुं निश्चिता । तथा सति वाक्यावयवेषु पूर्वपूर्वपदेषु विस्मृतेषु वाक्यार्थावगतिर्न स्यात् । यथा विस्मृतपूर्वपूर्ववर्णानामन्तिमवर्णमात्रात् न पदार्थावगिस्तथा वाक्ये पूर्वपूर्वपदानां विस्मृतत्वात् न ततोऽर्थबोधसम्भवः । अतः पदान्येव प्रथमं पदार्थानवबोध्य तदनन्तरं वाक्यार्थमपि लक्षणया बोधयन्ति ।

उक्तञ्च-

**" न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः ।**

**सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति च स्थितिः ॥**[1253] " इति ।

ननु वाक्यार्थस्यापूर्वत्वात् तत्र लक्षणा कथं सम्भवति , यतो हि **" शक्यसम्बन्धस्य[1254] , [1255]ज्ञाप्यसम्बन्धस्य , शक्यतावच्छेदकारोपस्य[1256] वा लक्षणात्वेनापूर्वे वाक्यार्थे कस्यचित् सम्बन्धस्य , आरोपस्य वासम्भवात् लक्षणापि असम्भवेति "** चेदत्रोच्यते मीमांसकैः -

प्राक् हरिद्रानामकनदीविशेषमजानता पुरुषेण **' हरिद्रायां नद्यां घोषः '** इति वाक्ये श्रुते नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषे

---

[1253] **श्लोकवार्त्तिके वाक्या. श्लोक.सं २२९ ।**

[1254] **लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः । न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे ।**

[1255] **केचित्तु ज्ञाप्य सम्बन्धेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणा - वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. सं.१०८ ।**

**शक्यसम्बन्धो लक्षणा इति स्वीकारे वाक्ये लक्षणा न सम्भवति तत्र शक्तेरभावादिति मीमांसकमतम् आह – केचित्त्विति – रत्नप्रभाटीकायां – वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. सं.१०९ ।**

[1256] **सामीप्यादि सम्बन्धमूलकः शक्यतावच्छेदकारोप एव लक्षणा । रत्नप्रभाटीकायां वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ. सं.११३ ।**

शक्तिग्रहणपुर्वकं नदीसम्बन्धित्वेनावगततीरः लक्षणया प्रतीयते , तथैव पदैः पदार्थानानुपस्थितावाकाङ्क्षाज्ञानादिसाचित्वात् पदार्थैरेव वाक्यार्थस्योपस्थितिः सम्भवति । तथोपस्थितस्यापि वाक्यार्थस्य वृत्त्यनुपस्थितत्वात् तस्य बोधस्य शब्दत्वं न स्यात् , अतः शब्दत्वप्रकारकबोधानुभवात् मध्ये लक्षणाग्रहः सम्भवत्येव । तस्मात् वाक्यार्थे लक्षणायाः सम्भवात् तत्र शक्तिस्वीकारोऽविचारितरमणीय इति मीमांसकानामभिप्रायः – तन्न युक्तम् तादृशबोधद्वयस्यानुभवाविषयत्वात् लक्षणायाः हेतोरभावात् , तत्र लक्षणायोगाच्च । तथाहि लक्षणायां मुख्यार्थबाधः प्रथमो हेतुः । उक्तञ्च काव्यप्रकाशे –

" **मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥**[1257] " इति ।

विश्वनाथेनापि प्रतिपादितम् –

" **मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।**
**रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता ॥** [1258]" इति ।

तत्र मुख्यार्थबाधो द्विप्रकारकः , तात्पर्यानुपपत्तिरूपः अन्वयानुपपत्तिरूपश्च । अत्र अन्वयानुपपत्तिरूपो मुख्यार्थबाधस्तु न विद्यते , अतः तात्पर्यानुपपत्त्या तत्र लक्षणा वक्तुं शक्या , किन्तु नियमतः पूर्वं तात्पर्यज्ञानस्यापि कल्पनापेक्षया वाक्यस्य वाक्यार्थे शक्तिकल्पनस्यैवौचित्यात् । तस्मात् वाक्यस्य वाक्यार्थे लक्षणा न स्वीकरणीया , कल्पनागौरवात् , अपि तु शक्तिरेव ।

अन्विताभिधानवादानुयायिनः वेदान्तिनोऽपि वाक्ये शक्तिं नाङ्गीकुर्वन्ति । तेषां मते संसर्गरूपस्य वाक्यार्थस्य पदैरेवाभिधानसम्भवात् ।

---

[1257] **काव्यप्रकाशे द्वितीयोल्लासे ।**

[1258] **साहित्यदर्पणस्य द्वितीयपरिच्छेदे . कारिका.सं. ५ ।**

प्रतिपादितञ्चैतत् नृसिंहाश्रमैः वृत्तिं विना शाब्दबोधविषयत्वासम्भवात् वाक्यार्थविषयिणी वृत्तिर्वक्तव्या । सा चातिरिक्ता गौरवान्नेति क्लृप्तपदार्थशक्तिरेव तद्विषयिणी कल्प्यते । पदानामन्वयसामान्ये शक्तौ तु विशेषमविषयीकृत्य सामान्यबुद्धेरपर्यवसानात् , तत्तत्पदसामान्यशक्तिभिरेव समभिव्याहृतपदोपस्थापितपदार्थविशेषनिरूपितान्वयविशेषः सेत्स्यतीत्येक-शक्तिलाघवम् । किञ्च पदप्रयोगेऽपि अन्वयविशेषस्य नियमेन जिज्ञासादर्शनात् तस्याश्चान्वयज्ञानसामान्यपूर्वकत्वात् , तज्ज्ञानस्य च शब्दादन्यतोऽसम्भवात् शब्द एवान्वितमभिधत्ते इति वाच्यम् । दृष्टे जम्बुरफलादौ रसविशेषजिज्ञासावत् तद्भविष्यतीति चेन्न , तत्र नियमेन तदभावात् । अन्यथा वैशेषिकमत इव व्याप्तिप्रतिसन्धानदशायामेव शब्दादर्थसंसर्गः प्रतीयत इति शब्दोऽप्यप्रमाणं स्यात् ।

अयम्भावः –वाक्यार्थे वाक्यस्य शक्तिर्न स्वीकरणीया , अपि तु पदानामेवान्विते शक्तिः । एवञ्चान्वितार्थनिरूपितशक्तिमद्भिः पदैरेव वाक्यार्थप्रतीत्युपपत्तौ , वाक्ये शक्तिकल्पने मानाभावः । अत एवान्विताभिधानवादस्यार्थविषये मतमुपस्थापयता मम्मटेनोक्तम् -

**“ वाच्य एव हि वाक्यार्थ इत्यन्विताभिधानवादिनः ” [1259] इति ।**

किञ्च ‘ **घट** ’ शब्देनोपस्थापितस्याकाशस्य शाब्दबोधविषयत्व-वारणायवृत्त्योपस्थितस्यैव शाब्दबोधविषयत्वं स्वीकुर्वन्ति सर्वे । अतः वाक्यार्थस्य शब्दबोधविषयत्वप्रतिपादनाय वाक्यार्थविषया वृत्तिरवश्यमेव स्वीकार्या । सा व वृत्तिः पदशक्तेरतिरिक्ता कल्प्यते चेत्तदा गौरवम् । अतः क्लृप्ताया एव पदशक्तेः वाक्यार्थविषयत्वमपि कल्प्यते । पदानां च सामान्यतः इतरान्विते शक्तावपि निर्विशेषं न सामान्यमिति सर्वतान्त्रिकसिद्धान्तत्वात्

---

[1259] **काव्यप्रकाशे द्वितीये उल्लासे ।**

विशेषाविशयसामान्यबिद्ध्यभावात् तत्तत्पदसामान्यशक्तिभिरेव समभि-व्याहारविशेषकारणत्वाद् आकाङ्क्षाज्ञानवलात् तत्तत्पदार्थविशेष-निरूपितान्वयविशेषबोधः सम्भवति।

किञ्च एकपदप्रयोगे ‘ **गाम्** ’ इत्युक्ते ‘ **गौः किं करणीया** ’ इति क्रियाविशेषान्वयस्य ‘ **आनय** ’ इत्युक्ते ‘ **किमानेयम्** ’ इति कारकविशेषान्वयस्य नियमेन जिज्ञासादर्शनात् , जिज्ञासायाश्च ‘ निर्विशेषं न सामान्यमितिवत् ’ निःसामान्यो विशेषोऽपि न इति न्यायस्यापि सत्त्वेनान्वसामान्यज्ञानपूर्वकत्वनियमात् तज्ज्ञानस्य शब्दादन्यतोऽसम्भवात् , शब्द एवान्वितमभिधत्ते । यत्र तु ‘ घट ’ शब्दाद् अन्वयरहितस्य घट रूपार्थस्य बोधः , तत्र अन्वितघटविषयायाः शक्तेः घटमात्रविषयत्वं भ्रमकृतमेवेति स्वीकार्यम्। अथवा सत्या , भामा, सत्यभामा इत्यत्र पदैकदेशा अपि प्रयुज्यन्ते , तद्वत् अर्थेऽपि अन्वयविशेषे केवलेऽर्थे वा पदानां शक्तिस्वीकारेऽपि क्षत्यभावः इति वेदान्तिनां तात्पर्यम् –

तन्न समीचिनम् – यतोहि शाब्दबोधस्थले पदज्ञानं करणम् , शाब्दबोधः फलमिति सिद्धान्तः । तथा च अन्वितार्थे शक्तिस्वीकारे करणभूतस्य घटादिपदज्ञानस्य कार्यभूतशाब्दबोधे घटान्वयोभयविषयत्वस्या-वच्छेदकत्वे गौरवम् , केवलार्थे शक्तिस्वीकारे तु घटमात्रविषयत्वस्यावच्छेदकत्वे लाघवम्। अतः कार्यतावच्छेदकलाघवाद-न्वितेऽर्थे एव पदस्य शक्तिः स्वीकार्या।

किञ्च वेदान्तिमतेऽन्वयविशिष्टे शक्तिस्वीकारेऽपि ‘ **घटमानय** ’ इत्यादौ ‘ **घटकर्मकमानयम्** ’ इति विशेषबोधाय समभिव्याहारविशेषस्य कारणत्वं कल्पनीयम् , तथा च वाक्यस्य पदसमभिव्याहाररूपत्वात् समभिव्याहारस्य कारणत्वस्वीकारे वाक्यस्यापि कारणत्वमकामेनापि

अङ्गीकरणीयमेव । वाक्यकारणत्वकल्पनायाश्च वाक्यशक्तावेव पर्यवसानं भवतीति वेदान्तिमतेऽपि वाक्ये शक्तिः सुतरां सिद्ध्यति ।

यदि तु अन्विते शक्तिरित्यस्य पदान्तरार्थेनान्वितः पदार्थ एव पदैरनुभाव्यते , न तु पदार्थमात्रम् इत्यर्थः , अर्थात् ‘ **घटमानय** ’ इत्यत्र घटपदस्यानयनक्रियान्वितघट एवार्थः , न तु पदार्थमात्रम् । तथा हि पदानामन्वयानुभवजनकत्वमेवशक्तिः , एकैकपदार्थोपस्थितिषु स्मृतिरूपा , एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतया हस्तिपकादिसाधारणत्वाद-न्वयानुभवजनकत्वरूपस्य मूलसम्बन्धस्य विद्यमान-त्वादित्युच्यते , तर्हि वाक्यशक्तिः सुतरां सिद्ध्यति । यतो हि सा शक्तिर्नैकपदे , केवलघटपदादप्यन्वयानुभवापत्तेः , न हि अन्वितो घट इति एकपदादनुभवः कस्यचित् जायते । अतः समुदाये एवान्वयानुभवजनकत्वरूपा शक्तिः स्वीकार्या । समुदाये स्वीकारे तु सा वाक्ये एव सिद्ध्यति , पदसमूहस्यैव वाक्यत्वात् ।

भाट्टास्तु – पदार्थेभ्यो वाक्यार्थस्य प्रतीतिं प्रतिपादयन्ति । तेषां मते पदज्ञानं न वाक्यार्थप्रतीतावुपयुज्यते , किन्तु यत् पदार्थप्रतीतिजनने एव समाप्तसामर्थ्यम् । भणितञ्च तैः-

**“ पदार्थानां तु मूलत्वं दृष्टं तदभावभावतः ।**
**सत्यं न वाचकं वाक्यं वाक्यार्थस्योपपद्यते ॥[1260] ” इति ।**

अपि चान्वयव्यातिरेकाभ्यामेवावगम्यते पदार्थपूर्वको वाक्यार्थः । तथापि – यो मानसादपचारात् श्रुतेष्वपि पदेषु पदार्थान्नावगच्छति , नावगच्छत्येवासौ वाक्यार्थम् । यस्त्वश्रुतेषु अपि पदेषु प्रमाणान्तरतः पदार्थान्

---

[1260] **श्लोकवार्तिके वाक्या.श्लोक.२११ ।**

जानीयात् जानात्येवासौ वाक्यार्थमपि अतो वाक्यार्थज्ञाने पदार्थज्ञानमुपयुज्यते।

पदार्थसंसर्गस्वभावत्वात् वाक्यार्थस्य सत्यं पदार्थपूर्वकत्वं , किन्तु न तावतैव पदार्थानां वाक्यार्थ हेतुत्वं सिद्ध्यति । मानसापचारे च सति पदानामपि ग्रहणाभावे कुतो वाक्यस्य ग्रहणम् ? कुतस्तरां वा पदार्थवाक्यार्थयोः ? यतः क्षणान्तरे समाहितचित्तः सः वक्ति – **“ नाहमेतद्भवदुदीरितमश्रौषम् । न वावगच्छामि भवद्विवक्षितमर्थम् । अन्यत्र मे मनोऽभूत् । तत् पुनर्ब्रूहि ”** इति।

भाट्टरीत्या तु तत्प्रश्नासंगतिः यतोहि तत्रापि पदानि स्मृत्वा तदर्थमवागच्छेत् न तु पुनस्तानि पृच्छेत् । तस्मात् पदार्थस्तत् स्मृतिर्वा शब्दबोधे हेतुरिति पक्षो न समीचीनः । तस्मात् वाक्ये वाक्यार्थनिरूपितावश्यमेव शक्तिः स्वीकार्या इति वाक्यस्फोटः निर्विवादं सिद्ध्यति।

ननु उक्तरीत्या वाक्ये शक्तिस्थापनेऽपि वर्णसमूहरूपपदवाक्ययोर्ज्ञानमेव न सम्भवति वर्णानामुत्पत्तिपक्षे वा समुदायोऽसम्भवः , तेषां क्रमिकत्वात् क्षणिकत्वाच्च इति चेदत्रोच्यते वैयाकरणैः-

पूर्ववर्णप्रत्यक्षानन्तरम् ‘ **उत्तरवर्णप्रत्यक्षकालेऽव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्वं तदुत्तरवर्णे गृह्यते । एवं तदुत्तरवर्णप्रत्यक्षकाले उपस्थितविशिष्टतद्वर्णवत्त्वं तदुत्तरवर्णे गृह्यते इति वर्णानां क्रमिकत्वेऽपि तेषां समुदायो नासम्भवी । ‘ सरो रसो , नदी दीन ’ इति इत्यादौ पर्यायतापत्तिरपि न स्यात् , पदयोः समानवर्णवत्त्वेऽपि क्रमे भेदात् ” इति।**

एवञ्च वर्णस्फोटः , पदस्फोटः , वाक्यस्फोटश्चेति स्फोटत्रयं निरूपितम्।

किन्तु एकं पदम् एकं , वाक्यम् , इति प्रतीतेः तदेवेदं घटपदं , यत् देवदत्तेनोच्चारितम् ‘ **तदेवेदं वाक्यं इत्यादिप्रतीतेश्च वर्णातिरिक्तं , प्रकृतिप्रत्ययादिविभागरहितं एकमखण्डं पदं वाक्यं च वर्णातिरिक्तं वर्णव्यङ्ग्यमवश्यमेव स्वीकार्यम् ।**’ उक्तञ्च भर्तृहरिणा-

**“ पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।**

**वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥ [1261] ” इति ।**

एवं महताप्रयासेन कृतानि पाणिनिना , सूत्राणि निरर्थकानि स्युरिति शङ्कापि न कार्या , बालव्युत्पादनार्थमसन्तमपि प्रकृतिप्रत्ययादीनां विभागं कल्पयित्वा पाणिनिना व्याकरणं प्रणीतम् । तथाह्युक्तं हरिणा-

**“ उपायाः शिक्षमाणानां बालानामुपलालना ।**

**असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥ [1262]” इति ।**

जातिस्फोटसमर्थनतत्परास्तु इत्थमाहुः – यथा व्यक्तीनामानन्त्यात् व्यभिचाराच्च न तत्र शक्तिः कल्प्यते , तथैव अनेकशब्दव्यक्तीनां वाचकत्वापेक्षया एकस्याः जातेर्वाचकत्वे लाघवात् जातेरेव वाचकत्वं युक्तम् । ‘ **इदं पदम्** ’ इदम् पदम् ‘ **इयं प्रकृतिः इयं प्रकृतिः अयं प्रत्ययः , अयं प्रत्ययः , इदं वाक्यम् , इदं वाक्यम्** ’ इत्येकाकारप्रतीत्या जातिविशेषः सिद्ध्यति । व्यक्तिशक्तिवादिनां मतेऽपि उपलक्षकतया जातिः अवश्यमेव स्वीकरणीया । तथा चावश्यकत्वात् जातिरेव वाचिकाप्यस्तु । तस्मात् लाघवात् जातिरेच शक्ता , जातिरेव तादात्म्येन शक्ततावच्छेदिका अपि ।

ननु जातेः प्रत्येकं वर्णेषु विद्यमानत्वात् , सर्वेभ्यो वर्णेभ्यो बोधापत्तिः स्यादिति चेदत्रोच्यते – अनेकाभिर्ध्वनिव्यक्तिभिवर्णाः व्यज्यन्ते । तेन

---

[1261] **भर्तृहरिवाक्यपदीये १/७३ ।**

[1262] **भर्तृहरिवाक्यपदीये २/२४० ।**

वर्णसमूहेन जातिरभिव्यज्यते , नतु प्रत्येकवर्णेन । अतो जातिर्वर्णसमुदाये व्यासज्यवृत्तिरिति न तु प्रत्येकवर्णवृत्तिरितिप्रत्येकवर्णादर्थबोधापत्तिर्नास्ति । अभिहितञ्च हरिणापि -

**“ अनेक व्यक्त्यभिव्यङ्ग्या जातिस्फोट इति स्मृता ।**

**कैश्चिद्व्यक्त एवास्था ध्वनित्वेन प्रकल्पिताः ॥**[1263] ” इति ।

ननु का नामेयं जातिः या स्फोटत्वेन स्वीक्रियते ? यदि तु अनुगतप्रतीतिविषयत्वं जातिः यथा ‘ **अयं घटः** ’ इत्युनुगतप्रतीतिविषयत्वात् घटत्वं जातिः , तर्हि घटशब्दानुगतप्रतीतिविषया सेति वक्तव्यम् । घटशब्दानुगतप्रतीतिविषयश्च घकारटकाररूप वर्णसमुदाय एव , इति वर्णस्फोट एव पर्यवस्यति । यदि तु मृत्पिण्डाद्विलक्षणं घटत्वमिव वर्णसमुदायाद्विलक्षणं घटशब्दत्वं नाम किञ्चित् , जातिरित्युच्यते , तदापि तस्य घटशब्दनिष्ठतया घटशब्दान्यत्वं न स्यात् , घट शब्देनान्यथासिद्धिश्च स्यात् । अतो जातेः किं स्वरूपमिति जिज्ञासायामुच्यते वैयाकरणैः – “ **अविद्याकल्पितः शब्दनिष्ठधर्मविशेषो जातिः । अथवा तत्तदुपाध्यवच्छिन्नब्रह्मसत्तैव जातिः** ” इति ।

उक्तञ्च हरिणा-

**“ सम्बन्धिभेदात् सत्तैव, भिद्यमाना गवादिषु ।**

**जातिरित्युच्यते तस्यां सर्वे शब्दाः व्यवस्थिताः ॥**

**सा नित्या सा महानात्मा तामाहुस्त्वलादयः ।**

**तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ॥** [1264]” इति ।

एवञ्च सत्तारुपं ब्रह्मैव वाच्यं वाचकं चेति न किमपि तदतिरिक्तं वस्तु सदिति न कस्या अपि शङ्कायाः अवसरः ।

---

[1263] **भर्तृहरिवाक्यपदीये १/९५ ।**

[1264] **भर्तृहरिवाक्यपदीये ३/३३,३४ ।**

वैयाकरणाभिमतस्फोटवादस्यायमेव निष्कर्षः , यत् ‘ **घटमानय** ’ इत्यादिवाक्योच्चारणे श्रूयमाणो वाक्यध्वनिः , न घटकर्मकानयनकार्यत्व-बोधकः , अपि तु तदभिव्यङ्ग्यस्फोट एव । अयं स्फोटाभिव्यक्तिः कथं स्यादित्यत्रोच्यते - “ **पटमानय इति वाक्यघटकपकारादयो वर्णाः क्रमेणैव श्रूयन्ते न तु युगपत्** ” इति । अतो घटकीभूतानां वर्णानां श्रवणस्य यौगपद्येन स्फोटव्यञ्जकत्वं स्वीकर्त्तुं न शक्यमिति क्रमिकेण तत्तद्वर्णश्रवणेन क्रमिकैव स्फोटाभिव्यक्तिः स्वीक्रियते । तत्र पूर्वपूर्ववर्णश्रवणेन जायमानायाः स्फोटाभिव्यक्तेरपेक्षया उत्तरोत्तरवर्णश्रवणसाध्या स्फोटाभिव्यक्तिः स्फुटतरा , अतिस्फुटतराभिव्यक्त एव च स्फोटोऽर्थप्रत्यायकः इति न प्रथमवर्णेनैवापेक्षितायाः स्फोटाभिव्यक्तेर्जाततया द्वितीयादिवर्णवैयर्थ्यम् , न वा चरमवर्णमात्रेणैवापेक्षितायाः स्फोटाभिव्यक्तेः सम्भवेन पूर्वपूर्ववर्णवैयर्थ्यम् , पूर्वपूर्ववर्णसाध्यानां स्फोटाभिव्यक्तीनां चरमवर्णसाध्यायां स्फुटतमस्फोटाभिव्यक्तेः प्रयोजकत्वस्वीकारात् ।

अत्रेदं जिज्ञासते – का तावत् स्फोटाभिव्यक्तिः ? सांख्यानामिवाभिव्यक्तावस्थालक्षणः कश्चन परिणामविशेषः वेदान्तिनामिव आवरणभङ्गः नैयायिकादीनामिवावगमो वा ।

प्रथमपक्षे तु अवस्थालक्षणपरिणामरूपत्वे स्फोटस्य नित्यत्वभङ्गप्रसङ्गः तस्यैकत्वं नित्यत्वं विभुत्वञ्च प्रतिपादितमस्ति । अतः स्फोटाभिव्यक्तपदेनावस्थालक्षणपरिणामविशेषो न स्वीकरणीयः । द्वितीयपक्षोऽपि न युक्तः - आवरणभङ्गस्वीकारे पकारादिश्रवणमात्रेणा-वरणभङ्गस्य सिद्धतया पटादि शब्दसंकेतरहितस्यापि पुंसः पटादिशब्दश्रवणे स्फोटस्य भग्नावरणत्वेन पटादिबोधापत्तेः । संकेतग्रहणस्याप्यावरणभङ्गे हेतुत्वस्वीकारात् नोक्त दोष इति तु न वाच्यम् , संकेतस्य स्फोटे एव ग्रहणीयतयावृते स्फोटे संकेतग्रहणस्यासम्भवात् , अन्यथावरणभङ्गकल्पनैव

व्यर्था स्यात् । अर्थात् आवरणभङ्गात् प्राक् संकेतग्रहः एव न सम्भवति , अतः आवरणाभङ्गं प्रति तस्य हेतुत्वकल्पनं सर्वथानुचितम् । तस्मात् स्फोटाभिव्यक्तिरावरणभङ्गरूपेति कथनमुक्तदोषस्तावत् अनुचितम् ।

नैयायिकादीनामिवावगमोऽपि न स्वीकार्यः विकल्पासहत्वात् । तथाहि नादसाध्या स्फोटाभिव्यक्तिर्यदि अवगमः ( ज्ञानं ) तदा तद् अनुमितिरर्थापत्तिः प्रत्यक्षं वा ।

ननु तावदनुमितिः अन्योन्याश्रयात् । तथाहि अर्थबोधे जाते सति तत्कारणतया स्फोटस्यानुमितिर्भवति , स्फोटेऽनुमिते तत्र संकेतग्रहात् अर्थबोध इत्यन्योन्याश्रयः । अतस्तस्यानुमितित्वं न सम्भवति । एवञ्च अर्थापत्तिरपि असम्भवैव , अन्योन्याश्रयात् । तथाहि अर्थबोधे जातेरर्थबोधस्यान्यथानुपपत्तिप्रतिसन्धानेन स्फोटस्यावगमः , प्रतीते च स्फोटे ततोऽर्थबोध इत्यन्योन्याश्रयः ।

एवञ्च स्फोटज्ञानस्य प्रत्यक्षत्वमपि न विचारसहम् । तथाहि यदि स्फोटज्ञानस्य प्रत्यक्षत्वं , तर्हि त्न्मानसं श्रौत्रं वा । नाद्यः आत्मनः तदीयगुणधर्मयोरेव च ग्रहणे मनसः सामर्थ्यस्य सिद्धतयानात्मरूपस्य स्फोटस्य मानसग्रहणासम्भवात् ।

स्फोट आत्मरूप एवेति मनसा तद्ग्रहणं सम्भवत्येवेति कथनमयुक्तम् , तथा सति तथा सुखादित्त्वेनात्मनो मनोग्राह्यत्वेऽहं सुखी इति प्रतीतिः तथैव घत्वादिनास्फोटस्य मनोग्राह्यत्वे **‘ अहं घकारः ’** इति प्रतीत्यापत्तिः । शब्दं श्रुत्वा अर्थं प्रत्येमि इत्यनुभवाफ्लपस्य शब्दं मत्वार्थं प्रत्येमि इत्यनुभवापत्तेश्च ।

एवं स्फोटस्य श्रोत्रग्राह्यत्वमपि न सम्भवति , वर्णात्मणो नादात्मन एवं शब्दस्य श्रोत्रगाह्यतया वर्णनादानात्मकस्य स्फोटस्य श्रोत्रग्राह्यत्वासम्भवात् , स्फोटस्य श्रोत्रग्राह्यतया अप्रामाणिकत्वाच्च ।

ननु घटपदं शृणोमि ' **घटमानयेति** ' वाक्यं शृणोमि इति प्रतीतेरनुभवसिद्धत्वात् स्फोटस्य स्फोटग्राह्यता सम्भवति । सा च प्रतीतिः वर्णसमुदायात्मकं पदं वाक्यं वा विषयीकर्त्तुं नार्हति , वर्णानां क्रमिकत्वात् क्षणिकत्वाच्च सर्वेषां वर्णानां युगपत्समवधाना असम्भवात् , प्रत्यक्षस्य च विद्यमानविषयकत्वस्वभावात् । अतः तत्प्रतीतिविषयता वर्णनादाभ्यां व्यतिरिक्ते स्फोटात्मकपदे वाक्ये च स्वीकरणीयेति सिद्धा स्फोटस्य श्रोत्रग्राह्यतेति चेन्न , घटपदस्फोटस्यापि घकारादिरूपरूषितस्यैव प्रत्यक्षतायाः अङ्गीकरणीयतया घकारादीनां च यौगपद्येन , तन्निखिलरूपरूषितस्य स्फोटस्य प्रत्यक्षासम्भवात् । घकाराकाराद्यनुभवाहितसंस्काराणां तदधीनस्य तेषां स्मरणस्य वा वलेन घकारादिरूपरूषितप्रत्यक्षमुपपाद्यते चेत्तदा नदीदीनशब्दयोः पर्यायत्वापत्तिः । येन क्रमेण नदीशब्दश्रवणं तेनैव क्रमेण नदीस्फोटव्यक्तिरपि श्रूयते । अपरञ्च नदीदीनशब्दयोः पर्यायतापत्तिरिति पक्षोऽपि न समीचीनः , क्रमिकाणां नकाराकारादिरूपप्रकारकस्फोटव्यक्तीनां यौगपद्यासम्भवेन मिलितानां तासामर्थबोधे हेतुत्वायोगात् । पूर्वपूर्ववर्णात्मना स्फोटव्यक्तेः क्रमेण जायमानायाश्चरमवर्णात्मना स्फोटव्यक्तेरर्थबोधकत्वेन न दोष इत्यपि न युक्तम् , चरमवर्णाभिव्यङ्ग्यस्फोटव्यक्तिनिष्ठार्थबोधकतया अवच्छेदकस्य दुर्वचत्वात् । नदीबोधे स्पष्टा नदीस्फोटव्यक्तिः कारणमित्येवं कल्पना निर्दुष्टेति न रम्यम् , आद्यायाः स्फोटव्यक्तेरपि स्वविषयांशे स्पष्टत्वात् । या प्रत्यक्षव्यक्तिः यमंशमवगाहमाना जायते , सा तदंशे स्पष्टैवेति सर्वसम्मतत्वात् ।

न च यद्वस्तुनो यद् यद् रूपं येनेन्द्रियेण ग्रहणार्हं , तदिन्द्रियजन्यस्य तत्तन्निखिलरूपप्रकारकत्द्वस्तुग्रहणस्यैव स्पष्तत्वात् । नदीस्फोटस्य च नदीशब्दघटको निखिलो वर्णो नत्वादिकं कृत्स्नं वारोपितं रूपम् ।

अद्यादिवर्णमात्ररूपरूषिततया स्फोटव्यक्तिश्च न तथेति न सा स्पष्टा , अतः स्पष्टायाः नदीस्फोटव्यक्तेरर्थबोधकत्वं निर्दोषमेवेति वाच्यम् , तथा सति नदी शब्दघटकचरमवर्णमात्ररूपेण स्फोटं गृहणन्त्या अभिव्यक्तेरप्यस्पष्टत्वेन नकाराकारादिसर्ववर्णविषयिण्या एकस्या एव स्फोटव्यक्तेरपेक्षणीयत्वात् , तथा अभ्युपगमे च नदीस्फोटव्यक्तेः दीनस्फोटव्यक्त्यपेक्षया वैलक्षणस्य दुर्वचत्वात् । न च नकारादिक्रमेण जायमानां नदीशब्दघटकचरमवर्णज्ञप्तिं दकारादिक्रमेन जायमानाया दीनशब्दघटकचरमवर्णज्ञप्तेर्विलक्षणा कथञ्चिदभ्युपेत्य , यदि तस्या नदीस्फोटव्यक्तौ कारणत्वम् , तथा जातायाः स्फोटव्यक्तेश्च नदीशाब्दबोधं प्रति कारणत्वं कल्पयित्वा दीनशब्दान्नदीबोधापत्तिर्वार्यते , तदा दीनस्फोटव्यक्तिकारणीभूतदीनशब्द-ज्ञप्तिव्यावृत्तेन रूपेण नदीबोधकनदीस्फोट-व्यक्तिकारणीभूतनदीशब्दज्ञप्तेरेव नदीशाब्दबोधं प्रति कारणत्वमङ्गीक्रियतां , स्फोटेन तज्ज्ञानेन वा ।

न च स्फोटानङ्गीकारे शब्दस्य शक्त्याश्रयत्वमनुपपन्नम् , प्रत्येकं वर्णस्य शक्तत्वे , प्रथमवर्णेनैव कृत्यकृत्यतया द्वितीयादिवर्णवैयर्थ्यापत्त्या , क्रमिकक्षणिकत्वाभ्यां वर्णसमूहस्य च दुरूपपन्नतया वर्णात्मकशब्दस्य तदभ्युपगमासम्भवादिति वाच्यम् , तत्तदर्थबोधजनकत्वनिष्ठप्रकारता-निरूपितविशेष्यतासम्बन्धेनेश्वरेच्छायास्तदीयतादृश-विषयतायाः वा शक्तित्वोपगमेन तदाश्रयत्वस्य क्रमिकेष्वपि वर्णेषु सम्भवात् , तत्तन्निरूपितविषयतायास्तत्तद्समानकालिकेष्वपि सत्तायाः सर्वसम्मतत्वात् । भगवत इच्छायाः , तदीयस्य ज्ञानस्य यत्नस्य वापि शक्तित्वापत्तिस्तु नोद्भाव्या , इष्टापत्तेः । तत्तदर्थबोधजनकत्वप्रकारक नित्यसविषयकत्वेन तेषां समेषां तत्सम्भवात् । अनीश्वरवादिनां शाब्दबोधानुपपत्तिरपि न , कारणतावच्छेदकगर्भ इच्छाद्यंश ईश्वरीयत्वस्याप्रवेशेन दोषाभावात् । न च स्फोटाङ्गीकारे घटम् इत्येकं पदं घटमानयेति एकं वाक्यमित्यादि

व्यवहारानुपपत्तिरिति वाच्यम् , बुबोधयिषीयबोधनिष्ठविषयतागतैकत्वस्य परम्परयावगाहनेन पदुपपत्तिसम्भवात् इति निरर्थकोऽयं स्फोटवादः । एवं महता समारम्भेण खण्डितोऽयं स्फोट राद्धान्तः वद्रीनाथ-शुक्लमहोदयैः स्वकीये स्फोटविस्फोटाख्ये निबन्धे।

अत्रोच्यते अस्माभिः - खण्डनप्रकारस्यायमेव सारांशः , यत् वैयाकरणानां नये स्फोटाभिव्यक्तेः निर्दुष्टं स्वरूपमेव न सम्भवति , अतः स्फोटाभिव्यक्तेरसम्भवात् , स्फोटोऽपि न स्वीकरणीयः इति।

अत्रेदमवधेयम् इत् उपस्थापितेषु पक्षत्रयेषु आवरणभङ्ग एव स्फोटाभिव्यक्तिः स्वीक्रियते । न च आवरणभङ्गरूपाभिव्यक्तिस्वीकारे घकारादिवर्णश्रवणमात्रेणावरण-भङ्गस्य साध्यतया घटादिशब्दसंकेत-शून्यस्यापि पुंसो घटादिश्ब्दश्रवणे शाब्दबोधापत्तिरिति संकेतग्रहस्यावरण-भङ्गहेतुत्वमपि न सम्भवति , स्फोट एव संकेतस्य ग्रहणीयतयावृत्ते स्फोट तदसम्भवात् , अतः आवरणभङ्गानन्तरमेव संकेतग्रहस्य सम्भवेनावरणभङ्गे तस्य हेतुत्वं न सम्भवति , प्रागविद्यमानत्वादिति वाच्यम् , संकेतग्रहः आवरणभङ्गे न हेतुः अपि तु शाब्दबुद्धित्वावच्छिन्नं प्रति तस्य कारणतास्वीकारेणादोषात् । तथाहि घटादिशब्दश्रवणेनावरणभङ्गे जातेऽपि संकेतग्रहरूपकारणाभावात् न तत्र शाब्दबोधः यत् किमपि कार्यं प्रति कारणकूटस्य कारणत्वात् । अतः शाब्दबुद्धित्वावच्छिन्नं प्रति अभिव्यक्तस्य स्फोटस्येव संकेतग्रहस्यापि कारणत्वस्वीकारेण , संकेतग्रहाभावे अभिव्यक्तेऽपि स्फोटे न शाब्दबोधापत्तिरूपदोषः।

अतः वैयाकरणानां स्फोटाभिव्यक्तिरित्यत्र अभिव्यक्तिपदेनावरण-भङ्गस्वीकारे नास्ति काचिद् विप्रतिपत्तिः । तस्मात् अभिव्यक्तेरसम्भवात् , स्फोटोऽपि निरर्थक इत्युक्तिरविचारितरमणीयेति।

## ➢तारानाथतर्कवाचस्पतिमतम्

वर्णानां प्रत्युच्चारणम् अन्यथा प्रतीयमाणतया अनित्यत्वेन आशु विनाशिनाञ्च तेषां मेलनासम्भवेन तत्समुदायस्यापि सम्बन्धित्वाभावेन प्रत्येकं वर्णेषु वृत्तौ व्यभिचारेण च पूर्वपूर्ववर्णाहितसंस्कारवीजवति अन्त्यवर्णजनितपरिपाकशालिनि हृदये झटिति समुदीयमानस्य स्फोटरूपस्यैव शब्दस्य नित्यतया तत्रैव नित्यसम्बन्धस्य योग्यतया वृत्तित्वमुचितमित्याकरे स्पष्टम्।

वर्णाः यदि वाचकाः स्युः स्यादेव तेभ्यो व्यस्तेभ्योऽर्थावगतिः । न च तथा । प्रत्येकं वृत्तिमत्त्वाभावेन तत्समुदायस्य वृत्तिमत्त्वं सुदूरपराहतम् । आशुविनाशिणां वर्णानां मेलनासम्भवेन तत्समुदायत्वासिद्धेः पूर्वपूर्ववर्णाहितसंस्कारसहितस्य चरमवर्णानुभवस्य वाचकत्वन्तु सम्भावितमपि दिनान्तरीयतादृशसंस्कारानादाय वर्त्तमानचरमवर्ण-मात्रानुभवेन अर्थावगत्यापत्त्या निरासितम् । अन्त्यवर्णपर्यन्तानामनुभवान्तरं समुदायानां संस्कारोदयकल्पनया पुनः समुदिप्तवर्णानां स्मरणात्मकज्ञानतः अर्थावगतिरित्यपि न सङ्गतं जाराराजेत्यादावविशेषेण तत्तद्वर्णसंस्कार-सद्भावादुभयवैलक्षण्यानापत्तेः अतोऽवश्यं वर्णातिरिक्तो अन्त्यवर्णानुभव-व्यङ्ग्यः स्फोटनामा शब्दः स्वीकार्यः स्फुटति प्रकाशते अर्थः अनेनेति व्युत्पत्त्या च तस्य सार्थकनामता इति पातञ्जलभाष्ये व्यासचरणैः।

तदेतेषाम् अर्थसंकेतेन अवच्छिन्नानाम् उपसंहृतध्वनिक्रमाणां य एको बुद्धिर्निर्भासस्तत्पदं वाचकं वाच्यस्य संकेत्यते तदेकं पदमेकबुद्धिविषय एकप्रयत्नाक्षिप्तमभागमक्रममवर्णं बौध्यमन्त्यवर्णप्रत्ययोपस्थापितं प्रतीयते इत्यन्तेन । अत्र च अनेकवर्णानां शक्ततावच्छेदकतापेक्षया एकस्यैव

जातिरूपस्फोटत्वस्य शक्ततावच्छेदकत्वकल्पने लाघवमपि द्रष्टव्यम्[1265]। उक्तञ्च शब्दकौस्तुभे बोपदेवचरणैः।

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्षिताम्। औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवदिति तथा -

**" शृणोति य इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक्।**
**येन वाक् व्यज्यते यस्य व्यक्तिराकाश आत्मनः [1266]॥ "**

इति मञ्जूषाधृतभागवतवचने स्फोटात्मकशब्दश्रवणस्यात्मलिङ्गतोक्त्या स्फोटरूपशब्दोऽर्थायात इत्यवगन्तव्यम्। " **अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय** [1267]" इति स्फोटस्य व्यञ्जकवर्णाश्रयत्वमभिहितम्। एतन्मताभिप्रायेणैव स्फोटमित्याहेति शारीरकसूत्रे तद्भाष्ये च स्फोटव्युत्पादनं वर्णा एवेति भगवानुपवर्ष इति निराकरणस्तूपवर्ष ग्रहणात् तन्मताभिप्रायेण। न स्फोटः प्रतीत्यप्रतीतिभ्यामिति सांख्यसूत्रेऽपि स्फोटखण्डनमुपवर्ष-मताभिप्रायेणेति सर्वं सुस्थम्। स च स्फोटो वर्णपदादिभेदेन अनेकविधो वाहुल्यभयात् न प्रपञ्चितः।

तस्य स्फोटस्याभिव्यक्तौ प्राकृतस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राकृतध्वनिजातवैकृतध्वनेरिति विवेकः। तत्र प्राकृतं नाम येन विना स्फोटरूपमनभिव्यक्तं न परिच्छिद्यते। वैकृतस्तु येन अभिव्यक्तं स्फोटरूपं पुनः पुनरविच्छेदेन प्रचिततरं कालमुपलभ्यते -

---

[1265] **शब्दकौस्तुभे बोपदेवचरणैः।**

[1266] **मञ्जूषाधृतभागवतवचने।**

[1267] **हरिवंशे।**

**" स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते ।**
**स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते ॥[1268] "**

इति च स्थितिभेदे चिरचिरतकालस्थितौ ध्वनिस्तु पूर्वलक्षितः । तस्य च स्फोटस्य नित्यतया ध्वनिगतह्रस्वदीर्घादिकालस्य तत्रोपचारः । तथैव प्रतिपादितञ्च –

**" स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः ।**
**ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते ॥**
**स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु ।**
**प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्य्यते ॥[1269] "**

इति शब्दस्य स्फोटस्य नित्यतया अभिन्नकालस्य ह्रस्वदीर्घादिषु प्राकृतध्वनेः कालः तारत्वादिधीहेतुरुपचर्य्यते इति तदर्थः । एवञ्च विलम्वितोच्चरणस्थले तत्तद्वर्णानां तद्बोधजनितसंस्काराणां वा बहुक्षणपर्यन्तस्थायित्वकल्पनामपेक्ष्य एकस्यैव शब्दस्याभिव्यक्त्यनन्तरं जायमानेन वैकृतेन ध्वनिना बहुकालस्थितिकल्पने लाघवमित्यपि द्रष्टव्यम् । भेरीशब्दादौ ध्वन्यभिव्यक्त्यनन्तरं जायमानप्राकृतध्वनेर्बहुकालस्थायित्वदर्शनेन अत्रापि तथाकल्पनौचित्यात् ।

अतएव च महाभाष्ये एवं तर्हि स्फोटः शब्दो ध्वनिः शब्दगुण इत्यादिना अभिव्यक्त्युपकारकत्वेन ध्वनेः स्फोटरूपशब्दगुणत्वम् अभिहितमभिहितञ्च ध्वनेः ह्रस्वदीर्घत्वेनापि भानम् । यथा ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते । ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुकालस्थायित्वे द्रुतत्वमिति विवेकः ।

---

[1268] **वाक्यपदीये भर्त्तृहरिणा ।**

[1269] **वाक्यपदीये ब्रह्मकाण्डे ७५-७६ ।**

एवं च बहुविधेषु स्फोटेषु वाक्यस्फोटस्यैव सिद्धान्ते निकृष्टतया तस्यैव बोधकत्वं तद्घटकपदानान्तु पदमध्यवर्त्तिवर्णवत् निरर्थकत्वं विशिष्टार्थद्योतनायैव तेषां प्रयोगात्। तथा चोक्तं-

**" ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मणकम्बले।**
**देवदत्तादयो वाक्ये तथैव स्युर्निरर्थका॥**
**पदे न वर्णाः विद्यन्ते वर्णेष्ववयवा न च।**
**वाक्यात् पदानामत्यन्तं प्रविवेको कश्चन॥ [1270]"**

इति च वाक्यपदीये पदाद्यसद्भावं दर्शयति। तथा वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिरिति हरिकारिकायां सिद्धान्ते वाक्यस्फोटस्यैव सिद्धिरिति प्रतिपादितम्।

एवं स्फोटरूपशब्दस्यैव बोधकत्वे स्थिते इदमिदानीं निरूप्यते किं साधूनामेव बोधकत्वमुतासाधूनामपीति। तत्र साधूनामिवासाधूनामपि बोधकत्वं सिद्धान्तसिद्धं समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शब्देन धर्मनियम इत्युक्तेः। तथाहि प्रथमव्यवहारेणैव शक्तिग्रहस्य जायमानत्वात् व्यवहारस्य च प्रायेणापशब्दगर्भतया गाव्यादिशब्दादिष्वेव अपभ्रंशेषु शक्तिग्रहः न साधुषु बालस्याव्युत्पन्नस्य प्रायशः साधुशब्दव्यवहार अनभिज्ञानात्।

सर्वे हि लोकाः बाल्यमारभ्यामरणान्तं संस्कृतमजानन्तोऽपि देशभाषया वाक्यादिकं विरचयन्ति जानन्ति च प्रयोजकप्रयुक्तापशब्दार्थमितरथा तच्छ्रवणादिष्टानिष्टशब्दौ न स्यातां प्रवृत्तिनिवृत्ती जायेते च सर्वेषामिति व्यवहारानुरोधिनी तथा कल्पना। न च तेषां तन्मूलसाधुशब्दस्मरणादेव अर्थबोधकत्वमिति वाच्यं स्मरणस्य पूर्वानुभवजन्यतया बालानां

---

[1270] **वाक्यपदीये २.१५ ब्रह्मकाण्डे ७३ ।**

तदनुभवाभावात् नापि पदार्थोपस्थितिमात्रम् असाधुभ्यः कल्प्यम् असाधुनां हि साधुमूलकत्वेन शक्तसम्बन्धित्वेन स्मारकत्वौचित्यादिति वाच्यं विशिष्टानुभवस्य अनुभवसिद्धत्वात् प्रवृत्त्यादिकार्यं प्रति विशिष्टबोधस्यैव हेतुत्वाद् व्यवहर्त्तृणां प्रवृत्त्यादिदर्शनाच्च।

अतः अवश्यमुभयविधानमपि बोधकत्वं स्वीकार्यम्। अत एव हरिणा असाधुरनुमानेन वाचकः कैश्चिदिष्यते इत्येकमतम् । वाचकत्वाविशेषे वा नियमः पुण्यपापयोरिति उभयविधानामपि बोधकत्वं व्यवस्थापितम्।

# उपसंहारः

# उपसंहारः

आदिमकालादद्यतनसमयं यावद् भारते ये केऽपि विद्वांसः सञ्जाताः सन्ति वा तेषां सर्वेषामपि मतमिदं यत् संसारे यावदपि ज्ञानं प्रावर्तत तावतः सर्वस्यापि आदिस्रोतोऽस्ति श्रुतिः । अत एव स्वायम्भूवो मनुः ' **सर्वज्ञानमयो हि सः** ' इत्यकथयत् । एतेन व्याकरणशास्त्रस्याप्यादिमूलं वेद इति निष्पन्नम् । वैदिकमन्त्रेषूपलभ्यमाना-स्तत्तत्पदविषयिण्यो व्युत्पत्तयोऽप्युपर्यभिहितमभिधानं परिपुष्णान्ति –

**१ . यज्ञेन यज्ञमयजन्त देवाः**[1271] **।**

**२. ये सहांसि सहसा सहन्ते** [1272]**।**

**३. धान्यमसि धिनुहि** [1273]**।**

**४. केतपूः केतं न पुनातु** [1274]**।**

**५. तीर्थैस्तरन्ति** [1275]**।**

अथ खलु पूज्ये धराहृदये कर्मभूम्यभिधेऽस्मन्भारतखण्डे को नाम विचक्षणो न विजानाति यत्किल सत्स्वपि प्रमाणान्तरेषु व्यवहारप्रयोजकेषु प्रत्यक्षादिषु तेषां मूर्धन्यभूतो वेद एव सर्वोत्कर्षेण प्रमाणमिति । वेदलक्षणन्तावत्प्रामाणिकै-स्तत्रभवद्भिर्महर्षिवर्यैश्च " **इष्ट्यप्राप्त्यनिष्ट-परिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेद** [1276]" इत्युररीकृतम् । अपि चोक्तम् –

---

[1271] **ऋग् १.१६४.५० यजयाच...... इति नङ् ।**

[1272] **ऋग् ६.६६.९ सहधातोः असुन् उणादौ ।**

[1273] **यजुः १.२० धिनोतेर्धान्यम् महाभा. ।**

[1274] **यजुः ११.७ क्विप् च ।**

[1275] **अथर्व १८.४.७ पातॄतुदिव ...इति ।**

[1276] **ऋग्वेदभाष्यभूमिकायां सायणाचार्येण ।**

**" प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।**
**एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥ [1277]" इति ।**

मन्त्रब्राह्मणात्मकत्वं तावददुष्टं वेदस्य लक्षणम् । तथाहि श्रूयते - " **मन्त्रब्राह्मणयोर्वेदनामधेयम्** [1278]" इति । अत्रभवतोऽपौरुषेयस्य वेदस्यान्यल्लक्षणं भवितुं नार्हति । अव्याप्त्यतिव्याप्तिदोषसद्भावात् ।

एवञ्चास्य भगवतो वेदस्य प्रामाण्यं बोधकत्वात्स्वत एव सिद्धम् । पौरुषेयावयवन्तु बोधकं सदपि पुरुषगतभ्रान्तिमूलत्वसम्भावनया तत्परिहाराय मूलप्रमाणमपेक्षते । न तथा वेदः । तस्य नित्यत्वेन वक्तृदोषशङ्कानुदयात् ।

अथ जैमिनिः –

**" पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता ।**
**काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत् ॥**
**समाख्यानं प्रवचनाद्वाक्यत्वं तु पराहतम् ।**
**तत्कर्तृनुपलम्भेन स्यात्ततोऽपौरुषेयता ॥** " इति ।

ननु भगवता वादरायणेन वेदस्य ब्रह्मकार्यत्वं सूत्रितम् – " **शास्त्रयोनित्वात्** [1279]" इति । ऋग्वेदादिशास्त्रकारणत्वाद् ब्रह्म सर्वज्ञमिति सूत्रार्थः । वाढम् । नैतावता पौरुषेयत्वं भवति , मनुष्यनिर्मितत्वाभावात् । ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवन्नित्यत्वं बादरायणेनैव देवताधिकरणे सूत्रितम् " **अत एव च नित्यत्वम्** " इति । श्रुतिस्मृती चात्र भवतः " **वाचा विरूपनित्यया** " इति । स्मृतिः –

**" अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भूवा ।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥** " इति ।

---

[1277] **याज्ञवल्क्येनोक्तम् ।**

[1278] **श्रौतसूत्रे आपस्तम्वेनोक्तम् ।**

[1279] **ब्रह्मसूत्रे १.१.३ , पृ.९ , राष्ट्रीय-संस्कृत-संस्थानम् ।**

अतोऽस्य परमभूतस्य भगवतो वेदस्योपासना द्विजातिभिरवश्यं विधेयेति सर्वत्र मुक्तकण्ठेन निगदन्ति श्रुतिस्मृत्यादयः।

श्रुतिः – **“ द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति , परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदो सामवेदोऽथर्ववेदः , शिक्षा , कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ – परा यया तदक्षरमधिगम्यते** [1280]**”** इति।

स्मृतिः –

**“ योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।**
**स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ ” इति।**

तत्रभवान् पतञ्जलिरपि – **“ ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च** [1281]**”** इत्यादिना द्विजातीन् बाढं वेदाध्ययने प्रवर्तयतीत्यलम् बहुना।

यश्च किल द्विजन्मा वेदमधीत्यापि अर्थं न विजानाति सोऽयं पुमान् भारमेव वहति।

**“ स्थाणुरयं भारहारः किलाभूदधीत्य वेद न विजानाति योऽर्थम् । योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकनेति ज्ञानविधूतपाप्मा** [1282]**”** इतिश्रुतेः। तस्माद्विजातीनामर्थज्ञानाय शिक्षादिषडङ्गानामध्ययनमपि न हेयम् भवतीति निश्चप्रचम्।

शिक्षायां वर्णस्वराद्युच्चारणप्रकार उपदिष्टः । छन्दसि मगणयगणादिसाध्यो गायत्र्यादिविवेको निर्दिष्टः। कल्पे यागप्रयोगः। ज्योतिषे कालविशेषे यागविशेषः। निरुक्ते अर्थावबोधे निरपेक्षतया पदजातमुक्तम्। एवं

---

[1280] **मुण्डकोपनिषदि १.१.४/५ पृ.१० , १२ , स्वामी जुष्टानन्द , उद्बोधन कार्यालय।**

[1281] **पतञ्जलिमहाभाष्यपस्पशाह्निके पृ. ३५ , दण्डिस्वामी दामोदर आश्रम ।**

[1282] **निरुक्तवृत्तौ।**

व्याकरणे अपि अर्थविशेषमाश्रित्य स्वरप्रकृतिप्रत्ययैः वैदिकलौकिकशब्दानां व्युत्पत्तिः प्रदर्शिता।

सत्स्वपि सर्वेषु व्याकरणेषु सार्वलौकिकवैदिकशब्दानां नितरां व्युत्पादकं तावत्पाणिनीयव्याकरणमेव। पाराशरीयपुराणे –

**" पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥** [1283]" इति।

श्रीमत्पाणिनीयव्रतीतरतपस्यासन्तोषितमहेश्वरवरलब्धचतुर्दशसूत्रस्याम्नायत्वं वरीवर्तीति तन्मूलकत्वादस्यैव पाणिनीयव्याकरणस्य वेदाङ्गत्वम्। अत्र प्रमाणं पाणिनीयशिक्षावचनम् –

**" येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।**

**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥** [1284]"

अत एव **" सोऽयमक्षरसमाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो ब्रह्मराशिः "** इति भाष्यमुपादायोक्तं भर्तृहरिणा – **" यथैवेदमव्युच्छिन्नं चन्द्रतारकादि एवमत्याक्षरसमाम्नायस्य न कश्चिद् आधुनिकः कर्ता अस्ति**[1285] " इति। ऋक्तन्त्रव्याकरणे शाकटायनोऽपि – **" इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच , बृहस्पतिरिन्द्राय इन्द्रो भरद्वाजाय भरद्वाज ऋषिभ्यः , ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते , न भुक्त्वा .....प्रब्रूयात्ब्रह्मराशिः** [1286] " इति।

---

[1283] **पराशरीयपुराणे।**

[1284] **पाणिनीयशिक्षायां सं ५७।**

[1285] **भर्तृहरिवाक्यपदीये।**

[1286] **ऋकतन्त्रे शाकटायानेन।**

व्याकरणशास्त्रस्य प्रमाणभूता आचार्यः पतञ्जलिव्याकरणाध्ययन-प्रयोजनानि वर्णयन् **' चत्वारि शृङ्गा ' ' चत्वारि वाक् ' ' उतः त्वः ' ' सक्तुमिव ' ' सुदेवोऽसि '** [1287]– इत्येतन्मन्त्रपञ्चकमुद्धरति स्म । व्याख्याञ्च तदीयां व्याकरणशास्त्रपरकाञ्चकार । पतञ्जलेरपि प्राचीनतरो यास्कोऽपि **' चत्वारि वाक् '** इत्येतस्य मन्त्रस्य व्याख्यां व्याकरणशास्त्रपरकामेव कुर्वाणोऽवाप्यते । व्याकरणमित्येतत्पदं यस्माद्धातोर्निष्पद्यते तस्यापि मुलार्थो यजुषि **" दृष्ट्वा रूपे व्याकरोत् सत्वानृते प्रजापतिः "** इत्येतस्मिन् वाक्ये प्रयुक्तः प्राप्यते ।

तदेवं हि व्याकरणस्य वेदप्रादुर्भूतता सिद्ध्यति सम्यक् । व्याकरणशास्त्रस्योत्पत्तिमधिकृत्य तु न निश्चप्रचतया किमपि कथनं सम्भवम् । इदन्तु वक्तुं शक्यं यदुपलब्धवैदिकपदपाठेभ्यः प्राक् व्याकरणशास्त्रं पूर्णतां गतं बभूव । प्रकृतिप्रत्ययधातूपसर्गसमासवत्पदविभागश्च कृत्स्नतया निर्धारितो जातो यदा तस्यानेहसो गतस्यानेकसहस्राब्द्यो व्यतीताः । वाल्मीकिरामायणस्य रचनाकाले व्याकरणशास्त्रस्याध्ययनमध्यापनञ्च सुव्यवस्थिततया प्रचलितमासीदित्येतद्धि –

**" नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।**
**बहु व्याहरतानेन न किञ्चिदपभाषितम् ॥** [1288]**"**

इत्यादिश्लोकेभ्यः विदितं जायते । भारतयुद्धकालवर्तिनि यास्कनिरुक्ते बहूनां व्याकरणाचार्याणामुल्लेखो दृश्यते । आचार्यः शाकटायनस्तु नैजं व्याकरणं यास्कादपि प्राक् लिलेख । पतञ्जलिर्मुनिर्लिखति – **" पुरा कल्प**

---

[1287] **पतञ्जलिमहाभाष्यपस्पशाह्निके पृ. ४७ , दण्डिस्वामी दामोदर आश्रम ।**

[1288] **प्रचलितवचनम् ।**

**एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते** [1289]" इति। एतेनापि व्याकरणं प्रति लोकस्य प्रवृत्तिः चिरासीदिति ज्ञायते।

यदा हि कापि भाषा व्यवहारातीततां प्रयाति तदा तस्या भाषाया ज्ञानं व्याकरणमन्तरेण न प्रतिपत्तुं शक्या भवति । व्याकरणमेव भाषायाः स्वरूपसंघटनं सर्वात्मना कुरुते । तस्माद् व्याकरणमेव भाषाज्ञानलाभाय सर्वेषामपि अष्टानां शक्तिग्राहकाणां मध्ये मूर्धन्यं स्थानमध्यास्ते । व्याकरणस्य नितान्तमेवोपादेयतां श्रेष्ठताञ्च तत्र तत्रावलोक्यैव तन्महिम्नि बुधैरभिहितमिदम्-

**" यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो माभूत् सकलं शकलं सकृच्छकृत्॥**
**शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे।**
**वन्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना॥ "**

व्याकरणानि बहुभिर्वैयाकरणैर्महर्षिभिः प्रणीतानि। तेषु व्याकरणकर्तृषु विद्वत्सत्तमेषु – इन्द्रः चन्द्रः काशकृश्नः आपिशलिः शाकटायनः पाणिनिः अमरः जैनेन्द्रः इत्येते अष्टौ सन्ति सुप्रथिताः । न केवलमेतेषामष्टानामेव व्याकरणकर्तृणां व्याकरणान्यपि तु अन्येषामपि आचार्याणां व्याकरणानि श्रूयन्ते यथा – कौमारं सारस्वतं शाकलञ्च व्याकरणम् । व्याकरणकारान् अथ च व्याकरणान्यधिकृत्यैतच्छलोकद्वयं प्रथितमस्ति –

**" इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।**
**पाणिन्यमरजैनेन्द्रा जयन्त्याष्टादिशाब्दिकाः** [1290]**॥**
**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्॥** [1291]**" इति।**

---

[1289] **पतञ्जलिमहाभाष्ये।**

[1290] **वोपदेवेन कविकल्पद्रुमे।**

साम्प्रतं सर्वत्र प्राधान्येन पाणिनीयं व्याकरणमेव प्रचलितं वर्तते । इदं हि पाणिनीयं व्याकरणं नितरामेव सुसमृद्धं सुसम्पन्नं सुललितं सर्वाङ्गीणं व्यापकञ्च विद्यते।

पाणिनीयस्य व्याकरणस्य परममहत्त्वपूर्णमङ्गं कात्यायनस्य वार्तिकपाठोऽस्ति । इदमन्तरेण वस्तुतः पाणिनीयं व्याकरणमपूर्णमेव प्रतिभाति । पतञ्जलिः कात्यायनीयं वार्तिकपाठमवलम्ब्यैव नैजं महाभाष्यमररचत् । पतञ्जलिभगवता एषा हि महाभाष्याख्या रचना पाणिनीयं व्याकरणं सरलया सरसया च रीत्या व्याचष्टे । सकलेऽपि संस्कृतवाङ्मये महाभाष्यं वस्तुतोऽद्वितीयो ग्रन्थः । सर्वेऽपि विद्वांसो मुक्तकण्ठतया प्रशंसन्ति ग्रन्थमिमम्।

व्याकरणस्य यानि प्रयोजनानि पतञ्जलिर्महाभाष्ये निजगाद तत्र चेद् मनागपि दृक्पातः क्रियते तदा व्याकरणस्य महनीयता तदीयोपादेयता तन्महत्ता च सम्यगवबोद्धुं शक्या भवति । ऋषिर्ब्रूते यद् वेदानां रक्षायै व्याकरणमध्ययनमपेक्ष्यते । यो जनो लोपागमवर्णविकारज्ञो भवति स एव वेदान् साधु रक्षितुमर्हति। तथाहि वेदे ‘ **जहार** ’ इत्येतस्य क्रियापदस्य स्थाने ‘ **जभार** ’ इत्येतत् क्रियापदं प्रयुज्यते। व्याकरणानभिज्ञस्य दृष्ट्या ‘ **जभार** ’ इत्येतत्पदं न शुद्धं स ‘ **जहार** ’ इत्येतदेव शुद्धं मत्वा ‘ **जभार** ’ इत्येतत्पदमनुच्चार्य्य ‘ **जहार** ’ इति प्रयोक्तुमुपक्रान्तो भविष्यति । तस्माद् व्याकरणाध्ययनमतितरामपेक्ष्यते।

व्याकरणस्याध्ययनेन विभक्तिविपरिणामस्य च बोधो जायते तस्माद् व्याकरणमवश्यमध्ययनीयमस्ति । न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्राः सन्ति निगदिताः । ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्या

---

[1291] **श्रीतत्त्वविधिनामके वैष्णवग्रन्थे।**

भवन्ति । नावैयाकरणस्तान् यथायथं विअपरिणमयितुं शक्नोति । अथाहि ‘ **अग्नये त्वा जुष्टं निर्वपामि** ” इत्येतद् वेदवाक्यम् । इदं हि वाक्यमग्निदेवताकं वर्तते । निर्वापकालेऽग्निदेवतामुद्दिश्य मन्त्रोऽयं पठितो भवति परं यदा सूर्यदेवतां लक्ष्यीकृत्य निर्वापः कृतो भवति तदा ‘ **सूर्याय त्वा जुष्टं निर्वपामि** ’ इत्यनेन विपरिणामेन पठनीयो भवति मन्त्रः एषः ।

“ **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इत्येतस्मादपि हेतोर्व्याकरणस्याध्ययनं परमापेक्षितं भवति । वेदस्य षडङ्गत्वात् षटस्वङ्गेषु च व्याकरणस्य प्रधानत्वात्** [1292]” इति ।

सुलभतया यथार्थज्ञानं व्याकरणं विना न भवितुमर्हति अतोऽपि व्याकरणस्य पठनमपेक्ष्यते । इदन्तु विदितमेव वर्तते यद् जिज्ञासुनावश्यमेव शब्दस्य कार्यं ज्ञानम् । शब्दस्य ज्ञानं व्याकरणं विहाय न केनाप्यन्येन सुलभेनोपायेन शक्यम् ।

संशयराहित्यनिमित्तेनापि व्याकरणमध्येयमस्ति । याज्ञिकाः पाठन्ति – “ **स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति तस्यां सन्देहोऽयम् – स्थूला चासौ पृषती च स्थूलपृषतीतिकथमभिप्रेतं किम्बा स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीतिकथमिष्टम् । अवैयाकरणस्तां न स्वरतोऽध्यवस्यति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः । अथान्तोदात्तत्वं ततस्तत्पुरुष** ” [1293] इति ।

एतेन विवेचनेन व्याकरणस्योपादेयत्वं तन्महत्त्वञ्च समुपस्थापयन् आचार्यपतञ्जलिस्तस्यान्यानि च कतिपयानि महत्त्वानि प्रस्तौति । स आह यद् व्याकरणं हि यो नरो न जानाति स शुद्धमपि वक्तुं न प्रभवति ।

---

[1292] **महाभाष्यपस्पशाह्निके पृ. ३५ , दण्डिस्वामी दामोदर आश्रम ।**

[1293] **महाभाष्यपस्पशाह्निके पृ. ४३ , दण्डिस्वामी दामोदर आश्रम ।**

शुद्धोच्चारणलाभाय व्याकरणस्य पठनं कर्तव्यम् । अशुद्धोच्चारणकर्ता भवति शिक्षितसमाजे निन्दितः । तस्माद् विज्ञेन सततं हि उच्चारणस्य शुद्धता समुपासनीया ।

अध्ययनं तदेव लाभप्रदं भवति यदर्थावधारणपूर्वकं विधीयते । अर्थावधारणायाः कृते व्याकरणस्य ज्ञानमपेक्षितं जायते । यदध्ययनं विनार्थावबोधं कृतं जायते तदध्ययनं तदैवाध्यातारं दुनोति । तदध्ययनं तु तदर्थं भाररूपमेव जायते । मया यत् किमपि पठितं तन्न जाने किं पठितमिति विचार्य स खिन्नमना जायते । अतस्तस्मात्स जुगुप्सते । कथनस्य प्रयोजनमिदमेव यद् यत् किमपि पठनीयं जनेन तद्बोधपूर्वकं पठनीयम् । बोधपूर्वकं पठनीयं तदैव सम्भवं भवितुमर्हति यदा व्याकरणस्य ज्ञानं स्यात् । इत्थं हि विद्वान् पतञ्जलिर्व्याकरणस्य महत्त्वं विदधानोऽग्रे पुनराह – मानवेन शब्दप्रयोगे प्रवीणेन भवितव्यम् । कः शब्दः केन प्रकारेण प्रयोक्तव्य इत्येतद् यो जानाति सः स्वकीयेनैकेनापि शब्देन नैजं प्रभावं जनताया मानसे समुपस्थापयितुं शक्नोति । जनतां स तां दिशां नेतुमर्हति यां दिशं प्रति तस्याः आवर्जनं तस्येष्टं भवति ।

व्याकरणज्ञ एव समुदाचारस्य विधिं साधु प्रयुङ्क्ते । कथनस्यास्य भावोऽयं यत्समुदाचारे व्यवहारे वा पदस्योच्चारणं कीदृशं कार्यमिदमपि वैयाकरण एव वेत्ति यतः स ह्रस्वदीर्घप्लुतोच्चारणेषु कस्मिन् अवसरे दीर्घं ह्रस्वं वा प्लुतमुच्चारणं कर्तव्यमित्येतद् वैयाकरणत्वाद् जानाति तस्मात् व्याकरणस्याभिज्ञता तु संसारे प्रतिपदमपेक्ष्यते ।

अथ च व्याकरणविद् एव प्रयाजान् मन्त्रान् सविभक्तिकान् विधाय पठितुमर्हतीत्येतस्मादपि कारणाद् व्याकरणज्ञतापेक्षितास्ति ।

योहि विद्वान् उच्चारणं तथा करोति यथा न किमपि पदं न कोऽपि स्वरो न च किमप्यक्षरमस्फुटं स्यात् स एव यज्ञकर्मण्यधिकारी भवितुमर्हति। एतादृशस्याधिकारस्य लाभायापि व्याकरणस्य ज्ञानमर्जनीयमस्ति।

शब्देन सह तादात्म्ये सति शब्दस्य परब्रह्मभूतेनार्थेन सहापि तादात्म्यं भवितुं शक्नोति इत्येतस्मादपि हेतोर्व्याकरणस्य ज्ञानं ग्राह्यमस्ति।

वाक्यगतस्य अर्थस्य यथायथबोधनिमित्तेन च व्याकरणं पठनीयम्। यावदर्थस्य समीचीनतया ज्ञानं न जायते तावत् न श्रुतेन वा लिखितेन वाक्येन किमपि कार्यं सिद्ध्यति। वस्तुतस्तदनवगतार्थं वाक्यन्तु तिरश्चां वच इव निरर्थकमेव। अतः सिद्धमिदं यदर्थावबोधनाय व्याकरणाज्ञता काङ्क्ष्यते।

वचसः शुद्धत्वं व्याकरणाधीनमस्ति। व्याकरणं वस्तुतस्तितउरिव वर्तते। यथा तितउना वस्तु निर्मलीक्रियते, तद्द्वारेण तृणकणादिका दूरीक्रियन्ते तथैव व्याकरणसाधनेन वैयाकरणो विचक्षणः अपशब्दान् अपसार्य स्वकीयं वाक्यं शुद्धं सुशब्दललितं विधत्ते गृह्णाति च तस्य साहाय्येन यथार्थमर्थम्। सुशब्दप्रयोगेण यथार्थार्थावगमनेन च शब्दार्थयोर्मध्ये ऐक्यभावनाया निर्माणं जायते। तस्या ऐक्यभावनायाश्च फलमिदं मधुरं समुत्पद्यते यत् सः वैयाकरणः सुधीरनुभवतीदं यत् तस्य वस्तुभिः सर्वैः सार्धमैक्यमेव। न सः किञ्च वस्तु भिन्नभिन्नपदार्थस्तदद्वयमपि वस्तुत एकमेवाभिन्नमेव। यत् सः तदेव वस्तु, यत् वस्तु तदेव स इत्येतेन ऐक्यानुभवेन भवति स ब्रह्मज्ञानवान्। एतस्य परमपदस्य लाभस्य साधनभूतं यद् व्याकरणशास्त्रमस्ति तस्याध्ययनमतोऽवश्यमेव कर्तव्यम्।

शब्दं किञ्च शब्दशक्तिमधिकृत्य यादृशं गभीरं व्यापकं विस्तृतं सूक्ष्मतमञ्च विमर्शनं संस्कृतव्याकरणं विदधदवाप्यते न तादृशं विचारं भुवि कस्या अपि भाषाया व्याकरणं कुर्वत् समवाप्यते। जगति एतादृशं कतमद् व्याकरणं विद्यते यस्य साहित्यं संस्कृतव्याकरणस्य साहित्येन सादृशं स्यात्।

न किमपि व्याकरणं तत्तुलामधिरोढुं प्रभवति। प्रथमन्तु यावन्ति व्याकरणानि संस्कृतभाषा विदधाति न तावन्ति व्याकरणानि काप्यन्या भाषा निदधाति। अस्याः संस्कृतभाषायाः एषा हि व्याकरणबहुला संस्कृतभाषायाः प्राचीनतमतां च साधयति । किञ्च संस्कृतव्याकरणमुद्दिश्य यावन्तो व्याख्याग्रन्था भाष्यग्रन्था आलोचनाप्रधानग्रन्था अन्यविधाश्च ग्रन्थाः प्रणीता अभुवन् न तावन्तस्तादृशाः ग्रन्थाः कस्या अपि अन्यस्या भाषाया विरचिता अजायन्त इत्येतत् सत्यं सर्वविदितम् । कस्याः हि भाषायाः व्याकरणे **अष्टाध्यायी-महाभाष्य-वार्तिकपाठ-वाक्यपदीय-परिभाषेन्दुशेखर-परमलघुमञ्जूषा-वैयाकरणभूषणसार-शब्दार्थरत्न-काशिका-मनोरमा-सिद्धान्तकौमुदी-वृहद्वैयाकरणभूषण-शक्तिवाद- शब्दकौस्तुभ-व्युत्पत्तिवाद-स्फोटवाद-स्फोटसिद्धिप्रभृतयो** हि सहस्रशो ग्रन्थाः शोभन्ते ? कस्या हि भाषाया व्याकरणे पाणिनि-पतञ्जलि-कात्यायन-कैयट-भर्तृहरि-नीलकण्ठ-नागेश-वररुचि-जयादित्य-पुरुषोत्तमदेव-भट्टोजिदीक्षित-पण्डितराजजगन्नाथ - अप्पयदीक्षित-प्रभृतयः संख्यातीताः संख्यावन्तः सञ्जाताः ? कस्याः हि भाषायाः व्याकरणोपरि लिखितस्यैकस्यैव ग्रन्थस्य एतावन्तष्टीकाप्रटीकाग्रन्थाः प्राप्यन्ते यावन्तष्टीकाप्रटीकाग्रन्थाः अस्याः संस्कृतभाषाया अष्टाध्यायीनामकस्य ग्रन्थस्य ?

संस्कृतव्याकरणं स्वां भाषां स्वकौशलेन परामेव विचित्रतां परामेव रमणीयतां परामेव विविधतां नयति। तत्कारणात् संस्कृतभाषा कौतुकागार इव तैस्तैरनन्तैर्विपुलैः परमाश्चर्यकैर्विचितविचित्रैः सुन्दरसुन्दरैः परार्थैरलंक्रियमाणा प्रदर्शनीव परमभयावहै-र्यादोभिर्भूयोभिः संख्यातीतैः रत्नैबहुलैस्तैस्तैः शङ्खविद्रुमादिभिरगाधैश्चार्णोभिः सुसमृद्धः सुशोभितो रत्नाकर इव , सञ्जाता अस्ति।

गवेषणनिबन्धेऽस्मिन् सर्वप्रथमं मया धात्वर्थविषये फलव्यापारौ धातुवाच्यौ आख्यातार्थः कृतिः , ' फलमात्रधात्वर्थः आख्यातार्थः कृतिरिति नैयायिकसम्मतं , फलमात्रं धात्वर्थः , व्यापारः प्रत्ययार्थः इति मीमांसकमण्डनमिश्रसम्मतं , फलव्यापारौ धातुवाच्यौ , आख्यातार्थः भावनेति मीमांसकसम्मतं सिद्धान्तं दूषयित्वा , वैयाकरणसम्मतं फलव्यापारौ धातुवाच्यौ , आख्यातार्थकर्तृकर्मणीति सिद्धान्तितः । तत्रापि फलव्यापारयोः खण्डशः शक्तिः विशिष्टे वेति प्राचीननवीनयोर्मतभेदं तेषां मतञ्चोपन्यस्य फलव्यापारयोः खण्डशः शक्तिरिति प्राचीनसम्मतं मतं सिद्धान्तत्वेन व्यावस्थापितम् । तत्र तारानाथतर्कवाचस्पतिनोक्तं शब्दार्थरत्ने क्रिया नाम धातुवाच्या फलव्यापारोभयरूपा तद्विशिष्टरूपा वा फलव्यापारयोर्धातु-रित्यग्रिमवचनात् व्यवस्थापयिष्यते च मतभेदेन फलव्यापारयोर्पृथक्शक्त्या विशिष्टशक्त्या वा धातुवाच्यता । अत्र फलांशस्य कर्त्तुरुद्देश्यत्वेन प्राधान्याभावात् व्यापारस्यैव प्राधान्यं समुचितं तस्य च साध्यतया कर्मातिरिक्तसर्वकारकाणां तत्रैव स्वस्वव्यापारद्वारा साधकत्वेनान्वयः कर्मणस्तु फल एव क्रियाजन्यफलाश्रयतयैव तस्योद्देश्यादिति विवेकः । एवमेव शाब्दबोधविषयेऽपि धात्वर्थस्य प्राधान्यं प्रतिपाद्य कर्तृप्रत्यये कर्मप्रत्यये च उभयत्रापि व्यापारमुख्यविशेष्यक एव बोध इति प्राचीनानां सम्मतिः , नागेशास्तु कर्मप्रत्यये फलमुख्यविशेष्यकबोधं कर्तृप्रत्यये व्यापारमुख्यविशेष्यकबोधञ्च स्वीकुर्वन्ति । अतः प्राचीननवीनयोः सयुक्तिकं मतमुपस्थाप्य सिद्धान्तस्य भाष्यानुसारित्वात् युक्तत्वं प्रतिपादितम् ।

द्वितीयेऽध्याये लकारार्थनिर्णयप्रसङ्गे –

**“ वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति ।**

**विध्यादौ प्रार्थनादौ क्रमाज्ज्ञेया लडादयः ॥[1294]”** इति वैयाकरणभूषणसारस्य कारिकां मनसि निधाय , लकारार्थः कर्तृकर्मसंख्याकालाश्चेति सिद्धान्तितः । तत्र लकारस्य कृतौ शक्तिः लाघवात् इति नैयायिकमतमपि सयुक्तिकं खण्डितम् ।

कर्तृकर्मादिवाचकत्वे स्थिते भावलकारस्थले तृतीयैव आश्रयबोधिका नत्वेक लकारस्योभयार्थकत्वं तेन तत्कर्तुस्तृतीयोपपत्तिरन्यथा लकारसामानाधिकरण्यात् प्रथमापत्तेः तिङ् समानाधिकरणे प्रथमेति वार्तिकोक्तेः । अत्र तिङ्समानाधिकरण इति निर्देशात् युष्मद्युपपदे समानाधिकरणे इत्यादिना युष्मत्समानाधिकरण्ये मध्यमपुरुषविधानाच्च प्रथमान्तार्थाख्यातार्थयोरभेदान्वय इत्युपेयत परैरपि लादेशशत्रादेरर्थस्य नामार्थेऽभेदान्वयाभ्युपगमेन तत्स्थानिलकारार्थस्यापि तथान्वयौचित्यात् । अत एव लकारादीनां लाघवेनापि कर्तृत्वादौ न शक्तिः कल्प्यते तथासति कर्तृत्वादे आश्रयतयैव नामार्थेऽन्वयस्य वक्तव्यतया तदन्वयिवाचकपदात् प्रथमानुपपत्तेः तिङ्समानाधिकरणे एव प्रथमाया विधानात् लकारेणानभिधानात्तृतीयापत्तेश्च कृत्तद्धितानां संख्यावाचकत्वानियमेन संख्याभिधानानभिधानाभ्यां प्रथमातृतीयादिव्यवस्थायाः कर्त्तुमशक्यत्वाच्च ।

ते च लकाराः लट्लिट्लुट्लेट्लोट्लृट् चेति षट् लङ्लिङ्लुङ्लृङ् चेति ङितश्चत्वार इति दशविधाः । तत्र लेटोवैदिकप्रयोगमात्रविष्यता इतरेषान्तु सर्वप्रयोगविषयता । तेषान्तु प्रत्येकलक्षणन्तु वक्ष्यमाणार्थवाचित्वे सति लकारादेशत्वम् । अर्थविशेषाश्च सूत्रविशेषादवगन्तव्याः हरिणापि तेषां कतिचिद् अर्थाः संगृहीताः । यथा-

---

[1294] **वैयाकरणभूषणसारे लकारार्थनिर्णये का. २२ , पृ.१२१ , चौ.सं.प्र ।**

**" वर्त्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति।**
**विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥**
**ह्योभूते प्रेरणादौ भूतमात्रे लङादयः।**
**सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृत "[1295] ॥**

इति एतेषाञ्चादित्वमुद्देशक्रमेण बोध्यम् । अत्र श्व इत्यस्य परोक्षे भूते भाविनि चान्वयः । तथा च लटो वर्त्तमानार्थे वर्त्तमाने लडिति सूत्रात् वर्त्तमानञ्चारब्धापरिसमाप्तत्वं प्रयोगसमानकालीनत्वं वा बोध्यमधि-श्रयणाधःश्रयणपर्यन्तकाले लट्प्रयोगात् । तच्च क्रियान्वयि क्रियाभेदाय कालस्तु इत्युक्तेः आत्मास्ति पर्वतास्तिष्ठन्तीत्यादौ तु तत्तत् कालिकक्रियाणामनित्यतया तद्विशिष्टे सत्तादौ वर्तमानादिकालान्वयः।

तत्र लकाराणां वाचकत्वं लादेशानां वेत्यत्र लादेशानामेव वाचकत्वमिति स्वीकुर्वतां नागेशानां मतमुपन्यस्य तद्विषये कौण्डभट्टस्य नास्ति कश्चनाग्रह इति मया सिद्धान्तितम्।

सुपां प्रकृतिभूतनामार्थनिरूपणे , लाघवात् जातिशक्तिवादिनां मीमांसकानां मतं सयुक्तिकं सप्रमाणञ्चोपन्यस्य तत् खण्डितम् , एवमेव सर्वेषां शब्दानां क्रिया एव प्रवृत्तिनिमित्तमिति वदतां महिमभट्टानामाशयं प्रतिपाद्य , तस्यानौचित्यमेव प्रदर्शितम्। एवञ्च सर्वेषां दार्शनिकानां मतं समालोच्य वैयाकरणसम्मतः नामार्थो विवेचितः । तृतीयेऽध्याये नामार्थप्रतिपादनविषये उक्तम्–

**" एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।**
**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥[1296]"**

---

[1295] **वैयाकरणभूषणसारे लकारार्थनिर्णये का. २२, २३ , पृ.१२१ , १३१ , चौ.सं.प्र।**
[1296] **वैयाकणभूषणसारे नामार्थनिर्णये का.सं.२५।**

इत्युक्त्या पञ्चकं प्रातिपदिकार्थः इति पक्षः प्रतिपादितः कौण्डभट्टेन , किन्तु शब्दस्यापि शाब्दबोधविषयत्वात् नामार्थत्वं प्रतिपाद्य तत्र कौण्डभट्टभर्तृहरिनागेशतारानाथतर्कवाचस्पतीनां वैयाकरणानां सम्मतिः प्रदर्शिता ।

**चतुर्थाध्याये तथा सुबर्थनिर्णयप्रसङ्गे** –

**" आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।**

**यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥ [1297]"**

इत्यभियुक्तोक्तिमाश्रित्य सुपामर्थाः निरूपिताः । तत्र आश्रयशब्देन कर्तृलकारे व्यापाराश्रयः कर्ता , कर्मलकारे फलाश्रयं कर्म , यत्र कर्तृकर्मान्यतरद्वारको व्यापाराश्रयोऽधिकरणमाश्रयः शब्दार्थ इति निरूप्य ईप्सितं कर्म , निर्वर्त्यम् , विकार्यम् , प्राप्यञ्चेति वैयाकरणसम्मतं त्रिप्रकारकं सलक्षणं निरूप्य , मीमांसकैः प्रतिपादितम् कर्मणाञ्चातुर्विध्यमपि वर्णितम् ।

एवञ्च परमलघुमञ्जूषायां कारकविचारः इत्याख्यं प्रकरणं निर्दिष्टमिति विलोच्य –

**" कर्ता कर्म च करणं च , सम्प्रदानं तथैव च**

**अपादानमधिकरणमित्याहुः कारकाणि षट् ।[1298] "**

इति नागेशोक्त्यादिशा कारकस्वरूपमपि निरूपितम् , तत्र प्रथमं सामान्यकारकस्वरूपं तत्पश्चात् कारकविशेषाणां कर्तृकर्मादीनां सभेदं स्वरूपमुपवर्ण्य तेषां कारकत्वाकारकत्वविचारः उपस्थापितः । सम्प्रदानापादनयोः **का**रकत्वं नास्तीति केषाञ्चिन्मतं सम्यगुपन्यस्य भाष्यविरुद्धत्वात् तत् खण्डितमपि ।

---

[1297] **वैयाकरणभूषणसारे का.२४ ।**

[1298] **परमलघुमञ्जूषायां १४२ , पृ. २५२ , चौ.सु.प्र ।**

अपादानसम्प्रदानकरणाधिकरणकर्मकर्त्तृभेदात्कारकं षड्विधम् उक्तञ्च तारानाथतर्कवाचस्पतिना शब्दार्थरत्ने। एतेषाञ्च एकस्यां क्रियायामुभयप्राप्तौ विप्रतिषेधे परं कार्यमित्युक्तेरुत्तरोत्तरप्रावल्यं तदुक्तं हरिणा-

**" अपादानसम्प्रदानकरणाधिकरणकर्मणाम्।**

**कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते ।। [1299]" इति।**

गुणप्रधानक्रिययोरेकस्मिन् द्रव्ये उभयशक्तिप्रसङ्गे तु प्रधानेन व्यपदेशाभवन्तीतिन्यायात् कार्यस्य प्रधानानुरोधित्वात् प्रधानशक्तिबोधिकैव विभक्तिर्जायते गुणक्रियाशक्तिस्तु तात्पर्यवशादेव तत्र प्रतीयते तदुक्तं हरिणा- प्रधानतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् । शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यति। प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते। यथा गुणे तथा तद्वदनुक्तापि प्रतीयते इति स्थित्वाश्वेन गच्छतीत्येव प्रयोगः।

पञ्चमाध्याये शब्दार्थयोः सम्बन्धरूपायाः शक्तेः स्वरूपनिरूपणावसरे -

**" इन्द्रियाणां स्वविषयेष्वनादियोग्यता यथा।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ।। [1300]"**

इति वैयाकरणभूषणसारोक्तदिशा कौण्डभट्टाभिमतां शक्तिं निरूप्य , नागेशाभिमता **' वाच्यवाचकभावापरपर्यायाखण्डसम्बन्धरूपा शक्तिः निरूपिता। तत्र नागेशमतनिरूपणावसरे पदार्थविचारशैलीमनुसरद्भिस्तर्कादितन्त्रनिपुणैः अपस्थापिताः [1301]'** अर्थविषयकबोधजनकतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपकेश्वरेच्छारूपातादृशे-

---

[1299] **भर्तृहरिवाक्यपदीये।**

[1300] **भर्तृहरिवाक्यपदीयतृतीयकाण्डस्य सम्बन्धसमुद्देशे क. २९।**

[1301] **नागेशभट्टैः।**

च्छीयविशेष्यतारूपा वा शक्तिरिति नानाविधाः पक्षाः , इच्छायाः विशेष्यतायाः सम्बन्धत्वस्य क्वाप्यदर्शनात् खण्डिताः ।

स्वरूपमन्तरङ्गमभिधेयमिति तेन मुख्यसम्बन्धोऽभिधाननियमः । अत एवान्यथापि पाठक्रमे सामर्थ्यात् स्वरूपे प्रथमं प्रतिपर्त्तिविभजनीया । वाच्यवाचकभेदेन सम्बन्धस्तावद्द्विविधः । तत्र वाच्यो नामार्थः, वाचको नाम शब्दः तयोः सम्बन्धः समवाय इति । मानसे शब्दः, अर्थः, स्फोटश्च विराजन्ते । मानसशब्देन वाह्यशब्दस्य सम्बन्धो भवति वाच्यवाचकभावसम्बन्धः । तत्रोच्यते समुद्देशे— **" ततोऽध्यस्तस्वरूपेऽर्थक्रियाकारिणीत्याभ्यामर्थस्वरूपाभ्यां शब्दस्य वाच्यवाचकभावः"** इति [1302] । प्रयोक्त्राभिप्रायेण तु सह कार्यकारणभावः।

वाच्यवाचकभावलक्षणः सम्बन्धः प्रस्तुतः सर्वपार्षदं पुनरिदं शास्त्रमिति ये बाह्यार्थस्य शब्दवाच्यत्वं नेच्छन्ति तन्मतोपस्थापनार्थं वक्त्राभिप्रायरूढस्यैव शब्दार्थत्वे तत्र कार्यकारणभावसम्बन्धः । यथाहुः-

**" वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते ।**
**प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्॥ [1303]" इति ।**

योग्यताकार्यकारणभावभेदाच्च सम्बन्धपदार्थो द्विविधो व्यवतिष्ठते, योग्यताकार्यकारणभावयोः परमार्थः भवति अध्यासः , अध्यासस्तु पृथग्भागः । उपचारसमाविष्टं वस्तु शब्दार्थं यथा वक्ष्यति तथैव कार्यकारणभावोऽपि सम्बन्धस्वरूपस्य तु मुख्यमेव वाच्यत्वमित्याह –

**" प्रतिपत्तिभवत्यर्थे ज्ञाने वा संशयः क्वचित् ।**
**स्वरूपेषूपलब्धेषु व्यभिचारो न विद्यते ॥ [1304]" इति ।**

---

[1302] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे पृ.१२२ , पुना १९६३।**

[1303] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे , तत्रैव ।**

अयं गौरिति संकेतः क्रियते, भेदेनैव घटशब्दस्यायमर्थ इति तु व्याख्यातृभूमिर्न व्यवहारदशा अत्रापि चायमिति शब्दाभेद एव । यदा गौरित्युच्यते तदा सास्नादिमानर्थो बोद्धव्यः । व्यवहारफलो हि संकेतः ।

शब्दोऽपि वाचकोऽर्थमभिधीयमानतया प्रकाशयन्नात्मानमभिधयैव प्रकाशयतीत्युचितम् । न तु श्रोत्रेन्द्रियविषयभावोपगमनेन, अर्थसामानाधिकरण्यापन्नं च स्वरूपमर्थवत् परामृश्यमानं शब्दस्याभिधानविषयोऽभिधेयम् । न तु वाचकतायामभिधीयमानतास्ति, परामर्शस्य परवागात्मनः कर्त्तृभूम्युपारूढस्य प्रकाशस्य वाचकत्वात् । तथाह—**" न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यता "** इति ।

सम्बन्धः समवस्थितः स्वभावत एव निरूढः न तु सामयिक इत्युक्तम् । तस्य सद्भावे लिंगमाह—

**" अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते ।**
**योगः शब्दार्थयोस्तत्त्वमित्यतो व्यपदिश्यते ॥" इति ।**[1305]

अस्यार्थस्यायं शब्दो वाचकोऽस्य शब्दस्यायमर्थो वाच्य इति षष्ठ्यन्यथानुपपत्त्यस्त्येव स्वाभाविकः शब्दार्थयोर्योग इति । असम्बन्धानां घटपदादीनामेवमन्योन्यपारतन्त्र्येण व्यवहारायोगात् । अत एव स्वाभाविकात् सम्बन्धात् शब्दार्थयोः तत्त्वं गौरयमर्थ इत्यभेदेन व्यवह्रियत इत्यर्थः । पदार्थानां स्वरूपमवधार्य तदनुगामिशब्दनिवेशेन लक्षणं क्रियते । तत्र स्वेन असाधारणेन धर्मेण स्वभावेनोपलक्षितस्य वाचकं प्रत्यायकम् ', अभिधानं षष्ठीव्यतिरिक्तं नास्ति, इदन्तया स्वरूपानवधारणात् । गुणा द्रव्याधीना अपि प्राधान्येन शुक्लादिशब्देन कदाचिदुच्यन्ते, नैवं सम्बन्ध इति अत्यन्तग्रहणम् । तत्रोच्यते-

---

[1304] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे संख्या २ ।**

[1305] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे सं.३ ।**

**" नाभिधानं स्वधर्मेण सम्बन्धस्यापि वाचकम् ।**

**अत्यन्तपरतन्त्रत्वाद्रूपं नास्यापदिश्यते ॥[1306] " इति ।**

उपकार्योपकारकयोः उपकारप्रभावितः सम्बन्धोऽसम्बन्धानाम् उपकाराभावात् । धर्म इति नित्यपारतन्त्र्यमाह । धर्मित्वे स्वातन्त्र्यात् सम्बन्धान्तरप्राप्तेः अनवस्थापनात् । न च शक्तिरेव सम्बन्धः, शक्तीनामप्याधारपारतन्त्र्ये नियतकार्यजनने च सम्बन्ध एव नियामकः, गुणानामपि च द्रव्याश्रितत्वावस्थापकः सम्बन्ध एवेति परतन्त्राणामप्युपकारकत्वात् सर्वत्रानुमीयमानस्वरूपो नित्यपरतन्त्रः । तथा चोच्यते—

**" उपकारात् स यत्रास्ति धर्मस्तत्रानुगम्यते ।**

**शक्तीनामपि सा शक्तिर्गुणानामप्यसौ गुणः॥[1307]" इति ।**

पारतन्त्रं सम्बन्धलक्षणमिति संयोगसमवाययोर्द्रव्यगुणादिषु तत्त्वात् सम्बन्धशब्दप्रवृत्तिः । तस्य सम्बन्धस्येव धर्मः पारतन्त्रलक्षणो ययोस्तौ तद्धर्माणौ । तथा च तस्य सम्बन्धस्येव शब्दस्तयोः, गौणः सम्बन्धशब्दः संयोगसमवाययोः, न तु मुख्यतस्तावेव सम्बन्धः। संयोगसमवायलक्षणः सम्बन्धः परैरिति कोऽतिशयः तत्प्रतिपादयितुमाह—

**" तद्धर्मणोस्तु ताच्छब्द्यं संयोगसमवाययोः।**

**तयोरप्युपकारार्था नियतास्तदुपाधयः ॥[1308]" इति ।**

समवायादिनिमित्तानपेक्षया अत्रोच्चरितमात्रात् शब्दाद् अर्थप्रत्ययोत्पत्तेः अकृत्रिमाशक्तिरवसीयते । अर्थमात्रेण हि शब्दमात्रस्य अवियोगमप्रवृत्तसंकेता अपि प्रतिपद्यन्ते । तथा च योग्यता स्वाभाविकी सिद्धा, संकेतस्तु तामेव

---

[1306] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे सं.४ ।**

[1307] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे सं.५ ।**

[1308] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे सं.६ ।**

द्योतयति । तद्यथा चक्षुरादीनां रूपादिविषये पुरुषप्रयत्नानपेक्षा ग्राहकता । न हि यत्नेनापि रूपे रसननिवेशः शक्यक्रियः । एवं गवार्थे घटशब्दनिवेशोऽसाधुः। तथा हि भाष्यम्— **" यो हि गामश्च इति ब्रूयान्न जातुचित् सम्प्रत्ययः स्यात् "** इति [1309] । हरिणा उक्तं—

**" इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ [1310]" इति ।**

सम्बन्धशब्दो योग्यतालक्षणं सम्बन्धं योग्यतयैव प्रतिपादयति । एवं समवायशब्दोऽपि योग्यतयैवानादिसिद्धया स्वार्थप्रतिपादकः। तथा योग्यताशब्दोऽपि इति सर्वत्रास्य सम्बन्धस्य व्याप्तिः । अनादिसिद्धार्थविषयव्यापारस्य शब्दस्य वृद्धव्यवहारपरम्परापरपर्यायात् समयात् स्वाभाविक्येव योग्यता निश्चीयते, न तु समयमात्रादतथाभूतेऽपि तथाभावः समुचितः-

**" सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता**

**समयाद्योग्यतासंविन्मातापुत्रादियोगवत् ॥[1311] " इति ।**

एवमुभयोः प्राचीननवीनयोर्विवादमुपन्यस्य प्राचीनवैयाकरणसम्मता बोधजनकतारूपा शक्तिरितिसिद्धान्तत्वेन व्यवस्थापिता अस्मिन् निबन्धे ।

अन्तिमे तथा षष्ठोऽध्याये स्फोटस्वरूपं आचार्यमतपुरःसरं सयुक्तिकमालोचितम् । कस्तावद् स्फोटः , स्फोटशब्दस्य कोऽर्थः , स्फोटस्य विभागादिकं प्रदर्श्य तेषु सूक्ष्मेक्षिकं पार्थक्यं सम्यग्रूपेण प्रदर्शितम् । **" वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः [1312]"** – इत्यादिना

---

[1309] **पतञ्जलिमहाभाष्ये ।**

[1310] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे सं.२९ |**

[1311] **भर्तृहरितृतीयकाण्डे सम्बन्धसमुद्देशे सं. ३१ |**

[1312] **वैयाकरणसिद्धान्तलघुमञ्जूषायां पृ.१ ।**

स्फोटस्य वाचकत्वं तस्य वर्णस्फोटादीनष्टप्रकारान् विशदीकृत्य अवसानेऽखण्डवाक्यस्फोटस्यैव पारमार्थिकदृष्ट्या वाचकत्वं प्रतिपादितम्।

एवमस्य निबन्धस्य सर्वान् पर्यालोच्य कथ्यते यद् व्याकरणधुरन्धरेषु कस्योत्कर्षत्वं कस्य वापकर्षत्वं वैमत्यं दृश्यते विदूषाम्। शेषे वक्तुमलं यद् कोऽपि कस्मान्न गरीयान् इति।

# परिशीलिता ग्रन्थपञ्जी

# परिशीलिता ग्रन्थपञ्जी

## संस्कृतग्रन्थाः


❖ *अष्टाध्यायी* , श्रीगोपालदत्तपाण्डेय ,चौखाम्वासुरभारतीप्रकाशन् , वाराणसी।

❖ *अष्टाध्यायी* , डः तपनशंकरभट्टाचार्य्य , संस्कृतबुक्डिपो ,कलकाता , २००६।

❖ *अष्टाध्यायीसूत्रपाठ* , पुष्पादीक्षित , ज्ञानभारतीपावलिकेशन् , दिल्ली , २००९।

❖ *अष्टाध्यायीसूत्रपाठ ( पह्लादटीप्पणीसहित )* , सम्पा . आचार्य सत्यनारायणशास्त्री खण्डूडी , कृष्णदाससंस्कृतएकादेमी , वाराणसी - २२१००१।

❖ *अष्टाध्यायीसूत्रपाठ* , डाँ . रामशकरमिश्र , मोतिलालबेनारसीदास , वाराणसी १९९७।

❖ *अष्टाध्यायीसूत्रपाठ* , सम्पा . लालबहादुरत्रिपाठी , सुदर्शनबुक-एजेन्सी , वाराणसी , प्रथमसंस्करणम् १९९२।

❖ *अष्टाध्यायीसूत्रपाठ* , चौखाम्वा-संस्कृत-सीरिज् , १९५०।

❖ *अमरकोष* , अमरसिंह , व्याख्याकारः आचार्यकृष्णमित्र , चौखाम्बासुरभारतीप्रकाशन्।

❖ *अर्थविज्ञान ओ व्याकरणदर्शन* , कपिलदेवद्विवेदी , विश्वविद्यालयप्रकाशन् , २००८।

❖ *ऋग्वेदभाष्योपक्रमणिका* , सम्पा. सत्यरञ्जनवन्द्योपाध्याय , संस्कृतपुस्तकभाण्डार , कोलकाता।

❖ *ऋक्प्रातिशाख्यम्* , व्रजवल्लभदास , चौखाम्बासंस्कृतसंस्थान , बनारस , १८९४।

❖ *काशिका ( न्यासपदमञ्जरीटीकाद्वयोपेता )* , स्वामीद्वारिकादास-शास्त्रिणा सम्पादिता , चौखाम्बासंस्कृतसीरिज् , १९६४।

❖ *काशिका* , कालिकाप्रसादशुक्ल , तारापावलिकेशन्स् , वाराणसी प्रथमसंस्करणम् , १९६६।

❖ *काशिका* , जयशङ्करलालत्रिपाठी , ताराबुक्एजेन्सी , वाराणसी , १९८५।

❖ *काशिकावृत्ति* , न्यासपदमञ्जरीसमन्विता , प्राच्यभारतीप्रकाशनम् , वाराणसी १९६५।

❖ *कारकचक्रम् ( रौद्रीमाधवीटीकाद्वयोपेतम् )* , श्रीभवानन्दसिद्धान्त-वागीशभट्टाचार्यप्रणीतं , श्रीअशोककुमारवन्द्योपाध्यायसम्पादितं , सदेश १०१ वि विवेकानन्दरोड कोलकाता -६।

❖ *काव्यप्रकाश ( कल्पिकामखोपाध्याय )* , विश्वभारती।

❖ *काव्यप्रकाश* , टीका झाल्कीकार , परिमलपावलिकेशन्।

❖ *काव्यप्रकाशविस्तारिका* , परमानन्दविरचिता।

❖ *काव्यप्रकाश* , विजया गिस्वामी , संस्कृत पुस्तक भाण्डार , कोलकाता ।

❖ *कुमारसम्भवम्* , सम्पा. जगदीशलालशास्त्री , मोतीलालबनारसीदास , बेनारस।

❖ *तर्कसंग्रह* , श्रीकृष्णवल्लभाचार्य , चौखाम्बाविद्याभवन् , वाराणसी , २००७।

❖ *दुर्घटवृत्तिः* , टीकाकारनारायणमिश्र , रत्नापावलिकेशन्स् , कमच्छा , वाराणसी १९८५ प्रथम-संस्करणम् ।

❖ *धात्वर्थविज्ञानम्* , श्रीभागीरथप्रसादत्रिपाठी , सम्पूर्णानन्दसंस्कृतविश्व-विद्यालय , वाराणसी ।

❖ *निरुक्तम्* , मुकुन्दरामझा, चौखाम्बासंस्कृतप्रतिष्ठान् , वाराणसी , १९६०।

❖ *निरुक्तम्* , सम्पा. ब्रह्मचारीमेधाचैतन्य ,दक्षिणेश्वररामकृष्णसंघ , आद्यापीठबालकाश्रम , १९८७ ।

❖ *निरुक्तम्* , अमरेश्वरठाकुरः , कलकाताविश्वविद्यालयः , कलकाता , १९६०।

❖ *निपातार्थनिर्णय* , डाः हरिश्चन्द्रमणित्रिपाठी , सम्पूर्णानन्दसंस्कृतविश्व-विद्यालय , वाराणसी , १९९० ।

❖ *न्यायसिद्धान्तमुक्तावली* , सम्पा . हरिरामशुक्ल , चौखाम्बासंस्कृतसंस्थान , वाराणसी , १९८९ ।

❖ *न्यायमञ्जरी* , चौखाम्बासंस्कृतसीरीज् , वाराणसी ।

❖ *न्यायमञ्जरी* , सम्पा . गौरीनाथशास्त्री , सम्पूर्णानन्दसंस्कृतविश्वविद्यालय , वाराणसी , १९८२ ।

❖ *परमलघुमञ्जूषा* , आचार्यलोकमणिदाहालः, चौखाम्बासुरभारती-प्रकाशन्, वाराणसी पु.मु. ।

❖ *परमलघुमञ्जूषा* , श्रीकालिकाप्रसादशुक्लः, वरोदासंस्कृत-महाविद्यालयः , वरोदा, १९६१ ।

- *परमलघुमञ्जूषा ( रत्नदीपिका )* , व्याख्योपेता साङ्गवेदविद्यालय , प्रेस रामघाट , वाराणसी ।
- परमलघुमञ्जूषा , व्याख्याकारः लोकमणिदाहाल , चौखाम्बा-सुरभारती-प्रकाशन् , वाराणसी प्रथम-संस्करणम् ।
- *परमलघुमञ्जूषा* , सम्पा. विजयागोस्वामी , संस्कृतपुस्तकभाण्डार , कोलकाता २००६ ।
- *परमलघुमञ्जूषा* , व्याख्याकार जयशङ्करलालत्रिपाठी , कृष्णदास एकादेमी , वाराणसी १९९७ ।
- *पातञ्जलमहाभाष्यम्* , ड. बालशास्त्री , वाणीविलासप्रकाशन , कचौडीगली , वाराणसी , १९८७ ।
- *पाणिनीयशिक्षा* , चौखाम्बाप्रकाशन , वाराणसी ।
- *पाणिनीयशिक्षा* , सम्पा . लालबहादुरत्रिपाठी , सुदर्शनबुकएजेन्सी , वाराणसी , प्रथमसंस्करणम् , १९९२ ।
- *परिभाषेन्दुशेखरः* , आचार्यविश्वनाथमिश्रः, चौखाम्बासुरभारती-प्रकाशन् , वाराणसी ।
- *परिभाषेन्दुशेखर (भूतिटीकासहित )* , श्रीरामकृष्णशास्त्री , राजराजेश्वरीमुद्रणालय , वाराणसी , १९६९ ।
- *परिभाषेन्दुशेखर* , व्याख्याकार विश्वनाथमिश्र , चौखाम्बासुरभारती - प्रकाशन , वाराणसी , २००९ ।
- *प्रौढमनोरमा* , गोपालशास्त्री नेने , चौखाम्बासंस्कृतसंस्थान् , वाराणसी ।

❖ *प्रौढमनोरमा ( अव्ययीभावान्तो भागः )* , टीकाकाराः हरिदीक्षित-भैरवमिश्र-वैद्यनाथपण्डित-गोपालशास्त्रीनेनेमहोदयाः , चौखाम्बा-संस्कृत-संस्थान् , वाराणसी , तृतीयविशेषसंस्करणम् ।

❖ *प्रौढमनोरमा* , सशब्दरत्नटीकात्रयोपेता , चौखाम्बासंस्कृतभवनम् ।

❖ *प्रक्रियाकौमुदी* , श्रीरामचन्द्राचार्य , चौखाम्बासंस्कृतसंस्थानम् , वाराणसी ।

❖ *वाक्यपदीयम्* , हेलाराजपुण्यराजेतिटीकाद्वयोपेतम् ।

❖ *वाक्यपदीयम् ( ब्रह्मकाण्डम् )* , विष्णुपदभट्टाचार्यः , पश्चिमवङ्गराज्यपुस्तकपर्षद् , कलकाता ,सं.२००७ ।

❖ *वाक्यपदीयम् ( भावप्रदीपिकाटीकासहितम् )* , सम्पा . पण्डितश्रीसूर्य-नारायणशुक्ला पण्डितश्रीरामगोविन्दशुक्ला च , चौखाम्बासंस्कृतसीरिज्-ओफिस् , वाराणसी , १९६१ ।

❖ *वाक्यपदीयम्* , डाःभागीरथप्रसादत्रिपाठी , सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः , वाराणसी १९७९ ।

❖ *वाक्यपदीयम् ( ब्रह्मकाण्डम् )* , वामदेवाचार्य , चौखाम्बाकृष्णदास्-एकादेमी, वाराणसी, तृतीयसंस्करणम् २००० ।

❖ *वाक्यपदीयम् ( हेलाराजाम्बाकर्तृव्याख्याद्वयोपेतम् ) तृतीयकाण्डम्* , द्वितीयो भागः , सम्पा. पण्डितरघुनाथशर्मा , सम्पूर्णानन्दसंस्कृतविश्व-विद्यालय , वाराणसी ।

❖ *वाक्यपदीयम् ( तृतीयकाण्डम् )* , सम्पा . के.ए.शुभ्रमनियम् आइयार् , समर्थभारतप्रेस् , पुना , १९६३ ।

❖ *वाक्यपदीयम्* , श्रीसत्यकामवर्मा , मुंशीमनोहरलाल , प्रथम-संस्करणम् , नइ दिल्ली १९७० ।

❖ *व्याकरणमहाभाष्यम्* , दधिरामशर्मा , चौखाम्बासंस्कृतप्रतिष्ठान् , वाराणसी १९९१ ।

❖ *व्याकरणमहाभाष्यम्* , प्रदीपोद्योततत्त्वालोकैर्विभूषितम् , काशी संस्कृत ग्रन्थमाला ।

❖ *व्याकरणमहाभाष्यम् ( भाष्यप्रदीप-भाष्यप्रदीपोद्योतसहितम् )* , सम्पा . भार्गवशास्त्री , चौखाम्बाप्रतिष्ठानम् , दिल्ली ।

❖ *व्याकरणमहाभाष्यम् ( नवाह्निकम् )* , सम्पा. चारुदेवशास्त्री , मोतिलालबनारसीदास , वाराणसी , १९६८ ।

❖ *व्याकरणशास्त्रेतिहास* , सम्पा . आचार्यलोकमणिदाहाल , भारतीयविद्याप्रकाशन , जवाहरनगर , दिल्ली ,२००७ ।

❖ *व्याकरणदर्शनप्रतिमा* , श्रीरामाज्ञापाण्डेय , सम्पूर्णानन्दसंस्कृतविश्व-विद्यालय , वाराणसी १९३६ ।

❖ *व्याकरणदर्शन भूमिका* , श्रीरामाज्ञापाण्डेय , सम्पूर्णानन्दसंस्कृतविश्व-विद्यालय , वाराणसी , १९८२ ।

❖ *व्याकरण दर्शनेर इतिहास* , गुरुपद-हालदार , संस्कृतवुक्डिपो , २००६ ।

❖ वेदान्तपरिभाषा , सम्पा . स्वामिगोविन्दसिंहसाधु , वेङ्कटेश्वरप्रेस् , मुम्बाइ , १९८४ ।

❖ *वेदान्तदर्शन्* , अनुवादक व्याख्याकर च स्वामिविश्वरूपानन्द , सम्पा . स्वामिचिद्घनानन्दपुरी वेदान्तवागीशश्रीआनन्दझा च , उद्बोधनकार्यालय , कोलकाता , २०११ ।

❖ *वैयाकरणभूषणसारः* ,चन्द्रिकाप्रसादद्विवेदी , चौखाम्वासंस्कृतप्रतिष्ठान् , दिल्ली , पु.मु. २०११ ।

❖ *वैयाकरणभूषणसारः ( प्रभादर्पणटीकाद्वयोपेतः )* , श्रीतारकेश्वरशास्त्रि-चतुर्वेदिना सम्पादितः ।

❖ *वैयाकरणभूषणसार* , टीकाकाराः बालकृष्णपञ्चोलीहरिवल्लभ-शास्त्रीमहोदयाः , चौखाम्बासंस्कृतसंस्थान् , तृतीयसंस्करणम् ।

❖ *वैयाकरणभूषणसार ( शङ्करीव्याख्यासहित )* , गङ्गाधरबापूरा-वकाले जे.पी, आनन्दाश्रममुद्रणालय , पुण्यपत्तनम् , १९५७ ।

❖ *वैयाकरणभूषणसार* , श्रीसदाशिवशास्त्रीजोशी , चौखाम्बासंस्कृत-सीरिज्ओफिस , बनारस सिटी , १९३९ ।

❖ *वैयाकरणसिद्धान्तकौमुदी* , गोपालदत्तपाण्डेयः , संस्कृतसुरभारती-प्रतिष्ठानम् , वाराणसी, २००१ ।

❖ *वैयाकरणसिद्धान्तकौमुदी* , बालमनोरमातत्त्वबोधिनीटीकोपेता, मोतिलाल- बनारसीदास, दिल्ली , पु.मू.२०११ ।

❖ *वैयाकरणसिद्धान्तकौमुदी* , गिरिधरशर्मा श्रीपरमेश्वरानन्दशर्मा , मोतिलालबनारसीदास, दिल्ली ।

❖ *वैयाकरणसिद्धान्तकौमुदी* , तत्त्वबोधिनी-बालमनोरमाटीकोपेता ।

❖ वैयाकरणसिद्धान्तकौमुदी , टीकाकाराः वासुदेवदीक्षितज्ञानेन्द्र-सरस्वतीमहोदयाः , मोतिलालबनारसीदास , वाराणसी ।

❖ *वैयाकरणसिद्धान्तकौमुदी ( कारकविभक्तिप्रकरणम् )* , व्याख्याकारः अयोध्यानाथसान्न्यालशास्त्री , संस्कृतपुस्तकभाण्डार , कोलकाता , द्वितीयसंस्करणम् ।

❖ *वैयाकरणसिद्धान्तकौमुदी* , सम्पा. लक्ष्मीशर्मा , व्याख्याकार आचार्यगोविन्द , चौखाम्बासुरभारतीप्रकाशनम् , २०१३ पु.मु . ।

❖ *वैयाकरणसिद्धान्तलघुमञ्जूषा ( प्रभातटीकोपेता )* , चौखाम्वासंस्कृत-सिरिज् , वाराणसी

❖ *वैयाकरणसिद्धान्तलघुमञ्जूषा* , प्रभाटीकोपेता , चौखाम्बासंस्कृत-सीरीज् , वाराणसी ।

❖ *वैयाकरणसिद्धान्तलघुमञ्जूषा* , चौखाम्बासंस्करणम् , वाराणसी , १९७३ ।

❖ *वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचार* , डा. कालिकाप्रसादशुक्ल , सम्पूर्णानन्दसंस्कृतविश्वविद्यालय , वाराणसी , १९७९ ।

❖ *व्युत्पत्तिवाद* , सम्पा. सच्चिदानन्दमिश्र , भारतीय-विद्या-प्रकाशन् ।

❖ *व्युत्पत्तिवाद* , धर्मदत्त-झा , कृष्णदासएकादेमी , वाराणसी द्वितीयसंस्करणम् ।

❖ *व्युत्पत्तिवाद* , श्रीगदाधरभट्टाचार्य , वाराणसी , १९८८ ।

❖ *भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा* , राममनोहरमिश्रः , सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी ,१९८३ ।

❖ *भाषापरिच्छेद* , सम्पा . रवीन्द्रनाथशास्त्री , संस्कृतपुस्तकभाण्डार , कोलकाता २००७ ।

❖ *भाषापरिच्छेद* , श्रीपञ्चाननशास्त्रीसम्पादित , आगमानुसन्धानसमिति , १३५४ वङ्गाब्दे ।

❖ *महाभाष्यम् ( नवाह्निकम् )* , दण्डिस्वामीदामोदरआश्रम, दक्षिणेश्वररामकृष्ण आश्रम ,आद्यापीठ , कलकाता ,चतुर्थप्रकाशनम् , १४१३ ।

❖ *महाभाष्यम् (नवाह्निकम्)* , हरिनारायणतिवारी, चौखाम्वाविद्याभवनम् , वाराणसी ।

❖ *महाभाष्यम्* , प्रदीपोद्योतसमन्वितम् , मोतिलालबनारसीदास , वाराणसी ।

❖ *महाभाष्यम् ( प्रदीपोद्योतसमेतम् )* , सम्पा. श्रीगुरुप्रसाद्शास्त्री , निर्णयसागर ।

❖ *महाभाष्यम् ( नवाह्निकम् )* , रुद्रधरझाशर्मा , चौखाम्वासंस्कृतसीरीज् , वाराणसी ।

❖ *महाभाष्यम् ( पस्पशाह्निकम् )* , सङ्घमित्रासेनगुप्त , संस्कृतपुस्तकभाण्डार , कोलकाता , १४०७ वङ्गीयाब्दे ।

❖ *महाभाष्यदीपिका* , के.वी. अभ्यङ्ग्कर , वी.पी.लिमये , भण्डारकरप्राच्यविद्याशोधसंस्थान् , पुना १९७० ।

❖ *रघुवंशम्* , व्याख्याकारः धारादत्तशास्त्री , मोतिलालबनारसीदास , वाराणसी ।

❖ *लघुशब्देन्दुशेखरः* , श्रीब्रह्मदत्तद्विवेदी , चौखाम्वासंस्कृतसिरिज-ओफिस् , वाराणसी , द्वितीयसंस्करणम् , २००८ ।

❖ *लघुशब्देन्दुशेखर* , व्याख्याकार श्रीनित्यानन्दपन्तपर्वतीय , चौखाम्बासंस्कृतसंस्थान् , वाराणसी , दशमसंस्करणम् ।

❖ *लघुशब्देन्दुशेखर* , वैकुण्ठीभैरवीटीकोपेत ।

❖ *लघुशब्देन्दुशेखर* , डा.बालशास्त्री , वाणीविलासप्रकाशन , कचौडी गली , वाराणसी , सं २०४८ ।

❖ *लघुशब्देन्दुशेखर ( श्रीभैरवमिश्रविरचिता चन्द्रकलाटीका )* , चौखाम्बासंस्कृतसंस्थानम् , वाराणसी , सं २०४३ ।

❖ *शक्तिवाद* , सम्पा . जयकृष्णदासहरिदासगुप्तौ , चौखाम्बासंस्कृत-सीरिज्ओफिस् , वाराणसी , १९८४ ।

❖ *शब्दार्थरत्नम् ( प्रतिलिपि )* , तारानाथतर्कवाचस्पति, सम्पा. जीवानन्दगोस्वामी, संस्कृतमहाविद्यालय , कोलकाता ।

❖ *शब्दकौस्तुभ ( द्वितीयो भागः )* , सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी , गणपतिशास्त्री च , राष्ट्रीयसंस्कृतसंस्थानम् , २००६ ।

❖ *शब्दव्यापारविचार* , सम्पा . रेवाप्रसादद्विवेदी , चौखाम्बाविद्याभवन , वाराणसी , १९३४ ।

❖ *शाब्दबोधमीमांसा* , एन्-एस्-रामानुजताताचार्य , राष्ट्रीयसंस्कृत-संस्थानम् , देहली , २००६ ।

❖ *शब्दशास्त्रेर इतिहास* , कालीजीवनदेवशर्मा , रामकृष्णमिशन् इनस्टिटिउट अव कालचार , १९९५ ।

❖ *शब्दशक्तिप्रकाशिका* , सम्पा.गुरुचरणदेवशर्मा , कलिकाताविश्व-विद्यालयः , कलिकाता , १९९९ ।

❖ *शब्दशक्तिप्रकाशिका ( कृष्णकान्तीटीकासहिता )* , सम्पा. जगदीशतर्कालंकार , चौखाम्बासुरभारतीप्रकाशनम् , वाराणसी , पु .मु . २०१० ।

❖ *शब्दशक्तिप्रकाशिका ( १-३ खण्डः )* , श्रीमधुसूदनभट्टाचार्य-न्यायाचार्यसम्पादिता , संस्कृतकलेज् , कोलकाता १९८० ।

❖ *श्लोकवार्त्तिकम्* , चौखाम्बासंस्कृतसीरीज् , वाराणसी ।

❖ *श्लोकवार्त्तिकम्* , श्रीपार्थसारथिमिश्र , श्रीस्वामीद्वारिकादासशास्त्री , रत्नापावलिकेशन्स , वाराणसी , १९७८ ।

❖ *सर्वदर्शनसंग्रह* , वासुदेवशास्त्री अभ्यङ्कर , भाण्डारकर अरियेन्टाल रिसार्च इन्स्टिटिउट , पुणा , १९७८ ।

❖ *साहित्यदर्पण* , सम्पा . आचार्यकृष्णमोहनशास्त्री , चौखाम्बासंस्कृत-संस्थान , वाराणसी , वि.सं.२०६८ ।

❖ *स्फोटदर्शन्* , पण्डितरङ्गनाथपाठक , विहारराष्ट्रभाषापरिषद् , पटना , प्रथमसंस्करणम् , १९६७ ।

❖ *स्फोटसिद्धि* , श्रीभरतमिश्र , अनन्तशयनसंस्कृतग्रन्थावली , १९९१ ।

❖ *स्फोटसिद्धि* , श्रीमण्डनमिश्र , मद्रासविश्वबिद्यालय , १९३१ ।

❖ *स्फोटचन्द्रिका* , श्रीकृष्णभट्ट , चौखाम्बासुरभारतीप्रकाशन् , वाराणसी , १९८०।

❖ *स्फोटमीमांसा* , श्रीरामनारायणमिश्र , सम्पूर्णानन्दसंस्कृतविश्वविद्यालय , वराणसी , १९९१ ।

❖ *स्फोटवादविवेचनम्* , श्रीकृष्णमणित्रिपाठी , चौखाम्बासुरभारती-प्रकाशन् , वाराणसी , १९७८ ।

❖ *स्फोटतत्त्वनिरूपणम्* , श्रीशेषकृष्ण , चौखाम्बासुरभारतीप्रकाशन् , वाराणसी , १९९४ ।

❖ *संस्कृतव्याकरणशास्त्र* , युधिष्ठिरमीमांसक , तृतीयसंस्करणम् , इतिहासबहालगड , सं २०३० ।

❖ *संस्कृत शास्त्रो का इतिहास* , आचार्यबलदेव उपाध्याय , प्रथमसंस्करणम् , वाराणसीसंस्कृतविश्वविद्यालय , वाराणसी , १९६९ ।

❖ *संस्कृतव्याकरणदर्शन्* , डा.रामसुरेशत्रिपाठी , राजकमलप्रकाशन् , प्रथमसंस्करणम् , दिल्ली , १९७२ ।

❖ *संस्कृत-व्याकरण मे कारकतत्त्वानुशीलन* , सम्पा. ड. उमाशङ्कर-शर्मा , चौखाम्वासंस्कृतभवनम् ।

## सहायिका पत्रिका

❖ *सारस्वती सुषमा* , सम्पूणानन्दसंस्कृतविश्वविद्यालयानिसन्धानपत्रिका , वाराणसी |

❖ *सागरिका त्रैमासिकी* , संस्कृतपरिषद्सागरविश्वविद्यालय , सागरम् |

## বাংলাগ্রন্থসমূহ

- *শব্দার্থতত্ত্ব* , সম্পাদনা রবীন্দ্রকুমারভট্টাচার্য , সদেশ , কোলকাতা , ২০০৯ |
- *শব্দার্থসম্বন্ধসমীক্ষা* , সম্পাদনা গঙ্গাধরকর , সংস্কৃতবুকডিপো , কোলকাতা , ২০০৩ |
- *ব্যাকরণ দর্শনের ইতিহাস* , সম্পাদনা অধ্যাপক তপনশঙ্কর ভট্টাচার্য , সংস্কৃতবুকডিপো , কোলকাতা , ২০০৬ |
- *পতঞ্জলি প্রণীত ব্যাকরণ-মহাভাষ্য ( পস্পশাহ্নিক )* , অনুবাদক ও সম্পাদক- দণ্ডীস্বামী দামোদর আশ্রম , দক্ষিণেশ্বর রামকৃষ্ণসঙ্ঘ , আদ্যাপীঠ , কলকাতা , ৭৬ চতুর্থ প্রকাশ , ১৪১৭ |

## English Books

- *Bhasatatva aur Vakyapadiya* , Satyakama Varma
- *Kaunda Bhattas Vaiyakaranabhusanasara* : An Analyatical Studies , Sandhya Rathore , Munshiram Manoharlal Publishers , 1998 .
- *Studies of Sanskrit Grammar* , S.K.Belvelkar , Bharatiya Vidya Prakashan , 1976 .
- *Vakyapadiya* , Dr.K.Raghavan Pillai , Motilal Banarasi Das , Delhi , 1971.
- *Vakyapadiya : Sphota Jati and Dravya* , Shrada Narayanan.

❖ *Vakyapadiya Of Bhartrhari (II)* , Iyer K.A.Subramania , Motilal Banarasi Das , Delhi , 1977.

❖ *Vakyapadiya Of Bhartrhari* , Iyer K.A.Subramania .

❖ *The Sanskrit Language* , Burrow , Motilal Banarasaidas , Delhi.

**Signature of the Candidate**
**Dated :**
**Ph.D Research Scholar**
**Department of Sanskrit**
**Jadavpur University**
**Kolkata 700032**